इति तत्तन्मूलमन्त्रेण अभ्यर्च्य। तयोः षडङ्गन्यासं कृत्वा। किरीटादिमुद्राः प्रदर्श्य। अर्घ्यादि नीराजनान्तं संपूज्य। आचार्यः ऋत्विग्भिः सह अन्वारब्धेन ओं भूमिर्भूम्ना----प्रचोदयात् इति भूसूक्तेन भुवम् अभिमन्त्र्य। भूमिं -खनित्रञ्च आधारादि पद्मान्तम् अभ्यर्च्य ( ओं ह्रीं आधारशक्त्यै नमः ----ओं अव्यक्तपद्माय नमः )। तत्तन्मन्त्रेण धूपं समर्प्य। आवाहनपात्रम् अद्भिरापूर्य। गन्धाक्षतपुष्पैः निक्षिप्य। वामहस्ते निधाय। दक्षिणहस्तेन पिधाय। ललाटान्तमुद्धृत्य। ओं भूं भूम्यै नमः आगच्छ आगच्छ इति चतुर्वारं जप्त्वा। तत्तोयं भूम्यां शिरसि विन्यस्य। आवाहनादि षण्मुद्राः प्रदर्श्य ( आवाहितो भव----प्रार्थितो भव )। प्रतिमामुद्रां प्रदर्श्य।

| | |
|---|---|
| ओं भां हृदयाय नमः | ओं भैं कवचाय हुं |
| ओं भीं शिरसे स्वाहा | ओं भौं नेत्राभ्यां वौषट् |
| ओं भूं शिखायै वषट् | ओं भः अस्त्राय फट् |

इति षडङ्गन्यासं कृत्वा। किरीट -कमल -वनमाल मुद्राः प्रदर्श्य। खनित्रे ओं हुं नमो भगवते वराहाय आगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य।

| | |
|---|---|
| ओं हां हृदयाय नमः | ओं हैं कवचाय हुं |
| ओं हीं शिरसे स्वाहा | ओं हौं नेत्राभ्यां वौषट् |
| ओं हूं शिखायै वषट् | ओं हः अस्त्राय फट् |

इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। वराहमुद्राञ्च प्रदर्श्य। अष्ट दिक्षु

| | |
|---|---|
| ओं इन्द्राय नमः | ओं वरुणाय नमः |
| ओं अग्नये नमः | ओं वायवे नमः |
| ओं यमाय नमः | ओं सोमाय नमः |
| ओं निर्ऋतये नमः | ओं ईशानाय नमः |

इत्यावाह्य। सम्पूज्य। ओं हुं नमो भगवते वराहाय -ओं भूं भूम्यै नमः अर्घ्यं समर्पयामि----कदलीफल कर्पूरताम्बूलं समर्पयामि। पानक -पानीयं समर्पयामि। आचमनीयं समर्पयामि।

ओं भूवराहाय विद्महे हिरण्यगर्भाय धीमहि तन्नः क्रोडः प्रचोदयात्॥

ओं धनुर्धरायै विद्महे सर्वसिध्यैच धीमहि तन्नो धरा प्रचोदयात्॥

ओं हुं नमो भगवते वराहाय - ओं भूं भूम्यै नमः  नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि। अस्य देवदेवस्य। भगवतो वासुदेवस्य। श्री भूमि नीला----नायिका समेत श्री----स्वामि सन्निधौ----यथासङ्कल्पित ----वत्सर----मास----दिन महोत्सवस्य पूर्वाङ्गत्वेन मङ्गल अङ्कुरावापनार्थं मृत्सङ्ग्रहण मुहूर्तः सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु - सुमुहूर्तोऽस्तु - इत्युच्चार्य। भूम्यां मुख -बाहु -ऊरुस्थल -स्तन -जठर -मध्यजघनाङ्घ्रिषु सर्वे सवाद्यघोष पुरस्सरं

उद्धृतासि वराहेण कृष्णेन शतबाहुना। भूमिर्धेनुर्धरणी लोकधारिणी

इति वराहमन्त्रेण मृदं खात्वा। लोहजे वेत्रजे वा भाजने

ओं नमो नारायणाय इति सङ्गृह्य। ओं वीर्याय अस्त्राय फट् इति अस्त्रमन्त्रेण अहतवाससा पात्रमाच्छाद्य। पश्चात् एवमेव नद्याः वालुकां

-गोकुलेषु गोकरीषञ्च सङ्गृह्य। पृथक् पृथक् भाजनयोः निक्षिप्य। वासोभ्यां पिधाय। आचार्यः स्वयं भाजनत्रयं गृहीत्वा। रथादिकं यानमारोप्य। सवेद् -वाद्यघोष -पुरस्सरं सुदर्शन-विष्वक्सेनेन सह ग्राम -धामादिकं प्रदक्षिणीकृत्य। यागशालां प्रविशेत्॥

## अङ्कुरार्पण विधिः

अथ अङ्कुरार्पण-विधिरुच्यते। सर्वालङ्कार -संयुक्तः आचार्यः पादौ प्रक्षाल्य। आचम्य। यागशालां प्रविश्य। पालिका -घटिका -शरावादीन् प्रत्येकं चत्वारि पात्राणि सङ्गृह्य। अथवा षोडश पालिकाः एव संस्थाप्य। पालिकादीनि पात्राणि विष्णुगायत्र्या प्रक्षाल्य। तेषां कण्ठेषु सहदेवी -दूर्वा -अश्वत्थ पल्लवानि बध्वा। कुश -काशतृणैः बिलमूलानि अवरुध्य। मध्यवेदिकायां पालिकादि -स्थानेषु प्रतिपदं शालि -तण्डुल -तिलैः क्रमेण वृत्तं -चतुरश्रं वा ओं रां नमः पराय विश्वात्मने नमः इति पीठं प्रकल्प्य। तदुपरि पद्ममालिख्य। आचार्यः प्राङ्मुखः उदङ्मुखः वा
ओं षौं नमः पराय परमेष्ठ्यात्मने नमः इति वारुण्यादि इन्द्रान्तं घटिकाः संस्थाप्य। ओं यां नमः पराय पुरुषात्मने नमः इति नैर्ऋत्यादि आग्नेयान्तं पालिकाः संस्थाप्य। ओं रां नमः पराय विश्वात्मने नमः इति वायव्यादि ऐशान्यान्तं शरावान् च संस्थाप्य। अथवा सोमकुम्भस्य परितः षोडशपालिकाः संस्थाप्य। दर्भैः परिस्तीर्य। पालिकादि पात्रेषु प्रथमं ग्राहितमृद्भिः अनन्तरं वालुकाभिः तदनु करीषचूर्णैश्च पूरयित्वा। तेषु कूर्चं निधाय। गन्धमाल्यादिभिः अलङ्कृत्य। प्रतिपात्रम् अथवा प्रतिव्यूहं

युवासुवासाः परिवीत आगात्। स उश्रेयान्भवतिजायमानः। तन्धीरासः कवय उन्नयन्ति। स्वाधियोमनसादेवयन्तः। इति मन्त्रेण वस्त्रैः आवेष्ट्य। सोमकुम्भमादाय "इन्द्रं नत्वा वाजिनं मां बृहतायां द्रष्टृभाजने। योगानां ब्राह्मणादीनां" इति मन्त्रेण यवान्तरालं तन्तुना आवेष्ट्य। पालिकादीनां पश्चिमे प्रदेशे व्रीहि -तण्डुल -तिलैः धान्यपीठं कल्पयित्वा। तत्र पद्ममालिख्य। तस्मिन् सोमकुम्भं विन्यस्य। गन्धोदकेनापूर्य। सरत्न -कूर्च -नालिकेर -अश्वत्थपल्लवापिधानं कृत्वा। वस्त्र -गन्ध -माल्यादिभिः अलङ्कृत्य। दर्भैः परिस्तीर्य। निष्पाव -शालि -मुद्ग -माष -प्रियङ्गु -सर्षप -यव -वेणु -तिल -गोधूमादीन् याज्ञिकान् धान्यजातान् नूतने पात्रे निक्षिप्य। तानि बीजानि विष्णुगायत्र्या गोक्षीरेण प्रक्षाल्य। तत् परिचारकमूर्ध्नि विन्यस्य। सतूर्यघोषं धामं प्रदक्षिणीकृत्य। यागमण्डपं प्रविश्य। पालिकादीनां पूर्वभागे शालि -तण्डुल -तिलैः पीठं परिकल्प्य। तस्मिन् बीजपात्रं निधाय। गन्धाक्षत पुष्पैः अलङ्कृत्य। दर्भैः परिस्तीर्य। यागशालायां परितः पूर्वादि चतुर्दिक्षु चतुर्द्वारं कल्पयित्वा। तेषु अश्वत्थ-औदुम्बर -न्यग्रोध -प्लक्ष तोरणानि संस्थाप्य। पूर्वादि द्वारस्तम्भेषु क्रमेण रक्त -पीत -नील -शुक्ल वर्णध्वजानि प्रत्येकं द्वौ द्वौ कल्पयित्वा। चतुर्द्वारेषु पार्श्वयोः भूमौ धान्यपीठे कुम्भद्वयं संस्थाप्य। पूर्वद्वारकुम्भयोः प्रवाल -पद्मरागञ्च क्रमेण निक्षिप्य। दक्षिणद्वारकुम्भयोः वज्र -वैडूर्यञ्च क्रमेण निक्षिप्य। पश्चिमद्वारकुम्भयोः पुष्पराग -नीलञ्चक्रमेण निक्षिप्य। उत्तरद्वारकुम्भयोः मुक्ता -स्फटिकञ्च क्रमेण निक्षिप्य। वेदिकायां पूर्वभागे

होमार्थं कुण्डं वा स्थण्डिलं वा कल्पयित्वा। अङ्कुरार्पणमारभेत्॥

आचार्यः प्राङ्मुखः आसने उपविश्य। पवित्रं धृत्वा। दर्भेष्वासीनः। दर्भान्धारयमाणः। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं श्रीगोविन्द गोविन्द गोविन्द----अस्य देवदेवस्य भगवतो वासुदेवस्य श्री भूमि नीला ----नायिका समेत श्री----स्वामि सन्निधौ राजराष्ट्राभिवृद्ध्यर्थं लोकक्षेमार्थं यथासङ्कल्पित----वत्सर----मास----दिन महोत्सव कर्माङ्गम् (ध्वजप्रतिष्ठा कर्माङ्गम्/तीर्थयात्रा कर्माङ्गम्) अङ्कुरार्पणकर्म करिष्ये तदङ्गं द्वार -तोरण -ध्वज -कुम्भदेवतापूजनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याहजलेन ओं सहस्रार हुं फट् इति सर्वाणि द्रव्याणि -बीजानि -पालिकादिपात्राणि द्वारतोरण कुम्भानि च संप्रोक्ष्य। द्वारपूजां कृत्वा।

## द्वारपूजा

पूर्वे- ऋग् रूपे -सुशोभननाम्नि -अश्वत्थतोरणे - ओं लं इन्द्राय नमः। तत्पार्श्वस्थित रक्तध्वजयोः ओं कुमुदाय नमः ओं कुमुदाक्षाय नमः। तत्र कुम्भयोः आधारादीन् अभ्यर्च्य। ओं पूर्णाय नमः ओं पुष्कराय नमः इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। तत्तदाद्यक्षरेण षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमाल मुद्राः प्रदर्श्य।
पूर्वद्वार देवताभ्यो नमः। अर्घ्यं समर्पयामि----दीपं समर्पयामि।
ओं भूर्भुवस्सुवः ओं देवस्यत्वा----प्रतिगृह्णातु। पूर्वद्वार देवताभ्यो नमः

कदलीफल कर्पूरताम्बूलानि समर्पयामि। पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि। ओं अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्। होता॑रं रत्न॒धात॑मम्॥ इति मन्त्रं पठित्वा।

दक्षिणे -यजुर् रूपे -सुभद्रनाम्नि -औदुम्बरतोरणे - ओं हं यमाय नमः। तत्पार्श्वस्थित पीतध्वजयोः ओं पुण्डरीकाय नमः ओं वामनाय नमः। तत्र कुम्भयोः आधारादीन् अभ्यर्च्य। ओं आनन्दाय नमः ओं नन्दनाय नमः इत्यावाह्य। तत्तदाद्यक्षरेण षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमालमुद्राः प्रदर्श्य। दक्षिणद्वार देवताभ्यो नमः। अर्घ्यं समर्पयामि---- दीपं समर्पयामि। ओं भूर्भुवस्सुवः ओं देवस्यत्वा----प्रतिगृह्णातु। दक्षिणद्वार देवताभ्यो नमः कदलीफल कर्पूरताम्बूलानि समर्पयामि। पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि।

ओं इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑स्स्थोपा॒यव॑स्स्थ दे॒वोव॑स्सवि॒ता प्रार्प॑यतु॒ श्रेष्ठ॑तमा॒य कर्म॑णे। हरिः॑ ओम्॥ इति मन्त्रं पठित्वा।

पश्चिमे -सामरूपे -सुबन्धनाम्नि -न्यग्रोधतोरणे - ओं वं वरुणाय नमः। तत्पार्श्वस्थित नीलध्वजयोः ओं शङ्कुकर्णाय नमः ओं सर्वनेत्राय नमः। तत्र कुम्भयोः आधारादीन् अभ्यर्च्य। ओं वीरसेनाय नमः ओं सुषेणाय नमः

इत्यावाह्य। तत्तदाद्यक्षरेण षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमालमुद्राः प्रदर्श्य। पश्चिमद्वार देवताभ्यो नमः। अर्घ्यं समर्पयामि---- दीपं समर्पयामि। ओं भूर्भुवस्सुवः ओं देवस्यत्वा----प्रतिगृह्णातु। पश्चिमद्वार देवताभ्यो नमः कदलीफल कर्पूरताम्बूलानि समर्पयामि। पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि।

ओं अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सथ्सि बर्हिषि॥

इति मन्त्रं पठित्वा।

उत्तरे -अथर्वरूपे -सुहोत्रनाम्नि -प्लक्षतोरणे - ओं सं सोमाय नमः। तत्पार्श्वस्थित शुक्लध्वजयोः ओं सुमुखाय नमः ओं सुप्रतिष्ठाय नमः। तत्र कुम्भयोः आधारादीन् अभ्यर्च्य। ओं सम्भवाय नमः ओं प्रभवाय नमः इत्यावाह्य। तत्तदाद्यक्षरेण षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमालमुद्राः प्रदर्श्य। उत्तरद्वार देवताभ्यो नमः। अर्घ्यं समर्पयामि---- दीपं समर्पयामि। ओं भूर्भुवस्सुवः ओं देवस्यत्वा----प्रतिगृह्णातु। उत्तरद्वार देवताभ्यो नमः कदलीफल कर्पूरताम्बूलानि समर्पयामि। पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि।

ओं शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शꣳय्योरभिस्रवन्तुनः॥

इति मन्त्रं पठित्वा।

## बीजपात्रपूजा

पात्राणि साधयित्वा। बीजपात्रे आधारादिपद्मान्तम् अभ्यर्च्य। धूपं समर्प्य।

| | |
|---|---|
| यवाधिदैवताय ओं ब्रह्मणे नमः | शाल्याधिदैवतायै ओं श्रियै नमः |
| सर्षपाधिदैवताय ओं रुद्राय नमः | गोधूमाधिदैवताय ओं यमाय नमः |
| प्रियङ्ग्वाधिदैवताय ओं सुब्रह्मण्याय नमः | माषाधिदैवताय ओं यक्षाय नमः |
| निष्पावाधिदैवताय ओं वायवे नमः | तिलाधिदैवताय ओं जलाधिपाय नमः |
| मुद्गाधिदैवताय ओं विष्णवे नमः | वेणुधान्याधिदैवताय ओं विनायकाय नमः |

इति तत्तत् बीजाधिदैवतानि आवाह्याभ्यर्च्य। बीजाधिदेवताभ्यो नमः अर्घ्यं समर्पयामि----पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि। एवं पूजयित्वा। नवेन वाससा आच्छाद्य। ततः सोमकुम्भं शोषणादिभिः संशोध्य। आधारादि पद्मान्तम् अभ्यर्च्य। तत्ततन्मन्त्रेण धूपं समर्प्य। ओं सों सोमाय नमः आगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य।

| | |
|---|---|
| ओं सां हृदयाय नमः | ओं सैं कवचाय हुं |
| ओं सीं शिरसे स्वाहा | ओं सौं नेत्राभ्यां वौषट् |
| ओं सूं शिखायै वषट् | ओं सः अस्त्राय फट् |

इति षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमालमुद्राः प्रदर्श्य। अर्घ्यादिभिरभ्यर्च्य। धूप-दीपं समर्प्य। ततः घटिकादीनां प्रत्येकम् आधारादिपद्मान्तम् अभ्यर्च्य। तत्ततन्मन्त्रेण धूपं समर्प्य।

घटिकासु - ओं कं ब्रह्मणे नमः आगच्छ आगच्छ इत्यावाह्य। ओं कां कीं कूं कैं कौं कः इति षडङ्गन्यासं कृत्वा किरीटादिमुद्राः प्रदर्श्य। ब्रह्ममुद्रां प्रदर्श्य। पालिकासु - ओं अं विष्णवे नमः आगच्छ आगच्छ इत्यावाह्य। ज्ञानादि षडङ्गन्यासं कृत्वा। किरीटादिमुद्राः प्रदर्श्य। विष्णुमुद्रां प्रदर्श्य। शरावेषु - ओं शं ईशानाय नमः आगच्छ आगच्छ इत्यावाह्य। ओं शां शीं शूं शैं शौं शः इति षडङ्गन्यासं कृत्वा। किरीटादिमुद्राः प्रदर्श्य। रुद्रमुद्रां प्रदर्श्य। अथवा षोडशपालिका स्थापने

| | |
|---|---|
| ओं केशवाय नमः | ओं श्रीधराय नमः |
| ओं नारायणाय नमः | ओं हृषीकेशाय नमः |
| ओं माधवाय नमः | ओं पद्मनाभाय नमः |
| ओं गोविन्दाय नमः | ओं दामोदराय नमः |
| ओं विष्णवे नमः | ओं वासुदेवाय नमः |
| ओं मधुसूदनाय नमः | ओं सङ्कर्षणाय नमः |
| ओं त्रिविक्रमाय नमः | ओं प्रद्युम्नाय नमः |
| ओं वामनाय नमः | ओं अनिरुद्धाय नमः |

इति पृथक् पृथक् पात्रेषु आवाह्य। सर्वेभ्यः अर्घ्यादिभिरभ्यर्च्य। धूपदीपं समर्प्य। ओं देवस्यत्वा----प्रतिगृह्णातु पालिकाधिदेवताभ्यो नमः

पायसान्नं गृहाण स्वाहा। सोमकुम्भे ओं सों सोमाय नमः पायसान्नं गृहाण स्वाहा इति पायसान्नं निवेद्य।

( ओं ब्रह्मजज्ञानम्प्रथमम्पुरस्तात्विसीमतस्सुरुचोवेनआवः। सबुध्नियाउपमाअस्यविष्ठास्सतश्चयोनिमसतश्चविवः।

ओं तद्विष्णोः परमम्पदꣳ सदापश्यन्तिसूरयः। दिवीवचक्षुराततम्। तद्विप्रासो विपन्यवोजागृवा ꣳ सस्समिन्धते। विष्णोर्यत्परमम्पदम्।

ओं परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतिरघायोः। अवस्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयायमृडय। )

पालिकाधिदेवताभ्यो नमः नीराजनं समर्पयामि।

ओं सोमोधेनुꣳसोमो अर्वन्तमाशुम्। सोमोवीरङ्कर्मण्यन्ददातु। सादन्यं विँदत्थ्यꣳसभेयम्। पितुश्श्रवणँ य्योददाशदस्मै।

ओं सों सोमाय नमः नीराजनं समर्पयामि।

पालिकाधिदेवताभ्यो नमः - सोमाय नमः समस्तोपचारान् समर्पयामि।

## सोम होमः

प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् अङ्कुरार्पणकर्मणि सोमहवनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। कुण्डे स्थण्डिले वा विधिवत् अग्निप्रतिष्ठादि अग्निमुखान्तं कृत्वा। बालाग्निं ध्यात्वा*1। अग्नेः पूर्णाहुत्यन्तं कृत्वा।

---

1) उत्सवे युवाग्निर्वा

ओं ह्रीं आधारशक्त्यै स्वाहा----ओं अव्यक्तपद्माय स्वाहा इति अग्निमध्ये आधारादि पद्मान्तम् आज्येन हुत्वा। तस्मिन् पूर्ववत् ओं नमो नारायणाय आगच्छ आगच्छ इत्यावाह्य। अर्घ्यादि नैवेद्यान्तम् अष्टोपचारान् (अर्घ्यं, पाद्यम्, आचमणीयं, गन्धं, पुष्पं, धूपं, दीपं, नैवेद्यं) सकृत् सकृत् आज्येन हुत्वा। ततः ओं सों सोमाय नमः आगच्छ आगच्छ इति अग्निमध्ये सोममावाह्य। अष्टोपचारान् आज्येन हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन्नग्नौ समिदन्नाज्यहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। पलाश -खादिर -अश्वत्थ -बिल्व समिद्भिः ओं सों सोमाय स्वाहा इति अष्टोत्तरशताहुतीः हुत्वा। चरुणा नृसूक्तेन षोडशाहुतीः हुत्वा। सर्पिषा सोममूलमन्त्रेण पूर्वोक्त समित् सङ्ख्यया हुत्वा। सम्पाताज्यं सङ्गृह्य।

ओं धं नमः पराय स्पर्शतन्मात्रात्मने नमः इति स्पर्शमन्त्रेण हस्ताभ्यां दूर्वाभ्यां पालिकादिपात्रेषु स्पर्शयित्वा। अवशिष्टाज्यं बीजपात्रे निक्षिप्य। विधिवत् स्विष्टकृदादि पूर्णाहुत्यन्तं हुत्वा। अग्निस्थं सोमं

( ओं यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्।

तेहनाकं महिमानस्सचन्ते। यत्र पूर्वे साध्यास्सन्ति देवाः। )

ओं सों सोमाय नमः कुण्डात् कुम्भे नियोजयामि। इति सोमकुम्भे नियोज्य। अग्निमुद्वास्य। सोममूलमन्त्रं शतवारं जप्त्वा।

ओं नमो भगवते वासुदेवाय इति मन्त्रेण पालिकादिपात्रेषु अङ्कुरान् अर्पयेत्॥

ओं मूर्धानन्दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम्।
कवि ँ सम्राजमतिथिञ्जनानामासन्ना पात्रं जनयन्त देवाः॥
इति मन्त्रेण पुनः मृद्भिः आपूर्य।
इमंमे वरुण श्रुधीहव मद्याध्याच मृडय। त्वामवस्युराचके।
तत्वायामि ब्रह्मनाणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणे हबोध्युरुषँ समान आयुः प्रमोषीः। इति मन्त्रेण
सोमकुम्भजलेन पालिकादिपात्रेषु संसिच्य। सोमकुम्भं पुनः जलेनापूर्य।
अलङ्कृत्य। आधारादि पद्मान्तम् अभ्यर्च्य। ओं सों सोमाय नमः इति पुनः
सोममावाह्य। अर्घ्यादिभिरभ्यर्च्य। सर्वेभ्यः यथाभागम् अन्नं निवेद्य।
नीराज्य।

( सोमोवा एतस्य राज्य माद्त्ते। योराजासन् राज्योवा सोमेन यजते।
देवसुवामेतानि हवीँषिभवन्ति। एतावन्तोवै देवानाँ सवाः। त एवास्मै
सवान् प्रयच्छन्ति। तएनं पुनस्सुवन्ते राज्याय। देवसूराजा भवति। )
अङ्कुरार्पण-मुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु
- सुमुहूर्तोऽस्तु। इत्युच्चार्य। द्वारस्थानां कुमुदादीनाम् ओं कुमुदाय नमः
बलिं ददामि----ओं सुप्रतिष्ठाय नमः बलिं ददामि इति क्रमेण
सम्पुटितोदकेन चरुणा बलिं दत्त्वा। एवम् उत्सवावसानमहर्निशं
सोमकुम्भपूजन -परमान्ननिवेदन -नीराजन -बलिप्रदानानि कुर्यात्।
हरिद्राजलेन अङ्कुराभिवृद्ध्यर्थं संसिच्य। सुगुप्ते स्थले संस्थाप्य। रक्षेत्।
सेनेशं यानमारोप्य निमित्तपरीक्षार्थं वीथिभ्रमणं कृत्वा। अनन्तरं

मुखमण्डपे अर्घ्यादिभिरभ्यर्च्य। निवेद्य -नीराज्य। स्वसन्निधौ निवेशयेत्॥

## वास्तुपूजा

मण्डपस्य दक्षिणे पार्श्वे पूर्वाग्रं वस्त्रमाच्छाद्य। तत्र तिलेन सलक्षणेन अधोमुखं प्राक्शिरसं कोणप्रासारित पाणिपादं वास्तुनाथं विलिख्य। तन्मध्ये सप्तदर्भकृत कूर्चं निक्षिप्य। गन्ध -पुष्पादिभिरलङ्कृत्य। परिस्तीर्य। तस्य पश्चिमे पार्श्वे होमार्थं कुण्डं वा स्थण्डिलं वा परिकल्प्य।

आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य ----लोकक्षेमार्थं----वत्सर----मास----दिन महोत्सव कर्मणि पूर्वाङ्गत्वेन सर्वदोष-शान्त्यर्थं वास्तुपूजां करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याहजलेन ओं सहस्रार हुं फट् इति मन्त्रेण पटं -कुण्डञ्च संप्रोक्ष्य। वास्तुपुरुषस्य पादयोः ओं ह्रीं आधारशक्त्यै नमः---- ओं अव्यक्तपद्माय नमः इत्यभ्यर्च्य। तत्तन्मन्त्रेण धूपं समर्प्य।

ओं वं वास्तुपुरुषाय नमः आगच्छागच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। ओं वां इत्यादि षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमालमुद्राः प्रदर्श्य।

| | |
|---|---|
| वास्तुनाथस्य शिरसि - ओं अंशुमालिने नमः | हस्ते - ओं विनायकाय नमः |
| दक्षिणतः बाहुमूले - ओं झषध्वजाय नमः | पादयोः - ओं अश्विनीदेवताभ्यां नमः |
| कूर्परे - ओं कुमाराय नमः | मध्ये - ओं चन्द्रमसे नमः |

| | |
|---|---|
| सव्यतः हस्ते - ओं दुर्गायै नमः | हृदये - ओं विष्णवे नमः |
| कूर्परे - ओं सप्तमातृभ्यो नमः | नाभौ - ओं ब्रह्मणे नमः |
| बाहुमूले - ओं स्थाणवे नमः | |

तत्परितश्च अष्टासुदिक्षु क्रमेण

| | |
|---|---|
| ओं लं इन्द्राय नमः | ओं वं वरुणाय नमः |
| ओं रं अग्नये नमः | ओं यं वायवे नमः |
| ओं हं यमाय नमः | ओं सं सोमाय नमः |
| ओं षं निर्ऋतये नमः | ओं शं शङ्कराय नमः |

वास्तुनाथस्य उत्तरे - ओं क्षं क्षेत्रपालाय नमः

इत्यावाह्य अभ्यर्च्य। सर्वत्र आवाहनादि षण्मुद्राः प्रदर्श्य। षडङ्गन्यासं कृत्वा। किरीटादिमुद्राः प्रदर्श्य। ओं वं वास्तुपुरुषाय नमः अर्घ्यं समर्पयामि----कदलीफल-कर्पूरताम्बूलं समर्पयामि। पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। वास्तुनाथस्य अङ्गदेवताभ्यश्च एवं पृथक्पृथक् उपचर्य।

( वास्तोष्पते प्रतिजानीह्यस्मान् त्स्वावेशो अनमीवोभवानः। यत् त्वेमहे प्रति तन्नो जुषस्व शन्नयेधि द्विपदे शं चतुष्पदे ) ओं वं वास्तुपुरुषाय नमः नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि। एवं पूजयित्वा।

## वास्तुहोमः

प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं वास्तुहोमकर्मणि अग्निप्रतिष्ठां करिष्ये। इति सङ्कल्प्य। कुण्डे विधिवत् अग्निप्रतिष्ठादि

अग्निमुखान्तं कृत्वा। बालाग्निं ध्यात्वा*1। अग्नेः पूर्णाहुत्यन्तं कृत्वा। ओं ह्रीं आधारशक्त्यै स्वाहा----ओं अव्यक्तपद्माय स्वाहा इति अग्निमध्ये आधारादि पद्मान्तम् आज्येन हुत्वा। तस्मिन् पूर्ववत् ओं नमो नारायणाय आगच्छ आगच्छ इत्यावाह्य। अर्घ्यादि नैवेद्यान्तम् अष्टोपचारान् सकृत् सकृत् आज्येन हुत्वा। तदनु अग्निमध्ये ओं वं वास्तुपुरुषाय नमः आगच्छागच्छ इत्यावाह्य। अर्घ्यादि नैवेद्यान्तं पूर्ववत् आज्येन हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन्नग्नौ वास्तुहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य।

ओं षौं नमः पराय परमेष्ठ्यात्मने स्वाहा।

ओं यां नमः पराय पुरुषात्मने स्वाहा।

ओं रां नमः पराय विश्वात्मने स्वाहा।

ओं वां नमः पराय निवृत्त्यात्मने स्वाहा।

ओं लां नमः पराय सर्वात्मने स्वाहा।

इति पञ्चोपनिषन्मन्त्रैः सर्पिषा सहस्रं शतं वा आहुतीः हुत्वा। ततः ओं नमो नारायणाय स्वाहा इति मूलमन्त्रेण शमी -अपामार्ग -खादिर समिद्भिः प्रत्येकम् अष्टाहुतीः हुत्वा। चरुणा नृसूक्तेन षोडशाहुतीश्च हुत्वा। ततः ओं वं वास्तुनाथाय स्वाहा  इति मन्त्रेण चरुणा अष्टोत्तरशताहुतीः हुत्वा। तदनु

---

1) उत्सवे युवाग्निर्वा

| | |
|---|---|
| ओं अंशुमालिने स्वाहा | ओं दुर्गायै स्वाहा |
| ओं झषध्वजाय स्वाहा | ओं सप्तमातृभ्यः स्वाहा |
| ओं कुमाराय स्वाहा | ओं स्थाणवे स्वाहा |
| ओं विनायकाय स्वाहा | ओं विष्णवे स्वाहा |
| ओं अश्विनीदेवताभ्यां स्वाहा | ओं ब्रह्मणे स्वाहा |
| ओं चन्द्रमसे स्वाहा | |

इति चरुणा सकृत् सकृत् हुत्वा। स्विष्टकृद्धवनं -प्रायश्चित्तहवनं -पूर्णाहुतिं च हुत्वा। अग्निस्थं वास्तुनाथं (ओं यज्ञेन यज्ञमयजन्त----सन्ति देवाः।) ओं वं वास्तुपुरुषाय नमः कुण्डात् पटे नियोजयामि इति नियोज्य। ततः ओं लं इन्द्राय नमः बलिं ददामि----ओं शं शङ्कराय नमः बलिं ददामि ओं क्षं क्षेत्रपालाय नमः बलिं ददामि इति अन्नेन बलिं दत्वा। ओं वं वास्तुपुरुषाय नमः नीराजनं समर्पयामि। ओं वं वास्तुपुरुषाय नमः उद्वासयामि इति वास्तुनाथमुद्वासयेत्॥

( अनन्तरं सर्ववीथिषु पर्यग्निकरणं कारयेत् )

उत्सवे च प्रतिष्ठायां प्रायश्चित्तेषु सर्वशः।
वास्तुहोमं प्रकुर्वीत क्रमाद्देवं यथाभवेत्॥
अनर्चिते वास्तुदेवे कृतं कर्म-आसुरं भवेत्।
तस्मात् सर्वप्रयत्नेन वास्तुनाथं समर्चयेत्॥ - विष्णुतन्त्र संहिता

---

இந்த வாஸ்து பூஜை ஸ்ரீப்ரச்னம், விஷ்ணுதந்த்ர ஸம்ஹிதைகளில் மட்டும் தான் உத்ஸவத்தின்அத்யாயத்தில் சொல்லப்பட்டுள்ளது. மற்ற ஸம்ஹிதைகளில் உத்ஸவக்ரியைகளில் வாஸ்துபூஜை சொல்லப்படவில்லை. ஆகையால் சோழ – பாண்டிய தேசங்களில் மட்டும் அநுஷ்டானத்தில் உள்ளது.

## ध्वज प्रतिष्ठा

अथ ध्वजप्रतिष्ठा-विधिरुच्यते। यथोक्त आयामविस्तृतियुते ध्वजे विधिवत् सलक्षणं गरुडं शिल्पिना आलिख्य। आचार्यः यजमानेन सह शिल्पशालां प्रविश्य। पटस्थ गरुडस्य शिल्पिना नयनोन्मीलनं कारयित्वा। ओं इति पटं गृहीत्वा। रथादिकम् आरोप्य ग्राम प्रादक्षिण्येन आलयं प्रविश्य। तत्र ध्वजपटं यागशालायां संस्थाप्य। छायाधिवासार्थं ध्वजस्य पुरतः जलद्रोणीं संस्थाप्य। तस्मिन् गन्धोदकेनापूर्य। तस्य दक्षिणे पार्श्वे शालि -तण्डुल तिलैः पीठं परिकल्प्य। तन्मध्ये सुवर्णादिलोहनिर्मितं रक्षार्थं सोपकुम्भाष्टकं सकरकं मध्यकुम्भं संस्थाप्य। सरत्न -कूर्च -अश्वत्थ पल्लावापिधानं कृत्वा। गन्धपुष्पादिभिः अलङ्कृत्य। पटस्य पुरतः नयनोन्मीलनार्थं धान्यपीठे सुवर्ण -रजत पात्रद्वयं पूर्वोत्तरक्रमेण संस्थाप्य। सुवर्ण -रजत निर्मितशलाकौ तत्तत् पात्रे निक्षिप्य। सुवर्णपात्रे मधु, रजतपात्रे आज्यञ्च पूरयित्वा। तयोः परितः नीवार -शालि -मुद्ग -श्यामाक -प्रियङ्गु -यव -तिल -गोधूमानि अष्टधान्यानि पृथक् पृथक् पात्रेषु निक्षिप्य। परिस्तीर्य। छायास्नपनार्थं ध्वजपटस्य पुरतः गरुडस्याभिमुखं सकूर्चं दर्पणं संस्थाप्य। तस्य पुरतः धान्यपीठे तत्तद्द्रव्ययुक्तं सलक्षणं षोडशकलशानि संस्थाप्य। सरत्न -कूर्च -अश्वत्थपल्लवापिधानं कृत्वा। वस्त्र-गन्धपुष्पादिभिः अलङ्कृत्य। शयनाधिवासार्थं पटस्य समीपे शालि -तण्डुल -तिलैः धान्यपीठं परिकल्प्य। तदुपरि नवैः वासोभिः आच्छाद्य। तूलिका -रत्नकम्बल -क्षौमवस्त्रयुक्त -पर्यङ्कं कल्पयित्वा।

रक्षाबन्धनार्थं तण्डुलपीठोपरि कदली-क्रमुक-नागवल्लीदलसंयुक्तं सुवर्णादि निर्मितं कार्पासेनकृतं वा रक्षासूत्रं निधाय। यागशालायां मध्ये वेदिकोपरि शालि -तण्डुल -तिलैः पीठं परिकल्प्य। तस्मिन् पद्ममालिख्य। तदुपरि सूत्रवेष्टितं सलक्षणम् उपकुम्भाष्टकं सकरकं महाकुम्भं संस्थाप्य। सरत्न -कूर्च -नालिकेर -अश्वत्थपल्लवापिधानं कृत्वा। वस्त्र -पुष्पैश्च अलङ्कृत्य। परिस्तीर्य। वेदिकायां पूर्वभागे चतुरश्रं स्थण्डिलं होमकुण्डं वा कल्पयित्वा। ध्वजप्रतिष्ठामारभेत्॥

आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य ----लोकक्षेमार्थं----वत्सर----मास----दिन महोत्सव -कर्मणि पूर्वाङ्गत्वेन ध्वजप्रतिष्ठाकर्म करिष्ये तदङ्गं ध्वजपटादीनां शुद्ध्यर्थं -कटाह शुद्ध्यर्थं -मधु -घृत शुद्ध्यर्थं सर्वद्रव्योपकरण-शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पूर्ववत् भूतशुद्धिम् -अष्टाक्षरन्यासञ्च कृत्वा।

## गरुडपञ्चाक्षरी न्यासः*1

अस्य श्रीगरुडपञ्चाक्षरी महामन्त्रस्य। काश्यप(दक्षः) ऋषिः। पङ्क्तीश्छन्दः। श्री लक्ष्मीशसकेतो गरुडो देवता। क्षीं बीजं। स्वाहा शक्तिः। श्रीगरुडप्रतिष्ठार्थे जपे विनियोगः।

---

1) இந்த கருடபஞ்சாக்ஷரீ ந்யாஸம் சந்த்ரிகையில் உள்ளது. சோழ பாண்டியதேசங்களில் மட்டும் அனுஷ்டானத்தில் இருக்கிறது.

## कर न्यासः

| | |
|---|---|
| ओं क्षिं ओं अङ्गुष्ठाभ्यां नमः | ओं स्वां ओं अनामिकाभ्यां नमः |
| ओं पं ओं तर्जनीभ्यां नमः | ओं हां ओं कनिष्ठिकाभ्यां नमः |
| ओं ओं ओं मध्यमाभ्यां नमः | ओं क्षिप ओं स्वाहा करतलकरपृष्ठाभ्यां नमः |

## स्थिति न्यासः

| | |
|---|---|
| ओं क्षिं ओं नाभौ | ओं स्वां ओं वक्रे |
| ओं पं ओं पादयोः | ओं हां ओं हृदये |
| ओं ओं ओं शिरसि | |

## षडङ्गन्यासः

ओं ज्वल ज्वल महामते स्वाहा ओं क्षां हृदयाय नमः

ओं गरुडचूडामणे स्वाहा ओं क्षीं शिरसे स्वाहा

ओं गरुडशिखायै ओं क्षूं शिखायै वषट्

ओं गरुड प्रभञ्जय प्रभञ्जय प्रभेदय प्रभेदय वित्रासय वित्रासय विमर्दय विमर्दय स्वाहा ओं क्षैं कवचाय हुं

ओं उग्ररूपधर सर्वसर्प भयङ्कर सर्वविषं दारय दारय भीषय भीषय दह दह भस्मीकुरु स्वाहा ओं क्षौं नेत्रत्रयाय वौषट्

ओं अप्रतिहत शासनाय नमस्सुदर्शनाय हुं फट् स्वाहा ओं क्षः अस्त्राय फट्

## ध्यानम्

आजानुतप्तसुवर्णाभम् आनाभेस्तुहिनप्रभम्।

कुङ्कुमारुणमाकण्ठात् आकेशान्तासितेतरम्॥

स्वस्तिकं दक्षिणं पादं वामपादन्तु कुञ्चितम्।

दीर्घबाहुं बृहत्स्कन्धं नागाभरण -भूषितम्॥

नीलाग्रनासिकात्मानं महापक्षं स्मरेद्बुधः।

दंष्ट्राकरालवदनं किरीटमकुटोज्वलम्।

सर्वाभरणसंयुक्तं सर्वावयवसुन्दरम्।

अनन्तोवामकटको यज्ञसूत्रन्तु वासुकी।

तक्षकः कटिसूत्रन्तु हारःकार्कोटकस्तथा।

पद्मो दक्षिणकर्णेतु महापद्मस्तु वामतः।

शङ्खः शिरःप्रदेशे तु गुलिकस्तु भुजान्तरे।

एवं ध्यायेत् त्रिसन्ध्यायाम् आत्मानं गरुडाकृतिम्।

विषं नाशयते क्षिप्रम् अग्निः क्षिप्तमिवाम्भसि।

ओन्नमः पक्षिराजाय वेदपक्षयुगप्रभो!।

वैनतेय! नमस्तेऽस्तु श्रीगरुडाय नमोनमः॥ इति ध्यात्वा मानसाराधने भगवन्तं ध्यात्वा। तस्य पादाग्रे क्षिप ओं स्वाहा इति गरुडं ध्यात्वा। ओं वैनतेयाय नमः अर्घ्यं समर्पयामि----समस्तराजोपचारान् समर्पयामि इत्यन्तं मानसोपचारैः उपचर्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन ओं वीर्याय अस्त्राय फट् इति ध्वजपटं संप्रोक्ष्य।

अस्त्रमन्त्रेण अभिमन्त्रित सिद्धार्थैः पुष्पैश्च ध्वजपटं सन्ताड्य। भगवत्समीपं गत्वा। इमां गाथामुदीरयेत्।

भगवन्! पुण्डरीकाक्ष! सर्वेश्वर! जगन्मय!।
त्वया यथा तु कथितं तथाकर्तुं न शक्यते॥
अस्वातन्त्र्यादसामर्थ्यात् श्रद्धादीनामभावतः।
तस्मान्मानादि सर्वेषां न्यूनाधिक्योपशान्तये॥
समालोकय नेत्राभ्यां शीतलाभ्यां पटस्थितम्।
सर्वदोषापहारिभ्यां वैनतेयं प्रसीदय॥

इति भगवन्तं प्रार्थ्य

## ध्वजस्य छायाधिवासः

प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् सन्निधौ भगवन्महोत्सवाङ्गं ध्वजप्रतिष्ठाकर्मणि ध्वजस्य छायाधिवासकर्म करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पुण्याहजलेन ओं सहस्त्रार हुं फट् इति मन्त्रेण जलद्रोणीं रक्षार्थकुम्भानि च प्रोक्ष्य। पात्राणि साधयित्वा।

जलद्रोण्यन्तर्गत-जलं,

ओं यं वायवे नमः शोषयामि। ओं रं अग्नये नमः दाहयामि।

ओं वं वरुणाय नमः प्लावयामि इति शोषणादिभिः संशोध्य।

ओं सुं सुरभ्यै नमः इति सुरभिमुद्रया अमृतीकृत्य। जलद्रोण्याम् आधारादि -पद्मान्तम् अभ्यर्च्य। तस्मिन् ओं वं वरुणाय नमः इत्यावाह्य। ओं वां इत्यादि षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्खमुद्राः प्रदर्श्य।

अर्घ्यादिभिरभ्यर्च्य। धूप-दीपं समर्प्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य। पटस्थं गरुडं पञ्चदर्भकृतकूर्चे संहारक्रमेण ध्यात्वा।

तत्त्व संहारन्यासः

ओं ङं नमःपराय चतुरश्राय पीतवर्णाय घ्राणोपस्थेन्द्रिययुताय शब्दस्पर्शरूपरसगन्धगुणयुताय पृथिवीतत्त्वात्मने नमः

-पादादिजान्वन्तम्।

ओं घं नमःपराय स्फटिकवर्णाय अर्धचन्द्राकाराय रसना - पाय्विन्द्रिययुताय शब्दस्पर्शरूपरसगुण-युताय अप्-तत्त्वात्मने नमः

-जान्वादिगुह्यान्तम्।

ओं गं नमःपराय रक्तवर्णाय त्रिकोणाय दृष्टि -चरणेन्द्रिययुताय शब्दस्पर्शरूपगुणयुताय अग्नितत्त्वात्मने नमः -गुह्यादिनाभ्यन्तम्।

ओं खं नमःपराय धूम्रवर्णाय वृत्ताय त्वक्करेन्द्रिययुताय शब्दस्पर्शगुणयुताय वायुतत्त्वात्मने नमः -नाभ्यादिनासिकान्तम्।

ओं कं नमःपराय जलदवर्णाय निराकाराय वाक् श्रोत्रेन्द्रिययुताय शब्दगुणयुताय आकाशतत्त्वात्मने नमः -नासादिमूर्धान्तम्।

ओं चं नमःपराय हेमवर्णाय मेहनेन्द्रियात्मने नमः -मेहने।

ओं छं नमःपराय रक्तवर्णाय पाय्विन्द्रियात्मने नमः -अपाने।

ओं जं नमःपराय रक्तवर्णाय पादेन्द्रियात्मने नमः -पादयोः।

ओं झं नमःपराय रक्तवर्णाय पाणीन्द्रियात्मने नमः -करयोः।

ओं ञं नमःपराय सितवर्णाय वागिन्द्रियात्मने नमः -वाचि।

ओं टं नमःपराय सितवर्णाय घ्राणेन्द्रियात्मने नमः -नासिकायाम्।

ओं ठं नमःपराय गौरवर्णाय जिह्वेन्द्रियात्मने नमः -जिह्वायाम्।

ओं डं नमःपराय कृष्णवर्णाय नेत्रेन्द्रियात्मने नमः -नेत्रयोः।

ओं ढं नमःपराय हेमवर्णाय त्वगिन्द्रियात्मने नमः -त्वचि।

ओं णं नमःपराय पाटलवर्णाय श्रोत्रेन्द्रियात्मने नमः -श्रोत्रयोः।

ओं तं नमःपराय सितवर्णाय गन्धतन्मात्रात्मने नमः -नासिकायाम्।

ओं थं नमःपराय पाण्डरवर्णाय रस तन्मात्रात्मने नमः -तालुनि।

ओं दं नमःपराय ज्योतिवर्णाय रूपतन्मात्रात्मने नमः -नेत्रयोः।

ओं धं नमःपराय लोहितवर्णाय स्पर्शतन्मात्रात्मने नमः -प्रतिमायां त्वचि।

ओं नं नमःपराय शुक्लवर्णाय शब्दतन्मात्रात्मने नमः -श्रोत्रयोः।

ओं पं नमःपराय सितासित वर्णाय मनस्तत्त्वात्मने नमः -हृदि।

ओं फं नमःपराय पाटलवर्णाय अहङ्कारात्मने नमः -हृदि।

ओं बं नमःपराय स्फटिकाभासाय बुद्धितत्त्वात्मने नमः -बुद्धौ।

ओं भं नमःपराय सितवर्णाय प्रकृत्यात्मने नमः -हृदि।

ओं मं नमःपराय स्फटिकाभासाय जीवतत्त्वात्मने नमः -नाभौ।

इति तत्त्वसंहारक्रममुच्चरन् प्राक्-शिरस्कं कूर्चं जलद्रोण्यन्तर्जले शाययित्वा ओं सशराय शार्ङ्गाय नाराचाय हुं फट् सुदर्शनाय स्वाहा इति चक्रमुद्रां प्रदर्श्य। नीराज्य। रक्षार्थकुम्भेषु क्रमेण आधारादिपद्मान्तम् अभ्यर्च्य। धूपं समर्प्य। मध्यकुम्भे ओं कं ब्रह्मणे नमः आगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। ओं कां कीं कूं कैं कौं कः इति

षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमाल -पद्म -गदा -ब्रह्ममुद्राः प्रदर्श्य। अष्टकुम्भेषु ओं लं इन्द्राय नमः----ओं शं शङ्कराय नमः इति इन्द्रादीन् आवाह्याभ्यर्च्य। पूर्ववत् आवाहनादि षण्मुद्राः प्रदर्श्य। तत्तत् बीजैः षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। करके - ओं सशराय शार्ङ्गाय नाराचाय हुं फट् सुदर्शनाय स्वाहा इति सुदर्शनम् आवाह्य। ओं आचक्राय स्वाहा इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। सर्वेभ्यः अर्घ्यादिभिरभ्यर्च्य। धूपदीपं समर्प्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य। एवं यामं - यामार्धम् -अशक्तौ सद्यो वा अधिवासयेत्। तदनन्तरं कूर्चं जलादुद्धृत्य। कूर्चस्थं पटे विचिन्तयेत्॥

## ध्वजपटस्य नयनोन्मीलनम्

प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् सन्निधौ भगवन्महोत्सवाङ्गं ध्वजप्रतिष्ठाकर्मणि धवजस्थ गरुडस्य नयनोन्मीलनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। नयनोन्मीलनद्रव्याणि पुण्याहजलेन प्रोक्ष्य। स्वर्णपात्रस्थ मधुनि ओं हं सूर्याय नमः आगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। ओं हां हीं हूं हैं हौं हः इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। रजतपात्रस्थ आज्ये ओं वं चन्द्रमसे नमः आगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। ओं वां वीं वूं वैं वौं वः इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। तयोः

अर्घ्यादिभिरभ्यर्च्य। धूपदीपं समर्प्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य। मधुपात्रं संस्पृश्य।

मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधु नक्तमुतोषसि मधुमत् पार्थिवꣳरजः। मधुद्यौरस्तुनः पिता। मधुमान्नो वनस्पतिर्मधुमाꣳअस्तु सूर्यः। माध्वीर्गावोभवन्तु नः॥ इत्यभिमन्त्र्य। आज्यपात्रं संस्पृश्य।

सविराजं पर्यैति प्रजानन् प्रजांपुष्टिं व्वर्द्धयमानो अस्मे। वाजस्येमां प्रसवश्शिश्रिये दिवमिमा च विश्वाभुवनानि सम्राट्॥ इत्यभिमन्त्र्य। पटस्य पुरतः यवनिकाम् आच्छाद्य।

ततः मध्वक्त स्वर्णशलाकया

ओं चित्रन्देवानामुदगादनीक ञ्चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राद्यावा पृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च। इति मन्त्रेण गरुडस्य दक्षिणनेत्रम् उन्मील्य। घृताक्त रजतशलाकया

ओं तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। इति मन्त्रेण गरुडस्य वामनेत्रम् उन्मील्य। अष्टनागानाञ्च एवं कृत्वा। यवनिकापटं व्यापोह्य। मधु - घृतपात्रौ अष्टधान्यानि च दर्शयित्वा। नीराजयेत्॥

## छाया स्नपनम्

प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् सन्निधौ भगवन्महोत्सवाङ्गं ध्वजप्रतिष्ठाकर्मणि ध्वजस्य षोडशकलशैः छायास्नपनकर्म करिष्ये इति सङ्कल्प्य। पात्राणि साधयित्वा।

सर्वाणि स्नपनकलशानि दर्पणञ्च पुण्याहजलेन प्रोक्ष्य। कलशेषु आधारादि पद्मान्तम् अभ्यर्च्य

आग्नेये - रत्नोदके - ओं नमो भगवते पुरुषात्मने

नैर्ऋते - लोहोदके - ओं नमो भगवते सत्यात्मने

वायव्ये - गन्धोदके - ओं नमो भगवते अच्युतात्मने

ऐशान्ये - घृते - ओं नमो भगवते अनन्तात्मने

पूर्वे - पाद्ये - ओं नमो भगवते कं ओं केशवाय

पूर्वे - अर्घ्ये - ओं नमो भगवते नं ओं नारायणाय

दक्षिणे - आचमनीये - ओं नमो भगवते मं ओं माधवाय

दक्षिणे - पञ्चगव्ये - ओं नमो भगवते गं ओं गोविन्दाय

पश्चिमे - अक्षतोदके - ओं नमो भगवते वं ओं विष्णवे

पश्चिमे - मार्जनोदके - ओं नमो भगवते मं ओं मधुसूदनाय

उत्तरे - कषाये - ओं नमो भगवते त्रं ओं त्रिविक्रमाय

उत्तरे - कुशोदके - ओं नमो भगवते वं ओं वामनाय

आग्नेये - दध्नि - ओं नमो भगवते श्रीं ओं श्रीधराय

नैर्ऋते - क्षीरे - ओं नमो भगवते हृं ओं हृषीकेशाय

वायव्ये - मधुनि - ओं नमो भगवते पं ओं पद्मनाभाय

ऐशान्ये - यवोदके - ओं नमो भगवते दं ओं दामोदराय

इति तत्तद्देवतान् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। तत्तद्बीजेन षडङ्गन्यासं कृत्वा। किरीटादिमुद्राः प्रदर्श्य। सर्वेभ्यः

अर्घ्यादिभिरभ्यर्च्य। धूपदीपं समर्प्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य। सकूर्चे दर्पणे पटस्थं गरुडं ओं क्षिप ओं स्वाहा इत्यावाह्य ओं तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात् इति मन्त्रेण उपचारैः उपचर्य। नीराज्य। पाद्यादि कलशैः दर्पणं यथाविधि पुरुषसूक्त-षोडश-ऋग्भिः संस्नाप्य। निवेद्य। नीराज्य। कूर्चस्थं पटे विचिन्तयेत्॥

## शयनाधिवासम् - रक्षाबन्धनम्

प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् सन्निधौ भगवन्महोत्सवाङ्गं ध्वजप्रतिष्ठा कर्मणि ध्वजस्य शयनाधिवास -रक्षाबन्धनञ्च करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पर्यङ्के ओं अं अनन्ताय नमः इत्यावाह्य। गन्धपुष्पादिभिरभ्यर्च्य। तस्मिन् ध्वजपटं शाययित्वा ( अशक्तौ वा पूर्ववत् कूर्चे गरुडं संहार क्रमेण ध्यात्वा। तस्मिन् शाययित्वा )। एवं यामं -यामार्धं -सद्यो वा अधिवास्य। अनन्तरम् उत्तिष्ठ ब्रह्मणस्पतेदेवयन्तस्त्वेमहे। उपप्रयन्तुमरुतस्सुदानवः। इन्द्रप्राशूर्भवासचा। प्रैतुब्रह्मणस्पतिः। इति मन्त्रेण शयनात् उत्थाप्य। कूर्चं चेत् पटे नियोज्य। नीराजयेत्॥ रक्षासूत्रं पुण्याहजलेन प्रोक्ष्य। दर्भपुञ्जैः अन्वारब्धेन अपराजित महामन्त्रं जप्त्वा।

## अपराजित महामन्त्रः

अस्यश्री अपराजित महामन्त्रस्य। प्रद्युम्न ऋषिः। अतितीश्छन्दः। विश्वरूपी नारायणो देवता। अं बीजं। उं शक्तिः। मं कीलकं। ध्वजस्य

प्रतिसराभिमन्त्रणार्थे जपे विनियोगः।

ओं नमो भगवते अनन्ताय सहस्त्रशीर्षाय सुगन्धि -क्षीरोदार्णव-शायिने -नागभोगपर्यङ्काय -गरुडवाहनाय -वासुदेवाय नमः -पीतवाससे -सङ्कर्षण -प्रद्युम्न -अनिरुद्ध -हयशीर्ष वराह-नारसिंह-वामन -त्रिविक्रम -राम -राम -राम -कृष्णः कल्कि -परब्रह्म नमोऽस्तुते। असुर -दैत्य -यक्ष -राक्षस -भूत -प्रेत -पिशाचापस्मार -सिद्ध -योगिनी -शाकिनी -डाकिनी ब्रह्मराक्षस -विनायक -पूतना -रेवती -स्कन्द -पुरोगम-नवग्रहादि -नक्षत्रग्रहान् अन्यांश्च महाग्रहान् हण हण पतीन्पतिभ्यः आख्यातुमाख्यातुं -गृहाण गृहाण -आविश आविश -ध्वंसय ध्वंसय -त्रासय त्रासय -द्रुह्य द्रुह्य चक्रेण गदया वज्रेण भस्मीकुरु भस्मीकुरु स्वाहा। सहस्त्रार मुख्य सर्वप्रहरणायुधबाहो -जयजय -विजय विजय -अनन्तापराजित -अप्रतिहत -सहस्त्रनेत्र -प्रज्वल प्रज्वल -ज्वल ज्वल -विश्वरूप -मधुसूदन -महापुरुष -वैकुण्ठनारायण पद्मनाभ -हृषीकेश -सर्वभूतवशङ्कर -शङ्ख-चक्र-गदाधर -सर्वभूतनमस्कृत -सर्वनागप्रमर्दन -सर्वासुरोत्साधन -सर्वदेवनमस्कृत -सर्वग्रहनिवारण -सर्वयन्त्रप्रभञ्जन -सर्वदुःखप्रशमन -सर्वज्वरविनाशन -सर्वभूतापकर्षण -सर्व दुःस्वप्ननाशन -सर्वभक्तप्रदायक -जनार्दन नमोऽस्तुते - इति जप्त्वा। ओं सहस्त्रार हुं फट् इति रक्षासूत्रं सप्तवारम् अभिमन्त्र्य। सूत्रे आधारादि पद्मान्तम् अभ्यर्च्य। धूपं समर्प्य। रक्षासूत्राधिदैवतायै ओं श्रीं श्रियै नमः आगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य।

ओं श्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट -कमल -वनमाल मुद्राः प्रदर्श्य। अर्घ्यादिभिरभ्यर्च्य। धूपदीपं समर्प्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य।

त्र्यम्बकꣳय्यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। इति चन्दनक्षोदेन रक्षासूत्रम् अनुलिप्य।

ओं विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते। पारावतं यत्पुरु सम्भृतं वस्वपावृणो श्शरभाय ऋषिबन्धवे। इति मन्त्रेण ध्वजस्य पुच्छे (ऊर्ध्वे वा) रक्षाबन्धनं कृत्वा। रक्षां स्पृष्ट्वा ओं वीर्याय अस्त्राय फट् इति अस्त्रमन्त्रम् अष्टवारं जप्त्वा।

ओं योब्रह्मा ब्रह्मण----शान्तिः इति घृतसूक्तं पठित्वा।

ओं बृहथ्साम क्षत्र भृद् वृद्ध वृष्णिय त्रिष्टुभौजश्शुभित मुग्रवीरम्। इन्द्रस्तोमेन पञ्चदशेन मद्ध्यमिदँ व्वातेन सगरेणरक्षा। इति मन्त्रेण धूपपात्र-भस्मना रक्षां कृत्वा। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराजयेत्॥

## कुम्भपूजा

श्रोत्राचमन पूर्वकं प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् सन्निधौ भगवन्महोत्सवाङ्गं ध्वजप्रतिष्ठाकर्मणि महाकुम्भपूजां करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। सर्वान् कुम्भान् पुण्याहजलेन प्रोक्ष्य। शोषणादीनि कृत्वा। ओं सुं सुरभ्यै नमः इति सुरभिमुद्रां प्रदर्श्य। महाकुम्भादीन् आधारादि पद्मान्तम् अभ्यर्च्य।

तत्तन्मन्त्रेण धूपं समर्प्य। महाकुम्भे गरुडमूलबेरात् -स्वहृदयकमलाद्वा यच्छक्तिम् आवाह्य।

एहि खेश! महाबाहो! वैनतेय! वयोधिप!।

सान्निध्यं कुरु पक्षीन्द्र! प्रसीदात्र नमोऽस्तु ते॥

क्षिप ओं स्वाहा आगच्छ आगच्छ सङ्कर्षण-पादांशजं गरुडम् आवाहयामि इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। ओं क्षां क्षीं क्षूं क्षैं क्षौं क्षः इति षडङ्गन्यासं कृत्वा। किरीट -कुण्डल -वनमाल -चक्र -शङ्ख -पद्म -गदा -अनन्त -गरुडमुद्राः प्रदर्श्य। उपकुम्भेषु ओं लं इन्द्राय नमः----ओं शं शङ्कराय नमः इति इन्द्रादीन् क्रमेणावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्खमुद्राः प्रदर्श्य। करके ओं सहस्रार हुं फट् इति सुदर्शनम् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। ओं आचक्राय स्वाहेति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। सर्वेभ्यः अर्घ्यादिभिरभ्यर्च्य। धूपदीपं समर्प्य। यथाभागमन्नं निवेद्य।

ओं तत्पु॑रु॒षाय॑ वि॒द्महे॑ सुव॒र्ण॒प॒क्षाय॑ धीमहि। तन्नो॑ गरुडः प्रचो॒दया॒॑त्। इति नीराज्य। ध्वजपटस्य समीपे गत्वा। ध्वजस्थं गरुडं संहारक्रमेण ध्यात्वा। ओं ङं नमः पराय चतुरश्राय पीतवर्णाय घ्राणोपस्थेन्द्रिययुताय शब्दस्पर्शरूपरसगन्धगुण-युताय पृथिवीतत्त्वात्मने नमः----
ओं मं नमःपराय स्फटिकाभासाय जीवतत्त्वात्मने नमः
इति तत्त्व संहारन्यासं पठित्वा।

## अथ होमः

प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं गरुडप्रतिष्ठाहवनं करिष्ये। इति सङ्कल्प्य। अप उपस्पृश्य। विधिवत् अग्निप्रतिष्ठादि अग्निमुखान्तं कृत्वा। बालाग्निं ध्यात्वा। अग्नेः पूर्णाहुत्यन्तं कृत्वा। अग्निमध्ये आधारादि पद्मान्तं सर्पिषा हुत्वा। तन्मध्ये पूर्ववत् ओं नमो नारायणाय आगच्छ आगच्छ इत्यावाह्य। अर्घ्यादि नैवेद्यान्तम् अष्टोपचारान् सकृत् सकृत् आज्येन हुत्वा। ततः क्षिप ओं स्वाहा आगच्छ आगच्छ इति अग्निमध्ये गरुडमावाह्य। पूर्ववत् अर्घ्यादि नैवेद्यान्तम् आज्येन हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन्नग्नौ समिदन्नाज्यहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। क्षिप ओं स्वाहा स्वाहा इति समिधा शतेन तदर्धेन तदर्धेन वा हुत्वा। चरुणा नृसूक्तेन षोडशाहुतीः हुत्वा। सर्पिषा पूर्वोक्त समित्सङ्ख्या गरुडमूलमन्त्रेण हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् गरुडप्रतिष्ठा कर्मणि तत्त्वन्यासहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। सृष्टि क्रमेण हुत्वा।

ओं मं नमःपराय स्फटिकाभासाय जीवतत्त्वात्मने स्वाहा -नाभौ

ओं भं नमःपराय सितवर्णाय प्रकृत्यात्मने स्वाहा -हृदि

ओं बं नमःपराय स्फटिकाभासाय बुद्धितत्त्वात्मने स्वाहा -बुद्धौ

ओं फं नमःपराय पाटलवर्णाय अहङ्कारात्मने स्वाहा -हृदि

ओं पं नमःपराय सितासितवर्णाय मनस्तत्त्वात्मने स्वाहा -हृदि

ओं नं नमःपराय शुक्लवर्णाय शब्दतन्मात्रात्मने स्वाहा -श्रोत्रयोः

ओं धं नमःपराय लोहितवर्णाय स्पर्शतन्मात्रात्मने स्वाहा -प्रतिमायां त्वचि

ओं दं नमःपराय ज्योतिर्वर्णाय रूपतन्मात्रात्मने स्वाहा -नेत्रयोः

ओं थं नमःपराय पाण्डरवर्णाय रसतन्मात्रात्मने स्वाहा -तालुनि

ओं तं नमःपराय  सितवर्णाय गन्धतन्मात्रात्मने स्वाहा -नासिकायाम्

ओं णं नमःपराय पाटलवर्णाय श्रोत्रेन्द्रियात्मने स्वाहा -श्रोत्रयोः

ओं ढं नमःपराय हेमवर्णाय त्वगिन्द्रियात्मने स्वाहा -त्वचि

ओं डं नमःपराय कृष्णवर्णाय नेत्रेन्द्रियात्मने स्वाहा -नेत्रयोः

ओं ठं नमःपराय गौरवर्णाय जिह्वेन्द्रियात्मने स्वाहा -जिह्वायाम्

ओं टं नमःपराय सितवर्णाय घ्राणेन्द्रियात्मने स्वाहा -नासिकायाम्

ओं ञं नमःपराय सितवर्णाय वागिन्द्रियात्मने स्वाहा -वाचि

ओं झं नमःपराय रक्तवर्णाय पाणीन्द्रियात्मने स्वाहा -करयोः

ओं जं नमःपराय रक्तवर्णाय पादेन्द्रियात्मने स्वाहा -पादयोः

ओं छं नमःपराय रक्तवर्णाय पाय्विन्द्रियात्मने स्वाहा -अपाने

ओं चं नमःपराय हेमवर्णाय मेहनेन्द्रियात्मने स्वाहा -मेहने

ओं कं नमःपराय जलदवर्णाय निराकाराय वाक्-श्रोत्रेन्द्रिययुताय शब्दगुणयुताय आकाशतत्त्वात्मने स्वाहा -मूर्द्धादिनासान्तम्।

ओं खं नमःपराय धूम्रवर्णाय वृत्ताय त्वक्करेन्द्रिययुताय शब्दस्पर्शगुणयुताय वायुतत्त्वात्मने स्वाहा -नासादिनाभ्यन्तम्।

ओं गं नमःपराय रक्तवर्णाय त्रिकोणाय दृष्टि-चरणेन्द्रिययुताय शब्दस्पर्शरूपगुणयुताय अग्नितत्त्वात्मने स्वाहा -नाभ्यादिगुह्यान्तम्।

ओं घं नमःपराय स्फटिकवर्णाय अर्धचन्द्राकाराय रसनापाय्विन्द्रिययुताय शब्दस्पर्शरूपरसगुण-युताय अप्तत्त्वात्मने स्वाहा -गुह्यादिजान्वन्तम्।

ओं ङं नमःपराय चतुरश्राय पीतवर्णाय घ्राणोपस्थेन्द्रिययुताय शब्दस्पर्शरूपरसगन्धगुण-युताय पृथिवीतत्त्वात्मने स्वाहा -जान्वादिचरणान्तम्।

इति अष्टवारं हुत्वा। सम्पाताज्यं सङ्गृह्य। परिषिच्य। पूर्वोक्त तत्त्वन्यासेन नमोन्तेन कूर्चेन पटस्थ गरुडस्य तत्तदङ्गेषु संस्पृश्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं प्राणादि-दशवायुन्यासहोमं -प्राणप्रतिष्ठाहोमञ्च करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य।

<u>प्राणादिदशवायु न्यासः</u>

ओं नाभिकन्दात् ब्रह्मरन्ध्रावधिस्थितायां सुषुम्नायां स्थिताय प्राणाय स्वाहा।

ओं कन्दात् वामनासापुटावधि इडायां स्थिताय अपानाय स्वाहा।

ओं कन्दात् दक्षिणनासापुटावधि पिङ्गलायां स्थिताय व्यानाय स्वाहा।

ओं कन्दात् वामदृगन्तम् उत्थितायां गान्धार्यां स्थिताय उदानाय स्वाहा।

ओं कन्दात् दक्षिणदृगन्तम् उत्थितायां हस्तिजिह्वायां स्थिताय समानाय स्वाहा।

ओं कन्दात् वामश्रोत्रान्तम् उत्थितायां पूषायां स्थिताय नागाय स्वाहा।

ओं कन्दात् दक्षिणश्रोत्रान्तम् उत्थितायां यशस्विन्यां स्थिताय

कूर्माय स्वाहा।

ओं कन्दात् पायुमूलावधि स्थितायाम् अलम्बुसायां स्थिताय

कृकराय स्वाहा।

ओं कन्दादारभ्य मेढ्रान्तम् अधोगतायां कुहूनायां स्थिताय

देवदत्ताय स्वाहा।

ओं कन्दादारभ्य पादाङ्गुष्ठान्तम् अधोगतायां कौशिन्यां स्थिताय

धनञ्जयाय स्वाहा।

एवं पूर्ववत् होमः न्यासश्च।

<u>प्राणप्रतिष्ठा</u>

अस्य श्री प्राणप्रतिष्ठा महामन्त्रस्य। ब्रह्म -विष्णु -महेश्वराः ऋषयः। ऋग्यजुस्सामाथर्वाणि छन्दांसि। सकलजगत्सृष्टि -स्थिति -संहारकारिणी परा प्राणशक्तिः देवता। आं ह्रीं क्रों बीजं। स्वाहा शक्तिः। ओं कीलकं। <u>गरुडस्य</u> प्राणप्रतिष्ठार्थे होमे विनियोगः।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। अं ङं घं गं खं कं पृथिव्यप्तेजो -वाय्वाकाश प्राणात्मने

क्रों ह्रीं आं आं हृदयाय नमः - स्वाहा।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। इं नं धं दं थं तं शब्दस्पर्शरूपरसगन्ध अपानात्मने क्रों ह्रीं आं ईं शिरसेस्वाहा - स्वाहा।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। उं ञं झं जं छं चं

वाक्पाणिपाद-पायूपस्थ व्यानात्मने क्रों ह्रीं आं ऊं शिखायै वषट् - स्वाहा।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। एं णं ढं डं ठं टं

श्रोत्रत्वक्चक्षुर्जिह्वा-घ्रान उदानात्मने क्रो ह्रीं आं ऐं कवचाय हुं - स्वाहा।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। ओं पं फं बं भं मं

मनोऽहङ्कारबुद्धि-प्रकृतिजीव समानात्मने क्रों ह्रीं आं औं नेत्राभ्यां वौषट्

- स्वाहा।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। अं यं रं लं वं शं षं सं

हं लं क्षं वचन गमनानन्द विहरणोत्सर्गानन्द नाग -कूर्म -कृकर -देवदत्त

-धनञ्जयात्मने क्रों ह्रीं आं अः अस्त्राय फट् - स्वाहा।

## ध्यानम्

रक्तांबोधिस्थ पोतोल्लसदरुण सरोजाधिरूढा कराब्जैः

पाशं कोदण्डमिक्षूद्भव-मलिगुणमप्यङ्कुशं पञ्चबाणान्।

बिभ्राणा सृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या

देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। श्रीवैनतेयप्राणः इहप्राणः।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। श्रीवैनतेयजीवः इहस्थितः।

ओं आं ह्रीं क्रों य र ल व श ष स ह ओं हंसः। श्रीवैनतेयस्य सर्वेन्द्रियाणि

मनोऽहङ्कारबुद्धिप्रधान -पृथिव्यप्-तेजो वाय्वाकाश -श्रोत्र -त्वक् -

चक्षुर्जिह्वाघ्राण -वाक्पाणिपादपायूपस्थ त्वक् चर्म मांस रुधिर मेदोऽस्थि

मज्जा शुक्ल प्राणापानव्यानोदान समानाः इह आयान्तु सुखं चिरं तिष्ठन्तु स्वाहा -स्वाहा॑ ओं। आयुधन्यासः -

| | |
|---|---|
| ओं चक्राय स्वाहा | ओं पद्माय स्वाहा |
| ओं शङ्खाय स्वाहा | ओं शार्ङ्गाय स्वाहा |
| ओं गदायै स्वाहा | |

एवं हुत्वा। सम्पाताज्यं सङ्गृह्य पूर्ववत् पटस्थ गरुडस्य तत्तदङ्गेषु संस्पृशेत्। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् गरुडप्रतिष्ठा-होमकर्मणि सर्वदोषशान्त्यर्थं भूरादि चतुर्व्याहृत्या शान्तिहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। वक्ष्यमान मन्त्रैः प्रत्येकं शतसङ्ख्यया हुत्वा। ओं भूस्स्वाहा इति मधुना हुत्वा। सम्पातेन गरुडस्य पादयोः -सर्वाङ्गञ्च ओं भूः इति स्पृशेत्। ओं भुवस्स्वाहा इति पयसा हुत्वा। सम्पातेन गरुडस्य जठरे -सर्वाङ्गञ्च ओं भुवः इति स्पृशेत्। ओं सुवस्स्वाहा इति दध्ना हुत्वा। सम्पातेन गरुडस्य शिरसि -सर्वाङ्गञ्च ओं सुवः इति स्पृशेत्। ओं भूर्भुवस्सुवस्स्वाहा इति आज्येन हुत्वा। सम्पातेन गरुडस्य शिरसि -सर्वाङ्गञ्च ओं भूर्भुवस्सुवः इति स्पृशेत्।

ओं ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासु॒दे॒वाय॑ धीमहि। तन्नो॑ विष्णुः प्रचो॒दया॒त्स्वाहा॑ इति गुड-आज्य-मधु संयोगेन हुत्वा। सम्पातेन गरुडस्य मुखे -सर्वाङ्गञ्च पूर्ववत् विष्णुगायत्र्या स्पृशेत्। परिषिच्य। तदनु स्विष्टकृद्धोमं -शान्तिहोमं -पूर्णाहुतिञ्च हुत्वा। अग्निस्थं गरुडं ( ओं य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः---- यत्र॒ पूर्वे॑ साध्यास्सन्ति॑ दे॒वाः। ) ओं वैनतेयाय नमः कुण्डात् कुम्भे

नियोजयामि इति कुम्भे नियोज्य। अग्निमुद्वास्य। पटस्थं गरुडं प्रार्थ्य

महाबल! महाबाहो! वैनतेय! वयोधिप!।
सन्निधत्स्व पटे तुभ्यं नमः प्रणवमूर्तये।
कर्मणां सिद्धिमाहूत कुरुष्व विहगेश्वर!।
आहूतव्याः त्रयोलोकाः देवस्योत्सव-संपदि॥

ततः कुम्भस्थं गरुडं प्रार्थ्य

वाहनाय महाविष्णोः ताक्ष्र्यायामित तेजसे।
गरुडाय नमस्तुभ्यं सर्व सर्पेन्द्रमृत्यवे।
नमो नमस्ते पक्षीन्द्र! स्वाध्याय वपुषे नमः।
विहगेन्द्र! नमस्तेऽस्तु समुत्पाटितकल्पक।
आहृतामृत कुम्भाय जननी दास्यमोचने।
सुरासुरेन्द्रजयिने नागेन्द्राभरणायते।
यदाधारमिदं सर्वं तदाधारायते नमः।
पक्षौ यस्य बृहत्साम रथन्तरमपि द्वयम्।
अक्षिणीचापि गायत्री त्रिवृत्साम शिरस्मृतम्।
स्तोम आत्मा नमस्तस्मै वामदेव्याङ्ग सम्पदे।
नमः प्राणादि वायूनामीशानाय गरुत्मते।
दोषान् अपनयाखण्डान् गुणान् आवह सर्वशः।
विघ्नानि जहि सर्वाणि आत्मसात्कुरुमामपि॥

एवं स्तुत्वा। गरुडमूलमन्त्रं यथाशक्ति जप्त्वा। ध्वजपटं गन्ध

-पुष्पमालादिभिः अलङ्कृत्य। यथाभागमन्नं निवेद्य। नीराजयेत्॥

## भगवतः शयनाधिवासः

ध्वजप्रतिष्ठानन्तरं देवस्य उत्सवार्थं शयनाधिवासं कृत्वा। भगवत्सन्निधौ उत्सवबेर-शयनार्थं क्षौमचित्रवस्त्र -तूलिकारत्नकम्बलयुतं पर्यङ्कं कल्पयित्वा। कार्पास उपधानानि -सपाद् कण्डुकानि पर्यङ्के निधाय। आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य ----महोत्सवाङ्गं भगवतः शयनाधिवासं करिष्ये तदङ्गं रक्षाबन्धनकर्म करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पुण्याहजलेन शय्यां संप्रोक्ष्य। पर्यङ्के ओं अं अनन्ताय नमः इत्यावाह्य। गन्ध -पुष्प -धूप -दीपैः अभ्यर्च्य। ततः भगवन्तं संपूज्य। देवीभ्यां सह उत्सवकौतुकस्य शयनाधिवासार्थं रक्षाबन्धनं कृत्वा। तान् पर्यङ्के शाययित्वा। नीराज्य। प्रधान यागशालायाम् **उत्सवार्थं** पूर्ववत् अङ्कुरार्पणं कृत्वा। सन्निधौ अर्धरात्रिपूजां समाप्य। भगवत्स्मरणेन जागरेण निशां नीत्वा। प्रभाते सर्वालङ्कार संयुक्तः आचार्यः देवस्य प्रातर्नित्याराधनं कृत्वा। अधिवास रक्षासूत्रं विसृज्य। अनन्तरं ध्वजपटं यानमारोप्य। वाद्य -वेदघोष पुरस्सरं वीथिषु बलिदानपुरस्सरम् उत्सवबिम्बेन सह ध्वजपटं वीथिभ्रमणं कृत्वा। धामान्तः प्रविश्य। ध्वजस्तम्भसमीपे पटं संस्थाप्य।

## भगवतः उत्सवाङ्ग रक्षाबन्धनम्*1

ततःआचार्यः अर्धमण्डपे आसने उपविश्य। पवित्रं धृत्वा। प्राणानायम्य।

---

1) உத்ஸவாங்க ரக்ஷாபந்தனம் பல க்ஷேத்ரங்களில் ஸம்ஹிதைகளில் சொல்லப்பட்டபடி முதல்நாள் இரவே நடைபெறுகிறது.

श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य भगवतो वासुदेवस्य श्री भूमि नीला----नायिका समेत श्री----स्वामि सन्निधौ। राजराष्ट्राभिवृद्ध्यर्थं लोकक्षेमार्थं----वत्सर----मास----दिन महोत्सवकर्मणि प्रथमदिवसे रक्षाबन्धनकर्म करिष्ये तदङ्गं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -द्रव्यशुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पूर्ववत् भूतशुद्धिं कृत्वा। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि संप्रोक्ष्य। देवस्य पुरतः चतुरश्रं स्थण्डिलं गोमयेन अनुलिप्य। तत्र सुवर्णादि पात्रे खारिद्रोणतण्डुलवति षष्ठ्युत्तर क्रमुक तच्चतुर्गुण नागवल्लीदल तदर्ध -कदल्यादि फलयुते निष्कप्रमाण स्वर्णसूत्राणि अथवा सप्तभिः पञ्चभिः कृतानि क्षौममयानि कार्पासमयानि वा सूत्राणि निधाय। पुण्याहजलेण प्रोक्ष्य। दर्भपुञ्जैः रक्षासूत्रं संस्पृश्य। अपराजितमहामन्त्रं जप्त्वा। अस्य श्री अपराजित महामन्त्रस्य---- नमोऽस्तुते एवं जप्त्वा। ओं सहस्रार हुं फट् इति सप्तवारम् अभिमन्त्र्य। रक्षासूत्रेषु आधारादि पद्मान्तम् अभ्यर्च्य। धूपं समर्प्य। भगवच्छ्रीवत्सात् ओं श्रीं श्रियै नमः आगच्छ आगच्छ इति श्रियम् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदश्र्य। ओं श्राम् इत्यादि षडङ्गन्यासं कृत्वा। किरीट -कमल -वनमालमुद्राः प्रदश्र्य। अर्घ्यादिभिः अभ्यर्च्य। धूपदीपं समर्प्य। फलवर्ग ताम्बूलादीन् निवेद्य। नीराज्य। हस्तयोः अङ्गुष्ठानामिकाभ्यां रक्षासूत्रं गृहीत्वा। ओं नमो भगवते वासुदेवाय इति

चन्दनक्षोदेन अनुलिप्य। भगवत्समीपं गत्वा। देवम् अर्घ्यादिभिः अभ्यर्च्य। धूपदीपादिकं दत्त्वा।

भगवन्! देवदेवेश! भक्तवत्सल! माधव!।
महोत्सवाय लक्ष्मीश! करिष्ये कौतुकक्रियाम्॥
वासुदेव! जगद्योने! महोत्सवमनुत्तमम्।
तवाज्ञया करोम्यद्य करे मङ्गलसूत्रकम्।
बन्धयामि मयिप्रीत्या गृहाण कमलापते!॥

इति देवं विज्ञाप्य। सुमुहूर्ते जितन्ता स्तोत्र -वेद -वाद्यघोष-पुरस्सरम् ओं विश्वेत्ताते----बन्धवे इति मन्त्रेण -ओं नमो नारायणाय इति वा मूलबेरस्य दक्षिणहस्ते रक्षासूत्रं बद्ध्वा। श्री भू देव्योश्च ओं श्रीं श्रियै नमः ओं ह्रीं भूम्यै नमः इति वामहस्ते बद्ध्वा। एवं श्री भू सहितेन उत्सव - बलिबिम्बानाञ्च रक्षां बन्धयित्वा। आचार्यस्य दक्षिणे हस्ते रक्षाबन्धनं कृत्वा। आचार्यः देवस्य रक्षां स्पृष्ट्वा। ओं वीर्याय अस्त्राय फट् इति अस्त्रमन्त्रम् अष्टवारं*1 जप्त्वा। ओं योब्रह्मा ब्रह्मण उज्जहार----अक्षितम् इति घृतसूक्तेन रक्षाम् अभिमन्त्र्य। ओं बृहत्सामक्षत्रभृत्----सगरेन रक्षा इति मन्त्रेण धूपपात्र-भस्मना रक्षां कृत्वा। देवं सम्पूज्य। अपूपं निवेद्य। नीराज्य। रक्षाबन्धन मुहूर्तः सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु - सुमुहूर्तोऽस्तु। इत्युच्चार्य। तीर्थावसानिकं सान्निध्यं प्रार्थ्य।

---

1) अष्टोत्तरशतवारम्

## ध्वजारोहणम्

श्री भूमिभ्यां सह उत्सवकौतुकं यानमारोप्य। षोडशस्तम्भयुत ध्वजस्तम्भ -मण्डपं नीत्वा। तत्र मध्ये देवं संस्थाप्य। ध्वजप्रतिष्ठा-यागशालायां द्वार -तोरण -पालिकादीन् उद्वास्य। सोपकुम्भाष्टकं गरुडमहाकुम्भम् उत्थाप्य। अविच्छिन्न करकवारिधारया वेद-वाद्यघोषेण सह धामं प्रदक्षिणीकृत्य। ध्वजस्तम्भमण्डपे वेदिकायां पूर्ववत् गरुडकुम्भनवकं संस्थाप्य। ततः आचार्यः भगवत्समीपङ्गत्वा। प्रणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य----महोत्सवकर्मणि ध्वजारोहणकर्म करिष्ये तदङ्गं स्तम्भशुद्ध्यर्थं -मण्डपादीनां शुद्ध्यर्थं वासुदेव-पुण्याहवाचनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। वासुदेवपुण्याहं वाचयित्वा। स्तम्भं -मण्डपञ्च संप्रोक्ष्य। ततः देवम् अर्घ्यादि नैवेद्यान्तं सम्पूज्य। नीराज्य। ध्वजस्तम्भकौतुके ध्वजं नियोज्य।

ओंतथ्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि। धियोयो नः प्रचोदयात्।

इति करकवारिणा ध्वजपटं परिषिच्य। (गरुडकुम्भं यथाविधि अर्घ्यादिभिः सम्पूज्य। नीराज्य।)

## पटस्थ गरुडपूजा

ध्वजपटे आधारादि पद्मान्तम् अभ्यर्च्य( ओं ह्रीं आधारशक्त्यै नमः---- ओं अव्यक्तपद्माय नमः)। तत्तन्मन्त्रेण धूपं समर्प्य। मध्यकुम्भजलेन प्रोक्ष्य। तज्जलेन क्षिप ओं स्वाहा आगच्छ आगच्छ इति पटे आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य।

कुम्भस्थं गरुडं पटे विचिन्त्य। ओं क्षां इत्यादि षडङ्गन्यासं कृत्वा। किरीट -कुण्डल-वनमाला-चक्र-शङ्ख-पद्म-गदा-अनन्त-गरुडमुद्राः प्रदर्श्य। उपकुम्भाष्टकैः क्रमयोगेन अष्टनागानां तत्तन्नाम्ना संप्रोक्ष्य।

| | |
|---|---|
| ओं अनन्ताय नमः | ओं पद्माय नमः |
| ओं वासुकिने नमः | ओं महापद्माय नमः |
| ओं तक्षकाय नमः | ओं शङ्खाय नमः |
| ओं कार्कोटकाय नमः | ओं गुलिकाय नमः |

इत्यावाह्य। सर्वत्र आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। किरीट -चक्र -शङ्ख -अनन्तमुद्राः प्रदर्श्य। ततः प्राणप्रतिष्ठां कुर्यात्। प्रणवेन ब्रह्मरन्ध्रं पिधाय

स्वामिन्! सर्वजगन्नाथ! यावत्तीर्थावसानकम्।
तावत्त्वं भक्तिभावेन ध्वजेऽस्मिन् सन्निधिं कुरु॥ इति प्रार्थ्य।

ओं वैनतेयाय नमः -अनन्तादिभ्यो नमः अर्घ्यं समर्पयामि----पृथुकानि -अपूपानि -मोदकानि -मुद्गान्नञ्च निवेदयामि। नालिकेरजलं निवेदयामि। ओं तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात्
ओं वैनतेयाय नमः -अनन्तादिभ्यो नमः नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि। एवं पूजयित्वा। ततः मड्डुकवाद्य पुरस्सरं गरुडतालं पठित्वा*1।

1) கருடதாளம் சோழ-பாண்டிய தேசங்களில் மட்டுமே அநுஷ்டானத்தில் உள்ளது. மற்ற தேசங்களில் இல்லை.

## गरुडतालः

अथ गरुडतालमिहोच्यते।

ओं गरुडवाहन -परशुधारण -चक्र -पाशधरम्।
स्फटिकसन्निभ -मकरकुण्डल -कनकमकुटधरम्।
विहगपरिभृड -महिविभूषणमसुर -वैरिरथम्।
अलिकुलालक -कुटिलकोमलमनिल -तुल्यगतिम्।
भ्रुकुटिभीषण -करतलालक -कनकलोचनकम्।
कनककल्पित -खचितरत्न -मकुटकोटिधरम्।
सकलपशुपति -हरितहरहरि -सर्पसंहरणम्।

अनन्तकटकं वासुकिसूत्रं तक्षककटि-बन्धनम्। हारसु कार्कोटकम्। पद्मं दक्षिण-कर्णस्थम्। वामे कर्णे महापद्मम्। शङ्ख-फणामणि-रत्न-मरीचि-विराजितशेखर-गुलिकभुजम्। कमल-भव-वन्दितं स्कन्द-बृन्दोपमम्। कनकमयकुण्डलं कञ्ज-पुञ्जाननम्। कर-चरणकिङ्किणी-कम्बुकोरम्बरं शिख -चरितमन्दिरं चित्तमम्भोजितम्। अम्भोजलधि-कारणम्। मङ्गलं पङ्कजं तेजुपति संहरत्यञ्जनत्यम्बुजे। झण झण झङ्कृत-किङ्किणी हण हण हङ्कृत हुङ्करणम्। विनतातनुजं कनकाद्रिनिभम्। भुजङ्गकुल-भीषणं विहङ्गकुल -भूषणम्। बृहत्पक्षविपक्षं गरुत्मन्तं नमस्येऽहम्। हरिवाहनं हरिवाहनं हरिकेतनं हरिकेतनम्। बन्धय बन्धय -प्रकट प्रकट -प्रमथन प्रमथन -ग्रहभुग् ग्रहभुग् -सङ्ग्रह सङ्ग्रह। चञ्चद्विञ्जुर चुञ्चु-विधारित पुञ्जत्सिञ्जत्-फणिराविकम्। कणिका-कपटिम्। रिङ्गश्लेष-फणामणि-

किङ्किणी-मञ्जुल कञ्जुकर तोम् तोम्। करणोरुहभीषण-नादकरम्। श्रीमद्गरुडं गरुडं वरदं वरदं विद्युत्-प्रभम्। भक्तप्रियम्। मुखोन्नत-नासोन्नतम्। सव्यवाहनमुख्यं मुख्यं नीलाम्बरधरम्। नागाभरणं मणिगणरुचिर किरीटाभरणम्। पादनूपुर-किङ्किणीघोषं सामगायति पक्षयुग्मम्। वेद-वेद्यतनुविहरति-पक्षम्। सकलशत्रु-भीषण-पक्षयुगलम्। शत्रु-वास्याननम्। बृह्मादि-वन्दितं स्कन्दवहचक्रिणम्। सकलदेव-लोकानन्दम्। सकल-सृष्टिपतिं संहारकारणम्। कमलसदृशाननम्। झल झलन किङ्किणी झर्झटं धोम् धोम् तत्तत्। झल झलन किङ्किणी झर्झटं धोम् धोम्। पक्षीशस्य गरुडतालम्। मध्यमस्वरम्। गौलरागम्। इति राग - तालादीन् श्रावयित्वा। ओं वैनतेयाय नमः समस्तोपचारान् समर्पयामि। नीराजनं समर्पयामि। एवं संपूज्य। तदनु अस्य देवदेवस्य भगवतो-वासुदेवस्य श्री भूमि नीला----नायिका समेत श्री----स्वामि सन्निधौ राजराष्ट्राभिवृद्ध्यर्थं लोकक्षेमार्थं----वत्सर----मास----दिन महोत्सव कर्मणि ध्वजारोहण मुहूर्तः सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु - सुमुहूर्तोऽस्तु। इत्युच्चार्य। वाद्यघोषेण सह

ओं सुपर्णोऽसिगरुत्मान् त्रिवृत्ते शिरोगायत्रञ्चक्षुस्स्तोम आत्मा सामतेतनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छन्छन्दाꣳस्यङ्गानि धिष्णियाश्शफा यजूꣳषि नाम। सुपर्णोऽसिगरुत्मान् दिवङ्गच्छसुवः पत। इति मन्त्रेण स्तम्भे ध्वजमारोप्य। स्तम्भमूले ध्वजकौतुकं बद्ध्वा। दर्भैः आच्छाद्य। गरुड कुम्भजलम् -इन्द्रादि अष्टकुम्भ जलञ्च स्तम्भस्य

परितः सेचयित्वा। वस्त्र- गन्ध- पुष्पमाल्यादिभिः स्तम्भम् अलङ्कृत्य। नीराज्य। यावदुत्सवावभृथं ध्वजोदरे गरुडस्य स्थितिं प्रार्थ्य।

पक्षीन्द्र! पक्षविक्षेप! तरङ्गानिल सम्पद!।
निरस्तासुरसन्नाह! समरे शत्रुसूदन!।
सन्निधत्स्व पटे यावदुत्सवावभृथान्तिमम्॥ इति प्रार्थ्य
अस्माद्दिनात्समारभ्य यावत्तीर्थ-दिनान्तिमम्।
सन्निधिं कुरु पक्षीन्द्र! राज्ञो जनपदस्य च।
ग्रामस्य यजमानस्य वैष्णवानां विशेषतः।
तुष्टये पुष्टये चैव सर्वशत्रुक्षयाय च।
अपमृत्युजयार्थाय वैनतेय! प्रसीद ओं॥

इति गाथया गरुडोपरि पुष्पाञ्जलिम् वितीर्य। उत्सवसन्निधावेव पुष्पाञ्जलिम् समादाय। देवं सम्पूज्य। यथाभागमन्नं निवेद्य। नीराज्य।

ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया।
तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा॥
ओं अच्युत! जगन्नाथ! मन्त्रमूर्तें! जनार्दन!।
रक्षमां पुण्डरीकाक्ष! क्षमस्वाज! प्रसीद ओं॥

इति भगवन्तं विज्ञाप्य। ध्वजसमीपे नक्तन्दिवम् अनिर्वाणं दीपम् आरोप्य। ध्वजारोहणात् अवरोहणान्तं प्रतिदिनं ध्वजस्थं गरुडं द्विकालं त्रिकालं वा सम्पूजयेत्॥

ततः उत्सवकौतुकं यानमारोप्य। धामप्रदक्षिणं कृत्वा। घटदीपं समर्प्य। नीराज्य। आदर्शमण्डपं नीत्वा। तत्र देवं संस्थाप्य। सम्पूजयेत्॥

## यागशाला पूजा

तदनु यागशालां प्रविश्य। मध्यवेदिकायां पञ्चभारं शालीं तदर्धं तण्डुलं तदर्धं तिलञ्च उपर्युपरि वस्त्राच्छादन क्रमेण विन्यस्य। तिलोपरि पद्ममालिख्य। तदुपरि दर्भानास्तीर्य। तन्मध्ये ससूत्रवेष्टितं महाकुम्भं तस्य परितः उपकुम्भाष्टकञ्च संस्थाप्य। महाकुम्भस्य वायव्ये सलक्षणं करकं संस्थाप्य। उपकुम्भ अन्तरालेषु श्रीवत्स -पूर्णकुम्भ -भेरी -दर्पण -मत्सययुग्म -शङ्ख -चक्र -गरुड चित्रपलकानि अष्टमङ्गलानि क्रमेण संस्थाप्य। मध्यकुम्भे षड्विंशद्दर्भकृत कूर्चं विन्यस्य। उपकुम्भेषु पञ्चदर्भकृत कूर्चं -करके सप्तदर्भकृत-कूर्चं च विन्यस्य। सरत्न-नालिकेर अश्वत्थपल्लवापिधानं कृत्वा। वस्त्र-गन्धाक्षत-पुष्पमाल्यादिभिः अलङ्कृत्य। परिस्तीर्य। यागशालायाम् आग्नेये सलक्षणं चक्राब्जमण्डलं वर्तयित्वा। पूर्ववत् द्वार-तोरण-कुम्भानि संस्थाप्य। तत्र वायव्ये भद्रासने बलिबेरं(यागबेरं) -सुदर्शनम् -अन्नमूर्तिञ्च संस्थाप्य। मध्यवेदिकायां पूर्वादि दिक्षु चतुरश्र -चाप -वृत्त -त्रिकोण कुण्डानि -ऐशान्ये चतुरश्र कुण्डञ्च योनि -पद्मयुक्तं -त्रिमेखलायुतं कल्पयित्वा। अथवा एककुण्डपक्षे पूर्वे चतुरश्रकुण्डमेव कल्पयित्वा। दिग्ध्वज-तोरण-वितान-मालादिभिः यागशालाम् अलङ्कृत्य। पुण्याहजलेन यागशालां संप्रोक्ष्य। आचार्यः पवित्रं धृत्वा। स्वगुरुं प्रार्थ्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं

श्रीगोविन्द----महोत्सवकर्मणि प्रथमोत्सवे यागशालायां चतुस्थानार्चनकर्म करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याह जलेन ओं सहस्रार हुं फट् इति महाकुम्भादीन् मण्डलञ्च संप्रोक्ष्य। महाकुम्भादीनां ओं यं वायवे नमः शोषयामि। ओं रं अग्नये नमः दाहयामि। ओं वं वरुणाय नमः प्लावयामि इति शोषणादिभिः संशोध्य। ओं सुं सुरभ्यै नमः इति सुरभिमुद्रां प्रदर्श्य। कुम्भानां प्रत्येकम् ओं ह्रीं आधारशक्त्यै नमः----ओं भद्रासनाय नमः इति आधारादीन् अभ्यर्च्य। तत्तन्मन्त्रेण धूपं समर्प्य। पूर्ववत् आवाहनपात्रम् अद्भिरापूर्य। गन्धाक्षतपुष्पान् निक्षिप्य। वामहस्ते निधाय दक्षिणहस्तेन पिधाय। नासिकाग्रान्तमुद्धृत्य। मूलबेरात् भगवन्तं ध्यात्वा।

ओं परमधामावस्थित मदनुग्रहकाम्य योद्यतावतार इहाभिमत सिद्धिद मन्त्रशरीर एह्येहि भगवन् ओं नमो भगवते वासुदेवाय आगच्छ आगच्छ आवाहयामि। इति महाकुम्भे मूलबेरादावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण स्थितिन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य।

स्वामिन्! सर्व-जगन्नाथ! यावत्तीर्थावसानकम्।
तावत्वं प्रीतिभावेन कुम्भेऽस्मिन् सन्निधिं कुरु॥ इति प्रार्थ्य।

उपकुम्भेषु पूर्वे - ओं नमो भगवते वासुदेवाय आगच्छ आगच्छ।

दक्षिणे - ओं नमो भगवते सङ्कर्षणाय स्वाहा आगच्छ आगच्छ।

पश्चिमे - ओं नमो भगवते प्रद्युम्नाय आगच्छ आगच्छ।

उत्तरे - ओं नमो भगवते अनिरुद्धाय आगच्छ आगच्छ।

आग्नेये - ओं नमो भगवते पुरुषात्मने आगच्छ आगच्छ। (हां)

नैर्ऋते - ओं नमो भगवते सत्यात्मने आगच्छ आगच्छ। (ह्सीं)

वायव्ये - ओं नमो भगवते अच्युतात्मने आगच्छ आगच्छ। (त्रीं)

ऐशान्ये - ओं नमो भगवते अनन्तात्मने आगच्छ आगच्छ। (हूं)

इत्यावाह्य। सर्वत्र आवाहनादि षण्मुद्राः प्रदर्श्य। वासुदेवादीनाम्

ओं कृद्धोल्काय स्वाहा हृदयाय नमः इत्यादि षडङ्गन्यासं कृत्वा।

पुरुषादीनां तत्तद्बीजेन षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य।

करके - ओं सहस्रार हुं फट् - सहस्रादित्यभास्वरं सहस्रारं

सहस्रज्ज्वालावृतं सुदर्शनम् आवाहयामि। इति सुदर्शनम् आवाह्य।

आवाहनादि षण्मुद्राः प्रदर्श्य। ओं आचक्राय स्वाहेति षडङ्गन्यासं कृत्वा।

किरीटादि मुद्राः प्रदर्श्य। अष्टमङ्गलेषु

| | |
|---|---|
| ओं श्रीवत्सायै नमः | ओं मत्स्ययुग्माय नमः |
| ओं पूर्णकुम्भाय नमः | ओं शङ्खाय नमः |
| ओं भेर्यै नमः | ओं चक्राय नमः |
| ओं दर्पणमण्डलाय नमः | ओं गरुडाय नमः |

इत्यभ्यर्च्य। कुम्भस्थं मन्त्रासन-युक्तवत् अर्घ्यादिभिः सम्पूज्य। महाकुम्भे

श्रीवत्सादि परिवारार्चनं कृत्त्वा। स्नानासने सर्वोपचारान् कृत्वा।

प्रोक्षणमार्गेन स्नानमाचरेत्। शयनासन-रहितेन सर्वान् विधाय।

यथाभागं चतुर्विधान्नं निवेद्य। नीराज्य।

## चक्राब्जमण्डलाराधनम्

तदनु मण्डल समीपङ्गत्वा। आराधनं कृत्वा। कर्णिकायां मन्त्राध्वानम् अर्चयेत्।

## मन्त्राध्वा

ओं नमो भगवते वासुदेवाय

ओं नमो नारायणाय

ओं विद्युल्काय स्वाहा बलाय कवचाय हुं

(भगवतो बलेन भगवतो वीर्येण भगवतस्तेजसा भगवतः कर्मणा भगवतः कर्मकरिष्यामि।)

भगवान् पवित्रं वासुदेवः पवित्रं शतधारं सहस्रधारम् अपरिमितधारम् अच्छिद्रम् अक्लिष्टम् अक्षय्यम् अनन्तम् अरिष्टम् अच्युतं परमं पवित्रं भगवान् वासुदेवः पुनातु

ओं नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्

ओं नमो भगवते सुदर्शनाय चक्रराजाय ज्वाला मालिने हुं फट् स्वाहा

ओं नमो भगवते वासुदेवाय

ओं नमो भगवते सङ्कर्षणाय स्वाहा

ओं नमो भगवते प्रद्युम्नाय

ओं नमो भगवते अनिरुद्धाय

ओं नमो भगवते नारसिह्माय

ओं नमो भगवते रामाय हुं फट्

ओं क्रौं कृष्णाय नमः

ओं वराहाय नारायणाय नमः इत्यभ्यर्च्य। केसरेषु तत्त्वाध्वानम् अर्चयेत्

तत्वाध्वा

| | |
|---|---|
| ओं जीव-तत्त्वात्मने नमः | ओं अहङ्कार-तत्त्वात्मने नमः |
| ओं प्राण-तत्त्वात्मने नमः | ओं मनस्तत्त्वात्मने नमः |
| ओं बुद्धि-तत्त्वात्मने नमः | |

| | |
|---|---|
| ओं शब्द्-तन्मात्रात्मने नमः | ओं रस-तन्मात्रात्मने नमः |
| ओं स्पर्श-तन्मात्रात्मने नमः | ओं गन्धतन्मात्रात्मने नमः |
| ओं रूप-तन्मात्रात्मने नमः | |

| | |
|---|---|
| ओं श्रोत्रेन्द्रियात्मने नमः | ओं जिह्वेन्द्रियात्मने नमः |
| ओं त्वगिन्द्रियात्मने नमः | ओं घ्राणेन्द्रियात्मने नमः |
| ओं चक्षुरिन्द्रियात्मने नमः | |

| | |
|---|---|
| ओं वागिन्द्रियात्मने नमः | ओं पाय्विन्द्रियात्मने नमः |
| ओं पाणीन्द्रियात्मने नमः | ओं उपस्थेन्द्रियात्मने नमः |
| ओं पादेन्द्रियात्मने नमः | |

| | |
|---|---|
| ओं पृथिवी-तत्त्वात्मने नमः | ओं वायु-तत्त्वात्मने नमः |
| ओं अप्-तत्त्वात्मने नमः | ओं आकाश-तत्त्वात्मने नमः |
| ओं अग्नि-तत्त्वात्मने नमः | |

| | |
|---|---|
| ओं अर्यम्णे नमः | ओं वैवस्वते नमः |
| ओं धात्रे नमः | ओं पूष्णे नमः |
| ओं विधात्रे नमः | ओं सवित्रे नमः |
| ओं मित्राय नमः | ओं रवये नमः |
| ओं वरुणाय नमः | ओं त्वष्ट्रे नमः |
| ओं भगाय नमः | ओं विष्णवे नमः |

| | |
|---|---|
| ओं वीरभद्राय नमः | ओं हरये नमः |
| ओं शम्भवे नमः | ओं स्थाणवे नमः |
| ओं गिरीशाय नमः | ओं भवाय नमः |
| ओं शर्वाय नमः | ओं शिवाय नमः |
| ओं उमापतये नमः | ओं शूलाय नमः |
| ओं ईशानाय नमः | |

इत्यभ्यर्च्य। दलेषु वर्णाध्वानम् अर्चयेत्

# वर्णाध्वा

| | |
|---|---|
| ओं नमःपराय क-काराय नमः | ओं नमःपराय ध-काराय नमः |
| ओं नमःपराय ख-काराय नमः | ओं नमःपराय न-काराय नमः |
| ओं नमःपराय ग-काराय नमः | ओं नमःपराय प-काराय नमः |
| ओं  नमःपराय घ-काराय नमः | ओं नमःपराय फ-काराय नमः |
| ओं नमःपराय ङ-काराय नमः | ओं नमःपराय ब-काराय नमः |
| ओं नमःपराय च-काराय नमः | ओं नमःपराय भ-काराय नमः |
| ओं नमःपराय छ-काराय नमः | ओं नमःपराय म-काराय नमः |
| ओं नमःपराय ज-काराय नमः | ओं नमःपराय य-काराय नमः |
| ओं नमःपराय झ-काराय नमः | ओं नमःपराय र-काराय नमः |
| ओं नमःपराय ञ-काराय नमः | ओं नमःपराय ल-काराय नमः |
| ओं नमःपराय ट-काराय नमः | ओं नमःपराय व-काराय नमः |
| ओं नमःपराय ठ-काराय नमः | ओं नमःपराय श-काराय नमः |
| ओं नमःपराय ड-काराय नमः | ओं नमःपराय ष-काराय नमः |
| ओं नमःपराय ढ-काराय नमः | ओं नमःपराय स-काराय नमः |
| ओं नमःपराय ण-काराय नमः | ओं नमःपराय ह्-काराय नमः |
| ओं नमःपराय त-काराय नमः | ओं नमःपराय ळ-काराय नमः |
| ओं नमःपराय थ-काराय नमः | ओं नमःपराय क्ष-काराय नमः |
| ओं नमःपराय द्-काराय नमः | |

इत्यभ्यर्च्य। नाभिभागे पदाध्वानम् अर्चयेत्

<u>पदाध्वा</u>

| | |
|---|---|
| ओं केशवाय नमः | ओं त्रिविक्रमाय नमः |
| ओं नारायणाय नमः | ओं वामानाय नमः |
| ओं माधवाय नमः | ओं श्रीधराय नमः |
| ओं गोविन्दाय नमः | ओं हृषीकेशाय नमः |
| ओं विष्णवे नमः | ओं पद्मनाभाय नमः |
| ओं मधुसूदनाय नमः | ओं दामोदराय नमः |

| | |
|---|---|
| ओं अत्रये नमः | ओं आङ्गीरसाय नमः |
| ओं भृगवे नमः | ओं विश्वामित्राय नमः |
| ओं कुत्साय नमः | ओं काश्यपाय नमः |
| ओं वसिष्ठाय नमः | |

| | |
|---|---|
| प्राच्यां दिशी - ओं वराहाय नमः | पश्चिमे - ओं श्रीधराय नमः |
| दक्षिणे - ओं नारसिह्माय नमः | उत्तरे - ओं हयग्रीवाय नमः |

| | |
|---|---|
| ओं भार्गवरामाय नमः | ओं वामनाय नमः |
| ओं राघवाय नमः | ओं वासुदेवाय नमः |

| | |
|---|---|
| ओं कुमुदाय नमः | ओं शङ्ककर्णाय नमः |
| ओं कुमुदाक्षाय नमः | ओं सर्वनेत्राय नमः |
| ओं पुण्डरीकाय नमः | ओं सुमुखाय नमः |
| ओं वामनाय नमः | ओं सुप्रतिष्ठाय नमः |

| | |
|---|---|
| ओं जयाय नमः | ओं भद्राय नमः |
| ओं विजयाय नमः | ओं सुभद्राय नमः |
| ओं चण्डाय नमः | ओं धात्रे नमः |
| ओं प्रचण्डाय नमः | ओं विधात्रे नमः |

| | |
|---|---|
| ओं सूर्याय नमः | ओं षण्मुखाय नमः |
| ओं चन्द्रमसे नमः | ओं दुर्गायै नमः |
| ओं कामाय नमः | ओं कुबेराय नमः |
| ओं ब्रह्मणे नमः | ओं शङ्कराय नमः |
| ओं विनायकाय नमः | |

| | |
|---|---|
| ओं विमलायै नमः | ओं प्रह्व्यै नमः |
| ओं उत्कर्षिण्यै नमः | ओं सत्यायै नमः |
| ओं ज्ञानायै नमः | ओं ईशानायै नमः |
| ओं क्रियात्मिकायै नमः | ओं अनुग्रहायै नमः |
| ओं योगिन्यै नमः | |

| | |
|---|---|
| ओं आदित्याय नमः | ओं शुक्राय नमः |
| ओं सोमाय नमः | ओं शनैश्चराय नमः |
| ओं अङ्गारकाय नमः | ओं राहवे नमः |
| ओं बुधाय नमः | ओं केतवे नमः |
| ओं बृहस्पतये नमः | |

| | |
|---|---|
| ओं लक्ष्म्यै नमः | ओं पुष्ट्यै नमः |
| ओं सरस्वत्यै नमः | ओं क्रियायै नमः |
| ओं रत्यै नमः | ओं कीर्त्यै नमः |
| ओं शान्त्यै नमः | ओं वाराह्यै नमः |
| ओं तुष्ट्यै नमः | |

इत्यभ्यर्च्य। अरेषु कलाध्वानम् अर्चयेत्

<u>कलाध्वा</u>

| | | |
|---|---|---|
| ओं अ काराय नमः | ओं ऋ काराय नमः | ओं ओ काराय नमः |
| ओं आ काराय नमः | ओं ॠ काराय नमः | ओं औ काराय नमः |
| ओं इ काराय नमः | ओं ऌ काराय नमः | ओं अं काराय नमः |
| ओं ई काराय नमः | ओं ॡ काराय नमः | ओं अः काराय नमः |
| ओं उ काराय नमः | ओं ए काराय नमः | |
| ओं ऊ काराय नमः | ओं ऐ काराय नमः | |

इत्यभ्यर्च्य। नेमिभागे भुवनाध्वानम् अर्चयेत्

## भुवनाध्वा

| | |
|---|---|
| ओं अतलाय नमः | ओं भूलोकाय नमः |
| ओं वितलाय नमः | ओं भुवर्लोकाय नमः |
| ओं सुतलाय नमः | ओं सुवर्लोकाय नमः |
| ओं रसातलाय नमः | ओं महर्लोकाय नमः |
| ओं तलातलाय नमः | ओं जनोलोकाय नमः |
| ओं महातलाय नमः | ओं तपोलोकाय नमः |
| ओं पातालाय नमः | ओं सत्यलोकाय नमः |

| | |
|---|---|
| ओं गन्धर्व-लोकाय नमः | ओं रुद्रलोकाय नमः |
| ओं यक्षलोकाय नमः | ओं देवलोकाय नमः |
| ओं अप्सरलोकाय नमः | ओं ब्रह्मलोकाय नमः |
| ओं किन्नरलोकाय नमः | ओं शिवलोकाय नमः |
| ओं यमलोकाय नमः | ओं विष्णुलोकाय नमः |
| ओं निर्ऋति-लोकाय नमः | ओं सदाविष्णुलोकाय नमः |
| ओं वरुणलोकाय नमः | |

| | |
|---|---|
| ओं कुम्भीपाकाय नमः | ओं सन्निमालाय नमः |
| ओं महारौरवाय नमः | ओं शीतलजलाय नमः |
| ओं क्षुरालयाय नमः | ओं उष्णजलाय नमः |

| | |
|---|---|
| ओं सन्तपनाय नमः | ओं धीयन्त्राय नमः |
| ओं तप्त लोकाय नमः | ओं धनुर्भिन्नाय नमः |
| ओं शाल्मलिने नमः | ओं शुद्धनिरयाय नमः |

इत्यभ्यर्च्य। बिन्दुषु- द्वादशाक्षराणि अर्चयित्वा।

| | | | |
|---|---|---|---|
| ओं ओं नमः | ओं भं नमः | ओं तें नमः | ओं दें नमः |
| ओं नं नमः | ओं गं नमः | ओं वां नमः | ओं वां नमः |
| ओं मों नमः | ओं वं नमः | ओं सुं नमः | ओं यं नमः |

कर्णिकायाम् ओं ह्रीं आधारशक्त्यै नमः----ओं भद्रासनाय नमः

इत्यभ्यर्च्य। तत्तन्मन्त्रेण धूपं समर्प्य।

## ध्यानम्

चक्राब्ज-कर्णिका-मध्ये सहस्रफणमण्डले।
शेषाहि-भोगि-पीठे तु सृष्टिस्थित्यन्त मुक्तिदम्।
मयूर-कण्ठवच्छ्यामम् एकवक्रं चतुर्भुजम्।
शङ्ख-चक्र-गदा-शार्ङ्ग नन्दकादिभिरुज्ज्वलम्।
श्रीवत्सस्फुरितोरस्कं वनमाला-विभूषितम्।
पीताम्बरधरं सौम्यं जगतामादि-कारणम्।
परवासुदेवादुद्भूतं श्री-भूमि-सहितं विभुम्।
वासुदेवं सुखासीनं ध्यायेदादित्यमण्डलात्॥ एवं ध्यात्वा।

ओं नमो भगवते वासुदेवाय आगच्छ आगच्छ आवाहयामि। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण

स्थितिन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। अर्घ्यादिभिरभ्यर्च्य।

धूपंदीपं समर्प्य। कर्णिकायाम् - ओं परमात्मने नमः। केसरेषु

| | |
|---|---|
| ओं लक्ष्म्यै नमः | ओं प्रीत्यै नमः |
| ओं सरस्वत्यै नमः | ओं कीर्त्यै नमः |
| ओं रत्यै नमः | ओं पुष्ट्यै नमः |
| ओं शान्त्यै नमः | ओं तुष्ट्यै नमः |

दल भूमिषु

| | | |
|---|---|---|
| ओं श्रीवत्सायै नमः | ओं विमलायै नमः | ओं सत्यायै नमः |
| ओं वनमालायै नमः | ओं सृष्ट्यै नमः | ओं ऐशान्यै नमः |
| ओं योगमायायै नमः | ओं उत्कर्षिण्यै नमः | ओं अनुकम्पायै नमः |
| ओं वैष्णव्यै नमः | ओं प्रज्ञायै नमः | ओं पितामह्यै नमः |

दलस्य परितः

| | |
|---|---|
| ओं व्याप्त्यै नमः | ओं विद्यायै नमः |
| ओं कान्त्यै नमः | ओं जयायै नमः |
| ओं तृप्त्यै नमः | ओं क्षमायै नमः |
| ओं श्रद्धायै नमः | ओं शान्त्यै नमः |

प्रथमनाभौ -ओं विष्णवे नमः

द्वितीयनाभौ -ओं ब्रह्मणे नमः

तृतीयनाभौ -ओं रुद्राय नमः

द्वादश अरेषु

| | |
|---|---|
| ओं विष्णवे नमः | ओं पद्मनाभाय नमः |
| ओं मधुसूदनाय नमः | ओं दामोदराय नमः |
| ओं त्रिविक्रमाय नमः | ओं केशवाय नमः |
| ओं वामनाय नमः | ओं नारायणाय नमः |
| ओं श्रीधराय नमः | ओं माधवाय नमः |
| ओं हृषीकेशाय नमः | ओं गोविन्दाय नमः |

अरान्त वलये

| | |
|---|---|
| ओं मत्स्याय नमः | ओं परशुरामाय नमः |
| ओं कूर्माय नमः | ओं दशरथ रामाय नमः |
| ओं वराहाय नमः | ओं बलरामाय नमः |
| ओं नारसिंह्माय नमः | ओं कृष्णाय नमः |
| ओं वामनाय नमः | ओं कल्किने नमः |

प्रथम-नेमिवलये

| | |
|---|---|
| ओं शङ्खिने नमः | ओं पद्मिने नमः |
| ओं चक्रिणे नमः | ओं मुसलिने नमः |
| ओं गदिने नमः | ओं शार्ङ्गिणे नमः |
| ओं खड्गिने नमः | ओं वनमालिने नमः |

आग्नेयादि पीठ कोणेषु

| | |
|---|---|
| ओं वराहाय नमः | ओं अनन्ताय नमः |
| ओं नारसिह्माय नमः | ओं हयग्रीवाय नमः |

लता वीथिषु -ओं इन्द्राय नमः----ओं ईशानाय नमः। द्वार चतुर्षु-

| | |
|---|---|
| ओं चण्डाय नमः | ओं जयाय नमः |
| ओं प्रचण्डाय नमः | ओं विजयाय नमः |
| ओं धात्रे नमः | ओं भद्राय नमः |
| ओं विधात्रे नमः | ओं सुभद्राय नमः |

वीथ्याम् ऐशान्ये -ओं विष्वक्सेनाय नमः

प्राङ्मुखे -ओं वैनतेयाय नमः

दक्षिणे -ओं पद्माय नमः

पश्चिमे -ओं गदायै नमः

उत्तरे -ओं शङ्खाय नमः इत्यावाह्याभ्यर्च्य। सर्वेभ्यः अर्घ्यादिभिः संपूज्य। गन्ध-पुष्प-धूप-दीपैः अभ्यर्च्य। यथाभागं चतुर्विधमन्नं निवेद्य। नीराज्य। ततः बलिबेर समीपङ्गत्वा। बलिबेरं -सुदर्शनम् -अन्नमूर्तिञ्च संपूज्य। बलिबेरं सुदर्शनञ्च तत्तन्मन्त्रेण अभ्यर्च्य। अन्नमूर्तिम्

ओं अन्नाधिपतये स्वाहा आगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। ओं ह्राम् इत्यादि षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। सर्वेभ्यः अर्घ्यपाद्यादि उपचारैः यथाविधि पूजयित्वा। यथाभागं चतुर्विधमन्नं निवेद्य। नीराजयेत्॥

## अथ होमः

## यौवनाग्नि उत्पादनम्

आचार्यः प्राङ्मुखः आसने उपविश्य। प्राणानायम्य। अद्यपूर्वोक्त एवङ्गुण सकलविशेषण विशिष्टायाम् अस्यां वर्तमानायां----शुभतिथौ श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य----महोत्सवकर्मणि प्रथमदिवसे यागशालायां होमार्थं सूर्यकान्ताश्मना (दर्पणं) यौवनाग्निम् उत्पादयामि इति सङ्कल्प्य। अप उपस्पृश्य। आत्मनः पुरतः स्थालिकां विन्यस्य। तस्यां शुष्ककाष्ठ -कार्पास -दर्भपुञ्जैः मिश्रितानि -अग्नि उत्पादन द्रव्याणि निक्षिप्य। पुण्याहजलेन सूर्यकान्त-दर्पणं स्थालीञ्च संप्रोक्ष्य। ओं लक्ष्मीनारायणाभ्यां नमः इति दर्पणं पूजयित्वा। गन्धादिभिः अभ्यर्च्य। सूर्यकिरणात् दर्पणमुखेन स्थाल्यां काष्ठेषु अग्निम् उद्दीपयेत्॥

### पञ्चकुण्ड पक्षः

पुण्याहजलेन अग्निं संप्रोक्ष्य। पञ्चकुण्ड पक्षे पश्चिमे गार्हपत्याग्निकुण्डे उल्लेखनान्तं कुण्डसंस्कारं कृत्वा। अग्निं निक्षिप्य। मुखान्तं हुत्वा। यौवनाग्निं ध्यात्वा। वैष्णवीकरणान्तं हुत्वा। इतरकुण्डेषु कुण्डसंस्कारं कृत्वा। गार्हपत्यात् अग्निं विकीर्य। सप्तजिह्वाहवनं कृत्वा। अग्निपूर्णाहुत्यनन्तरम् अग्निमध्ये आधारादि भद्रासनान्तं हुत्वा। पूर्वे चतुरश्रकुण्डे आहवनीयाग्निमध्ये -ओं नमो भगवते वासुदेवाय। दक्षिणे चापकुण्डे दक्षिणाग्निमध्ये -ओं नमो भगवते सङ्कर्षणाय स्वाहा। पश्चिमे वृत्तकुण्डे  गार्हपत्याग्निमध्ये -ओं नमो भगवते प्रद्युम्नाय।

उत्तरे त्रिकोणकुण्डे सभ्याग्निमध्ये -ओं नमो भगवते अनिरुद्धाय।

ऐशान्ये चतुरश्रकुण्डे आवसथ्याग्निमध्ये - मूलमूर्तिं ध्यात्वा

ओं नमो भगवते वासुदेवाय श्री भूमि नीला समेताय श्री----स्वामिने नमः

आगच्छ आगच्छ आवाहयामि। इत्यावाह्य। उपचारान् हुत्वा।

समिदन्नाज्यहोमं कृत्वा। उत्सवाङ्ग द्रव्यहोमं -पायसादि चतुर्विधैः अन्नैः

पूर्वादिकुण्डेषु क्रमेण नृसूक्तेन च हुत्वा। पूर्णाहुत्यन्तं सर्वं कुर्यात्॥

<u>एककुण्ड पक्षः</u>

एककुण्डपक्षे पूर्वे चतुरश्रकुण्डे कुण्डसंस्कारानन्तरम् अग्निं निक्षिप्य।

व्याहृतिहोमान्तं कृत्वा। यौवनाग्निं ध्यात्वा।

त्रिनेत्रं पञ्चवक्त्राढ्यं रक्तवर्णं दिशाभुजम्।
त्रिमेखलं त्रिपादं च सप्तजिह्वा समन्वितम्।
उपवीतसमायुक्तं जटामकुट-मण्डितम्।
चक्रं परशुखड्गं च वज्रं चाभयदक्षिणे।
टङ्कं पाशाब्ज-शङ्खञ्च वरदं वह्निवामके।
स्वाहा दक्षिणपार्श्वे तु स्वधा वामे तथैव च।
हिरण्या-कनका-रक्ता-कृष्णाचैव तु सुप्रभा।
अतिरक्तो-बहुरूपा सप्तजिह्वाः प्रकीर्तिताः।
मेषारूढं यौवनाग्निं ध्यायेदुत्सव-कर्मणि॥

एवम् उत्सवाग्निं ध्यात्वा। ओं रं यौवनाग्नये नमः आवाहयामि।

समस्तोपचारान् गृहाणस्वाहा इति हुत्वा।

ततः अग्नेर्जातदोषशान्तिं वैष्णवीकरणञ्च हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अग्नेः प्रशमनार्थाय सप्तजिह्वाहवनं*1 करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य।

हिरण्यायां -समिधः मूलमन्त्रेण

कनकायाम् -आज्यं प्रणवेन

रक्तायाम् -अन्नं वासुदेवमन्त्रेण

कृष्णायां -लाजं सङ्कर्षणमन्त्रेण

सुप्रभायां -तिलं प्रद्युम्नमन्त्रेण

अतिरक्तायां -मुद्गम् अनिरुद्धमन्त्रेण

बहुरूपायां -मधुना पुंसूक्तेन। इत्यादिभिः हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अग्निमध्ये भगवदाराधन हवनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। ओं ह्रीं आधारशक्त्यै स्वाहा---- ओं भद्रासनाय स्वाहा इत्यन्तं हुत्वा। ( श्रुचम् आज्येन सम्पूर्य। पुष्पाणि निक्षिप्य स्त्रुवेनपिधाय। नासिकाग्रान्तम् उद्धृत्य ) अग्निमध्ये ओं परमधामावस्थित----ओं नमो भगवते वासुदेवाय अगच्छ आगच्छ इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। द्वादशाक्षरेण स्थितिन्यासं कृत्वा। ओं ज्ञानाय इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। हस्तेपुष्पं गृहीत्वा।

---

1) உத்ஸவத்தில் ஸப்தஜிஹ்வா ஹோமம் விளக்கமாக சொல்லப்படவில்லை. அக்னிகார்ய விதியில் சொல்லியதுபோல் இங்கு யௌவனாக்கி ஜிஹ்வாக்களுக்கு கொடுக்கப்பட்டுள்ளது.

स्वामिन्! सर्व जगन्नाथ! यावत्तीर्थावसानकम्।

तावत्त्वं प्रीति भावेन वह्नौत्वं सन्निधिं कुरु॥ इति प्रार्थ्य।

पुष्पाणि अग्नौ निक्षिप्य। स्नान -शयनासनं विना -मन्त्रासनादि सर्वोपचारान् सकृत् सकृत् आज्येन हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन्नग्नौ समिदन्नाज्यहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। समिद्भिः मूलमन्त्रेण शतवारं वा तदर्धं तदर्धं वा हुत्वा। चरुणा नृसूक्तेन षोडशाहुतीर्हुत्वा। सर्पिषा मूलमन्त्रेण पूर्वोक्त समित्-सङ्ख्या हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य----महोत्सवकर्मणि----दिवसे---- ( प्रातः/सायाह्न ) हवनाख्य काले घृत -प्रसून -धूपद्रव्य -समित् -पयो -दधि -तिल -व्रीहि -यवैः प्रत्येकं मूर्तिमन्त्रैः अष्टोत्तरशताहुतीः (अष्टाविंशति) होष्यामि इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। ओं नमो भगवते वासुदेवाय स्वाहेति पूर्वोक्त द्रव्यैः चतुर्मूर्तिमन्त्रैः प्रत्येकं सङ्कल्पित सङ्ख्या हुत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् (पायसान्नेन) पायसादि चतुर्विधान्नैः पुरुषसूक्तेन प्रत्येकं षोडशाहुतीः होष्यामि इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। विधिवत् हुत्वा। ततः स्विष्टकृद्धवनं -प्रायश्चित्त हवनं -पूर्णाहुतिञ्च हुत्वा।

भक्त्या यदग्नौ विहितं यथाशक्ति यथाविधि।

आराधनं तवै-वेदं गृहाण पुरुषोत्तम!॥

इति होमफलं बलिबेरस्य पादयोः पुष्पेण समर्प्य। कुम्भं -मण्डलं -बिम्बञ्च पुनः पूजयित्वा। चतुर्विधान्नं निवेद्य। नीराज्य। यागशालायां द्वारेषु पूर्ववत् कुमुदादीनां बलिं दद्यात्॥

## भेरीताडनम्

सायाह्न-काले देवसन्निधौ नित्यहोमान्तं संपूज्य। अनन्तरं ध्वस्तम्भस्य पुरतः चतुरश्रं भूतलं गोमयेन अनुलिप्य। तत्र वेदिकां परिकल्प्य। तन्मध्ये शाल्यां पीठं परिकल्प्य। तस्मिन् ओं कालचक्राय नमः इति चक्रं लिखित्वा। तन्मध्ये बलिबेरं ध्वजस्तम्भस्याभिमुखं संस्थाप्य। तस्य पुरतः शाली -तण्डुल -तिलैः पीठं परिकल्प्य। तदुपरि वस्त्रवेष्टितं महाभेरीं संस्थाप्य गन्धमाल्यादिभिः अलङ्कृत्य। तस्य दक्षिणे कोणं निधाय। भेर्याः पूर्वभागे - शङ्खनिकरम्, आग्नेये - काहलं, याम्ये - मर्द्दलं, नैर्ऋते - मुरवतन्त्रीवंशानि, वारुणे - उडुक्क -मृदङ्ग -ह्रस्वमर्द्दलानि, वायव्ये - करटीं -कांस्यतालञ्च, उत्तरे - पटह -ह्रस्वपटहौ, ऐशान्ये - मड्डुकान् -वल्ली -हस्तघण्टाश्च संस्थाप्य एतेषां वाद्यानाम् अलाभे भेरीमात्रमेव संस्थाप्य। सर्वेषां वाद्यानां वस्त्र-गन्ध-माल्यादिभिः अलङ्कृत्य (बलिबेर भेर्योः मध्ये धान्यपीठे एक कलशं संस्थाप्य। सकूर्च-नालिकेर-अश्वत्थपल्लवापिधानं कृत्वा। वस्त्र -गन्ध -माल्यादिभिः अलङ्कृत्य) तत् समीपे सर्वालङ्कार-सम्युतम् उष्णीश-ऊर्ध्वपुण्ड्र धरं पवित्रपाणिं पारशवं संस्थाप्य। दिक्षु विदिक्षु तत्तत् वाद्य वादकान् -नृत्तकान् -गीतकाञ्च संस्थाप्य। भेरीताडनमारभेत्॥

आचार्यः पवित्रं धृत्वा। स्वगुरुं प्रार्थ्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं श्रीगोविन्द्----महोत्सवकर्मणि प्रथमदिवसे सायाह्नकाले देवस्योत्सव-सेवार्थं देवताह्वानकर्म करिष्ये तदर्थं भेरीताडनं करिष्ये तदङ्गं भेर्यादिवाद्यानां शुध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन ओं सहस्रार हुं फट् इति सर्वाणि द्रव्याणि -वाद्यानि -पारशवादीनाञ्च संप्रोक्ष्य। बलिबेरं मूलबेरादावाह्य। यथाविधि अर्घ्यादिभिः सम्पूज्य। धूप-दीपं समर्प्य। यथाभागमन्नं निवेद्य। नीराज्य

( *1 कुम्भे - ओं नं नमः पराय शब्द तन्मात्रात्मने नमः इत्यावाह्य। अभ्यर्च्य। भेरीताडन समये तत्तद्देवताः कुम्भे आवाह्य। अन्ते फलवर्गादीन् निवेद्य। नीराज्य)। आचार्यः भेर्याभिमुखम् आसने उपविश्य। भेर्यादि सर्व-वाद्येषु आधारादि पद्मान्तम् अभ्यर्च्य (ओं ह्रीं आधारशक्त्यै नमः---- ओं अव्यक्तपद्माय नमः)। तत्तन्मन्त्रेण धूपं समर्प्य। भेरीमध्ये

-ओं त्रिगुणात्मिकायै प्रकृत्यै नमः इत्यावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। ज्ञानादि षडङ्गन्यासं कृत्वा। किरीट -चक्र -शङ्ख -वनमालमुद्राः प्रदर्श्य। ओं नारायणाय----प्रचोदयात्। ओं महादेव्यै च----प्रचोदयात्॥

भेर्यां दक्षिणे -ओं विष्णवे नमः ओं श्रियै नमः इत्यावाह्य

मध्ये -ओं ब्रह्मणे नमः

दक्षिणे -ओं विष्णवे नमः

---

1)இந்த கும்பபூஜை ஆந்த்ரதேசங்களில் மட்டும் அனுஷ்டிக்கப்படுகிறது.

वामे -ओं रुद्राय नमः

दक्षिणमुखे -ओं सूर्याय नमः

वाममुखे -ओं चन्द्रमसे नमः

चर्मसूत्रे -ओं वासुख्यै नमः

दक्षिणपार्श्वे नवरन्ध्रेषु

| | |
|---|---|
| ओं वागीश्वर्यै नमः | ओं विद्यायै नमः |
| ओं क्रियायै नमः | ओं कान्त्यै नमः |
| ओं कीर्त्यै नमः | ओं दुर्गायै नमः |
| ओं लक्ष्म्यै नमः | ओं गणपतये नमः |
| ओं सृष्ट्यै नमः | |

इत्यभ्यर्च्य। वामपार्श्वे नवरन्ध्रेषु

| | |
|---|---|
| ओं अत्रये नमः | ओं गौतमाय नमः |
| ओं भृगवे नमः | ओं भरद्वाजाय नमः |
| ओं वसिष्ठाय नमः | ओं विश्वामित्राय नमः |
| ओं भार्गवाय नमः | ओं मरीचये नमः |
| ओं नारदाय नमः | |

इत्यभ्यर्च्य। भेर्याः परितः अष्टासु दिक्षु

| | |
|---|---|
| ओं रम्भायै नमः | ओं ऊर्वश्यै नमः |
| ओं मेनकायै नमः | ओं तिलोत्तमायै नमः |

| | |
|---|---|
| ओं सुमुख्यै नमः | ओं रमण्यै नमः |
| ओं सुन्दर्यै नमः | ओं यामवर्धिन्यै नमः |

कोणे -ओं वायवे नमः इत्यभ्यर्च्य। अर्घ्यादिभिरभ्यर्च्य। धूपदीपं समर्प्य। यथाभागं निवेद्य।

शङ्खाधिदैवताय ओं विष्णवे नमः

काहलाधिदैवतायै ओं वागीश्वर्यै नमः

मर्द्दलाधिदैवतेभ्यो ओं त्रिमूर्तिभ्यो नमः

मुरवाधिदैवताय ओं ब्रह्मणे नमः

मृदङ्गाधिदैवताय ओं रुद्राय नमः

झल्लर्याधिदैवताय ओं विष्णवे नमः

पटहाधिदैवतायै ओं श्रियै नमः

डमरुकाधिदैवताय ओं ईशानाय नमः

उडुक्काधिदैवताय ओं षण्मुखाय नमः

करट्याधिदैवताय ओं धर्मराजाय नमः

तिमिलाधिदैवताय ओं वायवे नमः

डक्कर्याधिदैवताय ओं चन्द्रशेखराय नमः

कांस्यतालाधिदैवताय ओं ब्रह्मणे नमः

वामहस्त घण्टाधिदैवतायै ओं श्रियै नमः

दक्षिणहस्त घण्टाधिदैवतायै ओं पार्वत्यै नमः इत्यावाह्य अभ्यर्च्य।

सर्वेभ्यः अर्घ्यादिभिः अभ्यर्च्य। धूपदीपं समर्प्य। यथाभागं निवेद्य।

नीराज्य। भेर्यादि वाद्येभ्यो नमः समस्तोपचारान् समर्पयामि इति पुष्पाणि समर्प्य। सुमुहूर्ते कोणेन आचार्यः स्वयमेव भेरीं ताडयेत्। ओं नं नमः पराय शब्दतन्मात्रात्मने नमः इति एकवारं ताडयित्वा। त्रिमूर्तिं ध्यात्वा। ओं तद्विष्णोः----पदम्। ओं ब्रह्मजज्ञानं----विवः। ओं कद्रुद्राय प्रचेतसे मीडुष्टमाय तव्यसे। वोचेमशन्तमꣳहृदे। सर्वोह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ इति त्रिवारं ताडयित्वा।

ततः आह्वान तालमिहोच्यते

*1 नृदन्तयुक्तो नादब्रह्मस्वरूपनिरुपहरिं। निष्कलब्रह्मस्वरूप निरुपहरिं। स्मृतिमतियुगलं ग्रहगणयन्त्रं दक्षिणचक्रं फणिपतिवामं मध्यममाकाशं, तत्तन्मध्यममाकाशं, दक्षिणब्रह्मं, वामकरुद्रं, मध्यमविष्णुं, वासुकिपाशं वासुकिपटहदण्डं दण्डं चञ्चत्पुटितं चञ्चत्पुटुतं। आवाहितदेवाहितदेवं तत्तत्तृप्यततालमिदम्। तत्तत्।

श्रीशैलेश दयापात्रं धीभक्त्यादि गुणार्णवम्।
यतीन्द्र प्रवणं वन्दे रम्यजामातरं मुनिम्॥
लक्ष्मीनाथ समारम्भां नाथ-यामुन मध्यमाम्।
अस्मदाचार्य पर्यन्तां वन्दे गुरुपरम्पराम्॥

---

1) नर्तनयुक्तो नर्तनयुक्तो नादब्रह्म स्वरूप निरूप निष्कल हरिम्। स्मृतिकृतियुगलं स्मृतिकृतियुगलं फणिपति यन्त्रं मध्यममाकाशम्। वामे रुद्रतरं मध्ये ब्रह्माणतरम्। वासुकिपाशं वासुकिपाशं दिनकर सितकर वदनं पटहं पटहम्। ताडय ताडय चञ्चुत्पुटितं चाचूपुटितम् आवाहित तृप्तिकर तालोयम्। तत्तत्।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्न वदनं ध्यायेत् सर्वविघ्नोपशान्तये॥
वन्दे लक्ष्मीपतिं देवं शङ्ख-चक्र-गदाधरम्।
विद्यामूर्तिं हयग्रीवं शब्दार्थ ज्ञानलब्धये॥
अमृताध्माद मेघाभम् अमृताहरणं विभुम्।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठ भूपतिम्॥
नमस्सकल कल्याण दायिने शेष-शायिने।
निर्मलानन्द कल्याणनिधये विष्णवे नमः॥
नमस्सकलकल्याण दायिने चक्रपाणये।
विषयार्णवमग्नानां समुद्धरण हेतवे॥
भगवच्छास्त्रतत्त्वज्ञं भगवत्पाद संश्रितम्।
वन्दे शाण्डिल्यमाचार्यं पौण्ड्रवर्ध्न-स्थलोद्भवम्॥
भगवच्छास्त्रतत्त्वज्ञम् औपगायन देशिकम्।
तोताद्रिसंभवं वन्दे वासुदेवपदाश्रितम्॥
अनन्तपुरसंभूतमनेक गुणभूषितम्।
प्रपद्ये भगवच्छिष्यं मौञ्ज्यायन गुरूत्तमम्॥
वासुदेवकृपापात्रं पञ्चरात्रविशारदम्।
मृगस्थलसमुत्पन्नं प्रपद्ये कौशिकं गुरुम्॥
भारद्वाजाख्यमाचार्यं विष्णोः पादाब्ज संश्रितम्।
प्रपद्ये सुगुणाम्बोधिं सालग्रामाचलोद्भवम्॥

पञ्चरात्रार्थतत्त्वज्ञान् पञ्चसंस्कार शालिनः।
पञ्चाचार्यान् प्रपद्येहं पञ्चकालिक-तत्परान्॥

ततः पारशवेन प्रतिचूर्णिका-पठनानन्तरं भेरीं त्रिवारं ताडयित्वा॥

वेदाःसर्वे विवर्धन्तां देवाःसर्वे सवासवाः।
वर्धन्तां वैष्णवाःसर्वे वर्धन्तां ब्राह्मणास्सदा॥
भुज वीर्यपराक्रान्तो वैरि पक्षो महाद्युतिः।
वर्धन्तां भूपतिर्नित्यं सामात्यस्सपुरोहितः॥
लक्ष्मीशोत्सवसेवार्थम् आगता मुखबाहुजाः।
ऊरू पाद समुद्भूताः अनुलोमाश्च धार्मिकाः॥
स्वकर्म निरताः सर्वे दातारस्सत्यवादिनः।
इतरे मानवास्सर्वे पुत्र पौत्र धनाधिपाः।
शतायुषश्च वर्धन्तां नीरोग निरुपद्रवाः।
सुवाह नः सुशक् शक्तिः तिष्ठन्नित्यं पृथक्पृथक्॥ - त्रिः

<u>द्वात्रिंशत् बाह्यदेवताः</u>

ईशानश्चैव पर्जन्यो जयन्तश्च महेन्द्रकः।
आदित्यस्सत्यकश्चैव भृगुश्चैवाऽन्तरिक्षकः।
अग्निःपूषाविधाता च राक्षसाश्च यमस्तथा।
गन्धर्वो भृङ्गराजश्च ऋषयः पितृदेवताः।
दौवारिकश्च सुग्रीवो पुष्पदन्तो बलादिकः।
असम्सोषाश्च विहितो वायुर्नागस्तथैव च।

आद्धपुल्लाटकश्चैव सोमश्चैव बृगुस्तथा।

अदितिश्च दितिश्चैव द्वात्रिम्शद्वाह्य देवताः।

१.आयुधाः

दिव्यायुध धराश्चाष्टौ स्वचिह्नाङ्कितमस्तकाः।

चक्री मुसलवान् शङ्खी खड्गीचैव गदाधरः।

शार्ङ्गी पद्मी तथा वज्री नराकारास्त्रपाणयः।

सायुधैः सगणैस्सार्धं तदीयैर्गणनायकैः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२.विश्व भूताः

पर्वताश्च समुद्राश्च नद्यश्चैव ह्रदावपि।

वृक्षाः गुल्मलताश्चैव यवाद्यौषधयस्तथा।

अण्डजाः श्वेतजाश्चैवमुद्बीजाश्च जरायुजाः।

सर्वे विश्वेषु भूतास्ते स्वस्वरूपानु रूपतः।

तिष्ठन्त्वागत्यते यावत् पुष्पयागमहोत्सवे॥

३.देवताः

देवताप्सरसस्चैव विद्याधर-महर्षयः।

श्वेतद्वीपादिवासाश्च ये च वैकुण्ठ पार्षदाः।

भूम्यन्तरिक्ष स्वर्गस्ताः तथा पाताल वासिनः।

ब्रह्मलोक निवासाश्च ये च मेरुनिवासिनः।

विष्णुपादाश्रिताश्चैव वैष्णवाभुविमानवाः।

ऋषयः पितरश्चैव स्वस्वरूपानु रूपतः।
तिष्ठन्त्वागत्यते यावत् पुष्पयागमहोत्सवे॥

४.दैत्य दानवादयः

यक्षाश्च राक्षसाश्चैव युताः किंपुरुषादिभिः।
पिशाचाप्सरसस्चैव गन्धर्वाः किन्नरादयः।
विद्याधराश्च तेसर्वे वेणु वीणादि वादनैः।
तिष्ठन्त्वागत्यते यावत् पुष्पयागमहोत्सवे॥

५.वेदादयः

वेदास्सर्वेपिमन्त्राः स्तुतिरुपनिषदश्चापि शिक्षास्सकल्पाः
ज्योतिश्छन्दो निरुक्तिः फणिपतिफणितिश्चापि काणादवाणी।
मीमांसाशास्त्रयुग्मं स्मृतिवचन पुराणागमास्सेतिहासाः
श्रीभूमीशस्य विष्णोः त्वरितमिह समायान्तु दिव्योत्सवार्थम्॥

६.अग्नयः

आहवनीं पुरा स्मृत्वा द्वितीयं दक्षिणात्मकम्।
तृतीयं गार्हपत्यञ्च सभ्याग्निं तु चतुर्थकम्॥
पञ्चममावसथ्यञ्च अग्निभेदाः क्रमात्स्मृताः।
बाल वृद्ध युवाग्निश्च त्रिधा कर्मानु रूपतः।
ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

७.क्रतवः

अग्निष्टोमोऽतिरात्रो निखिलमखवरा राजसूयाश्वमेधौ
अप्तोर्यामाभिधोत्थौ सुरजनमहितो विश्वजित्पौण्डरीकः।
सर्वाः काम्येष्टयोऽन्ये विविधमखवराः पञ्चयज्ञादयश्च
श्रीभूमीशस्य विष्णोः त्वरितमिह समायान्तु दिव्योत्सवार्थम्॥

८.उत्तम गणाः

आदित्या वसवो रुद्राः साध्याश्च मरुतस्तथा।
विश्वेदेवाश्च पितरो मातरो गृहदेवताः।
अङ्गिराश्चाश्विनीदेवौ तथा स्त्रीदेवता गणाः।
लोकेशा वास्तुदेवाश्च नक्षत्राणि च पार्षदाः।
तत्त्वानां पतयश्चैव उत्तमाः परिकीर्तिताः।
ते सर्वे शीघ्रमायान्तु देवयाग महोत्सवे॥

९.मध्यम गणाः

सिद्धाश्च ऋषयो नागाः असुरा राक्षसा अपि।
यक्षविद्याधराश्चैव सौरभेयाश्च गुह्यकाः।
गन्धर्वाप्सरसस्चैव प्रजानां पतयस्तथा।
मर्त्याश्चैवाथ रोहिण्यो गणास्ते मध्यमाः स्मृताः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

१०.जघन्य गणाः

भूताः प्रेताः पिशाचाश्च कूष्माण्डाः प्रमथा अपि।

स्कन्दो बालग्रहाश्चैव तैतलाश्चैव भैरवाः।
किन्नराश्चैव वेताला अपस्मारास्तथैव च।
योगिन्यश्चैव डाकिन्यः शाकिन्यश्चैव शारिकाः।
मोहिन्यश्चैव सर्वेषु जघन्याः परिकीर्तिताः।
ते सर्वे शीघ्रमायान्तु देवयाग महोत्सवे॥

११.अष्ट वसवः

धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवः शान्तवर्चसः।
ते सर्वे शीघ्रमायान्तु देवयाग महोत्सवे॥

१२.एकादश रुद्राः

मृगव्याधश्च शर्वश्च निर्ऋतिर्ध्वज एकपात्।
अहिर्बुध्नियः पिनाकी च यवषश्च तथैव च।
स्थाणुर्भवः कपाली च रुद्राश्चैकादश स्मृताः।
ते सर्वे शीघ्रमायान्तु देवयाग महोत्सवे॥

१३.द्वादशादित्याः

धातार्यमा विधाता च मित्रश्च वरुणस्तथा।
भगो विवस्वान् पूषा च सविता च रविस्तथा।
त्वष्टा विष्णुरिति प्रोक्ताः द्वादशैतेऽदितेः सुताः।
ते सर्वे शीघ्रमायान्तु देवयाग महोत्सवे॥

१४.सप्तमरुद्गणाः

आवहो निवहश्चैव उद्वहः संवहस्तथा।

निवहोऽनुवहश्चैव प्रवहश्च तथैव च।

सप्तैते मरुतः प्रोक्ताः सप्त सप्ताद्रिभेदिनः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

१५.साध्यगणाः

कालो रविश्च रुद्रश्च अग्निरापस्तथैव च।

पञ्चैते तु समाख्याताः गणाः साध्यसमाह्वयः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

१६.विश्वेदेवगणाः

रुद्रोऽग्निः सविता विष्णुर्विश्वेदेवगणाः स्मृताः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

१७.पितृगणाः

कव्यबाडनलस्सोमो यम एवार्यमा तथा।

अग्निष्वात्तास्सोमपाश्च तथा बर्हिषदोऽपि च।

एते पितृगणाः प्रोक्ताः सप्तैते लोकपूजिताः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

१८.विश्वेदेवाः

क्रतुदक्षः कालकाम्यो वसुस्सत्यः शुची रुचिः।

पुरूरवार्द्रवश्चैव विश्वेदेवा इमे स्मृताः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

१९.अश्विनी देवौ

नासत्यादस्त्रमुभयमश्विनौ परिकीर्तितौ।

अन्योन्यसदृशौ देवौ पीयूषकलशोद्भवौ।

ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२०.नवग्रहाः

रवि-सोमाङ्गार-बुध-गुरु-शुक्र-शनैश्चराः।

राहु-केतू तथाश्लिष्टौ कीर्तितास्तु नवग्रहाः।

ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२१.इन्द्रादयः

शक्राग्नि-यमरक्षांसि वरुणो वायुरेव च।

सोम ईशान इत्यष्टौ लोकापालाः प्रकीर्तिताः।

ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२२.अङ्गिरसाः

अग्निर्वायुः प्रजासक्तश्चत्वारोऽङ्गिरसः स्मृताः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२३.गृहदेवताः

लक्ष्मी सरस्वती विघ्ना(दुर्गा) तिस्रस्तु गृह देवताः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२४.कुमुदादयः

कुमुदः कुमुदाक्षश्च पुण्डरीकोथ वामनः।
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः।
ते सर्वे समलङ्कृत्य वस्त्र स्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२५.चतुर्दश लोकाः

अतलं वितलं चैव सुतलं च तलातलम्।
महद्रसातलं चैव पातालमिति च स्मृतम्।
भूलोकश्च भुवर्लोकः स्वर्लोकस्तु महस्तथा।
जनस्तपस्सत्यलोकः सप्तलोकाः प्रकीर्तिताः।
ते सर्वे समलङ्कृत्य वस्त्र स्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२६.चतुर्युगाः

प्रथमं कृतयुगं चैव द्वितीयं त्रेत-संज्ञकम्।
तृतीयं द्वापरं चैव चतुर्थं कलि-रूपकम्।
एते चतुर्युगाः प्रोक्ताः धर्माधर्म समन्विताः।
ते सर्वे समलङ्कृत्य वस्त्र स्रग्गनुलेपनैः।

देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२७.कालादयः

त्रुटी लव कला काष्ठा मुहूर्त दिन पक्षकाः।
मासायनर्तुपक्षाद्याः कालाः कल्पान्तकावपि।
ते सर्वे समलङ्कृत्य वस्त्र स्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२८.षष्टि सम्वत्सराः

प्रभवो विभवः शुक्लः प्रमोदूतः प्रजोत्पतिः।
आङ्गीरसः श्रीमुखो भावो युवो धातुस्तथेश्वरः।
बहुधान्यः प्रमाथी च विक्रमो विषुवत्सरः।
चित्रभानुः स्वभानुश्च तारणः पार्थिवो व्ययः।
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ।
हेविलम्बी विलम्बिश्च विकारी शार्वरी प्लवः।
शुभकृच्छोभकृत्क्रोधी विश्वावसुपराभवौ।
प्लवङ्गः कीलकस्सौम्यः साधारणो विरोधिकृत्।
परिधावी प्रमाथी च आनन्दो राक्षसो नलः।
पिङ्गलः कालयुक्तिश्च सिद्धार्थी रौद्रदुर्मती।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनोऽक्षयः।
षष्ठि संवत्सराः प्रोक्ताः तत्तत्स्वरूप संयुताः।

ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

२९.मासाः

मासश्चैत्रोऽथ वैशाखो ज्येष्ठ आषाढसंज्ञकः।
ततस्तु श्रावणो भाद्रपदोऽथाश्विनसंज्ञकः।
कार्तिको मार्गशीर्षश्च पौष्यमाघोऽथ फाल्गुनः।
एते द्वादश मासाः स्युः चान्द्रमासाः प्रकीर्तिताः।
ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

३०.ऋतवः

वसन्तो ग्रीष्मसंज्ञश्च तद्वद्वर्षा ततः शरत्।
हेमन्तश्शिशिरश्चैव षडेते ऋतवः स्मृताः।
ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

३१.तिथयः

प्रतिपच्च द्वितीया च तृतीया च चतुर्थिका।
पञ्चमी च तथा षष्ठी सप्तमी चाष्टमी तथा।
नवमी सा तिथिः प्रोक्ता दशम्यैकादशी तथा।
द्वादशी च तथा प्रोक्ता त्रयोदशी चतुर्दशी।
पूर्णिमा वाप्यमावास्या तिथयः षोडशः स्मृताः।

ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

३२.वाराः

भानुश्च सोमवारश्च मङ्गलो बुधसंज्ञकः।
बृहस्पतिश्शुक्रशनी सप्तवाराः प्रकीर्तिताः।
ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

३३.नक्षत्राणि

अश्विनी भरणी चैव कृत्तिका रोहिणी तथा।
मृगशीर्षा च आर्द्रा च तथैव च पुनर्वसू।
पुष्यमाश्लेषपितृभं फल्गुनी चोत्तरा तथा।
हस्त चित्रा स्वातिभं च विशाखा ऋक्षमेव च।
अनूराधा ज्येष्ठ मूला पूर्वाषाढास्तथैव च।
उत्तराषाढ विष्णुश्च धनिष्ठा शततारकम्।
पूर्वाभाद्रोत्तराभाद्रा रेवती ऋक्षमेव च।
ते सर्वे समलङ्कृत्य वस्त्र स्त्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

३४.पर्वताः

विन्ध्यस्सह्यो महेन्द्रश्च तथा श्रीघट्टनो गिरिः।
माल्यवान् मलयश्चैव किष्किन्धो रामपर्वतः।

श्रीगिरिश्चित्रकूटाख्यः हेमकूटस्त्रिकूटकः।
सुमेरूबदरीचैव कैलासो गन्धमादनः।
महेन्द्रो निषदह्येते पर्वताः परिकीर्तिताः।
तिष्ठन्त्वागत्यते यावत् पुष्पयागमहोत्सवे॥

३५.आरण्याः

विन्ध्यारण्यो बदर्याख्यो वीक्षारण्यः पलाशकः।
कदम्ब-कृष्ण-नन्द्या च  वल्कलो नैमिशो वनम्।
चम्पको दण्डकश्चैव ह्यारण्याः परिकीर्तिताः।
ते सर्वे समलङ्कृत्य वस्त्र स्रग्गनुलेपनैः।
देवेशोत्सवसेवार्थं शीघ्रमागच्छताद्य वै॥

३६.नद्यः

गङ्गाच यमुनाचैव नदीच महतीतथा।
नर्मदा सिन्धु कावेरी तुङ्गभद्रा तथैव च।
गोधादि पुण्य तीर्थाणि मणिकर्णिक पुष्करौ।
तिस्त्रः कोट्योऽर्ध कोटी च तीर्थ सङ्घात्वपाम्पतिः।
वापी कूप तटाकाश्च नद्यश्चैव ह्रदावपि।
सर्वे विश्वेषु तीर्थास्तेऽभ्यागच्छन्तु महोत्सवे॥

३८.सेनेशगणाः

राकाचन्द्रप्रवाल द्रुतकनकमहानील सङ्काशगात्राः
वेतण्डाद्याश्च कालप्रकृति रथ जयत्सेन सिह्मानननाद्याः।

चत्वारो मन्त्रिणोऽमी भुजगशय-गणाधीशितुश्चण्डरूपाः

श्रीभूमीशस्य विष्णोः त्वरितमिह समायान्तु दिव्योत्सवार्थम्॥

३९.अष्टनागाः

भोगीशोनन्तनामा गुलिकसमभिधो वासुकिस्तक्षकाख्यः

कार्कोटश्शङ्खपालो भुजगपरिभृढः सन्महापद्मपद्मौ।

एतेऽष्टौ पन्नगेन्द्राः बलिसदनगतैस्साकमन्यैर्भुजङ्गैः

श्रीभूमीशस्य विष्णोः त्वरितमिह समायान्तु दिव्योत्सवार्थम्॥

४०.ऋषयः

वसिष्ठः काश्यपश्चैव विश्वामित्रोऽङ्गिरस्तथा।

भृगुश्च नारदश्चैव षडेते मुनयस्तथा।

वेद् वेदाङ्ग पठनैः स्वशिष्यैः परिवारिताः।

तिष्ठन्त्वागत्यते यावत् पुष्पयागमहोत्सवे॥

४१.तपश्श्रेष्ठाः

प्रह्लादोऽत्रि वसिष्ठश्च शुकः कण्वः पराशरः।

विश्वामित्रो महातेजो कपिलश्शौनको महान्।

याज्ञवल्क्यो भरद्वाजो जमदग्निस्तपो निधिः।

गौतमो मुद्गलश्श्रेष्ठो वेदव्यासश्च रोमशः।

अगस्त्यः कौशिको वत्सः पुलस्त्यो मङ्कणस्तथा।

दुर्वासः तपसां श्रेष्ठः नारदः काश्यपस्तथा।

गायत्र्यो ऋषयस्सर्वेऽप्यागच्छन्तु महोत्सवे॥

### ४२.भगवच्छास्त्र प्रवर्त्तकाः

शाण्डिल्याद्याश्च साक्षान्मधुमथनकृपालब्ध दीक्षाभिषेकाः
त्रातश्रीपाञ्चरात्रः सकलमपिजनं शुद्धयागैकसक्तम्।
कुर्वाणाः पाञ्चकाल्याः प्रकटननिपुणाः पञ्चसंस्कार-भाजः
श्रीभूमीशस्य विष्णोः त्वरितमिह समायान्तु दिव्योत्सवार्थम्॥

### ४३.परम भागवताः

प्रह्लादो नारदश्चैव पुण्डरीकः पराशरः।
व्यासाम्बरीशश्शौनकः श्रीशुको भीष्म एव च।
रुक्माङ्गतोऽर्जुनश्चैव वसिष्ठश्च विभीषणः।
ते सर्वे शीघ्रमायान्तु देवयाग महोत्सवे॥

### ४४.दिव्य सूरयः

भूतं सरश्च भेतालो भट्टनाथः पराङ्कुशः।
भक्तिसारो मुनेर्वाहः कलिजित्कुल शेखरः।
मधुरेण कवीन्द्रेण समं भक्ताङ्घ्रिरेणुना।
सूरयश्च महायोगिन् भगवत्प्रियसत्तमाः।
ते सर्वे शीघ्रमायान्तु देवयाग महोत्सवे॥

### ४५.भगवद्विज्ञापनम्

स्वामिन्नाश्रित लोकरक्षक! विभो! दिव्योत्सवे श्रीमतः
सेवार्थं समुपागतान्बलरिपु ब्रह्माद्यमर्त्यैश्वरान्।
नानालोकभवान् चराचरगणान् सर्वानिमान् प्राञ्जलीन्

वीक्षस्वाम्बुधिकन्यया सहकृपा तुङ्गैरपाङ्गैश्शुभैः॥

४६.आगतानाम् आज्ञा

ब्रह्माद्या निर्जरौघाः कुमुदमुखगणाः शेषशेषांशनाद्याः
मुक्ताभक्ताश्च सक्ता भगवति सततं ये च चैतन्ययुक्ताः।
एते सर्वेऽपि सेनापरिभृढवशगाः सायुधैर्वाहनाद्यैः
साकं श्रीपुष्पयागान्तमिह वसतिं प्राप्नुवन्तु प्रहृष्टाः॥

४७.रक्षकाणाम् आज्ञा

सिह्मास्या धोटवक्त्राः करटिकिटिमुख व्याघ्रराङ्घालतुण्डाः
प्रोच्चण्डास्साट्टहासाः तरलतरदृशः पारिषद्यास्त्वसङ्ख्याः।
विष्वक्सेनाज्ञयामीत्वसुर दनुसुताधीश रक्षोधिपेभ्यः
रक्षादीक्षां विधातुं त्वनिशमित इतस्सायुधास्सञ्चरन्तु॥

<u>कुमुदादि गणेशानां रागतालादयः</u>

४८.कुमुदः

प्रागाशाभिमुखो महागज गतो नेत्र त्रयाब्जोज्वलः
पञ्चाशत्करिणाङ्गणैः परिवृतो शुभ्रश्चतुर्भिर्भुजैः।
वज्रं चक्र मथाञ्जलिं च कुमुदः बिभ्रद्विभूषोज्ज्वलः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

कुमुदतालमिहोच्यते

विमलशशि रुचि मुषित सुरपति वारणम्भयवारणम्।

मकुटधर मणि कुलिशभुजरुचि रञ्जलिं रचिताञ्जलिम्।

अरुणनिवसन मयुग विलसित लोचनं भवमोचनम्।

भजतपरिमिह कुमुदमिति जननामकं गणनायकम्॥ तत्तत्। कुमुदस्य

समतालम्। षड्गमस्वरम्। गान्धार-रागम् (रीतिकौल) । विलासनृत्तम्।

४९.कुमुदाक्षः

हेमाभो महिषासनस्त्रिनयनो श्यामाम्बरो भासुरो
देवोसौ कुमुदाक्षकः परिवृतो दैत्यैः पितृणाङ्गणैः।
बिभ्रन्मुद्गर खड्ग यष्टिमनिशं युद्धोत्सुकैः स्वैर्भुजैः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

कुमुदाक्षतालमिहोच्यते

पृथुलनिजभुज विधृत शुभतर खड्ग मुद्गर यष्टिकम्।

मकुटविलसित हरितमणिगण शातकुम्भनिभाकृतिम्।

निखिलदितिसुत विहितरतिमति भीमसौरिभवाहनम्।

नमतसितरुचि जलजविरचित नामकं गणनायकम्॥ तत्तत्।

कुमुदाक्षस्य बद्धावतालम्। ऋषभस्वरम्। कौल-रागम्। सर्वतोभद्रनृत्तं।

५०.पुण्डरीकः

रक्ताभो हयवाहनस्त्रिणयनो श्यामाम्बरो भासुरो
दोर्भिर्बिभ्ररथाञ्जलिञ्च मुसलं चक्रं च भूषोज्वलः।
प्रेतैः क्रूरमहागणैः परिवृतः श्रीपुण्डरीको विभुः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

पुण्डरीकतालमिहोच्यते

अरुणकपिशित विलसदनुभव रोचिषं रुचिराननम्।

विमलशशिमुख कमलमरुतर घोटकोपरिवासिनम्।

सततकरतल विधृत विलसित चक्र-मौसल-मञ्जलिम्।

नमतपरिमिह कपिशमृदुतर वाससं बहुलोचनम्॥ तत्तत्।

पुण्डरीकस्य भृङ्गिणीतालम्। गान्धारस्वरम्। कौशिक(भैरवि)रागम्।

खेटकनृत्तम्।

### ५१.वामनः

कुन्दाभश्शकटासनः त्रिणयनो नीलाम्बरोभासुरो
वज्रं शूलमधोभुजैःदरधरैः मुष्टिं च भूषोज्वलः।
रक्षो नाथ गणैर्वृतो बहुमुखैः श्रीवामनाख्यो विभुः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

वामनतालमिहोच्यते

समय विकसित कुसुमपरिमल कुन्दपुष्प परिच्छदम्।

महित विघटित कनकरथवर सुस्थितं भजवामनम्।

कनकगिरिनिभ पृथुल निजभुज वज्र शूल समुष्टिकम्।

नमत परिमिह कपिश मृदुतर वाससं बहुलोचनम्॥ तत्तत्।

वामनस्य मल्लतालम्। मध्यमस्वरम्। नटभाषिक-रागम् (नाट)।

चक्रमण्डलनृत्तम्।

### ५२.शङ्कुकर्णः

पीताभो बहुभूषणस्त्रिणयनो व्याघ्रासनो माल्यवान्

पाशञ्चाङ्कुशमञ्जलिं च सततं बिभ्रच्चतुर्भि र्भुजैः।
भूतानां बहुसङ्घकैः परिवृतः श्रीशङ्कुकर्णाह्वयः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

शङ्कुकर्णतालमिहोच्यते

कपिशतनुरुचि विततविलसित दीपिकाखिल दिङ्मुखम्।
ज्वलितमणिगण विपिन परिवृढ वाहनस्थिति दीक्षितम्।
अमितभुजबल विधृत कर वर पाशमङ्कुश-मञ्जलिम्।
नमत परिमिहमतुलमिह भुवि शङ्कुकर्ण समाह्वयम्॥ तत्तत्।
शङ्कुकर्णस्य मङ्गलतालम्। पञ्चमस्वरम्। श्रीकामद-रागम् (पन्तुवराली)।
कान्तारनृत्तम्।

## ५३.सर्वनेत्रः

धूम्राभो मृगवाहनस्त्रिणयनो श्यामाम्बरो भासुरो
दोर्भिष्टङ्क परश्वधौ च सुवहन् मुष्टिं च पाशं वहन्।
नागानां बहुभिर्गणैः परिवृतः श्रीसर्वनेत्रो विभुः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

सर्वनेत्रतालमिहोच्यते

कपिश सुविलसदरुण सरसिज लोचनं बहुलोचनम्।
असित समधिक महित जलधर रूरुको परि सुस्थितम्।
सतत करतल विधृत विलसित टङ्क पाश परश्वधम्।
नमतपरिमिह कपिश मृदुतर सर्वनेत्र समाह्वयम्॥ तत्तत्। सर्वनेत्रस्य

जयतालम्। धैवतस्स्वरम्। तत्केशी-रागम्(काम्बोजि)। कुट्टिमनृत्तम्।

५४.सुमुखः

श्यामाभो मृगराज वाहनगतो नेत्र त्रयाब्जोज्ज्वलः
चक्रं शक्तिमथाञ्जलिञ्च सुमुखो बिभ्रच्चतुर्भि र्भुजैः।
भूतानां शतसङ्घकैः परिवृतः कृष्णांशुको भासुरो
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

सुमुखतालमिहोच्यते

निशित करतल नखर विलसित पञ्चवक्त्र निवासिनम्।

पृथुलशतमख विमलमणिगण सोदरोज्ज्वल विग्रहम्।

अरुणमणिगण सदृशनिवसन वेष्टितोदर बन्धनम्।

सुमुखमपिभज मकुटमणिगण रञ्जिताखिलविग्रहम्॥ तत्तत्। सुमुखस्य भद्रतालम्। निषादस्वरम्। दक्ष-रागम्(हरिकाम्बोजि)।पृष्ठकुट्टिमनृत्तम्।

५५.सुप्रतिष्ठः

राजावर्त समान कान्ति निचयो व्यालासनो भीषणो
हस्तैः कुन्तमथार्गलं दधतुरो मुष्टिञ्च पाशंवहन्।
नागानां बहुभिर्गणैः परिवृतः श्रीसुप्रतिष्ठाह्वयः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रंसमागच्छतु॥

सुप्रतिष्ठतालमिहोच्यते

विमल शशिमुख विलसदुरतर पन्नगोपरि सुस्थितम्।

पृथुलशतमख हरितमणिगण सोदरोज्ज्वल विग्रहम्।

अरुणमणिगण सदृश निवसन वाससस्फुरितोज्ज्वलम्।

भजतकरधृत परिघविलसित सुप्रतिष्ठ समाह्वयम्॥ तत्तत्। सुप्रतिष्ठस्य ढक्करीतालम्। धैवतस्वरम्। चालापणिरागम्(मोहनं)। कटिबन्धन नृत्तम्।

५६.ब्रह्मा

ब्रह्मास्वर्ण निभश्चतुर्मुखलसन् नेत्राष्टकालङ्कृतः
पाणिःप्रस्फुरिताक्ष सूत्र करकः पिङ्गैर्जटामण्डलैः।
देवैरुज्ज्वलसिद्ध चारणगणैः हम्साधिरूडो हरेः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

ब्रह्मतालमिहोच्यते

अण्डमण्डल कोटिमण्डल नाभिपङ्कजविष्टरम्।

अण्ड पिण्डचराचराखिल देवराक्षससर्गिणम्।

कम्स वैरिपदाब्जचिन्तन हम्सचित्त चतुर्मुखम्।

भेरिताडन डम्बरानुग ब्रह्मतालमिदम्भजे॥ तत्तत्।

ब्रह्मस्य द्रुवतालम्। निषादस्वरम्। हम्सध्वनि-रागम्। बुजङ्ग-नृत्तम्।

५७.इन्द्रः

मेघश्यामतनुः सहस्र नयनो वज्रायुधोवासवो
नागेन्द्रोन्नत पीन कन्धरगतो देवावली सेवितः।
भेरी मद्दल झल्लि काहलरवैः पूर्णाखिलांशो हरेः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

इन्द्रतालमिहोच्यते

सकल सुर गण मकुटमणिगण रञ्जिताङ्घ्रि सरोरुहम्।
दनुजविभुदनि करविराजित वज्रशक्ति शचीपतिम्।
रजत गिरिरिव विलसदतिमद हस्तिमस्तक निष्ठकम्।
विधृत करटिक पटह विलसितम् इन्द्रतालमिदं भजे॥ तत्तत्।
इन्द्रस्य समतालम्। पञ्चमस्वरम्। नाटरागं। विलासनृत्तम्।

५८.अग्निः

वह्नि शक्तिधरः प्रवालविलसन् देहप्रभामण्डलः
ज्वालाजाल परीतरत्नमकुटः कल्याणपीताम्बरः।
भूषारत्न मरीचिमांसल रुचिर्मेषाधिरूडो हरेः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

अग्नितालमिहोच्यते
लोक हितानु गतागतिहव्यक वाहक दीप्तपदम्।
वाहनमेषज वाधिकरोहण वायुगतिं वरदम्।
ज्ञान समाधिकृतानुगताखिल कारणवायुसखम्।
भेरिकताटन तालविभेदित पावक तालमिदम्॥ तत्तत्।
अग्नेः अटतालम्। ऋषभस्वरम्। कौलरागम्। सर्वतोभद्रनृत्तम्।

५९.कालः

कालः पाशधरः प्रभूततिमिरः श्यामाभ देहोज्ज्वलः
ज्वालारूक्ष कटाक्षतीक्ष्ण वदनः दम्ष्ट्रानिमग्नाधरः।
आरूडोमहिषो विषाणकुटिलः प्रेतैरुपेतो हरेः

तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

काल तालमिहोच्यते

काल धूतपति कालमेघनिभ कालपाशविराजितम्।

काल चक्रगति कालचक्रकृति कालकालमहत्तनुम्।

काल केतुघन कालहारिवर कालपूजकसत्प्रियम्।

भेरिकानुग तालभेदित कालतालमिदं भजे॥ तत्तत्। यमस्य मङ्गलतालम्।

गान्धार-स्वरम्। देशिकी-रागम्(बौलि)। सर्वतोभद्र-नृत्तम्।

६०.नैरृतिः

रक्ताक्षो द्रुतिहेमकान्ति तनुमान् खङ्गञ्च खेटंदधत्

निर्द्वन्द्वो निर्ऋतिर्निशाचरपतिः दंष्ट्राकरालाङ्कः।

आरूडो नरवाहनः परिवृतो दैत्यैरुपेतो हरेः

तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

नैरृतितालमिहोच्यते

अक्षयपक्ष विपक्षबलक्षय दक्ष सपक्षयुतम्।

शिक्षित भक्षित वैरिविचक्षण निर्झितनिर्झरकम्।

सर्गनिसर्ग करद्वय वर्गकवर्गवपुर्गलणम्।

नित्य नितान्तनिरन्तरसन्तत नैरृतितालमिदम्॥ त्तत्तत्। नैरृतेः

जयतालम्। षड्जमस्वरम्। देशाक्षी-रागम्(भूपालम्)। कमलबद्ध-नृत्तम्।

६१.वरुणः

आरूढो मकरो महोदधिभवो मन्दारमालोज्ज्वलः

पाशालङ्कृत पाणिरेषवरुणः संसेवितः किङ्करैः।
कुन्देन्दुद्युतिमान् स्वदेहरुचिना ध्वस्तान्धकारो हरेः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

वरुण तालमिहोच्यते

मकरवाहनमब्धिसम्भव कल्पपुष्प विभूषितम्।
पाशशोभित पाणिपङ्कज शोभमानकलेभरम्।
कुन्दसन्निभ देहकान्ति निराकृताखिलशर्वरम्।
मकर परिभृडवाहनं जगदेककुम्भकनायकम्॥ तत्तत्।

वरुणस्य भद्रतालम्। धैवतस्वरम्। नाटरागम्। कमलनृत्तम्।

## ६२.वायुः

वायुर्वह्निसखः प्रसन्नवदनः पिङ्गायताक्षिद्वयो
धूम्राभो मृगवाहनः परिलसत् पाणिद्वयालङ्कृतः।
पीनोदार भुजान्तराल विलसद्धामाभिरामो हरेः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

वायु तालमिहोच्यते

धिमित धितिसुत युवतिकुचतट घटितकुङ्कमहारिणम्।
सततगतिमिह सकल जगदभिरक्षणोत्सुखमानसम्।
विकच सुरतरु बहुलपरिमल कुसुमदामविराजितम्।
अनलहितकर जनितवरसुत वायुतालमिदं भजे॥ तत्तत्।

वायोः झंपतालम्। षड्जमस्वरम्। श्री-रागम्। पृष्टकुट्टिम-नृत्तम्।

## ६३.कुबेरः

सोमस्सुन्दरलोचनः त्रिपुरजिन् मित्रश्चलः कुण्डलः
श्वेताभश्शुकतुण्ड रक्तवदनः पाणिस्थ पद्मोज्वलः।
आरूढो नरवाहनः परिचरैः यक्षैरुपेतो हरेः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

कुबेरतालमिहोच्यते।

उद्यद्दिनकर किरणप्रहसनदक्षिण नैर्ऋरुचिम्।

दीप्यद्दशमुख नृत्यद्भुजबल तक्षकयक्षपतिम्।

नीलसुलोहित मैतृकशोभित हेमतुल्यकलेभरम्।

शङ्ख पद्म सुरेश्वर शिव भूबृन्दावसदेश्वरम्॥ तत्तत्।

सोमस्य अनन्ततालम्। ऋषभस्वरम्। मोहन-रागम्। मण्डल-नृत्तम्।

## ६४.ईशानः

ईशश्शूलधरः त्रिलोचनधरः शार्दूल चर्माम्बरः
भूत प्रेतपिशाच राक्षसगणैः युक्तःप्रवालाद्युतिः।
आरूडो वृषवाहनः शशिलसच्छूडाभिरामो हरेः
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

ईशान ताल मिहोच्यते।

त्रिलोचनं त्रिशूलिनं जटाधरं नटाधिपम्।

कपर्धिनं विमर्दिनं प्रभञ्ज मोहकारणम्।

पुरान्तकं जितान्तकं नतान्तरङ्गतोषकम्।

चिरन्तनं तपोधनैर्विचिन्त्यमान विग्रहम्।

उमापतिं नमामितं कपालिनंकृपालयम्।

भुजङ्गराज भूषणं कुरङ्ग राजपोषणम्।

थणाकुधिं धिणाकृधिं धिणेकुधिं धिनेकृधिम्।

दगद्धग द्धिगिद्धिगिच्चिवस्य तालमीदृशम्। तत्तत्।

ईशानस्य ढक्करीतालम्। मध्यमस्वरम्। शङ्कराभरण-रागम्।

वामजानूर्ध्व-नृत्तम्।

६५.अनन्तः

विष्णोश्चक्र वितानकांशुकवर श्रीपादुकाद्यात्मवान्

स्वीयश्वास निराकृतासुरगणोऽनन्तो भुजङ्गाधिपः।

दीप्यन्मौलिमणि प्रभापरिलसद्विश्वम्भराशामुखः

तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

अनन्ततालमिहोच्यते

मार्ताण्डबिम्बनिभ माणिक्यजाल भव देदीप्यमानसुषमा।

जालायमानफण जालावृतप्रकट हालाहलोज्ज्वल मुखः।

निद्राण विष्णु मुख निश्वास गन्धवह पानाति तुन्दिलवपुः।

भूमी सरोज वर नालायमान तनु यष्टिर्भुजङ्ग रमणः॥ तत्तत्। अनन्तस्य अनन्ततालम्। गान्धारस्वरम्। (पुन्नाग)वरालि-रागम्। केतकनृत्तम्।

६६.गरुडः

पक्षा धूतन सम्भृतैः प्रतिभटानूच्छाटयन्मारुतैः

भूषारूपधरैः भुजङ्गपतिभिः सम्सेवितस्सन्ततैः।

देवो विष्णुरथः प्रचण्डबलवान् श्रीवैनतेयो हरेः

तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु॥

गरुडतालमिहोच्यते

गरुडवाहन परशुधारण चक्रपाशधरम्।

स्फटिक सन्निभ मकरकुण्डल कनकमकुटधरम्।

विहग परिभृडमहि विभूषणमसुरवैरिरथम्।

अलिकुलालक कुटिलकोमल मनिलतुल्यगतिम्॥ तत्तत्।

गरुडस्य गरुडतालम्। मध्यमस्वरम्। कौलरागम्। विष्णुक्रान्त-नृत्तम्।

६७.विष्वक्सेनः

विष्वक्सेनः किरीटी मणिमयकटको पूर्वहस्ताब्जयुग्मे

मुद्रां कौमोदकीञ्चापर करयुगले शङ्ख चक्रं दधानः।

स्वर्णाभो लम्बकुक्षिः प्रति भटभयकृत् पिङ्गल श्मश्रुकेशो

ह्रीमत्या सूत्रवत्यात्वरितमिह समागच्छताम् उत्सवादौ॥

विष्वक्सेनताल मिहोच्यते

धाराकृतिमद् वारालसदिव वक्राद्यपहृत विघ्नौघम्।

घोराकृतिरिपु वाराहितकर नारायणपरिवारेशम्।

भानामधिपति भानाद्भुतधर भानूल्लसदरि हृत्पाणिम्।

वन्दे बुधजन बृन्देरितनिज मन्देतरसन सौभाग्यम्॥ तत्तत्।

सेनेशस्य बलितालम्। ऋषभस्स्वरम्। वरालीरागम्। स्वस्तिक-नृत्तम्।

## मङ्गलं

वर्धन्तां सर्ववेदाः क्षितिविबुधगणाः तत्प्रकाशप्रवीणाः
वर्धन्तान्तैः प्रक्लृप्ता निखिलमखवराः तद्भुजो निर्जरेन्द्राः।
वर्धन्तां राशितेषां जलनिधितनया वल्लभा सक्तिभावाः
श्रीमान्तत्तोषकारी सजयतु सततं देवकैङ्कर्य धुर्यः॥

देवताह्वानवेलायां भेरीं श्रृण्वन्ति ये नराः।
तैर्नदीतरणं नैव यानं वै योजनात्परम्।
अनाद्यन्तोत्सवं मोहात् दूरं यायाजनो यदि।
स याति निरयं स्थानं प्रेत्य दुःखमिहापि च।
तस्मादवभृथं यावत् वसेदत्रैव नो व्रजेत्॥

स्वस्ति-प्रजाभ्यः परिपालयन्तां न्यायेन मार्गेण महीं महीशाः।
गो ब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु।

## सायं हवनं बलिदानञ्च

भेरीताडनानन्तरं यागशालायां सायामाराधनं कुर्यात्। द्वारपूजादि चतुस्थानपूजान्तं कृत्वा। तत्र अग्नियजन काले पायसेन नृसूक्तहोमानन्तरं परिवार होमं कुर्यात्। आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन्नग्नौ परमान्नेन(पायसेन) ब्रह्मादि परिवारहवनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य।

ओं ब्रह्मणे सपरिवाराय स्वाहा

ओं प्रजापतये सपरिवाराय स्वाहा

ओं रुद्राय सपरिवाराय स्वाहा - अप उपस्पृश्य

ओं सर्वेभ्यः देवेभ्यः सपरिवारेभ्यः स्वाहा

ओं वेदेभ्यः सपरिवारेभ्यः स्वाहा

ओं छन्दोभ्यः सपरिवारेभ्यः स्वाहा

ओं ऋषिभ्यः सपरिवारेभ्यः स्वाहा

ओं गन्धर्वेभ्यः सपरिवारेभ्यः स्वाहा

ओं सरीसृपेभ्यः सपरिवारेभ्यः स्वाहा

ओं यक्षेभ्यः सपरिवारेभ्यः स्वाहा

ओं अप्सरोभ्यः सपरिवाराभ्यः स्वाहा

ओं मासादिभ्यः सपरिवारेभ्यः स्वाहा

ओं वत्सरेभ्यः सपरिवारेभ्यः स्वाहा

ओं सर्वेभ्यो देवीभ्यः सपरिवाराभ्यः स्वाहा

ओं समुद्रेभ्यः सपरिवारेभ्यः स्वाहा

ओं पर्वतेभ्यः सपरिवारेभ्यः स्वाहा

ओं आपगाभ्यः सपरिवाराभ्यः स्वाहा

ओं भूतेभ्यः सपरिवारेभ्यः स्वाहा

ओं पशुभ्यः सपरिवारेभ्यः स्वाहा

ओं वृक्षेभ्यः सपरिवारेभ्यः स्वाहा

ओं ओषदीभ्यः सपरिवारेभ्यः स्वाहा

ओं वनस्पतिभ्यः सपरिवारेभ्यः स्वाहा

ओं उद्भीजेभ्यः सपरिवारेभ्यः स्वाहा

ओं स्वेदजेभ्यः सपरिवारेभ्यः स्वाहा

ओं अण्डजेभ्यः सपरिवारेभ्यः स्वाहा

ओं जरायुजेभ्यः सपरिवारेभ्यः स्वाहा

ओं भूरादि सप्तलोकेभ्यः सपरिवारेभ्यः स्वाहा

ओं अतलादि सप्तपातालेभ्यः सपरिवारेभ्यः स्वाहा

ओं चण्डादिद्वारदेवेभ्यः सपरिवारेभ्यः स्वाहा।

इति हुत्वा ( एवं प्रतिदिनं परिवारहोमं कुर्यात् )। परिषिच्य। श्री भगवदाज्ञया भगवत्कैङ्कर्यं बलिद्रव्येण मूलमन्त्रेण अष्टोत्तरशताहुतीः/अष्टाविंशत्याहुतीः होष्यामि इति सङ्कल्प्य। तत्तद्दिनोक्त बलिद्रव्येण यथाविधि हुत्वा। परिषिच्य। स्विष्टद्धवनं -प्रायश्चित्त हवनं -पूर्णाहुतिश्च हुत्वा। पूर्ववत् उत्तराङ्गपूजादनन्तरं बलिदानं कृत्वा। बलिबेरं -चक्रम् -अन्नमूर्तिश्च शिबिकायाम् आरोप्य। घण्टानाद -वेद -वाद्यघोषेण -छत्र -चामर -व्यजन -बहुदीपैः साकं बलिं कारयेत्। प्रथमोत्सवे फल -रजनीचूर्ण -लाज -(करम्भ)दधि -तण्डुलपिष्टान् चरुणा संयोजितेन द्रव्येण बलिं दत्वा।

## बलिदानक्रमः

प्रथमं यागमण्डपद्वारेषु ओं कुमुदाय नमः बलिं ददामि----

ओं सुप्रतिष्ठाय नमः बलिं ददामि इति कुमुदादीनां बलिं क्षिप्त्वा। अनन्तरम् ओं चण्डाय नमः बलिं ददामि इत्यारभ्य नित्योत्सववत् गर्भगेहद्वारादि सर्वावरणेषु -वीथिषु च बलिं दत्वा। ग्राममध्ये ब्रह्माणम् -

इन्द्रादीशानान्तञ्च तत्तत् स्थाने तोयपूर्वोत्तरं बलिं दद्यात्। सर्वेषु बलिदानेषु बलिमुद्रां मङ्गलाष्टकञ्च दर्शयित्वा। धामान्तः प्रविश्य। महाबलिपीठे अशेषतोऽवशिष्टं बलिद्रव्यम् ओं सर्वेभ्यो श्रीमहाविष्णु-पार्षदेभ्यो नमः इति बलिं दद्यात्। एवं प्रथमोत्सव-सायाह्नमारभ्य तीर्थदिवसात्पूर्वदिनान्तम् अहनि रात्रौ च बलिं दत्वा। नवमोत्सवे प्रातर्बलिमेव कुर्यात्। तद्दिने रात्रौ अवभृथं चेत् -ग्रहण -विषु -अयन सम्भवे च बलिद्वयं कृत्त्वा। एवं चतुस्थानार्चनं बलिं च कुर्यात्। बल्यनन्तरं मुखमण्डपे बल्यादि बिम्बानां पृथुकादीन्निवेद्य। नीराज्य। बलिबिम्बं सन्निधौ निवेश्य। चक्रं यागशालायां निवेश्य। अन्नमूर्तिं बहिस्थित महाबलिपीठे निवेशयेत्॥

## कल्याणकौतुकस्य वीथ्युत्सवम्

तदनु ब्राह्मणैः वैष्णवैः स्वस्तिसूक्त -रथन्तर सामपठनेन कल्याणकौतुकं यानारोपणमण्डपं नीत्वा। तद्दिनोक्त यानं पुण्याहजलेन प्रोक्ष्य।

भ॒द्रङ्कर्णे॑भिश्शृणु॒याम॑ देवाः। भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः।

स्थि॒रैरङ्गै॑ स्तुष्टु॒वाꣳस॑स्त॒नूभि॑ः। व्यशे॑म दे॒वहि॑तँ॒य्यदायु॑ः।

स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः। स्व॒स्ति न॑ः पू॒षा वि॒श्ववे॑दाः।

स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः। स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु॥ इति मन्त्रेण देवं यानमारोप्य। सर्वाभरणाद्यैः -अपूर्व पुष्पमालादिभिः -नानावर्ण क्षौमवस्त्रैः देवं समलङ्कृत्य। दर्पणं दर्शयित्वा। ततः देवं न्यास पूर्वकं सम्पूज्य। अर्घ्यादिभिः अभ्यर्च्य। धूप -दीपं समर्प्य। यथाभागमन्नं निवेद्य। नीराज्य। वाहकान् ओं वैनतेयाय नमः इत्यभ्यर्च्य। बहु-घृतदीपैः -वाल

-व्यजनैः -राजचिह्नैः -वेदपारगैः -दिव्यप्रबन्ध -शास्त्र -इतिहास -पुराण -स्तोत्रपाठकैः -भक्तैः -भागवतैः साकं पुरतः यानारूढेन ध्वजारूढेन वा अञ्जलीयुत तार्क्ष्येन -पृष्ठतश्च वेत्रहस्तेन शोभित विष्वक्सेनेन -कनकपात्रे देवस्य पादुकान्वितेन वाद्यघोषेण सह देवं ग्राम-धामादिकं परिभ्रम्य। वीथिषु भक्तैः दापन निवेदनवस्तून् ओं वीर्याय अस्त्राय फट् इति प्रोक्ष्य। देवाय निवेद्य। फलवर्ग -ताम्बूलञ्च तूष्णीमेव निवेद्य। भक्तैः समर्पित वस्त्राभरणञ्च अस्त्रमन्त्रेण संप्रोक्ष्य। नियोजयेत्। प्रासादान्तः प्रविश्य। महापीठस्य पुरतः मूलार्चाभिमुखं देवं संस्थाप्य। तस्य पुरतः महानसात् उद्दीपित घटदीपं संस्थाप्य। घटदीपं ओं विर्याय अस्त्राय फट्

தெய்வாய மறமன்னர் குருதி கொண்டு
திருக்குலத்திலிறந்தோர்க்குத் திருத்தி செய்து – என்றும்,

வென்றிமாமழுவேந்தி முன் மண்மிசை
மன்னரை மூவெழுகால் கொன்றதேவ – என்றும்,

यो हत्वा दुरितरतानथैकविंशत्

राजन्यानां स्तद्रुधिरासृ गाप्लुतेषु।

कृत्वा तत्पितृगण तर्पणं ह्रदेषु

क्ष्माभारं सकलमपाजहार देवः ॥ – என்றும்,

நின்றிலங்கு முடியினாய் இருபத்தோர்
காலரசுகளை கட்ட வென்றி நீண்மழுவா – என்கிறபடியே

भृगु குலத்திலே ஜமதக்னி குமாரராய் அவதரித்து

पितृवधं பண்ணினாய் என்கிற வ்யாஜத்தாலே

கார்த்த வீர்யப் प्रभृति களான துஷ்ட ராஜாக்களை இருபத்தொரு தலைமுறை முதலரிந்து அந்த உதிரத்திலே பித்ருதர்ப்பணம் பண்ணி

भू भारத்தை நீக்குவதற்காக सङ्कर्षणांशभूतராய் பார்க்கவராமாவதாரம் செய்தருளினீர்.

**<u>தஶரத ராமாவதாரம்</u>**

அங்கணெடுமதிள்புடை சூழ் அயோத்தியென்னும்
அணிநகரத்துலகனைத்தும் விளக்கும் சோதி
வெங்கதிரோன்குலத்துக்கோர் விளக்காய்த்தோன்றி
விண்முழுதும் உயக்கொண்டவீரன் – என்றும்,

लङ्केशाकुल विबुधेन्द्र याचितो यः

कौसल्या जठरगतोहि राम रूपः।

सङ्क्लिश्यज्जनक सुता च्छलेन रक्षां

स्युन्मूलान्यतनुत सिद्धगीतवीर्यः॥ – என்றும்,

மன்னுபுகழ்க் கௌசலைதன் மணிவயிறுவாய்த்தவனே – என்றும்,

கொம்பு போல் சீதை பொருட்டு இலங்கை நகர்
அம்பெரியுய்த்தவர் – என்றும்,

धनुश्शत्रोरप-कामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम – என்றும்,

स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः।

अर्थितो मानुषे लोके जज्ञे विष्णुस्सनातनः॥ – என்கிறபடியே
அடியவர்கள் கொண்டாடும்படி தஶரத சக்ரவர்த்தி
திருமாளிகையிலே வந்து அவதரித்தருளி

रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् – என்றும்,

नहितस्मान्मनः कश्चित् चक्षुषी वा नरोत्तमात्।

न च शक्नोत्यपाक्रष्टुम् अतिक्रान्तेऽपिराघवे॥ – என்றும்,
தயரதன் பெற்ற மரதக மணித்தடத்தினையே – என்றும்
சொல்லுகிறபடியே

शीलादिகுணங்களாலும், கண்ட போதே श्रमापहारமான வடிவழகாலும்,

அனைவரையும் வாழ்வித்து पितृ वचन परिपालन धर्मத்தை

உபதேஶித்து दण्डकारण्य வாஸிகளான மஹரிஷிகளை

खरदूषण -त्रिशिरः -कबन्धादिகளின் நிரஸனத்தாலே निर्भयர்களாக்கி

सुन्दरी रघुनाथस्य सुरस्त्रीदुःखशान्तये।

दशाननस्य भवने दशमासानुवा स ह॥ – என்கிறபடியே

பந்தீக்ருதர்களான ப்ருந்தாரக ஸுர ஸுந்தரிகளுடைய

दुःख निवृत्त्यर्थமாக தன்னுடைய निर्हेतुक காருண்யத்தாலே
அபேOாக வநிகையிலே வஸித்த ஜனகராஜன் திருமகளை
வ்யாஜீகரித்து
இலங்கைக்கிறைவன் தன் திண்ணாகம் பிளக்கச்சரம்
செலவுய்த்தாய் – என்றும்,

பொய்யிலாத பொன்முடிகள் ஒன்பதோடொன்றும் அன்று
செய்த வெம்போர்தன்னில் அங்கோர் செஞ்சரத்தால் உருள
எய்த எந்தை – என்றும்,

லோகத்ரய கண்டகனான இராவணனை தலைபத்தும் அறுத்துகந்து,
இராக்கதர்வாழ் இலங்கை பாழாளாகப்பண்ணி,
சீராரும் திறலனுமனுக்குத் தன் திருவடிவத்தை ப்ரஸாதித்து
பரதனும் தம்பி சத்துருக்கனனும் இலக்குமனனும் மைதிலியும்
தாமும் கோப்புடைய சீரிய சிங்காஸனத்திருந்து ஏழுலகும் தனிக்கோல்

செல்ல திக்குநிறை புகழாளராக प्रद्युम्नांशभूत ராய் ஸ்ரீராமாவதாரம்
செய்தருளினீர்

## பலராமாவதாரம்

ஒற்றைக்குழையும் நாஞ்சிலும் ஒருபால் தோன்றத்தான்தோன்றி –
என்றும்,

शैलाभं सपदि जघान यः प्रलम्बं

गङ्गायां कुरुनगरीं च पातयन्यः।

तद्दर्पं व्यपनयदाशु नीलवासाः

तं देवं शरणमहं गतोस्म्यनन्तम्॥ – என்றும்,

यःपृथ्वीमसुर-भयादभङ्गुरार्थामुद्धर्तुं मुसल हलायुधो बभूव – என்றும்,
பிலம்பன் தன்னைப் பண்ணழியப் பலதேவன் வென்ற – என்றும்,
ஓவாப்புகழ்ப் பலதேவனென்னும் – என்கிறபடியே தேவரீர்
திருவனந்தாழ்வானுடைய அம்ப1ஒத்தோடு கூடியவராய்

देवकी रोहिणीगर्भ ஸங்க்ரமணத்தாலே ஸங்கர்ஷணன் என்கிற
திருநாமத்தை உடையவராய் அவதரித்தருளி,

செம்பொற்கழலடிச் செல்வா பலதேவா – என்றும்,
நம்பிமூத்தபிரான் – என்கிறபடியே

ஜ்ஞானாதிகர் எல்லோரும் கொண்டாடும்படி हलायुध धारियாய்,

ஸ்ரீக்ருஷ்ணனுக்கு ஸர்வாவஸ்தைகளிலும் सहायभूतராய்,

गोपकुमार ரூபத்தாலே நலிவன் என்று வந்த प्रलम्बासुरனை நிரஸித்து,

ऐश्वर्यमदमत्तர்களான துர்யோதனாதிகளுடைய கர்வத்தை

हलाकर्षणத்தாலே உன்மூலமாக்கி, त्विषदादि களான துஷ்ட

ராஜாக்களை நிக்ரஹித்து ஜகத்தை அடைய प्रद्युम्नांशभूतராய்
பலராமாவதாரம் செய்தருளினீர்.

<u>ஸ்ரீக்ருஷ்ணாவதாரம்</u>

தந்தை தளைகழலத் தோன்றிப்போய், ஆய்பாடி
நந்தன் குலமதலையாய் வளர்ந்தான் காணேடீ,
நந்தன் குலமதலையாய் வளர்ந்தான் நான்முகற்குத்
தந்தைகாண், எந்தை பெருமான் – என்றும்

भूभारक्षपणकृते सुरार्थितो यः

देवक्यास्तनुजपदं समेत्य दुष्टान्।

सञ्जघ्ने सपदिहि लीलयैव दैत्यान्

तं वन्दे यदुकुलभूषणं दयाब्धिम्॥ – என்கிறபடியே

कालनेमिप्रभृतिகளான மஹாஸுரர்கள் கம்ஸாதிகளாய் ஜனித்து

அவர்கள் பண்ணும் उपप्लवங்கள் பொறுக்க மாட்டாமையாலே
தேவதைகள் ப்ரார்திக்க

ततोऽखिल जगत्पद्मबोधायाच्युत भानुना।

देवकीपूर्वसन्ध्यायाम् आविर्भूतं महात्मना॥ – என்றும்,
ஒருத்தி மகனாய் பிறந்து
ஓரிரவில் ஒருத்தி மகனாய் ஒளித்து வளர – என்கிறபடியே

சீதக்கடலுள் அமுதன்ன தேவகிக்கு மகனாகப் பிறந்து, மாதர்க்குயர்ந்த அசோதை மகனாக வளருகிற அளவிலே

கண்சோர வெங்குருதி வந்திழிய வெந்தழல் போல் கூந்தலாளை
மண்சேர முலையுண்ட மாமதலாய் – என்றும்,

தளர்ந்தும் முறிந்தும் சகடவசுரர் உடல் வேறா
பிளந்து வீயத் திருக்காலாண்ட பெருமான் – என்றும்,

புணரேய் நின்ற மரமிரண்டின் நடுவே போனமுதல்வாவோ – என்றும்,

உறியார்ந்த நறுவெண்ணையொளியால் சென்றங்கு
உண்டானைக் கண்டாய்ச்சி உரலோடார்க்கத்
தறியார்ந்த கருங்களிறே போல நின்று
தடங்கண்கள் பனிமல்கும் தன்மையான் – என்றும் சொல்லுகிறபடியே

आश्रित स्पर्श முள்ள द्रव्यமே தேவரீருக்கு धारकं என்று தோற்றும்படி

துன்னுபடல் திறந்துபுக்கு மத்துறுகடை வெண்ணெய்
களவினில் உர விடையாப்புண்டு எத்திறம் உரலினோடு
இணைந்திருந்தேங்கிய வெளிவே – என்றும்

ஜ்ஞானாதிகரெல்லோரும் மோகிக்கும்படி எளியனாய்

सर्वस्य जगतः पालौ वत्सपालौ बभूवतुः என்னும்படி

காளையாகிக் கன்றுமேத்துக்
குன்றெடுத்து அன்று நின்றான் – என்றும்,

தன்னேராயிரம் பிள்ளைகளோடு
தளர் நடையிட்டு வருவான் – என்றும்,

பெற்றம் மேய்த்துண்ணும் குலத்தில் பிறந்து – என்றும்,

கும்பக்களிறட்டகோவே கொடுங்கஞ்சன்
நெஞ்சினில் கூற்றே – என்றும்,

பார்தனுக்காய் அன்று பாரதம் கைசெய்திட்டு
வென்ற பரஞ்சுடர் – என்கிறபடியே

गोवर्द्धणोद्धरणादिகளாலும், மற்றுமுள்ள अतिमानुष चेष्टितங்களாலும்,

கம்ஸாதிகளான असुरप्रकृतिகளுடைய நிரஸனத்தாலும்,
பார்த்தனுக்கு கீதோபதேேசம் செய்ததாலும், உலகோரை உய்வித்து

अप्रतर्क्यங்களான அனுகூல ப்ரதிகூல विभागமற எல்லோரையும்

திருத்தி अधर्मத்தை ஒழித்தருளி

कृत्वा भारावतरणं पृथिव्याः पृथुलोचनः।

मोहयित्वा जगत्सर्वं गतस्स्वस्थानमुत्तमम्॥ – என்கிறபடியே

தன்னுடைச்சோதிக்கு எழுந்தருள प्रद्युम्नांशभूतராய்
ஸ்ரீக்ருஷ்ணாவதாரம் செய்தருளினீர்.

**கல்க்யவதாரம்**

கடும் பரிமேல் கற்கியை நான் கண்டுகொண்டேன் – என்றும்

भूत्वा यो हयवहने जगत्यमुष्मिन्

म्लेच्छानां निधनविधिं विधाय सद्यः।

आद्यस्य व्यतनुत वै युगस्य धर्मं

सोऽस्माकं शरणमहीन्द्र भोगशायी॥ – என்றும்

கல்கியா மென்னும் கார்வண்ணன் என்றும் இக்கலியுகத்திலே
சம்பளக்ராம வாஸியான விஷ்ணுவென்கிற ப்ராஹ்மணனுடைய

க்ருஹத்திலே அவதரித்து ஹயத்தின் மேலேறி कर-वालहस्तராய்

दुष्टनिग्रहं பண்ணியும், सदुपदेशादि களாலே सम्यग्ज्ञान த்தை

உண்டாக்கியும், கார்த்தயுக धर्मமான भगवद्धर्मத்தை
ப்ரவர்த்திப்பித்தருளியும்,

கலியுகமொன்றுமின்றிக்கே தன்னடியார்க்கு அருள்செய்யும்
மலியும் சுடரொளிமூர்த்தி – என்றும்,

पाषण्डान् कलिकलुषीकृत-स्वधर्मान् ।

निश्शेषं सपदि निराचिकीर्षुरीशः।

यःकल्की भवति नितान्तघोररूपः॥ – என்றும்,

தொண்டீர் ஒக்கத் தொழுகிற்றிராகில்
கலியுகமொன்றுமில்லையே – என்கிறபடியே

கலியுகாந்தத்திலே वर्णाश्रम धर्मங்கள் லுப்தங்களாய் லோகமடங்க

பாஷண்ட தூஷிதமானபோது धर्मस्थापनम् செய்தருளுகைக்காகவும், இந்தக் கலியினாலே கலங்கிநிற்கிற பாமரஜனங்களுக்கு

ஏற்றரும் வைகுந்தத்திருப்பு தருவதற்காகவும் अनिरुद्धांशभूतராக கல்கிரூபமாக அவதரிக்க உள்ளீர். (அவதரித்தருளினீர்)

மற்றுமுள்ள पद्मनाभादिகளான அவதாரங்களாலும்

दुष्टनिग्रहादिகளாலே ஸ்ரீவைகுண்டலோகத்தை அடைய வாழ்வித்தருளினீர். இப்படி பற்பல அவதாரங்கள் செய்தருள்வது விபவம்.

<u>அந்தர்யாமித்வமாவது</u>

योगतत्त्वे न मुनयः सदा मां ध्यानगोचरम्।

पश्यन्ति देवि हृन्मध्ये तस्मान्मां हार्द उच्यते॥ – என்றும் (श्रीप्रश्ने),

यस्य आत्मा शरीरं। यस्य पृथिवी शरीरं – என்றும்,

एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः – என்றும்,

वेदैश्चसर्वैः अहमेव वेद्यः। जगत्सर्वं शरीरं ते – என்றும்,

शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः – என்றும்,

पद्मकोश प्रतीकाशं हृदयञ्चाप्यधोमुखं – என்றும்,

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठञ्च समाश्रितः – என்றும்,

तत्रापि दह्रङ्गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् – என்றும்,
ஓடிவந்தென் மனக்கடலில் வாழவல்ல மாய மணாள நம்பீ – என்றும்,
நேசத்தினால் நெஞ்சநாடு குடிகொண்டான் – என்றும்,

மாசற்றார் மனத்துளானை – என்றும்

भूगतஜலம்போலே உள்ளத்தே உறைகின்றவராய்,

सकलजन-हृदयान्तर्वर्तियாய், प्रवृत्ति निवृत्यादिகள் செய்பவராய், விபே⁴ஷித்து யோகிகள் ஸித்தர்கள் பகவத் ஜ்ஞானிகளுடையவும் ஸகல ஸ்ரீவைஷ்ணவர்களுடைய ஹ்ருதயகமலத்திலே எழுந்தருளியிருப்பது அந்தர்யாமித்வம்.

<u>அர்ச்சாவதாரமாவது</u>

अज्ञानात् भव सागरे विलुटतां भ्रान्तात्मनां देहिनां

नेशानां तवपादपद्मयुगलं योगादिभिस्सेवितुम्।

दृष्टिंसाधकयन् पुमर्थमखिलं तिष्ठन् स्थलेषूत्तमे

ष्वर्चारूपमवाप्य सर्व सुलभो देव्यासह द्योतसे॥ – என்றும்,

अर्चावतारस्सर्वेषां बान्धवो भक्तवत्सलः। – என்றும்,

अर्च्यस्सर्व-सहिष्णुरर्चक-पराधीनाखिलात्मस्थितिः – என்றும்,
நலங்கடல்கிடந்து மேல் ஆக மூர்த்தியாய வண்ணம் – என்றும்,

தமருகந்ததெவ்வுருவம் அவ்வுருவம்தானே
தமருகந்ததெப்பேர் மற்றப்பேர் – என்றும்,

சுவர்மிசைச்சார்த்தியும் வைத்தும் தொழுவர் – என்றும்,

ஸ்ரீ வைகுண்ட லோகத்திலே இன்துணைப் பதுமத்தலர்மகளும் நான்முகனும் அமரர்களும் – புவியில்வாழ் ஜீவகோடிகளின் ஸம்ஸார நிஸ்தரணத்துக்கு விரகுகாண மாட்டாமல் தேவரீரை ப்ரார்த்திக்க, அப்போது

सर्वातिशायि षाड्गुण्यं संस्थितं मन्त्रबिम्बयोः।

मन्त्रे वाच्यात्मना नित्यं बिम्बेतु कृपया स्थितम्॥ – என்று
அருளிச்செய்தபடியே

அஜ்ஞானிகளுடைய ரக்ஷணார்த்தமாக ஸௌலப்யத்தின் எல்லை நிலமாக மந்த்ர மயமான பிம்பத்திலே திவ்யஸாந்நித்யம் கொண்டு

जायतेसिद्धिरचिरात् स्थाने स्थापय तां च माम्।

ज्ञानं योगश्च यदिदं केवलं मुक्तिकारणं।

स्थापयित्वा तु मां स्थाने पुरुषः सर्वमश्नुते।

यो मां संस्थाप्य सदने ममाराधयति स्वयम्।

न तस्य केवलं सिद्धिः स्थानाभ्यर्हजुषामपि।

तस्मात्सर्वात्मना ब्रह्मन् स्थाने मां स्थापयेत्पुमान्॥ (पाद्मे) என்று அருளிச்செய்தபடியே

ஸ்தலங்கள்தோறும் दिव्यमङ्गलविग्रहமாய் எழுந்தருளி, ஞானிகளும், அஜ்ஞாநிகளும், பக்தர்களும், பகவரும், பாமரரும்,

கண்ணாரக்கண்டுகொள்ளும்படியாகவும், विभवங்களிலே செய்த

चेष्टितதங்களையும், திருக்கல்யாணங்களையும்,

भक्तानुग्रहकारणार्थமாக அர்ச்சையிலே கொண்டருளி தாளடைந்தோர்தங்கட்டுத் தானே வழித்துணையாக அர்ச்சாவதாரம் செய்தருளினீர். இப்படிப்பட்ட அர்ச்சாவதாரத்திலே தன்னுடைய

प्रतिष्ठादि க்ரியைகளையும், ब्रह्मोत्सवादि உத்ஸவங்களையும் செய்விக்கும்படியான

अनन्तो गरुडश्चैव विष्वक्सेनः कपालभृत्।

ब्रह्मा इत्येव पञ्चैते शृण्वन्ति पृथगीरितम्॥

अनन्तः प्रथमे रात्रौ गरुडश्च द्वितीयके।

तृतीयरात्रौ सेनेशः चतुर्थे वेधसा श्रुतम्॥

रुद्रःपञ्चमरात्रौ च श्रुत्वा शास्त्रं पृथक् पृथक्। – என்கிறபடியே (विहगेन्द्रे) பரமபதத்திலே அநந்த கருட விஷ்வக்ஸேந ப்ரஹ்ம ருத்ராதிகளுக்கும்,

नरनारायणाभ्यां च जगतो हितकाम्यया।

तथाऽनुष्ठीयते मूलधर्मोऽत्र मुनिपुङ्गवाः॥ – என்றும் (ईश्वरे),

पुरा तोताद्रिशिखरे शाण्डिल्योऽपि महामुनिः।

समाहितमना भूत्वा तपस्तत्वा महत्तरम्॥

अनेकानि सहस्राणि वर्षाणां तपसोऽन्ततः।

द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च॥

साक्षात् सङ्कर्षणाल्लब्ध्वा वेदमेकायनाभिधम्॥ – என்றும் (ईश्वरे),

दिव्यं सच्छास्त्रजालं तदुक्त्वा सङ्कर्षणादिभिः।

प्रवर्तयामास भुवि सर्वलोकहितैषिभिः॥ – என்றும் (ईश्वरे),

पञ्चायुधांशास्ते पञ्च शाण्डिल्यश्चौपगायनः।

मौञ्ज्यायनः कौशिकश्च भारद्वाजश्च योगिनः॥

पञ्चापि पृथगेकैकदिवारात्रं जगत्प्रभुः।

अध्यापयामास यतः ततस्तन्मुनिपुङ्गवाः॥ – என்கிறபடியே (ईश्वरे),

प्रपञ्चத்தின் उज्जीवनार्थமாக नरனாகவும் नारायणனாகவும் பூவுலகில்

அவதரித்து நரனுக்கும், पञ्चायुध अंशभूतர்களாக

तोताद्रिशिखरादि களில் அவதரித்த ஶாண்டில்யாதி ஐந்து மஹரிஷிகளுக்கும், மற்றுமுள்ள அநேக க்ஷேத்ர –ஶிகர –ஆரண்யாதிகளிலும் தானே தோன்றி

तत्परव्यूह विभव स्वभावादि निरूपणम्।

पाञ्चरात्राह्वयं तन्त्रं मोक्षैक फल लक्षणम्॥ – என்றும் சொல்லுகிறபடியே மயர்வேதும் வாராமல் மானிடரை வாழ்விக்கும் திவ்யமான ஶ்ரீபாஞ்சராத்ர ஶாஸ்த்ரத்தை உபதேஶித்தருளினீர்.

இப்படி அந்த பகவத் ஶாஸ்த்ர பூர்வகமாக திவ்யதேஶங்களிலேயும் பற்பல ஸ்தலங்களிலேயும் அர்ச்சிக்கபடா நிற்கிற தேவரீர், திவ்யமங்கள விக்ரஹ விஶிஷ்டநாய், அடிக்கீழ் அமர்ந்து புகுந்து அடியீர்

வாழ்மினென் என்று அருள் கொடுக்கும் பிரானாய், இந்த----ஸ்தலத்திலே நித்ய ஸாந்நித்யம் செய்தருளி, தேஶாந்தரகதனான புத்ரன் பக்கல் பித்ரு ஹ்ருதயம் கிடக்குமாப்போலே ஸம்ஸாரிகளாய் பாமரராய் கிடக்கும் ஜீவாத்மாக்களை கடாக்ஷித்து தன்னுடைய ஸௌந்தர்யாதிகளாலே வஶப்படுத்தலாமென்று பார்த்தருளி

आराधनादि यागेभ्य एषोऽतिप्रीतिवर्धनः।

महत्प्रीतिर्येन मम उत्सवेन भविष्यति॥ – என்றும் (श्रीप्रश्ने)

आराधनमिदं ब्रह्मन् मोक्षकामैरनुष्ठितम्।

पश्वादिफलकामैस्तु दुरनुष्ठानमद्भुतम्।

तोषणं मम कल्याणमनुष्ठितममानुषम्।

सवस्सांसारिकं दुःखमुत्तरन्ति तदम्बुधिम्।

यष्टार इति विद्वांसो निर्ब्रुवन्त्युत्सवाह्वयम्॥ (पाद्मे) - என்றும் அருளிச்செய்தபடியே

ஆனந்தத்தை பிறப்பித்து உஜ்ஜீவிப்போமென்று திருநாள் கண்டருளத்திருவுள்ளம் பற்றி ஶ்ரீபாஞ்சராத்ரவிதியினாலே----மாஸ ----தின மஹோத்ஸவம் ஸங்கல்பித்து அதிலே உத்ஸவாங்கமாக தேவரீருடைய ஆழிப்பிரானும் சேனாபதி ஆழ்வானும் தேவரீரிடத்தில் நியமனம் பெற்று திருமுளைத்திருநாளுக்கு ம்ருத்ஸங்க்ரஹணம் செய்தருளி वीथिशोधनार्थமாகத் திருவீதி அலங்கரித்தருளினர்.

## முதல்திருநாள்

கொடியாவடுபுள்ளுடையான் – என்றும்,

கருளப்புட்கொடி – என்றும்,

सुपर्णोसि गरुत्मान् दिवङ्गच्छ सुवः पत – என்றும் சொல்லுகிறபடியே பெரிய திருவடிநாயனாரும் திருக்கொடித் திருநாள் கொண்டருளி திருக்கொடிமரத்திலே ஆரோஹணித்தருளினார்.

वेदश्रृङ्ग विमानमध्य विलसत् लक्ष्मीसदा सेवितम्

मुक्तारत्न सुवर्णकुण्डलधरं केयूरहारान्वितम्।

नानावाद्य निनादपूरितमहं रथ्यासु सायं शनैः।

आगन्तार मनन्तजन्मसुकृतैरद्राक्षमक्ष्णां फलम्॥ – என்கிறபடியே

பேரீதாடனம் கண்டருளி நவரத்னகசிதமான இந்தரவிமானத்தில் (திருச்சிவிகையில்) ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆ౦ரிதஜனங்களை ஸ்ரீமான்களாகச்செய்தருளினீர்.

## <u>இரண்டாம் திருநாள்</u>

तेजोभिर्दिवसायमान रजनी सूर्यप्रभामण्डले

मध्ये मंजुल पङ्कजासनवरे माणिक्य कान्तिस्स्थिते।

उत्तिष्ठन्तममोघ-दर्शनमिमं पश्यन्ति ये देहिनः

ते सत्यं मनुजा द्विजाति पशवश्चान्ये च धन्यावहम्॥ – என்றும்,

ध्येयस्सदा सवितृमण्डल मध्यवर्ति नारायणः – என்றும்,

வானிடை அருக்கன் மேவி நிற்பாற்கு – என்கிறபடியே

புறவிருள் விலக்கியருளும் ஆதித்யனின் மண்டலத்தில் அகவிருளை நீக்குமவராய் ஸூர்யப்ரபை வாஹனத்தில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆ౦ரிதஜனங்களை ஸ்ரீமான்களாகச்செய்தருளினீர்.

## <u>மூன்றாம் திருநாள்</u>

अस्थाने भयशङ्कयातिसुभगं दृष्ट्वापदस्तावकम्

फूत्कारानिलसम्भृतैः विषगणैः दुष्प्रेक्ष्यमार्येतरैः।

छत्रीभूत फणासहस्त्र विलसद् रत्नांशु नीराजितम्

शेषित्वं निखिलात्मनां विशदयस्यास्थाय शेषं विभो॥ – என்றும்,

அனந்தன்மேல் நண்ணி நன்குறைகின்றானை – என்றும்,

சென்றால் குடையாம் இருந்தால் சிங்காசனமாம்
நின்றால் மரவடியாம் நீள்கடலுள், என்றும்
புணையாம் மணிவிளக்காம் பூம்பட்டாம் புல்கும்
அணையாம் திருமாற்கு அரவு – என்கிறபடியே

திருவெண்கொற்றக்குடை போலே இருக்கிற फणासहस्रத்தில்

प्रकाशिயாய் நின்றுள்ள ரத்னங்களுடைய प्रभासंसर्गத்தாலே விசித்ர

வர்ணமானவரும், सर्वविध தாஸபூதருமான திருவனந்தாழ்வான்
பேரில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆ'ப்'ரிதஜனங்களை
ஸ்ரீமான்களாகச்செய்தருளினீர்.

**நான்காம் திருநாள்**

पक्षीशे निगमात्मनि प्रविलसत्  पक्षेनिलक्ष्यान्विते

ब्रह्माण्डे त्रिदशेन्द्रभक्त-मनुजैरासेवितुं संस्थिते।

भेरी मद्दल तालकाहलरवैः ध्वाने त्रयीशेखरे

श्रीशं शार्ङ्गधरं नमामि शिरसा सायन्तरीयोत्सवे॥ – என்றும்,
தெய்வப்புள்ளேறி வருவான் – என்றும்,

ஆனையின் துயரம்தீரப்புள்ளூர்ந்து – என்றும்,

மேலால்பரந்த வெயில்காப்பான் வினதைசிறுவன்
சிறகென்னும் மேலாப்பின்கீழ் வருவானை – என்கிறபடியே
முக்த்யார்த்திகளுக்கு முக்திப்ரஸாதமாக ஸதாதாஸபூதரான
பெரியதிருவடி நாயனாரின் பேரில் ஏறி எழுந்தருளி
திருவீதி அலங்கரித்து ஆ'ப்'ரிதஜனங்களை
ஸ்ரீமான்களாகச்செய்தருளினீர்.

**ஐந்தாம் திருநாள்**

तत्तादृक् जनकात्मजा परिभवक्लान्तस्य यद्रक्षसाम्

सङ्ग्रामे तव रूपमुग्रमभवत् द्रष्टुं तमिच्छावताम्।

सन्तोषाय सुमेरु चारु वपुषः पृष्ठे वहन् मारुतेः

आरुह्येषुधिकार्मुकाशुगवरान् धत्ते मनोज्ञाकृतिः ॥ – என்றும்,

திறல்விளங்கு மாருதியோடமர்ந்தான் – என்கிறபடியே
மஹாமேரு ஸத்ருஶமான சிறியதிருவடி நாயனாரின் பேரில் ஏறி
எழுந்தருளி தூணீர கார்முக ஶரவரங்களைத் தரித்தருளி
அதிமனோகரமான வடிவழகாலே அசேஷ ஜகத்தையும் வாழ்வித்தருளி
திருவீதி அலங்கரித்து ஆஶ்ரிதஜனங்களையும்
ஸ்ரீமான்களாகச்செய்தருளினீர்.

## ஆறாம்திருநாள்

इच्छामो महता गजेन पदवीमायान्तमित्यादरात्

ऐच्छन् ये न हि तेऽलभन्त दयया निर्व्याजया ते वयम्।

अद्यायान्तमिभाधिराजम् अधिरुह्यासीम सौन्दर्यया

देव्या श्रीशविभो भवन्तमधुना दृष्ट्वा परं निर्वृताः ॥ – என்றும்,

ஆனைக்கன்றருளை யீந்த கண்ணறா – என்கிறபடியே

பக்திக்கு முக்தியைப்பெற்ற கஜேந்த்ராழ்வான் பேரில் ஏறி எழுந்தருளி
திருவீதி அலங்கரித்து ஆஶ்ரிதஜனங்களை
ஸ்ரீமான்களாகச்செய்தருளினீர்.

## ஏழாம் திருநாள்

नानावर्ण विचित्रधामनिकरैः प्रालम्बिमुक्तासरैः

काश्मीरैः हिमवालुकापरिचितैः कस्तूरिपङ्कैश्शुभैः।

आलिप्तावयवो मुदंविरचयन् श्रीपुष्पकं संश्रितः

श्रीभूमीश करोषि सर्वमनुजान् धन्याननन्याश्रयान्॥ – என்றும்,

மஞ்சளும் செங்கழுநீரின் வாசிகையும் நாறுசாந்தும்
அஞ்சனமும் கொண்டுவைத்தேன் அழகனே நீராடவாராய் –
என்கிறபடியே

அபராஹ்னத்திலே आर्थिகளுக்கு समस्त कल्याणप्रदராய்

சூர்ணாபிஷேகம் கண்டருளி ஸ்ரீபூமிஸஹிதராய் नवरत्नघचितமான,

கிங்கிணீஜால शोभितமான புஷ்பகவிமானத்தின் பேரில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆப்₃ரிதஜனங்களை ஸ்ரீமான்களாகச்செய்தருளினீர்.

## எட்டாம் திருநாள்

वलत्तुरग मल्लके विविध पाद विक्षेपणे

खुर प्रभव धूलिभिः क्षुभित पङ्किलाम्भो निधिम्।

विडंबितमनोगतौ धवल चामराऽलङ्कृते

प्रधावति महारथं सपदि वीक्षितुं शार्ङ्गधृत्॥ – என்றும்,

கடும்பரிமேல் கற்கியை நான் கண்டுகொண்டேன் – என்கிறபடியே அபராஹ்னத்திலே வீதியாரவந்த களைப்பாறவும், தன்னடியாருக்கு

इह पर सुखप्रदानार्थமாகவும் தேவிமாரோடே கூட ஜலக்கிரீடை என்று சொல்லுகிறபடியே ஜலத்ரோணியில் தீர்த்த அவகாஹனம் கண்டருளி காட்டில் உறைவோர்க்கு உகந்தருள்செய்ய மிருகங்களும் பேரின்பப்பெறு நாடு பெற ம்ருகயாத்திரை கண்டருளி

मनसाचिन्त्यमाने तु हयः प्रत्यक्षताङ्गतः।

वायुरश्वत्वमापन्नः रज्जुस्तत्वाभिमानिनी।

तस्योपरि समातिष्ठत् सर्वाभरण भूषितः॥ – என்கிறபடியே தேவரீர் உத்யானவனத்திலே ஒருகுதிரையை சிந்திக்க வாயுபகவான்

பரியாய் சமைய, मनोवेघतुल्यமான குதிரைநம்பிரான் பேரில் ஏறி எழுந்தருளி அர்த–புலாயனாதி கதிகளை ப₃ரிக்ஷித்து நடத்தி இடவரும் வலவருமாய் வையாளி விட்டருள, அங்கமலத்தடவயல் சூழ் ஆலிநாடன் மங்கைமன் கலிகன்றியும் எதிர்பட்டு வேடர் பறிப்பை நடத்தி திருவிரல்கனையாழியை தன் திருமுத்துக்களாலே பிடித்து

இழுக்க கலியன் என்று பேரிட்டு ஸ்ரீபாதஸ்பர்ஶம் ஏற்பட ஜ்ஞானோதயம் பெற்று வாடினேன்வாடி என்றவர்கதறி அலந்தேன் வந்தடைந்தேன் அடியேனை ஆட்கொண்டருளே என்று சரணடைய, அவரையாட்கொண்டு கடாக்ஷித்தருளி திருவீதி அலங்கரித்து ஆஶ்ரிதஜனங்களை ஸ்ரீமான்களாகச்செய்தருளினீர்.

**<u>ஒன்பதாம் திருநாள்</u>**

मुक्ताविद्रुम मालिकाभिरमलैः अंभ्रर्कषैः केतुभिः

नानारत्न विचित्रितैश्च मुकुरैः चेतोहरैश्चामरैः।

सूताधिष्ठित वाजिपुङ्गववरैः संभूषितं स्यन्दनम्

श्री भूमीश हरेऽधिरुह्य कृतवान् तीर्थैः कृतार्थं जगत्॥ – என்றும்

கலக்கவேழ்கடலேழ்மலை உலகேழும்கழிக்கடாய்
உலக்கத்தேர் கொடு சென்ற மாயம் – என்றும்

படர்ப்புகழ்பார்த்தனும் வைதிகனுமுடன் ஏற திண்தேர் கடவி –
என்கிறபடியே

सर्वालङ्कृतமாய், पुष्पक विमानத்தோடொத்து விளங்குமதாய், निर्निद्रकान्तिகளான मुक्ता विद्रम மாலிகைகளாளேயும், अतिनिर्मलங்களாய் இருக்கிற ध्वजங்களாலேயும், विविधरत्न विचित्रங்களான கண்ணாடிகளாலேயும், அதிமநோஹரங்களான சாமரங்களாலேயும், अतिसमर्थனான ஸாரதியாலேயும், अधिष्ठितங்களான हयश्रेष्ठங்களாலேயும் அலங்க்ருதமான கண்டவர் கண்குளிரக்கண்டு आनन्दनिर्भरராம்படி இருக்கிற திவ்யமான திருத்தேரிலே எழுந்தருளி ஸ்வயம் ப்ரகாஶமாய், दिव्याभरण दिव्यायुधங்களாலே பூஷிதராய், சேவை சாதித்தருளி

रथस्थं केशवं दृष्ट्वा सर्वपापैः प्रमुच्यते – என்கிறபடியே

திருத்தேரிலே சேவித்தவர்கள் पाप द्रुमங்களை வேரொடுவெட்டி
வேர்களைந்து அனுக்ரஹம் செய்தருளி திருவீதி அலங்கரித்து,
மாமுனிவேள்வியைக்காத்து அவபிரதம் ஆட்டிய அடுதிறல் –
என்கிறபடியே
தேவரீர் க்ருபா கடாக்ஷத்தாலே கோலாஹலமாகக் கண்டருளின
மஹோத்ஸவத்தினுடைய पूरणार्थமாக *1 अवभृथस्नानं கண்டருளி

अवभृथस्नान समये देवेन सह मज्जनम्।

सर्वपापप्रशमनं सर्वमङ्गलदायकम्॥ – என்கிறபடியே

தன்னொடு நிமஜ்ஜித்த பக்தர்களுக்கு पापपनोदनं செய்து
முக்திபதத்தை ப்ரஸாதித்தருளிநீர்.

<u>பத்தாம் திருநாள்</u>

दिवसे पुष्पयागे तु कृत्वा द्वादशपूजनम्। – என்றும்,

श्रुणु वत्स प्रवक्ष्यामि पुष्पयागाख्यमुत्सवम्।

कर्तव्यं मम सम्प्रीत्यै सर्वदोषान् दहेत्पुनः॥ – என்றும்
அருளிச்செய்தபடியே
ஸ்ரீபாஞ்சராத்ர விதியினாலே மஹோத்ஸவம் கண்டருளி அதன்
மத்தியிலே ஏற்பட்ட मन्त्रलोपादि தோஷங்களுக்கு ப்ராயச்சித்தமாகவும்,

न्यूनातिरेक शान्त्यर्थமாகவும்,

மூன்று மூர்த்தியாகி மூன்று
மூன்று மூன்று மூன்றுமாய் – என்கிறபடியே
த்வாதஶாக்ஷர ப்ரதிபாத்யரான தேவரீர் த்வாதஶாக்ஷரங்களாலே
த்வாதஶாராதனம் கண்டருளி
செண்பக மல்லிகையோடு செங்கழுநீர் இருவாட்சி
என்பகர்பூவும் கொணர்ந்தேன் – என்கிறபடியே
பஞ்சவர்ண புஷ்பங்களைக்கொண்டு இந்த உத்ஸவத்தாலே

---

1) வலத்தாழிப்பிரானைக்கொண்டு

अतिसन्तुष्टரான தேவரீர் புஷ்பயாகம் கண்டருளி साञ्जलिहस्तர்களான பக்தர்களோடும், பாகவதோத்தமர்களோடும்

अनन्त-गरुड-विष्वक्सेन-पराङ्कुश-परकाल-यतिवरप्रभृतिகளாலும், ஸகலமான ஆசார்யர்களாலும், ஸ்தூயமானராய், ஸேவ்யமானராய், ப்ரஹ்ம -ருத்ராதி ஸேவகர்கள் அவரவர் லோகத்திலே விடைகொள்ள திருவுள்ளம்பற்றி ஸப்தப்ராகாரங்களிலும் எழுந்தருளினீர்.

ब्रह्मा सनन्द सनकादि महर्षयश्च।

दौवारिकाः कुमुदपूर्व-गणादिनाथाः।

तिष्ठन्ति वीक्ष्य तव शासनमद्य सर्वे॥ - என்கிறபடியே

कुमुदादिகளும், शङ्ख चक्राद्यायुधगणங்களும், ப்ரஹ்மாதி தேவர்களும், ஸனகாதி மஹரிஷிகளும், இந்த்ராதி திக் பாலகர்களும், வையத்தேவர்களும், மற்றுமுள்ள பாகவதோத்தமர்களும் தேவரீர்

திருநாளுக்கு விடை கொண்டு यथोचित किङ्कर வ்ருத்திகளைப்பண்ணி

कृतार्थர்களாய் தேவரீரிடத்தில் விடை ப்ரஸாதித்தருள வேணுமென்று நியமனத்தை எதிர்பார்த்து நிற்கின்றவளவிலே அவர்களுக்கு விடை தந்தருள வேணும்.

अज्ञान कर्शनसुदर्शन पाञ्चजन्य

कौमोदकी प्रथितनन्दक शार्ङ्गमुख्याः।

देवोत्सवं कलयितुं धरणीमुपेताः

भूयः प्रयातभुवनं भुवनानि वन्द्याः॥

सुदर्शनादि दिव्यायुधங்கள் வந்து ஸேவித்து நிற்கிறார்கள் அவர்கள் தன் ஸ்ரீவைகுண்டத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

आखण्डल द्रुहिणमुख्यमखाशनाद्याः

वैकुण्ठनाथनगरीकृत नित्यवासाः।

अद्योत्सवार्थमवनीमवतीर्णवन्तो

भूयं प्रयात हरिणानुमतास्वलोकान्॥

वैकुण्ठवासिகள் வந்து ஸேவித்து நிற்கிறார்கள் அவர்கள் தன் ஸ்ரீவைகுண்டத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

अष्टौ ये कुमुदादयो मधुरिपोः कैङ्कर्यधौरेयकाः

विष्वक्सेनसुरक्षिताः सुयशाः स्वर्णायकैस्संयुताः।

विष्णोरुत्सवलिप्सया वसुमती मय्यागतास्तेऽधुना

भूयोऽमीविवशन्तु विष्वनुमताः श्रीकान्त लोकान्तरम्॥

कुमुदादिகளும், विष्वक्सेनரும் வந்து ஸேவித்து நிற்கிறார்கள் அவர்கள் தன் ஸ்ரீவைகுண்டத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

त्रिविष्टपादिष्वनिशं निविष्टाः

भुवि प्रविष्टाः त्रियुगोत्सवाय।

प्रीतेन चैतेन कृताभ्यनुज्ञाः

पुनर्भजन्तु स्वपदं भरन्तः॥

ஸர்வலோக ஜனங்களும் வந்து ஸேவித்து நிற்கிறார்கள் அவர்கள் தத்தம் தேசங்களிலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

भक्ता हरेर्भागवताश्च सर्वे सक्तास्तदीयोत्सवसेवनेषु।

दत्ताभ्यनुज्ञा मुदितेन तेन तत्तादृशन्तु स्वपदं विशन्तु॥

பக்தாளும் பாகவதாளும் வந்து ஸேவித்து நிற்கிறார்கள் அவர்கள் தத்தம் தேசங்களிலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

**ब्रह्मा**

आरुह्य हंस महिलागम शोभितास्यः

वाण्यासमं विधिरसौ इह सेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

ப்ரஹ்மா – ஹம்ஸவாஹனாரூடனாய், அக்ஷஸூத்ர –கமண்டலுதரனாய், ஸரஸ்வதீ தேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் ஸத்ய லோகத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

**इन्द्रः**

ऐरावतं समधिरुह्य सवज्रहस्तः

शच्या सकं हरिहयोऽत्र निषेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

இந்த்ரன் – ஐராவதவாஹனாரூடனாய், வஜ்ராயுததரனாய், ப₃சீ தேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் அமராவதிபுரியிலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

**अग्निः**

आरुह्यमेष महिलागम शक्तिहस्तः

स्वाहायुतो हरिहयोऽत्र निषेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

அக்நி – மேஷவாஹனாரூடனாய், ஸ்ருக் ஸ்ருவதரனாய், ஸ்வாஹா –ஸ்வதா தேவிகள் ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் தேஜோவதிபுரியிலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

**यमः**

आरुह्य कृष्णमहिषं धृतदण्डहस्तः

धूम्रायुतो पितृपतिस्त्विह सेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

யமன் – மஹிஷவாஹனாரூடனாய், பாப்ப தண்ட தரனாய், ப்ப்யாமளாதேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் பித்ருலோகத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

**निर्ऋतिः**

आरुह्य तुङ्गहयमद्भुत खड्गधारी

भद्रायुतो निर्ऋतिस्त्विह सेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

நிர்ருதி – ஹயவாஹனாரூடனாய், கட்க கேட தரனாய், தீர்க்கிகா தேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் நிர்ருதிலோகத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

**वरुणः**

आरुह्य दिव्य मकरं वरपाशहस्तः

श्वेतायुतो वरुण एष निषेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

வருணன் – மகரவாஹனாரூடனாய், பாப்ப தரனாய், ப்பீதளா தேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் வித்யுல்லோகத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

## वायुः

आरुह्य दिव्यहरिणं ध्वजचारुहस्तः

युक्ताञ्जनो मरुदसास्त्विह सेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

வாயு – ஹரிணவாஹனாரூடனாய், த்வஜ தரனாய், ஸதாகதி தேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் வாயுலோகத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

## कुबेरः

आरुह्य पञ्चजनमागत शङ्खहस्तः

ऋद्ध्यायुतो धनद एष निषेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

குபேரன் – நரவாஹனாரூடனாய், பத்ம தரனாய், ஸம்பத்தேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் அளகாபுரியிலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

## ईशानः

आरुह्य चारुवृषभं सितशूलहस्तः

दुर्गायुतस्त्रिणयनोऽत्र निषेवते त्वाम्।

गच्छेत् यथापुर मसौ निजमेव लोकं

श्री भूसमेत भगवन् वितराभ्यनुज्ञाम्॥

ஈஶானன் – வ்ருஷபவாஹனாரூடனாய், ஶூல தரனாய், பார்வதீ தேவீ ஸமேதனாய் வந்து ஸேவித்து நிற்கிறான். அவன் தன் கைலாஸலோகத்திலே விடைகொள்ளும்படி திருவுள்ளம்பற்றியருளவும்.

देवादि देव भवदुत्सव-दर्शनार्थम्।

अभ्यागतान् हर विरिञ्चि पुरन्दराणाम्।

भक्तान् मुनीन् तव कटाक्ष स वीक्षणेन।

गन्तुं नियोजय हरे विजयैक दामन्।

तदस्तु भगवद्भक्ताःदेशान्तर निवासिनः।

देवस्योत्सव सेवार्थं ये नराःपूर्वमागताः।

तेषां स्वदेशयात्रार्थं देवस्योऽनुमतीकृताः।

तस्माद्गच्छन्तु ते भक्ताः स्वस्वदेशे यथासुखम्॥ - என்கிறபடியே தேஶதேஶாந்தரத்தில் நின்றும் ஆகதர்களான பரமைகாந்திகளுக்கும் யதிகளுக்கும், ஶ்ரீவைஷ்ணவர்களுக்கும், ஸர்வபக்தர்களுக்கும் ஶ்ரீ----ஸ்வாமியினுடைய க்ருபையினாலே ஸேவாபலம் தந்தோம், தீர்த்தபலம் தந்தோம் தந்தோம், மேலே திருக்கல்யாணத்திற்கு வாருங்கோள்.

स्वस्ति प्रजाभ्यः परिपालयन्तां न्यायेन मार्गेण महीं महीशाः

गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु।

## इतर वाहनानि *1

### सिह्मवाहनम्

कण्ठे कालनिवासशैलकमला प्राणेशपर्यङ्किता

कम्बुस्तोम कलाधिनाथ सदृशे कण्ठीरवांसे स्थितः।

कैलासोन्मिषदिन्द्रनील-शिखर प्रस्पर्द्धि दिव्याकृतिः

भूमादंबुरुहानुकारिनयनः श्रीरङ्गराजाम्बुधिः॥

---

1) அவரவர் தேசாசார அநுஷ்டானப்படி வாஹனபடனங்களை மாற்றிக்கொள்ளவும்.

கோப்புடைய சீறிய சிங்காசனத்திருந்து – என்கிறபடியே ஸிம்ம வாஹனத்தில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆப்ரிதஜனங்களை ஶ்ரீமான்களாகச்செய்தருளினீர்.

## हम्सवाहनम्

चञ्चुकोटिचलचारुमृणालं मञ्जुलं समधिरुह्य मरालम्।

चञ्चरन्नगरवीथिषु कुर्यात् बृन्दकाननपतिः कुशलं वः॥ – என்கிறபடியே ஹம்ஸ வாஹனத்தில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆப்ரிதஜனங்களை ஶ்ரீமான்களாகச்செய்தருளினீர்.

## चन्द्रप्रभा

चन्द्रमण्डलगतः स रङ्गराट् वज्रमौक्तिकमयैर्विभूषणैः।

भूषितः सुगुणगोदया सह राजवर्त्मसु विराजतेतराम्॥ – என்கிறபடியே சந்தரப்ரபை வாஹனத்தில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆப்ரிதஜனங்களை ஶ்ரீமான்களாகச்செய்தருளினீர்.

## आन्दोलोका

आन्दोलिकां ललितमौक्तिक लालितां तां

आन्दोलित स्फुटतरोभयचामरश्रीः

आरुह्य मोहनमयीं परिगृह्य मूर्तिं

आनन्दकन्दलमसौ भगवान्विधत्ते॥ – என்கிறபடியே திவ்யமான பல்லக்கில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆப்ரிதஜனங்களை ஶ்ரீமான்களாகச்செய்தருளினீர்.

## यालिवाहनम्

चलद्विमल-चामरद्वितयशोभिपार्श्वद्वयः

प्रमृष्टमणिमौक्तिक-प्रकरभूषणालङ्कृतः।

सुराजपथमध्यगः तदनु यालिपत्रस्थितः

करोतु कुतुकं नृणां सपदि रङ्गनाथः प्रभुः॥ – என்கிறபடியே யாளி வாஹனத்தில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆ ́ரிதஜனங்களை ஸ்ரீமான்களாகச்செய்தருளினீர்.

<u>पुन्नागवृक्षवाहनम्</u>

पुन्नागवृक्षमधिरुह्य तु वल्लवीभिः

संवेष्टितो मुषितवस्त्र विभूषणाभिः।

कृष्णावतार-चरितान्यधुनातनानां

सन्दर्शयन् प्रविचचार महापथेषु॥ – என்கிறபடியே புன்னைமர வாகனத்தில் ஏறி எழுந்தருளி திருவீதி அலங்கரித்து ஆ ́ரிதஜனங்களை ஸ்ரீமான்களாகச்செய்தருளினீர்.

## <u>महाकुम्भ प्रोक्षणम्</u>

तदनु देवं यानादवरोप्य। मूलालये संस्थाप्य। यागशालायाम् उप कुम्भैः सह महाकुम्भम् उत्थाप्य। तन्महाकुम्भं परिचारकमूर्ध्नि विन्यस्य। आचार्यः वेद -वाद्यघोषैः -छत्र -चामर उपचारैः -बहुदीपैः -भक्तैः -भागवतैः साकम् अविच्छिन्न करकवारि-धारया धामं प्रदक्षिणीकृत्य। प्रासादान्तः प्रविश्य। भगवतः पुरतः सोपकुम्भाष्टकं महाकुम्भं पूर्ववत् संस्थाप्य। "ओं ध्रुवाद्यौर्ध्रुवा पृथिवी----वृत्रहातिष्ठ" इति मन्त्रेण मूलबेरादि समस्त बेराणां महाकुम्भजलेन संप्रोक्ष्य। उपकुम्भाष्टकैः एवं कृत्त्वा। अष्टमङ्गलानि दर्शयित्वा। यथाभागमन्नं निवेद्य। नीराज्य। विज्ञाप्य।

भगवन्! वासुदेव! त्वं त्वद्वक्षः स्थलवासिनी!।
कमला च युवां सर्वलोकानामादिकारणौ।
त्वं विष्णुः कमला लक्ष्मीस्त्वं रुद्रः कमला शिवा।
त्वं ब्रह्मा कमला वाणी त्वं शक्रः कमला शची।
त्वमग्निः श्रीः स्वधा स्वाहा त्वं यमो हरिणी तु मा।
नैर्ऋतिस्त्वं दीर्घिका श्रीः पाशी त्वं शीतला रमे।
सदागतिः श्रीस्त्वंवायुस्त्वं श्रीदः सम्पदिन्दिरा।
ज्योत्स्ना लक्ष्मीस्तथेन्दुस्त्वं सूर्यस्त्वं तु प्रभा च मा।
इत्थं युवां लोकरक्षा-दीक्षितौ पितरौ हरे!।
एवं लोक हितार्थाय तत्तत्काले भविष्यतः।
सदानपायिनीयुक्त चिन्मयानन्द विग्रह!।
एवं विधस्य भवतः सर्वज्ञस्य तव प्रभो!।
प्रियाप्रियमविवात्रा बालिशेन मया कृतम्।
शास्त्रीयं वाप्यशास्त्रीयं त्वमेव ज्ञातुमर्हसि।
अपचारं मया यद्यदुत्सवे भक्तवत्सल!।
शरणागत भक्तस्य गृहाण श्रीसमन्वित!॥

इति प्रार्थ्य। भगवतां देवीनाञ्च रक्षासूत्राणि विसृज्य। रक्षासूत्रस्थितां लक्ष्मीं भगवत् श्रीवत्से नियोज्य। आचार्यादीनां सर्वेषां च रक्षासूत्राणि मोचयेत्॥

## मूकबलिः

तदनु बलिबेरं शिबिकायाम् आरोप्य। गर्भगृह-द्वारादि सर्वावरणान्तं बलिदानं कृत्वा। वीथिषु इन्द्रादीनां ग्राममध्ये ब्रह्माणञ्च मूकैः परिकरैः साकं बलिदानं कृत्वा। ओं लं इन्द्राय नमः उद्वासयामि----
ओं कं ब्रह्मणे नमः उद्वासयामि इति तत्रस्थान् उद्वास्य। महाबलिपीठे पूर्ववत् निरवशिष्टं बलिं दत्वा। भगवत्सन्निधौ अर्धरात्रिपूजां कारयेत्। यजमानः गुरोः -साधकानां -वेदादिपाठकानां -वाद्यवादकानां -सेवकानां -वाहकानां -सर्वकैङ्कर्यपराणां च गो -भू -हिरण्यादि दानञ्च तत्तत्कर्मानुसारेण यथाशक्ति धनैश्च तोषयित्वा। यजमानः आचार्यं गजं वा स्यन्दनं वा आरोप्य। छत्र -चामरादि सर्वविधोपचारैः सह ग्रामं प्रदक्षिणीकृत्य। आचार्यस्य गृहे प्रवेशयित्वा। तत्र तं प्रणम्य। आचार्यः सर्वेभ्यः आशीः प्रदद्यात्॥

******महोत्सवविधिः संपूर्णम्******

श्रीः

## पवित्रोत्सव विधिः

अथ पवित्रोत्सव-विधिरुच्यते। आचार्यः नित्यकर्मानुष्ठान निर्वृतेन आलयमासाद्य। सपवित्रकरः सायमाराधनं बल्यन्तं कृत्वा। ततः भगवत्सन्निधिं प्रविश्य। उत्सवार्थं विशेषयजनं कृत्त्वा। इमां गाथामुदीरयेत्।

न्यूनातिरेकशान्त्यर्थं पवित्रारोपणं परम्।
अर्चनं भगवन्! सर्व दुरितोत्सारणक्षमम्॥
सम्पदां चापि सर्वासाम् उत्पादनमुत्तमम्।
क्रियते तदविघ्नेन यथास्यात् कर्म चोदितम्॥
ओमादिवेदमन्त्रात्मन्! षाड्गुण्य पुरुषोत्तम!।
क्रियालोपस्य शमनं यत् त्वयाभिहितं विभो!॥
पवित्रारोपणं नाम तदद्य क्रियते मया।
अनुज्ञां कुरु देवेश! सेनेशस्य गदाधर!॥
तथानुज्ञापयामि त्वाम् अनुजानी हि कर्म तत्॥
चातुराश्रमिणां देव! कर्मवैकल्य शान्तये।
सर्वदोषविनाशार्थं सेवतां च महोत्सवम्॥
सम्पदे सर्वलोकानां दुर्भिक्षोत्सादनाय च।
आरोग्यसिद्ध्यै रुग्णानां प्रभोरिष्ठार्थसिद्धये॥
पवित्रारोहणं नाम क्रियतेऽद्य महोत्सवः।

अनुजानीहि देवेश! कर्मस्वस्मान्-नियोजय॥

अस्य देवदेवस्य। भगवतो वासुदेवस्य। श्री भूमि नीला----नायिका समेत श्री----स्वामि सन्निधौ नित्य -नैमित्तिकानां -काम्यानां सर्वेषां कर्मणां न्यूनातिरेक-शान्त्यर्थं -संवत्सर-प्रायश्चित्तार्थं यथासङ्कल्पित----दिनात्मक पवित्रोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन---- करिष्यामि। तत् भगवान् अनुमन्यताम्। विष्णो अनुमन्यताम् इति देवं विज्ञाप्य। यथाभागमन्नं निवेद्य। नीराज्य। भगवदभिमुखं विष्वक्सेनं संस्थाप्य। आचार्यः अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन् सन्निधौ यथासङ्कल्पित पवित्रोत्सवकर्मणि समस्तकार्याणां निर्विघ्नेन परिसमाप्त्यर्थम् आदौ विष्वक्सेनाराधनम् करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। विष्वक्सेनं संपूज्य। अर्घ्यादिभिरभ्यर्च्य। भगवद्धारित वस्त्र -पुष्पमालां च विष्वक्सेनाय दद्यात्। भगवत् पादुकां धारयित्वा। भगवन्निवेदितान्नं निवेद्य। नीराज्य। दर्भपुञ्जस्थकरेण सेनेशं प्रार्थ्य।

सेनेश! द्विपवक्त्रादि परिचर्यपदद्वय!।
पवित्राङ्कुरसिद्ध्यर्थं देवेनाज्ञापितःकिल॥
मृत्तिकां सङ्गृहीतुं त्वं मयायाहि सवैष्णवैः।

इति विष्वक्सेनं प्रार्थ्य। नीराज्य। सभ्यनुज्ञां कुर्यात्॥ ध्रुवन्ते राजा वरुणो ----दीर्घायुष्यमस्तु।हरिःओं नमस्सदसे नमस्सदसस्पतये----स्वीकृत्य। अस्य देवदेवस्य। भगवतो वासुदेवस्य। श्री भूमि नीला----नायिका समेत

श्री----स्वामि सन्निधौ नित्य -नैमित्तिकानां -काम्यानां सर्वेषां कर्मणां न्यूनातिरेक-शान्त्यर्थं -संवत्सर-प्रायश्चित्तार्थं यथासङ्कल्पित----दिनात्मक पवित्रोत्सवकर्म कर्तुं योग्यतासिद्धिमनुग्रहाण - तथास्तु योग्यता सिद्धिरस्तु इति सर्वेभ्यः श्रीवैष्णवेभ्यः ब्राह्मणेभ्यः अनुज्ञां लब्ध्वा। तेषां दक्षिणां दत्वा। ततः आचार्यः आसने उपविश्य। ओं ओं ओं इति श्रोत्राचमनं कृत्वा। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीगोविन्द गोविन्द गोविन्द---- श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य। भगवतो वासुदेवस्य। श्री भूमि नीला----नायिका समेत श्री----स्वामि सन्निधौ नित्य -नैमित्तिकानां -काम्यानां सर्वेषां कर्मणां न्यूनातिरेक-शान्त्यर्थं -संवत्सर-प्रायश्चित्तार्थं यथासङ्कल्पित----दिनात्मक पवित्रोत्सवकर्म करिष्ये तदङ्गं तत्पूर्वाह्ने स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -यागशाला-पाकशालाशुद्ध्यर्थं -पात्राद्युपकरणशुद्ध्यर्थं -मृत् -खनित्र -पालिकादीनाञ्च शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन ओं सहस्रार हुं फट् इति सर्वाणि द्रव्याणि सम्प्रोक्ष्य।

## मृत्सङ्ग्रहणम् - अङ्कुरार्पणम्

आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य ----यथासङ्कल्पित---- दिनात्मक पवित्रोत्सवकर्मणि मङ्गल अङ्कुराभिवृद्ध्यर्थं मृत्सङ्ग्रहणकर्म करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। विधिवत् मृत्सङ्ग्रहणं कृत्वा। यागशालां प्रविश्य। प्राणानायम्य।

अस्य देवदेवस्य----पवित्रोत्सवकर्मणि अङ्कुरावापनकर्म करिष्ये तदङ्गं द्वार-तोरण-ध्वज-कुम्भदेवता पूजनं करिष्ये इति सङ्कल्प्य।

अप उपस्पृश्य। द्वारपूजां कृत्वा। सोमहवन-पुरस्सरम् अङ्कुरान् अर्पयेत्॥

## रक्षाबन्धनम्

प्रभाते कृतकृत्यः आचार्यः भगवत् सन्निधौ सपवित्रकरः प्रातराराधनं कुर्यात्। अनन्तरम् अर्धमण्डपे रक्षाबन्धन वस्तून् पुण्याहकुम्भञ्च संस्थाप्य। आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----पवित्रोत्सवकर्मणि रक्षाबन्धनकर्म करिष्ये तदङ्गं रक्षासूत्रशुध्यर्थं -पवित्रशुध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा -प्रोक्ष्य। रक्षासूत्रं सम्पूज्य। देव-देवीनां -तीर्थबिम्बस्य -आचार्यस्य च रक्षाबन्धनं कृत्वा। अपूपं निवेद्य। नीराज्य। कल्याणकौतुकं बहुकलशैः संस्नाप्य।

## पवित्र अधिवासविधिः

सायाह्नसमये पवित्राधिवासार्थं चतुस्तम्भ-मण्डपं कल्पयित्वा। तन्मध्ये चतुरश्रां वेदिकां प्रकल्प्य। पुण्याहजलेन प्रोक्ष्य। वेदिकां वस्त्रेण आच्छाद्य। तदुपरि पूर्वाग्रान् दर्भान् आस्तीर्य। तस्मिन् प्रागग्रम् उदगग्रं वा अधिवास -उत्सव विहितेन पवित्राणि निक्षिप्य। अचार्यः प्राणानायम्य। श्रीगोविन्द ----पवित्रोत्सवकर्मणि पवित्र-अधिवासकर्म करिष्ये इति सङ्कल्प्य।

अप उपस्पृश्य। पुण्याहजलेन पवित्राणि संप्रोक्ष्य। पवित्रेषु हस्तताडनं कृत्वा। शोषणादिभिः संशोध्य। पवित्रेषु कस्तूरिकादि-कर्दमैः आलिप्य।

सुगन्धद्रव्यैः अनुलिप्य। कुङ्कुमेन उपलिप्य। धूपद्रव्येण सन्धूपयित्वा। परिमलपुष्पाणि विकीर्य। वेदिकायाम् अष्टदिक्षु मङ्गल द्रव्याणि संस्थाप्य*1

| | |
|---|---|
| पूर्वे - गन्धकाष्ठम् | आग्नेये - चन्दनम् |
| दक्षिणे - पूर्णकुम्भम् | नैर्ऋते - कुशम् |
| पश्चिमे - पुण्यमृत्तिका | वायव्ये - कुङ्कुमम् |
| उत्तरे - कोष्टद्रव्यम् | ऐशान्ये - पद्मम् |

मुखे - दूर्वां च संस्थाप्य। पवित्राणि अहतवाससा आच्छाद्य। चक्रमुद्रां प्रदर्श्य। ओं वीर्याय अस्त्राय फट् इत्यभ्यर्च्य। अधिवासमण्डपम् ओं सहस्रोल्काय स्वाहा वीर्याय अस्त्राय फट् इति मन्त्रेण ऐशान्यदिशिमारभ्य तद्दिगन्तं सूत्रेण संवेष्ट्य।

मण्डपस्योपरि - ओं सुदर्शनाय नमः

अधोभागे - ओं पद्माय नमः

मण्डपस्य द्वारेषु - ओं गदायै नमः

विदिक्षु - ओं शङ्खाय नमः इत्यभ्यर्च्य।

अधिवास-मण्डपस्य अष्टदिक्षु

छिद्रयन्ति च कर्माणि विघ्नयन्ति च यानि वै।
बलिं गृहीत्वा निर्यान्तु तानि भूतानि वै बहिः॥

इत्युच्चारण पूर्वकं सर्वभूतेभ्यः बलिं ददामि इति माषोदनेन बलिं दद्यात्॥

1) இந்த மங்களத்ரவ்ய ஸ்தாபனம் அநிருத்த ஸம்ஹிதையில் உள்ளது.

## अधिवास चतुस्थानार्चनम्

ततः कल्याणकौतुकं यानमारोप्य। वेद् -वाद्येन सह यागशालां प्रविश्य। मध्यवेदिकायाः पश्चिमे भागे भद्रासने देवं संस्थाप्य। मध्यवेदिकायां चक्राब्जं वर्तयित्वा। तद्वायव्ये सकरकं महाकुम्भम् उपकुम्भाष्टकञ्च संस्थाप्य।

आचार्यः पवित्रपाणिः प्राणानायम्य। श्रीगोविन्द्----पवित्रोत्सवे पवित्राधिवास कर्मणि चतुस्थानार्चनं करिष्ये तदङ्गं द्वार-तोरण-ध्वज-कुम्भदेवता-पूजनं करिष्ये। इति सङ्कल्प्य। अप उपस्पृश्य।

पात्राणि साधयित्वा। द्वारपूजां पालिकाराधनञ्च कृत्वा। चक्राब्जं विधिवत् सम्पूज्य। महाकुम्भे मूलबेरात् समावाह्य। उपकुम्भाष्टके वासुदेवादीन् -विदिक्षु पुरुषादीन् च पूर्ववत् आवाह्य। अर्घ्यादिभिः सम्पूज्य। यथाभागमन्नं निवेद्य। नीराज्य। ततः कल्याणकौतुकं मण्डलमध्ये निवेश्य। सम्पूज्य। नीराज्य। कुण्डे अग्निं प्रतिष्ठाप्य। समिदन्नाज्यहोमान्तं कृत्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया----पवित्रोत्सवकर्मणि अधिवासहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। आज्येन मूलमन्त्रेण अष्टोत्तरशत-सङ्ख्यया हुत्वा। सम्पातं सङ्गृह्य। परिषिच्य।

ओं धं नमः पराय स्पर्शतन्मात्रात्मने नमः इति संपाताज्येन कूर्चेन समस्तपवित्रेषु संस्पर्श्य। स्विष्टकृद्धोमादि पूर्णाहुत्यन्तं कृत्वा। ततः अधिवासपवित्रं गृहीत्वा मूलबेरस्य -कल्याणबेरस्य -महाकुम्भ -उपकुम्भ -करक -चक्राब्ज -होमकुण्डानाञ्च "ओं इदं विष्णुर्विचक्रमे----परमं पदं"

इति मन्त्रेण अधिवासपवित्रं समर्प्य। यथाभागमन्नं निवेद्य। नीराज्य। जागरेण निशां नीत्वा। प्रभाते आचार्यः नित्यपूजां कृत्वा। अधिवासपवित्रं विसृज्य। कल्याणकौतुकं स्नानासने निवेश्य। यागशालायां चक्राब्जगतं महाकुम्भे नियोज्य। मण्डलं शोधयित्वा। यथाविभवकलशैः कल्याणकौतुकं संस्नाप्य।

## उत्सवाङ्ग चतुस्थानार्चनम्

वेदिकायां पुनः चक्राब्जं वर्तयित्वा। यागशालायां पूर्वदिग्भागे गरुडं संस्थाप्य। दक्षिणे चक्रं संस्थाप्य। पश्चिमे हनूमन्तं संस्थाप्य। उत्तरे विष्वक्सेनं संस्थाप्य। यागपूजामारभेत्॥

आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया----पवित्रोत्सवकर्मणि चतुस्थानार्चनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। चक्राब्जमण्डले भगवन्तम् आवाह्य। सम्पूज्य। महाकुम्भादीन् च पूर्ववत् सम्पूज्य। मण्डलमध्ये पूर्ववत् कल्याणकौतुकं संस्थाप्य*1। सम्पूज्य। सर्वेभ्यः चतुर्विधान्नं निवेद्य। नीराज्य।

## होमः

ततः चतुष्कुण्डपक्षे गार्हपत्ये अग्निं प्रतिष्ठाप्य। सर्वकुण्डेषु अग्निं विभज्य। वासुदेवादिकान् आवाह्य। पूर्वादि कुण्डेषु क्रमेण पायसान्न -कृसरान्न -गुलान्न -हरिद्रान्नादीन् श्रपयित्वा। एककुण्डपक्षे पूर्वे आहवनीये अग्निं

1) மண்டலமத்தியில் ப்ரதான உத்ஸவரை எழுந்தருச்செய்வது என்பது தற்காலத்தில் எந்த கோயில்களிலும் அனுஷ்டானத்தில் இல்லை. அப்படி இருந்தும் சாஸ்த்ரத்தை அனுஷ்டிப்பதற்காக ஸமாதானமாக பல க்ஷேத்ரங்களில் பலிபேரரை எழுந்தருளச்செய்கிறார்கள்.

प्रतिष्ठाप्य। पायसान्नं श्रपयित्वा। समिदन्नाज्यहोमान्तं कृत्त्वा। परिषिच्य। प्राणानायम्य। श्रीभगवदाज्ञया----पवित्रोत्सवकर्मणि प्रथमोत्सवे प्रातर्हवनाख्यकाले यव -व्रीहि -वेणु -तिल -लाज -अगरु -पुष्प -घृत -समिद्भिः प्रत्येकं मूलमन्त्रेण अष्टोत्तरसहस्राहुतीः (अष्टोत्तरशताहुतीः /अष्टाविंशत्याहुतीः/अष्टाहुतीः) होष्यामि इति सङ्कल्प्य। अप उपस्पृश्य। उक्तद्रव्यैः प्रत्येकम् ओं नमो नारायणाय स्वाहा इति हुत्वा। स्विष्टकृद्धोमादि-पूर्णाहुत्यन्तं कृत्वा। तदनु पवित्रपूजां कारयेत्॥

## पवित्रपूजा

### ( श्रीप्रश्नोक्त विशेष विधिः )

पवित्रेषु आधारादि भद्रासनान्तम् अभ्यर्च्य। तत्तन्मन्त्रेण धूपं समर्प्य। सृष्टिक्रमेण तत्त्वैः अर्चयित्वा। पवित्रग्रन्थिषु द्वादशाक्षरेणाभ्यर्च्य। भगवद् पवित्रेषु ओं नमो भगवते वासुदेवाय आगच्छागच्छ इत्यावाह्य। न्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। अर्घ्यादिभिः अभ्यर्च्य।

श्रीवत्स-पवित्राधिदैवतायै ओं श्रीं श्रियै नमः

कौस्तुभ-पवित्राधिदैवताय ओं भानवे नमः

वनमाला-पवित्राधिदैवतायै ओं वनमालायै नमः इत्यावाह्य

( इतरपवित्रेषु ओं नमो नारायणाय इत्यभ्यर्च्य )

श्रियादि देवीनां पवित्रेषु - ओं श्रीं श्रियै नमः

विमान - परिवार पवित्रेषु - ओं सुदर्शनाय नमः

द्वारतोरण - कुम्भ पवित्रेषु - ओं पाञ्चजन्याय नमः

मानुषोक्त पवित्रेषु - ओं वज्राय नमः इत्यावाह्य

सर्वेभ्यः अर्घ्यादिभिरभ्यर्च्य। गन्ध -पुष्प -धूप -दीपं समर्प्य। यथाभागमन्नं निवेद्य। नीराज्य। पवित्राणि पृथक् पृथक् पात्रेषु गृहीत्वा। वेद-वाद्यघोषैः साकं प्रासादं प्रदक्षिणीकृत्य। गर्भालयान्तः प्रविश्य।

"अतोदेवा----धामभिः"

"इदं विष्णुर्विचक्रमे----सुरे"

"ओं नारायणाय----प्रचोदयात्"

"ओं नमो नारायणाय"

"ओं नमो भगवते वासुदेवाय" इति मन्त्रैः जितन्तास्तोत्र-पठनेन च मूलबेरादि समस्तबेराणां -श्रियादि देवीनां -ब्रह्मादि परिवाराणां -विमान -गोपुरादीनां -चण्डादि द्वारपालानां -सर्वेषां भक्तबिम्बानां -धूपदीपादि सर्व उपकरणानाञ्च -महाबलिपीठान्तं पवित्राणि आरोप्य। ततः यागशालां गत्वा। चक्राब्जस्य -महाकुम्भ उपकुम्भ करकादीनां -द्वारतोरण -ध्वजकुम्भानां -पालिकादीनां -होमकुण्ड -स्रुक्स्रुवादीनाञ्च पवित्राण्यारोप्य। पवित्राणि पृथक् पृथक् धूप-दीप प्रदान सहितम् आरोप्य। तदनु गर्भालयं प्रविश्य मनुष्यार्थकृत-पवित्राणि पुष्पवत् मूलबेरस्य पादयोः विन्यस्य। देवं प्रार्थ्य -प्रणम्य। आचार्यः स्वयम् आत्मनः पवित्रमालां धृत्वा। ऋत्विजानां -यजमानानां -यतीनाञ्च पवित्रं धारयित्वा। आचार्यः हस्ते पुष्पं गृहीत्वा। भगवन्तं विज्ञाप्य।

भगवन्! देवदेवेश! शङ्खचक्र-गदाधर!।

संवत्सरोपचाराणां पूरणार्थं कृतं मया॥

आराधनं गृहाणत्वं भक्तानां हित काम्यया।

नाहं स्वतन्त्रः किञ्चिच्च करोमि विहितं हितम्॥

किन्तु त्वत्प्रेरितः सर्वं करोमि तव यत्स्वयम्।

तत् क्षन्तव्यमशेषेण क्रियालोपाद्यनुष्ठितम्॥

इयं सांवत्सरीपूजा तवास्तु गरुडध्वज!।

श्रद्धाभक्तिक्रियामन्त्रद्रव्यहीनं जनार्दन!॥

यत्पूजितं मया देव! परिपूर्णं ततस्तु ते। इति विज्ञाप्य। यथाभागमन्नं-भक्ष्याणि च निवेद्य। नीराज्य। सायाह्नकाले पूर्ववत् यागशालायां द्वारपूजा पुरस्सरं चतुस्थानार्चनं कृत्वा। पूर्णाहुत्यनन्तरं कल्याणकौतुकं यानमारोप्य। वेद-वाद्यघोषेण सह वीथिभ्रमणं कृत्वा। मुखमण्डपे घटदीपं नीराजनञ्च समर्प्य। देवं सन्निधौ निवेश्य। अर्धरात्रिपूजां कारयेत्॥

एवं त्रिदिनं वा -पञ्च -सप्त -नवदिनानि वा उत्सवं कारयेत्॥

प्रतिदिनम् अहनि रात्रौ च चतुस्थानार्चनं वीथ्युत्सवञ्च कुर्यात्॥

## अवभृथोत्सवः

समाप्तिदिवसे नित्यपूजानन्तरं कल्याणकौतुकं तीर्थबेरं च यानमारोप्य। विथिभ्रमणेन नदीं -तटाकं वा गत्वा। अलाभे कटाहे वा अवभृथं कृत्वा।

आचार्यः प्राणानायम्य। श्रीगोविन्द्----अस्य देवदेवस्य। भगवतो वासुदेवस्य। श्री भूमि नीला----नायिका समेत श्री----स्वामि सन्निधौ नित्य-नैमित्तिकानां-काम्यानां सर्वेषां कर्मणां न्यूनातिरेक-शान्त्यर्थं - संवत्सर-प्रायश्चित्तार्थं यथासङ्कल्पित----दिनात्मक पवित्रोत्सव-सम्पूर्णता सिद्ध्यर्थम् अवभृथस्नानकर्म करिष्ये तदङ्गं----कलशैः स्नपनकर्म करिष्ये तदङ्गं सर्वोपकरणशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। महोत्सववत् स्नपनम् -अवभृथञ्च कारयेत्॥ ततः आलयमासाद्य। कल्याणकौतुकं चक्राब्जे निवेश्य। तीर्थबेरं सन्निधौ निवेश्य। पूर्ववत् प्रातरुत्सव-हवनं कुर्यात्॥

## महाकुम्भप्रोक्षणम् - पवित्रावरोपणम्

रात्रौ यथाविधि उत्सव-हवनं कृत्वा। पूर्णाहुतिं हुत्वा। अग्निस्थं महाकुम्भे संयोज्य। द्वारतोरण पालिकादींश्च उद्वास्य। कल्याणकौतुकं सन्निधौ निवेश्य। चक्राब्जगतं महाकुम्भे नियोज्य। करकवारिधारया उपकुम्भाष्टकेन महाकुम्भं गर्भालय प्रादक्षिण्येन सन्निधौ संस्थाप्य। मूलबेरं कल्याणकौतुकञ्च संप्रोक्ष्य। पुरुषसूक्त -रथन्तरसाम -त्रिसुपर्णमन्त्रैः - मूलमन्त्रेण च पवित्राणि अवरोप्य। रक्षासूत्रं विसृज्य। विष्वक्सेनं भगवदभिमुखं संस्थाप्य। भगवन्निर्माल्यमेकं पवित्रं विष्वक्सेनाय दद्यात्। अपराधक्षमापणं कुर्यात्॥

## अपराधक्षमापणंम्

जानता-जानता वाऽपि कायेन मनसा तथा॥

वचसा वापराधो मे जातो वा जायतेऽथवा।

क्षमस्व देवदेवेश! दोषाणां चैव शान्तये॥

प्रीतये च यथाशास्त्रमद्य निर्वर्तयाम्यहम्।

पावित्रकं विधानं तत् सर्वकर्मप्रपूरणम्॥

कृतं मे तद्गृहाण त्वं प्रसन्नो भव शाश्वत!।

होमान्तं पूजनं सर्वं कुरु त्वमात्मसात् प्रभो!॥ इति प्रार्थ्य इतर पवित्राणि आचार्यः स्वयं गृहीत्वा। अन्येभ्यः ब्राह्मणेभ्यः वैष्णवेभ्यः भक्तेभ्यः पवित्राणि दद्यात्॥ ततः यजमानः आचार्य -ऋत्विजां च यथावित्तानुसारतः सम्मानं कृत्वा। आशिषोवाचयित्वा। अर्धरात्रिपूजां कारयेत्॥ इदं बहुबेर पवित्रारोहण विधिः। एकबेरे कल्याणकौतुकं विना रक्षा -स्नपनं -अधिवास-पवित्रम् इत्यादि सर्वं मूलबेरे कृत्त्वा। मूलबेरस्य स्नपनानन्तरं रक्षाकौतुकं बद्ध्वा। यागशालायां मण्डलमध्ये भगवन्निवेशनं न कुर्यात्॥

श्रीः

## पवित्रमालायां मान -तन्तु -ग्रन्थि सङ्ख्या

(पाद्म संहितानुसारेण अनुक्तम् इतर संहितायाः आहृतम्)

### अधिवास पवित्र लक्षणम्

मूलबेरादिषु अधिवास पवित्रं - नाभिपर्यन्तम् -

अष्टोत्तरशत तन्तवः -द्वात्रिंशत् ग्रन्थयः भवति।

अधिवास दिने मण्डलस्य पवित्रम् -अब्जपर्यन्तं -यथेच्छ तन्तु ग्रन्थयः।

कुम्भस्य पवित्रं -तत्तन्मानेन युतं -यथेच्छ तन्तु ग्रन्थयः।

कुण्डस्य पवित्रं -मेखलापर्यन्तं -यथेच्छ तन्तु ग्रन्थयः। एवं ज्ञात्वा।

### उत्सवाङ्ग पवित्रलक्षणम्

### मण्डल पवित्रम्

१) कर्णिकामानं - चतुश्शत तन्तवः - सप्तविंशति ग्रन्थयः।

२) केसरमानं -त्रिशत तन्तवः - चतुःपञ्चाशत् ग्रन्थयः।

३) नाभिमानं -द्विशत तन्तवः - चतुःपञ्चाशत् ग्रन्थयः।

४) दलमानं -शत तन्तवः - चतुःपञ्चाशत् ग्रन्थयः।

५) नेमिमानं -शत तन्तवः - अष्टोत्तरशत ग्रन्थयः।

६) मण्डलस्य बहिः पवित्रं - चतुश्शत तन्तवः -

पञ्चत्रिंशदुत्तरशत(१३५) ग्रन्थयः। एवं ज्ञात्वा।

महाकुम्भस्य - तन्मानम् -अष्टोत्तरशत तन्तवः - सप्तविंशति ग्रन्थयः

- पञ्च यष्टिपवित्रं भवति।

उपकुम्भानां -हस्तमानम् -एकयष्टि पवित्रं -

सप्तविंशति तन्तवः -बहुग्रन्थयः भवति।

करकस्य - एकोत्तराशीति तन्तवः -

सप्तविंशति ग्रन्थयः - त्रियष्टिपवित्रं वा एकयष्टिः वा भवति।

वेदिकायां -तत्प्रमाणं -यथेच्छ तन्तु -ग्रन्थयः भवति।

तोरणानां - हस्तमानम् -एकयष्टि पवित्रं -सप्तविंशति तन्तवः -

बहुग्रन्थयः भवति।

## भगवत्पवित्रमाला लक्षणम्

उत्तमं पञ्चयष्टिः स्यात् -मध्यमं त्रियष्टिकम् -अधमम् एकयष्टिस्स्यात् पवित्रं त्रिविधं भवेत्॥

## भगवतः दशविधपवित्राणि

१) प्रामाण्यं -नाभिपर्यन्तम् -अष्टोत्तरशत तन्तवः -त्रयोविंशति ग्रन्थयः।

२) गन्धपवित्रं -हृदयान्तम् -एकोत्तराशीति तन्तवः -पञ्चविंशति ग्रन्थयः।

३) अलङ्काराख्यपवित्रं -जङ्घामध्यमान्तं -द्विशत तन्तवः -

अष्टोत्तरशत ग्रन्थयः।

४) उत्तमपवित्रं -जानुपर्यन्तं -चतुश्शत तन्तवः -अष्टोत्तरशत ग्रन्थयः।

५) मध्यमपवित्रम् -ऊरुमध्यान्तं -त्रिशत तन्तवः -अशीति ग्रन्थयः।

६) अधमपवित्रं -नाभ्यन्तं -द्विशत तन्तवः -षष्टि ग्रन्थयः।

७) किरीटपवित्रं -किरीटमानं -चतुश्शत तन्तवः -द्वात्रिंशत् ग्रन्थयः।

८) श्रीवत्सपवित्रं -हारान्तं -त्रिशत तन्तवः -सप्तविंशति ग्रन्थयः।

९) कौस्तुभपवित्रं - स्तनपर्यन्तं -द्विशत तन्तवः -द्वात्रिंशत् ग्रन्थयः।

१०) वनमालापवित्रं - चरणपर्यन्तम् -अष्टोत्तरसहस्र तन्तवः

-अनेकग्रन्तयः भवति।

पीठपवित्रं - पीठमानम् -अष्टोत्तरशत तन्तवः -पञ्चविंशति ग्रन्थयः भवति।

प्रभापवित्रं - तन्मानेन -अनेक तन्तु -ग्रन्थयः भवति।

भद्रासने - तन्मानं -यथेच्छ तन्तु -ग्रन्थयः भवति।

परतन्त्र बिम्बेषु उत्तमादि त्रयं भवति।

श्रियादीनाम् - अष्टोत्तरशत तन्तवः -बहुग्रन्थयः भवति।

श्रियादीनां - नाभिमानं -जानुमानं -पादमानम् इति क्रमेण त्रियष्टिपवित्रं वा

यष्टिद्वयं वा भवति।

अग्निकुण्डे - उत्तमपक्षे प्रतिमेखलायां पवित्राणां प्रत्येकं

-सप्तविंशति तन्तवः -सप्तविंशति ग्रन्थयः।

अग्निकुण्डे मध्यमपक्षे - पञ्चविंशति तन्तवः -पञ्चविंशति ग्रन्थयः।

अग्निकुण्डे अधमपक्षे - द्वाविंशति तन्तवः -द्वाविंशति ग्रन्थयः भवति।

स्रुक्स्रुवादिषु - तत्समायामं -पञ्चविंशति तन्तवः -बहुग्रन्थयः भवति।

अर्घ्यादिपात्र -धूप -दीप -घण्टा -अक्षमालायां पवित्रेषु -

द्वादशाङ्गुलमायतम् -अष्टोत्तरशत तन्तवः -यथेप्सित ग्रन्थयः भवति।

विष्वक्सेन -गरुड -इन्द्रादि -ब्रह्मा -दुर्गा -गणेश -रुद्र -इतरपरिवारेषु

पवित्रेषु -हस्तमानायतम् - अष्टोत्तरशत तन्तवः

-द्वात्रिंशत् ग्रन्थयः भवति।

चण्डादीनां - हस्तमानं -सप्तविंशति तन्तवः -बहुग्रन्थयः
(ग्रन्थिभिन्नेन) भवति।

वाहन -छत्र -चामर -व्यजन -पादुका -ध्वजदण्डादीनां -तत्तत्प्रमाणकं
-यथेच्छ तन्तु -ग्रन्थयः भवति।

बलिपीठस्य - कर्णिकायाम सम्मितम् -एकोनचत्वारिंशत् तन्तवः
-द्वादश ग्रन्थयः भवति।

प्रासादस्य(विमानस्य) - चतुश्शत तन्तवः -द्वादश ग्रन्थयः भवति।

आलयस्य(आलयस्य सर्व स्थानेषु) - अष्टाविंशति तन्तवः
-द्वादश ग्रन्थयः भवति।

गोपुरस्य(राजगोपुरस्य) - एकोनत्रिंशत् तन्तवः -अष्ट ग्रन्थयः भवति।

उपबलिपीठस्य - पञ्चविंशति तन्तवः -द्वादश ग्रन्थयः भवति।

प्राकारस्य - त्रीणि तन्तवः -द्वादश ग्रन्थयः भवति।

आचार्याणां -यतीनां पवित्रेषु - नाभ्यन्तम् -अष्टोत्तरशत तन्तवः
-बहुग्रन्थयः च आचार्यस्य पवित्रद्वयं भवति।

ऋत्विक् -पूजकानां पवित्रेषु - नाभ्यन्तम् -एकोत्तराशीति तन्तवः
-बहुग्रन्थयः भवति।

राज्ञस्य पवित्रे - नाभ्यन्तम् -अष्टोत्तरशत तन्तवः -यथेष्टग्रन्थयः भवति।

राज्ञस्य अनुजीविनां पवित्रेषु - नाभ्यन्तम् -एकोत्तराशीति तन्तवः
-यथेष्टग्रन्थयः भवति।

वैश्यानां पवित्रेषु - नाभ्यन्तं -चतुर्विंशति तन्तवः -बहुग्रन्थयः

-उपवीतवत् धारणं भवति।

अन्येषां मानुषाणां - स्तनमानम् - एकोत्तराशीति तन्तवः

-यथेष्टग्रन्थयः भवति। एवं ज्ञात्वा।

*****पवित्रोत्सव विधिः संपूर्णम्*****

श्रीः

## प्लवोत्सवविधिः

अथ प्लवोत्सव-विधिरुच्यते। पूर्ववत् सर्वाणि द्रव्याणि सम्पाद्य। सर्वालङ्कार संयुक्तः आचार्यः नित्यानुष्ठान निर्वृतेन आलयं प्रविश्य। पादौ प्रक्षाल्य। आचम्य। भगवत्सन्निधिं समासाद्य। सायमाराधनं बल्यन्तं कृत्वा। अनन्तरं प्लवोत्सवार्थं विशेषाराधनं कृत्वा। नीराज्य। भगवन्तं विज्ञाप्य।

क्षीराब्धौ शेषशयने! शयित त्वं रमापते!।

प्लवोत्सवाय बिम्बेऽस्मिन् सन्निधत्स्व श्रिया सह॥

देवदेव! जगन्नाथ! भक्तवत्सल! माधव!।

प्लवोत्सवं तु निर्विघ्नमङ्गीकुरु दयानिधे!॥ इति प्रार्थ्य।

ततः आचार्यः आसने उपविश्य। स्वगुरुं प्रार्थ्य। श्रोत्राचमनं कृत्वा। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर----मास (----दिन) प्लवोत्सवकर्म करिष्ये तत्पूर्वाङ्गत्वेन स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -मृत्-

खनित्रशुद्ध्यर्थं -पालिकादीनां शुद्ध्यर्थं -यागशालाशुद्ध्यर्थं -सर्वद्रव्योपकरणशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं समस्तकार्याणां निर्विघ्नेनेन परिसमाप्त्यर्थम् आदौ विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य। पात्राणि साधयित्वा। विष्वक्सेनं संपूज्य। पुण्याहं वाचयित्वा। तज्जलेन ओं सहस्रार हुं फट् इति सर्वाणि द्रव्याणि संप्रोक्ष्य। ततः आचार्यः अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर----मास (----दिन) प्लवोत्सवकर्माङ्गं मङ्गलाङ्कुर-वापनार्थं मृत्सङ्ग्रहणकर्म करिष्ये इति सङ्कल्प्य। अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य। पूर्ववत् मृत्सङ्ग्रहणं कृत्वा। यागशालायां विधिवत् सङ्कल्पपूर्वकं द्वारपूजा पुरस्सरम् अङ्कुरार्पणं कुर्यात्॥

प्रभाते मुहूर्ते नित्यपूजानन्तरं देव देव्यौ -बलि -तीर्थबेरयोः -आचार्यादीनाञ्च रक्षाबन्धनं कृत्वा। यागशालायां यथोक्तवत् चतुस्थानार्चनं कृत्वा। होमे -समिदन्नाज्यहोमान्तं कृत्वा। पूर्णाहुतिं हुत्वा। द्वारबलिं दत्वा। तदाप्रभृति देवं यानारोपणं -वाहनारोपणं वा कृत्वा। वीथिषु परिभ्रम्य। उत्सवारम्भादवसाने कालद्वये चतुस्थानार्चनं कुर्यात्॥

उत्सवारम्भदिने माध्याह्ने श्री-भूमिभ्यां सह श्रीशं पञ्चविंशतिघटैः संस्नाप्य। प्लवोत्सवदिने प्रभाते नित्यपूजानन्तरं विशेषयजनं कृत्वा। आचार्यः आसने उपविश्य। पवित्रपाणिः। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर

----मास(-----दिन) प्लवोत्सवकर्मणि सरस्तीरमण्डप-शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पुण्याहं वाचयित्वा। सरस्तीरमण्डपं संप्रोक्ष्य। सुमुहूर्ते देवीभ्यां सह देवं यानमारोप्य। वीथिभ्रमणेन सरस्तीरमण्डपं नीत्वा। तत्र देवं भद्रासने संस्थाप्य। मन्त्रासनप्रभृति सम्पूज्य। विविधान्न -भक्ष्य -मधुपर्कादीन्निवेद्य। नीराज्य। प्लवप्रतिष्ठा -सरःपूजाञ्च कुर्यात्॥

<u>प्लवप्रतिष्ठा</u>

(प्रतिवत्सरैव)

दिव्यं प्लवम् अप्सु न निमज्जनेन पलकाभिः दृढीकृत्य। बहुस्तम्भं कल्पयित्वा। नानाविधवस्त्रैः -घण्टाभिः -छत्र -चामर -ध्वज -वितानैः -विविधमाल्यैः -नालिकेरैः -पूगफलैः -स्तबकैः -कदलीफलैः -दर्पणैः -ह्रीबेरैश्च प्लवं समलङ्कृत्य। सरस्तीरमण्डपे देवस्य पुरतः शाली -तण्डुल -तिलैः पीठं परिकल्प्य। तदुपरि कुम्भमेकं संस्थाप्य। कुम्भस्य पुरतः कुण्डं वा स्थण्डिलं वा कल्पयित्वा। सर्वाणि पूजाद्रव्याणि सम्पाद्य। आचार्यः आसने उपविश्य। पवित्रपाणिः। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----प्लवोत्सवकर्मणि प्लवप्रतिष्ठां -सरःपूजाञ्च करिष्ये तदङ्गं प्लवशुद्ध्यर्थं -सरश्शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन ओं सहस्रार हुं फट् इति सर्वाणि द्रव्याणि -सरः -प्लवञ्च संप्रोक्ष्य। कुम्भं शोषणादिभिः संशोध्य।

आधारादि पद्मान्तम् अभ्यर्च्य। तत्तन्मन्त्रेण धूपं समर्प्य। तस्मिन्
ओं अं अनन्ताय नमः आगच्छ आगच्छ इति अनन्तमावाह्य।
आवाहनादि षण्मुद्राः प्रदर्श्य। ओं शां इत्यादि षडङ्गन्यासं कृत्वा।
किरीटादि मुद्राः अनन्तमुद्राञ्च प्रदर्श्य। ओं अं अनन्ताय नमः
अर्घ्यं समर्पयामि----दीपं समर्पयामि। फलवर्गताम्बूलादीन् निवेदयामि।
पानकं समर्पयामि। पानीयं समर्पयामि। आचमनीयं समर्पयामि।
औं सहस्रफणाय----प्रचोदयात् ओं अं अनन्ताय नमः नीराजनं
समर्पयामि। समस्तोपचारान् समर्पयामि। एवं सम्पूज्य। ततः अग्निं
प्रतिष्ठाप्य। अग्नेःपूर्णाहुत्यन्तं कृत्वा। अग्निमध्ये आधारादि पद्मान्तं हुत्वा।
तस्मिन् ओं नमो नारायणाय आगच्छ आगच्छ इति भगवन्तम् आवाह्य।
उपचारान् हुत्वा। अनन्तरं ओं अं अनन्ताय नमः आगच्छ आगच्छ इति
अनन्तमावाह्य। पूर्ववत् उपचारान् हुत्वा। परिषिच्य। श्रीभगवदाज्ञया
भगवत्कैङ्कर्यम् अस्मिन्नग्नौ समिदन्नाज्यहोमं करिष्ये इति सङ्कल्प्य।
अप उपस्पृश्य। परिषिच्य। ओं अं अनन्ताय स्वाहा इति समिधा शतेन
तदर्धेन पादेन वा हुत्वा। चरुणा नृसूक्तेन षोडशाहुतीर्हुत्वा। सर्पिषा
समित्सङ्ख्यया अनन्तमन्त्रेण हुत्वा। सम्पाताज्यं सङ्गृह्य। स्विष्टकृद्धोमं
- प्रायश्चित्तहवनं - पूर्णाहुतिञ्च कृत्वा। सम्पाताज्येन
ओं धं नमः पराय स्पर्शतन्मात्रात्मने नमः इति स्पर्शमन्त्रेण प्लवं संस्पृष्ट्वा।
प्लवम् आधारादि-पद्मान्तम् अभ्यर्च्य। धूपं समर्प्य। महाकुम्भजलेन
ओं अं अनन्ताय नमः इति प्लवं संप्रोक्ष्य। प्लवे अनन्तमावाह्य।

प्लवभूमौ - ओं भूम्यै नमः

प्लवोर्ध्वे - ओं अनन्ताय नमः

प्लवस्यपरितः - ओं कुमुदाय नमः-----ओं सुप्रतिष्ठाय नमः इत्यभ्यर्च्य। प्लवस्थम् अर्घ्यादिभिरभ्यर्च्य। धूप-दीपञ्च समर्प्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य।

## सरः पूजा

सरस्य जलं शोषणादिभिः संशोध्य। सुरभिमुद्रया अमृतीकृत्य। आधारादि पद्मान्तम् अभ्यर्च्य। धूपं समर्प्य। सरोमध्ये ओं क्षीरार्णवाय नमः ओं वं वरुणाय नमः इत्यावाह्य सरस्य परितः ओं इन्द्राय नमः---- ओं ईशानाय नमः इत्यभ्यर्च्य। सर्वेभ्यः अर्घ्यादि-नैवेद्यान्तं सम्पूज्य। नीराज्य। आचार्यः भगवत्समीपङ्गत्वा। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य----प्लवोत्सवकर्मणि---उत्सवे(नवमोत्सवे) देवस्य प्लवारोपण-प्लवभ्रमण काले च तिथि -वार -नक्षत्र -लग्न -योग -करणैः यो दोषः समजनि तद्दोष परिहारार्थं यात्रादानं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। हिरण्यमादाय। हिरण्यगर्भ----प्रयच्छमे अस्य देवदेवस्य----प्लवोत्सवकर्मणि नवमोत्सवे देवस्य प्लवारोपण -प्लवभ्रमण काले तिथि -वार -नक्षत्र -लग्न -योग -करणैः यो दोषः समजनि तद्दोष परिहारार्थम् इदं हिरण्यं नाना गोत्रेभ्यः श्रीवैष्णवेभ्यः तेभ्यस्तेभ्यः संप्रदते। न मम श्रीकृष्णार्पणम् इति यात्रादानं कृत्वा। सर्वेभ्यः श्रीवैष्णवेभ्यः ब्राह्मणेभ्यः दक्षिणां दद्यात्।

तदनु वेद -वाद्यघोषेण सह श्री-भू सहितं देवं यानमारोप्य। मण्डपात्
सरस्तीरमासाद्य। "ओं भद्रङ्कर्णेभिः----ददातु" इति मन्त्रेण देवं प्लवे
आरोप्य। नीराज्य। अर्चक -साधक -परिचारकानां देवेन सह प्लवे प्रविश्य।
वाद्य -नृत्तकान् पृथक् प्लवे समारोप्य। नौकादण्डेन प्लवं त्रिवारं वा पञ्च
-सप्तवारं वा जलमध्ये भ्रमयित्वा। अनन्तरं देवं प्लवादवरोप्य।
सरोमध्यमण्डपे संस्थाप्य। अर्घ्यादिभिरभ्यर्च्य। यथाभागमन्नं निवेद्य।
नीराज्य। सायाह्नसमये दिनकरास्तङ्गते पुष्करिण्यास्तुपरितः अनुपदं
ज्वालायुतान् दीपान् सन्दीपयित्वा। ततः देवं समभ्यर्च्य। मध्यमण्डपात्
प्लवे निवेश्य। पुनः प्लवं त्रिवारं भ्रमयित्वा। सरस्तीरमासाद्य। नीराज्य। देवं
प्लवादवरोप्य। ग्रामप्रादक्षिण्येन आलयं प्रविश्य। मुखमण्डपे घटदीपं
-नीराजनञ्च दर्शयित्वा। देवं गर्भगृहे निवेश्य। अर्धरात्रिपूजां कारयेत्॥
परस्मिन् दिवसे प्रभाते नित्यपूजानन्तरं तीर्थबिम्बेन सह देवं बहुकलशैः
संस्नाप्य। तीर्थबिम्बं शिबिकायाम् आरोप्य सरस्तीरं(कटाहसमीपं वा)
समासाद्य। आचार्यः अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया
----प्लवोत्सव संपूर्णता सिद्ध्यर्थम् अवभृथस्नानकर्म करिष्ये तदङ्गं
सरश्शुद्ध्यर्थं (कटाहस्थ जलशुद्ध्यर्थं ) वासुदेवपुण्याहवाचनं करिष्ये
इति सङ्कल्प्य। अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य।
पुण्याहं वाचयित्वा। विधिवत् अवभृथं कुर्यात्॥ तदनु तीर्थबिम्बम्
आलयमासाद्य। देवं -तीर्थबिम्बञ्च समलङ्कृत्य। गर्भगृहे संस्थाप्य।
यागशालायां सायाह्न हवनानन्तरं द्वारतोरणानि उद्वास्य। पालिकाङ्कुराणि

देवस्य दर्शयित्वा। मण्डल -कुण्डस्थाञ्च उद्वास्य। महाकुम्भमादाय। वेद - वाद्यघोषेण सह गर्भालयं प्रविश्य। महाकुम्भजलेन सर्वेभ्यः संप्रोक्ष्य। रक्षां विसृज्य। यथाभागमन्नं निवेद्य। नीराज्य।

यन्मयानुष्ठितं देव! प्रियं ते प्लवमुत्तमम्।

अज्ञानादभिमानाच्च न्यूनं तत्र भवद् ध्रुवम्।

मदीयकृतमित्येतत् क्षमस्व कमलापते!॥

इति विज्ञाप्य। तत्काले यजमानः गुरोः -ऋत्विजानाञ्च दक्षिणां दत्वा। अर्धरात्रिपूजां कारयेत्॥

*****प्लवोत्सवविधिः सम्पूर्णम्*****

श्रीः

## जलक्रीडोत्सवविधिः

अथ जलक्रीडोत्सव-विधिरुच्यते। क्रीडोत्सवार्थं गन्धचूर्णं -रजनीचूर्णं -तत्कालानुसारितपुष्पाणि -तैलं -क्षीरं -कर्पूरकुङ्कुमं -नालिकेरादि-युद्धक्रीडा द्रव्याणि तत्तद्दिनेषु यथोक्तवत् सङ्गृह्य। अन्यानि सर्वाणि द्रव्याणि सम्पाद्य। आलयाद्बहिः वसन्तोत्सववत् जलावृतमण्डपं समलङ्कृत्य। मण्डपस्य परितः गन्धजलेनापूर्य। पुष्पाणि विकीर्य। चूर्णस्नानार्थं बहुधा रजनीचूर्णं सङ्गृह्य। उत्सवं कारयेत्॥

आचार्यः आलयमासाद्य। सन्निधौ सायाह्नपूजानन्तरं विशेषयजनं कृत्त्वा।

यथाभागमन्नं निवेद्य। नीराज्य। क्रीडोत्सवार्थं भगवन्तं प्रार्थ्य।

भगवन्! देवदेवेश! शङ्ख-चक्र-गदाधर!।

जलक्रीडाक्रियां कर्तुम् अनुज्ञां देहि मे प्रभो!॥

अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर----मास----दिन जलक्रीडोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन---- विष्णो अनुमन्यताम्। इति प्रार्थ्य। आचार्यः प्राणानायम्य। देशकालौ सङ्कीर्त्य। श्रीभगवदाज्ञया----लोकक्षेमार्थं----वत्सर----मास----दिन जलक्रीडोत्सवकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं - वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्च कुर्यात्॥

प्रभाते मुहूर्ते नित्यपूजानन्तरम् आचार्यः यागशालाशुद्ध्यर्थं - जलक्रीडामण्डप-शुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तान् संप्रोक्ष्य। विधिवत् देव्यौ सह कल्याणकौतुकस्य -बलिबेरस्य -आचार्यस्य च रक्षाबन्धनं कृत्त्वा। अनन्तरं बलिबेरेण सह यागशालां प्रविश्य। तत्र तं संस्थाप्य। जलक्रीडोत्सवकर्मणि चतुस्थानार्चनं करिष्ये इति सङ्कल्प्य। पूर्ववत् द्वारपूजा पुरस्कं विधिवत् चतुस्थानार्चनं बल्यन्तं कृत्वा। ततः आचार्यः जलक्रीडा-मण्डपमासाद्य। पुण्याहजलेन प्रोक्ष्य। मण्डपस्य परितः इन्द्रादीन् आवाह्य -सम्पूज्य। तेषां बलिं दत्त्वा। अपराह्ण समये देवं देव्यौ च यानमारोप्य। वेद -वाद्यघोषेण प्रादक्षिण्येन जलक्रीडामण्डपं निवेश्य। तत्रस्थ भद्रासने देवं प्राङ्मुखं वा उदङ्मुखं वा संस्थाप्य। तस्य पुरतः शाली -तण्डुल -तिलैः पीठं

परिकल्प्य। तन्मध्ये चूर्णपात्रं संस्थाप्य। तत्र आचार्यः आसने उपविश्य। प्राणानायम्य। श्रीभगवदाज्ञया----जलक्रीडोत्सवकर्मणि युद्धक्रीडाद्रव्य-शुद्ध्यर्थं -जलद्रोण्यन्तर्गत-जल शुद्ध्यर्थं -स्नानोपकरणशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि संप्रोक्ष्य। पात्रस्थचूर्णे ओं श्रीं श्रियै नमः इत्यावाह्य। अर्घ्यादि-नीराजनान्तं सम्पूज्य। ततः देवं यथाविधि पूजयित्वा। यथाभागमन्नं निवेद्य। आचार्यः चूर्णपात्रमादाय। देवं देव्यौ च श्रीसुक्तेन चूर्णेन अभिषिच्य। पश्चात् देवं देव्यौ च याने -कुञ्जरे वा समारोप्य। ग्रामवीथिषु परिभ्रमणं कृत्त्वा। ग्राममध्यान्तम् आसाद्य। प्रथमोत्सवे गन्धयुद्धक्रीडां कृत्वा। देवदासीभिः सार्धम् आचार्यः चन्दनक्षौदेन देवं देव्यौ च सन्ताड्य। नीराज्य। अनन्तरं जलक्रीडामण्डपं नीत्वा। पूर्ववत् देवं देव्यौ च भद्रविष्टरे संस्थाप्य।

## जलक्रीडा (निमज्जनोत्सवः)

पूर्वोक्त धान्यपीठे सलक्षणं जलद्रोणीं संस्थाप्य। गन्धजलेन सम्पूर्य। पुण्याहजलेन संप्रोक्ष्य। शोषणादीनि कृत्त्वा। आधारादि-पद्मान्तम् अभ्यर्च्य। जलमध्ये गङ्गादि-नदीः आवाह्य। अर्घ्यादि -नीराजनान्तं संपूज्य। भेरी -पटह -शङ्खादि-वाद्यघोष -छत्र -चामर उपचारेण साकम् उत्सवकौतुकमानीय। पुरुषसूक्तेन देवं जलद्रोण्यन्तर्जले निमज्ज्य। पुनः विष्टरे संस्थाप्य। श्री -भू देव्यौ च एवं कृत्त्वा। भगवत् पादुकामादाय। तस्मिन् कूर्चं संवेष्ट्य। कूर्चे भगवन्तम् आवाह्य। पूर्ववत् जले निमज्ज्य।

महाहविर्निवेद्य। नीराज्य। भगवन्निमज्जित मङ्गलाम्भसा आचार्यः -सर्वे विप्राः -यजमानः -सर्वे श्रीवैष्णवाः -मूर्तिपाः -पुरुषाः -स्त्रियः -गणिका देवदासीः -वाद्यवादकाश्च परस्परं जलक्रीडया सेचनं कारयेत्॥

ततः स्नानार्द्रवस्त्रेण सह देवं देव्यौ च यानमारोप्य। ग्रामवीथिषु वरुणस्य प्रीतये -सर्वेषां जनानां पवित्रीकरणाय च परिभ्रम्य। मन्दिरान्तः प्रविश्य। स्नपनमण्डपे तान् संस्थाप्य। तत्र पञ्चविंशतिघटैः विधिवत् संस्नाप्य। अलङ्कृत्य। तदनु यागशालायां पूर्ववत् चतुस्थानार्चनं बल्यन्तं कृत्त्वा। देव्यौ सह कल्याणकौतुकं गर्भगृहे निवेश्य। अर्धरात्रिपूजां कारयेत्॥

## विविधयुद्धक्रीडाः

एवं नवदिनोत्सवं विधाय। प्रथमोत्सवादि-नवमोत्सवान्तं विविध युद्धक्रीडाः भवन्ति। प्रथमोत्सवे गन्धयुद्धं -द्वितीयोत्सवे पुष्पयुद्धं -तृतीयोत्सवे रजणीचूर्णयुद्धं -चतुर्थोत्सवे तैलयुद्धं -पञ्चमोत्सवे क्षीरयुद्धं -षष्टोत्सवे कर्पूरकुङ्कुमैर्युद्धं -सप्तमोत्सवे नालिकेरयुद्धम् -अष्टमोत्सवे गन्धाम्बुना युद्धं -नवमोत्सवे जलयुद्धञ्च कृत्वा। उत्सवं सप्ताहं चेत् रजनीचूर्णयुद्धादिकं कृत्वा। पञ्चाहोत्सवे क्षीरयुद्धादिकं -त्र्याहोत्सवे नालिकेरयुद्धादिकं -एकाहोत्सवे जलयुद्धञ्च कारयेत्॥

अवसानदिने सायं चतुस्थानार्चनं बल्यन्तं कृत्वा। देवं सन्निधौ निवेश्य। यागशालायां द्वार -तोरण -कुण्ड -मण्डलान् उद्वास्य। देवस्य पालिकादर्शनं -महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च कृत्त्वा। यथाभागमन्नं निवेद्य। नीराज्य। जितन्तास्तोत्रेण क्षमापणं कृत्त्वा।

यजमानः गुरोः -मूर्तिपानां -गणिका-देवदासीणां -समस्तकैङ्कर्यपराणाञ्च यथावित्तानुसारेण सम्मानं समर्प्य। अर्धरात्रिपूजां कारयेत्॥

*****जलक्रीडोत्सवविधिःसम्पूर्णम्*****

श्रीः

## वसन्तोत्सवविधिः

अथ वसन्तोत्सव-विधिरुच्यते। वसन्तोत्सवार्थं तत्कालानुसारित शैत्य-सौरभ्यवस्तून् -फल -पुष्पादिकञ्च सर्वाणि द्रव्याणि च सम्पाद्य। देवभ्रमणमार्गेषु -वीथिषु पार्श्वतः सुगन्धपुष्पैः अलङ्कृत्य। आलयाश्रित उद्याने -उपवने वा जलाशयोक्तमण्डपे वा आलयाद्बहिः जलावृतमध्यमण्डपे यद्वा नदीतीरे वा देवस्य वसन्तं कृत्वा। तन्मण्डपं नानाविधपुष्पैः -पूगादिफलैः -कदलीस्तम्भ -क्रमुक -नालिकेरादिभिः अलङ्कृत्य। गन्धाम्बुना मण्डपं समालिप्य। वासनैः धूपैः सन्धूपयित्वा। मण्डपस्य परितः महता गन्धजलेनापूर्य। पुष्पाणि विकीर्य। एवं कल्पितमण्डपे उत्सवं कारयेत्॥

आचार्यः आलयमासाद्य। सन्निधौ सायाह्नपूजानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। वसन्तोत्सवार्थं प्रार्थ्य।

पीताम्बर! हरे! कृष्ण! शङ्ख-चक्र-गदाधर!।
वसन्तोत्सवपूजार्थं सन्निधिं कर्मकौतुके।

कुरुष्व जगदानन्द! भक्तानुग्रह काम्यया॥ - इति प्रार्थ्य।

अस्य देवदेवस्य----लोकक्षेमार्थं वसन्तकाल-श्रमशान्त्यर्थं----वत्सर ----मास----दिन वसन्तोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम् इति प्रार्थ्य। देशकालौ सङ्कीर्त्य। श्रीभगवदाज्ञया----लोकक्षेमार्थं वसन्तकाल-श्रमशान्त्यर्थं----वत्सर---- मास----दिन वसन्तोत्सवकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्च कुर्यात्॥

प्रभाते गुरुः नित्याराधनात्परं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं - यागशालाशुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तान् संप्रोक्ष्य। देव्यौ सह कल्याणकौतुकस्य बलि -तीर्थबिम्बयोः -आचार्यस्य च रक्षाबन्धनं कृत्वा। ततः आचार्यः बलिबेरेण सह यागशालां प्रविश्य। तत्र बलिबिम्बं संस्थाप्य। आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया---- वसन्तोत्सवकर्मणि चतुस्थानार्चनं करिष्ये इति सङ्कल्प्य। पूर्ववत् द्वारपूजा पुरस्कं पालिकाराधनं -चतुस्थानार्चनञ्च विधिवत् कृत्वा। द्वारबलिं दत्त्वा। अनन्तरं यथाविभवैः कलशैः कल्याणकौतुकं संस्नाप्य। सायाह्नसमये महामण्डपे आचार्यः वसन्तमण्डपशुद्ध्यर्थं -गन्धद्रव्यानां शुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन गन्धद्रव्याणि -वसन्तमण्डपञ्च संप्रोक्ष्य। यागशालायां पूर्ववत् चतुस्थानार्चनं बल्यन्तं कृत्वा। ततः देव्यौ सहितेन वा कल्याणकौतुकं यानमारोप्य। वेद -वाद्यघोषेण सह

पुष्पकवीथिकासु प्रादक्षिण्येन वसन्तमण्डपं नीत्वा। तत्रस्थ रत्नमयभद्रासने दक्षिणाभिमुखं देवं समारोप्य। गन्ध -कुङ्कुम -कस्तूरिकादि सुगन्धवस्तुभिः देवं समालिप्य। वालव्यजनैः वीजयित्वा। यथाविधि अर्घ्यादिभिरभ्यर्च्य। भोज्यासने विविधभक्ष्याणि -उर्वारुकखण्डानि -शर्कराखण्डमिश्र वासनायुक्त पानीयानि -श्याममुद्गदलानि -नानाविधफलानि -दध्यन्नञ्च निवेद्य। नीराज्य। देवस्य पुरतः गानं -नाट्यञ्च प्रदर्श्य। निवेदितान्नं सर्वेभ्यः श्रीवैष्णवेभ्यः -भक्तेभ्यः दापयित्वा। तदनु देवं यानमारोप्य। वाद्येन सह प्रासादान्तः प्रविश्य। भगवन्तं गर्भगृहे निवेश्य। अर्धरात्रिपूजां कारयेत्॥

एवं सप्ताहं सायं-प्रातः चतुस्थानपूजायुक्तम् उत्सवं कृत्त्वा। सप्तमोत्सवे प्रातर्हवनानन्तरं देवं -तीर्थबिम्बञ्च शिबिकायाम् आरोप्य। तीर्थतीरमासाद्य। तत्र स्नानविष्टरे देवं तीर्थबिम्बञ्च बहुकलशैः संस्नाप्य। वसन्तोत्सवसम्पूर्णता सिद्ध्यर्थम् अवभृथस्नानं कृत्वा। अलङ्कृत्य। वाद्येन सह आलयमासाद्य। गर्भगृहे निवेश्य। तस्मिन्दिने सायं चतुस्थानार्चनं बल्यन्तं कृत्वा। द्वार -तोरण -कुण्ड -मण्डलान् उद्वास्य। पूर्ववत् वसन्तमण्डपे देवस्य वसन्तं कृत्वा। गर्भगृहे निवेश्य। पालिकादर्शनं -महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। भगवन्तं प्रार्थ्य।

दयानिधे! जगन्नाथ! भक्तरक्षणदीक्षित!।
भवदुक्तेन शास्त्रेण पूजनादिषु कर्मसु।

भक्तिर्नास्ति मया मोहाद्यत्कृतं तत् क्षमस्व भो॥

इति विज्ञाप्य। यजमानः तत्काले आचार्यस्य -मूर्तिपानाञ्च समस्त कैङ्कर्यपराणाञ्च यथावित्तानुसारतः सम्मानं समर्प्य। अर्धरात्रिपूजां कारयेत्॥

*****वसन्तोत्सवविधिः सम्पूर्णम्*****

श्रीः

## वैशाखोत्सव विधिः

आचार्यः देवसन्निधौ प्रातराराधनानन्तरं विष्वक्सेनं यानमारोप्य। वाद्यैः सह महावनं प्रविश्य। फलसञ्चय समीपे गत्वा। तत्रस्थ नालिकेरान् -द्राक्षाः -खर्जूरान् -मातुलङ्गान् -चूतान् -कुरुविन्दान् -पनसान् -कदलीन् च समाहृत्य। स्वर्णभाण्डेषु निक्षिप्य। तान् परिचारकमूर्ध्नि निक्षिप्य। विष्वक्सेनं पुरस्कृत्य वेद -वाद्येन सह मन्दिरान्तः प्रविश्य। पचनालये फलभाण्डान् निक्षिप्य। तानि फलानि जिह्वाचापल्यवर्जितैः श्रीवैष्णवैः ब्राह्मणैः शोधनार्हाणि संशोध्य। क्षालनार्हाणि संक्षाल्य। निस्त्वक्करण-योग्यानि त्वचं व्यपोह्य। उत्सवार्थमण्डपं फलैः अलङ्कृत्य। सायमाराधनानन्तरं विशेषयजनं कृत्त्वा। गर्भालयं प्रविश्य। देवम् अर्घ्यादिभिरभ्यर्च्य। यथाभागमन्नं निवेद्य। नीराज्य। विशाखोत्सवार्थं प्राथ्र्य।

भक्तवत्सल! गोविन्द! वासुदेव! जगत्प्रभो!।

प्रीतये ते रचितोऽयमुत्सवः फलसंयुतः।

फलदानेन देवेश सफलो भव जन्मनि।

अपुनर्भवलाभाय गृहाण परमेश्वर!।

भगवन्! सर्वलोकेश! मकरध्वजपूजित!।

विशाखोत्सवपूजार्थं बिम्बेऽस्मिन् सन्निधिं कुरु॥

इति प्रार्थ्य। नीराज्य। आचार्यः आसने उपविश्य। अस्य देवदेवस्य---- वैशाखोत्सवकर्म करिष्ये तदङ्गं यागशालाशुद्ध्यर्थं -फलादीनां शुद्ध्यर्थं - स्नानोपकरण-द्रव्यशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं -वासुदेव पुण्याहवाचनं कृत्त्वा। तज्जलेन फलानि -यागशालां -बहिर्मण्डपं - स्नपनद्रव्याणि च संप्रोक्ष्य। ततः यागशालायां बलिबेरस्थापनेन चतुस्थानार्चनं कृत्त्वा। पूर्णाहुत्यनन्तरं बलिं दत्त्वा। तदनु देवीभ्यां सह कल्याणकौतुकं यानमारोप्य। फलैरलङ्कृत बहिर्मण्डपे संस्थाप्य। षोडशकलशैः वा पञ्चविंशति कलशैः वा देवं संस्नाप्य। भगवन्तं मल्लिकामालती -कुन्द -कुरवैः -दमनैः -पद्मैः -उत्पलाद्यैः -आम्रपुष्पैः अलङ्कृत्य। तत्समये महानसे चतुर्विधान्नम् -अपूपादि भक्ष्यान् पाचयित्वा। अनन्तरं -चूतान् -कदल्यादीन् -सर्वफलाणि -नालिकेरखण्डानि पाचनार्थम् पचनपात्रे निक्षिप्य। तम् अग्नौ आरोप्य। एतेषां फलानां परिमाणस्य समं क्षीरं -शर्करान् -मधूनि च निक्षिप्य। किञ्चित् मरीची -जीरक -एला -कर्पूर चूर्णैः संमिश्र्य। संयक् पाचयित्वा। मण्डपस्थ देवं

मन्त्रासनाद्युक्तं समाराध्य। प्रथमं मूलबेरादीनां चतुर्विधान्नम् अपूपादि भक्ष्यान् च फलपाकञ्च निवेद्य। अनन्तरं कल्याणकौतुकस्य पुरतः महाहविःप्रकारेण अन्नराशिं कृत्त्वा। पूर्ववत् फलपाकञ्च निवेद्य। पानकं -नालिकेराम्बु -शीतलं तर्पणजलं -ताम्बूलञ्च निवेद्य। नीराज्य। गीत -नृत्त -वीणादि वाद्य-वादनेन ऋगादि घोषेण भगवन्तं तोषयित्वा। विविधैः स्तोत्रैः स्तुत्वा। अन्न -भक्ष्य -फलपक्वाणि च सर्वेभ्यः श्रीवैष्णवेभ्यः भक्तेभ्यः दद्यात्॥ अनन्तरं देवीभ्यां सह देवं यानमारोप्य। वीथि भ्रमणं कृत्त्वा। आलयान्तः प्रविश्य। देवं सन्निधौ निवेश्य। महाकुम्भ प्रोक्षणादीन् पूर्ववत् कृत्त्वा। देवं नमस्कृत्य।

अज्ञात्वा शास्त्रसरणिमविचार्य भवत्प्रियम्।
अकारि यन्मया कर्म तत्सर्वं क्षन्तुमर्हसि॥

इति प्रार्थ्य। अर्धरात्रि पूजां कारयेत्॥

***** वैशाखोत्सवविधिः संपूर्णम्*****

श्रीः

## कल्हारोत्सवविधिः

अथ कल्हारोत्सव-विधिरुच्यते। कल्हारोत्सवार्थं सर्वाणि द्रव्याणि सम्पाद्य।

### कल्हारपुष्प सङ्ग्रहणक्रमः

आचार्यः मूर्तिपैः सह कल्हारस्थ वापी समीपमासाद्य। वाप्याः पश्चिमे

वितान -मालालङ्कृतं चतुस्तम्भप्रपां कल्पयित्वा। तन्मध्ये शाली -तण्डुल -तिलैः पीठं परिकल्प्य। तस्मिन् सोपकुम्भाष्टकं -सकरकं -महाकुम्भं संस्थाप्य। तस्य पुरतः होमार्थं कुण्डं कल्पयित्वा। आचार्यः तत्र आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया---- लोकक्षेमार्थं -सर्वेषां जनानां ऐहिकामुष्मिक फल सिद्ध्यर्थं----वत्सर---- मास----दिन कल्हारोत्सवकर्मणि कल्हारसङ्ग्रहणं करिष्ये तदङ्गं वापीशुद्ध्यर्थं -कुम्भ -वह्निशुद्ध्यर्थं –सर्वद्रव्योपकरण-शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि कुम्भादीन् वापीञ्च सम्प्रोक्ष्य। महाकुम्भादीनाम् आधारादि पद्मान्तम् अभ्यर्च्य। महाकुम्भे ओं भूं भूम्यै नमः इत्यावाह्य। करके सुदर्शनम् -उपकुम्भेषु

| | |
|---|---|
| ओं लक्ष्म्यै नमः | ओं तुष्ट्यै नमः |
| ओं सरस्वत्यै नमः | ओं पुष्ट्यै नमः |
| ओं रत्यै नमः | ओं क्रियायै नमः |
| ओं शान्त्यै नमः | ओं कीर्त्यै नमः |

इत्यावाह्य। अर्घ्यादि दीपान्तं सम्पूज्य। पायसान्नं निवेद्य। नीराज्य। कुण्डे अग्निं प्रतिष्ठाप्य। अग्निमध्ये भगवन्तम् आवाह्य। अनन्तरं भूमिम् आवाह्य। उपचारान् हुत्वा। समिदन्नाज्य -होमानन्तरम् आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया----कल्हारसङ्ग्रहण-कर्मणि भू मन्त्रेण आज्येन अष्टोत्तरशताहुतीः होष्यामि। इति सङ्कल्प्य। आज्येन भू मन्त्रेण हुत्वा।

पूर्णाहुतिं हुत्वा। अग्निस्थमुद्वास्य। वाप्याः परितः इन्द्रादिभ्यः क्षेत्रपालाय च बलिं दत्त्वा। ततः आचार्यः श्रीवैष्णवैः सह भूसूक्तेन वाप्यां कल्हारकुसुमानि सङ्गृह्य। स्वर्णादिनिर्मित पात्रेषु विन्यस्य। महाकुम्भसमीपे संस्थाप्य। महाकुम्भ -करक -उपकुम्भादीन् उद्वास्य*1। आचार्यः कल्हारप्रसून-पात्रमानीय। वेद -वाद्यघोषेण सह आलयं प्रविश्य। शुचौ देशे पात्रं संस्थाप्य। श्रीवैष्णवैः -मालाकारनिपुणैः मूलबेरादि -आलयाश्रित सर्वबेराणां -तत्तद्बिम्ब-प्रमाणानुसारेण कल्हारैः मालाः कारयित्वा। विमान -गोपुर -स्थूण -द्वार -कुम्भ -मण्डल -कुण्डादि युक्त कल्हारस्रजाञ्च कल्पयित्वा। एवं कल्हारसंस्कारं कारयेत्*2॥ सर्वालङ्कारसम्युक्तः आचार्यः आलयमासाद्य। सायमाराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। कल्हारोत्सवार्थं भगवन्तं प्राथ्र्य।

महीपते! जगन्नाथ! कल्हारकुसुमोत्सवम्।
करोमि तव देवेश! तदनुज्ञातुमर्हसि॥
कल्हारकुसुमैर्देव! त्वद्धितैरर्चयाम्यहम्॥
दयामपि च सर्वेश! तदनुज्ञातुमर्हसि।

1) கல்ஹார ஸங்க்ரஹார்த்தமான ஹோமத்தில் கும்ப விஸர்ஜனத்தை பற்றி ஸம்ஹிதையில் சொல்லப்படவில்லை. குளத்தில் விஸர்ஜனம் செய்யலாம் என்பது பலர் கருத்து.
2) ஒரு நாள் முதல் பலநாட்கள் அனுஷ்டிக்கும் கல்ஹாரோத்ஸவத்தில் முதல் நாள் மட்டும் குளக்கரையில் ஹோமம் பலிதானம் செய்தால் போதுமானது. இரண்டாம் நாள்முதல் பூ மந்த்ரத்தால் கல்ஹாரஸங்க்ரஹம் மாத்திரம் செய்யவேண்டும்.

विडम्बनानि मे देव! क्षन्त्वा पूजां जुषस्व मे॥

कल्हारोत्सव-पूर्त्यर्थं भूपते! भक्तवत्सल!।

आयाहि कर्मबिम्बेऽस्मिन् उत्सवं पूरयाद्य मे॥

अहं कल्हारमालाभिः त्वामलङ्कर्तुमर्थये।

भक्तस्य प्रार्थनां देव! स्वीकुरु त्वं जगद्गुरो!॥ इति प्रार्थ्य।

अस्य देवदेवस्य----लोकक्षेमार्थं सर्वेषां जनानाम् ऐहिकामुष्मिक फल सिद्ध्यर्थं----वत्सर----मास----दिन कल्हारोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम्। इति प्रार्थ्य। सभानुज्ञां कृत्वा। पूर्ववत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्च कुर्यात्॥

प्रभातेगुरुः सन्निधौ नित्यपूजानन्तरं कल्हारकुसुमानि सङ्गृह्य। मालाः कारयित्वा। ततः मूलबेरस्य -उत्सव -बलि -तीर्थबिम्बानाञ्च यथाविधि पुण्याहपुरस्सरं रक्षाबन्धनं कृत्वा। सायाह्नसमये देव्याः सह देवं यानमारोप्य। यागशालायाः पश्चिमे भागे भद्रविष्टरे सन्निवेश्य। देवस्य पुरतः शाली -तण्डुल -तिलैः पीठं परिकल्प्य। तस्मिन् कल्हारमालापात्रं संस्थाप्य। कल्हारमालाशुद्ध्यर्थं -कुम्भ -मण्डल -वह्निशुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि -कल्हारमालाश्च संप्रोक्ष्य। देवम् अर्घ्यादिभिरभ्यर्च्य। यथाभागमन्नं निवेद्य। नीराज्य। बलिबेरं यागशालायां संस्थाप्य। सङ्कल्पपूर्वकं द्वारपूजा पुरस्सरं चतुस्थानार्चनं कृत्वा। अग्नौ समिदन्नाज्य-होमानन्तरम् -अस्मिन्नग्नौ

कल्हारपुष्पैः मूलमन्त्रेण अष्टोत्तरसहस्राहुतीः होष्यामि इति सङ्कल्प्य। आज्यावसिक्तैः कल्हारपुष्पैः मूलमन्त्रेण हुत्वा। पूर्णाहुतिं हुत्वा। द्वारबलिं दत्त्वा।

## अधिवास कल्हारमालाधारणम्

तदनु मूल -उत्सवबेराणां -कुम्भ -मण्डलयोश्च एकैकम् अधिवास-कल्हारमालां समर्प्य। विविधान्न -अपूप -लेह्य -पेय -मधुपर्क -ताम्बूलादीन्निवेद्य। नीराज्य। कल्याणकौतुकं शयने शाययित्वा। शयनस्य परितः अष्टमङ्गलानि -सर्वफलानि -नालिकेराणि -ताम्बूलक्रमुकाणि संस्थाप्य। देवं कम्बलैः आच्छाद्य। नीराज्य। तत्काले यजमानः दशदानं कृत्वा। आचार्यः यजमानेन सह जागरेण निशां नीत्वा।

## कल्हारमालापूजा

प्रभाते गुरुः देवं शयनात् उत्थाप्य। अधिवासकल्हारस्रजं विसृज्य। नित्यपूजां कृत्वा। पूर्ववत् कल्हारपुष्पाणि सङ्गृह्य। तत्तद्बिम्ब -प्रमाणानुसारेण मालाः कारयित्वा। देवस्य पुरतः धान्यपीठे पूर्ववत् मालाः संस्थाप्य। तत्र आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----कल्हारोत्सवकर्मणि कल्हारपूजां करिष्ये तदङ्गं कल्हारशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। कल्हारपुष्पेषु संप्रोक्ष्य। कल्हारमाला स्रजञ्च शोषणादिभिः संशोध्य। आधारादि पद्मान्तम् -अभ्यर्च्य। ओं श्रीं श्रियै नमः आगच्छ आगच्छ इति श्रियम् आवाह्य।

अर्घ्यादिभिः अभ्यर्च्य। फलवर्ग -ताम्बूलादीन् निवेद्य। नीराज्य। देवस्य वितानं -स्तम्भं -भित्तिषु च यागशाला -द्वार -तोरणानि च कल्हारपुष्पैः अलङ्कृत्य। यागशालायां विधिवत् चतुस्थानार्चनं कृत्वा। पूर्णाहुतिं हुत्वा। बलिप्रदानानन्तरं कल्याणकौतुकं स्नानविष्टरे निवेश्य। पूर्ववत् एकोत्तर अशीतीघटैः संस्नाप्य। अलङ्कृत्य। कल्हारपुष्पैः अलङ्कृत-मण्डपमध्ये वेदिकायां भगवन्तं संस्थाप्य। अर्घ्यादिभिरभ्यर्च्य। भोज्यासने ध्रुवबेरादीनाम् - उत्सवबेरादीनाञ्च सर्वव्यञ्ज-सम्युक्तं -सर्वफलोपेतं -घृतेन -गव्येन सम्युतम् अपूप -पृथुकाद्यैः सहितं महाहविः निवेदयेत्॥

## कल्हारमाला धारणम्

तदनन्तरं कल्हारपुष्पमाला-पात्राण्यादाय। मूलबेरादि समस्तबेराणां कल्याणकौतुकानां -कुम्भ -मण्डल -कुण्डानाञ्च कल्हारमालाः समर्प्य। एवं श्रियादीनां -द्वारावरणदेवतानां -समस्त परिवाराणां विमान -गोपुरादीनां -समस्त मण्डपानां -सर्वस्थूणानाञ्च कल्हारस्रजं समर्प्य। नीराज्य। सायाह्नसमये देवं कल्हारकुसुमैः अर्चयित्वा। यागशालायां चतुस्थानार्चनं कृत्वा। कल्हारकुसुमैः होमं कृत्वा। बलिप्रदानानन्तरं कल्हार-पुष्पमालालङ्कृतं -देव्याः सह देवं यानमारोप्य। सर्ववीथिषु परिभ्रमणं कृत्वा। घटदीपं नीराजनञ्च दर्शयित्वा। भगवन्तं गर्भगेहे निवेश्य। सर्वेभ्यः कल्हारमालां विसृज्य। अर्धरात्रिपूजां कारयेत्॥

एवं त्रिदिनं वा पञ्च -सप्त -नव -एकादशदिनानि वा उत्सवं कृत्त्वा। प्रतिदिनं कल्हारपुष्पं सङ्गृह्य -संस्कृत्य -समर्प्य। उत्सवावसानदिने प्रातर्हवनानन्तरं

देव्याः सह देवं तीर्थबिम्बञ्च यानमारोप्य। तटाक समीपङ्गत्वा। यथाविधि संस्नाप्य। कल्हारोत्सव सम्पूर्णता सिद्ध्यर्थम् अवभृथस्नानं पूर्ववत् कृत्वा। आलयमासाद्य। आचार्यः यागशालायां सायाह्नहवनं विधाय। बल्यनन्तरं पालिकादर्शनं कृत्वा। पूर्ववत् कुण्ड -मण्डलञ्च उद्वास्य। सोपकुम्भाष्टकं -महाकुम्भमादाय करकवारि-धारया गर्भगृहं प्रविश्य। पूर्ववत् महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य।

यो मयानुष्ठितो देव! कल्हारोत्सव संज्ञिकः।
तत्र प्रमादात्स्खलितं तत्सर्वं क्षन्तुमर्हसि॥
गृहाण देव! देवेश! कल्हारकुसुमैः कृताम्।
त्वद्दत्तैर्भोगनिचयैः संपूर्णां सर्वकामदाम्॥

इति विज्ञाप्य। तत्काले यजमानेन गुरवे -ऋत्विजानाञ्च दक्षिणां दद्यात्॥
अर्धरात्रिपूजां कारयेत्॥

## कल्हारमाला - पुष्पसङ्ख्या

### श्री भू समेत ध्रुवबेरस्यमाला लक्षणम्

उत्तम - मध्यम - कनिष्ठ - किरीट - वनमाला इति पञ्चमालाः भवन्ति।

उत्तमम् - अष्टोत्तरसहस्रपुष्पैः जानुपर्यन्तं कृत्वा।

मध्यमम् - अष्टशतपुष्पैः ऊरुपर्यन्तं कृत्वा।

कनीयसं - षट्-शतैः पुष्पैः नाभिपर्यन्तं कृत्वा।

किरीटाख्यम् - अष्टोत्तरशतपुष्पैः किरीटवत् कृत्वा।

वनमालमालां - चतुस्सहस्रैः पुष्पैः आपादतल-मस्तकान्तं कृत्वा।

आधारपीठस्यमालाम् - अष्टोत्तरशतपुष्पैः कृत्वा।

प्रभायां - बहुपुष्पैः तत्प्रमाणेन कृत्वा।

<u>श्री भू समेत कल्याणकौतुकस्य मालालक्षणम्</u>

उत्तमं - पञ्चशतपुष्पैः जानुपर्यन्तं कृत्वा।

मध्यमं - चतुश्शतपुष्पैः ऊरुपर्यन्तं कृत्वा।

कनीयसं - त्रिशतैः पुष्पैः नाभिपर्यन्तं कृत्वा।

किरीटाख्यं - पञ्चाशत् -पुष्पैः किरीटवत् कृत्वा।

वनमालमालां - पञ्चशतैः पुष्पैः आपादतल-मस्तकान्तं कृत्वा।

आधारपीठस्य मालाम् - अष्टोत्तरशतपुष्पैः कृत्वा।

प्रभायां - द्विसहस्रपुष्पैः तत्प्रमाणमालां कृत्वा।

कर्मार्चादीनाम् - अष्टशत अथवा चतुश्शत द्विशतपुष्पैः वा एकमालां वा कल्पयित्वा।

यागशालायां महाकुम्भ -कुण्डानां त्रीणिमालाः वा एकमालां वा -द्विशतपुष्पैः वा शतपुष्पैः वा कल्पयित्वा। महाकुम्भस्य प्रमाणवत् करकस्यमालां विधाय। उपकुम्भेषु एकैकपुष्पं भवतु।

<u>मण्डलस्यमाला</u>

पद्मान्तं शतपुष्पैः -नाभ्यन्तं द्विशतपुष्पैः -नेम्यन्तं त्रिशतपुष्पैः -पीठस्य चतुश्शतपुष्पैः -बहिः चतुस्सहस्रपुष्पैः मालाः कारयित्वा।

विष्वक्सेनस्य - द्विसहस्रपुष्पैः नाभिमानं कृत्वा।

गरुडस्य - द्विशतपुष्पैः नाभिमानं कृत्वा।

चण्डादि सर्वेषां द्वारपालकानां इन्द्रादीनाञ्च त्रिशतपुष्पैः नाभिमानं कृत्वा।

अन्येषां परिवाराणाम् अष्टोत्तरशतपुष्पैः नाभिमानं मालाः कारयेत्॥

आचार्यस्य द्विशतपुष्पैः वा शतपुष्पैः वा नाभिमानं कृत्वा।

बलिपीठस्य त्रिशतपुष्पैः वा द्विशतशतपुष्पैः वा कृत्वा।

सर्वं हाराकारेण कल्पयेत्॥

## अन्यत्रविधिः

मूलबेरस्य - पञ्चशतपुष्पैः मालां कृत्वा।

मूलबेर श्री भू देव्यौ मालां - पञ्चाशदुत्तरद्विशतपुष्पैः कृत्वा।(२५०)

उत्सवबेरस्य मालाम् - अष्टोत्तरशतपुष्पैः कृत्वा।

उत्सवबेरस्य श्री भू देव्यौ च मालां - चतुःपञ्चाशत्पुष्पैः कृत्वा।(५४)

इतरबेराणां - पञ्चविंशति पुष्पैः स्रजान् कृत्वा।

कुम्भ - मण्डल - कुण्डानां पञ्चाशत्पुष्पैः स्रजान् कृत्वा।(५०)

अन्येषां तत्तत्प्रमाणानुसारेण स्रजान् कारयेत्॥

*****कल्हारोत्सवविधिः सम्पूर्णम्*****

श्रीः

## दमनोत्सवविधिः

अथ दमनोत्सव-विधिरुच्यते। दमनोत्सवार्थं सर्वाणि द्रव्याणि सम्पाद्य।

## दमनाहरणविधिः

आचार्यः दमनोद्यानमासाद्य। तन्मध्ये प्रपां कल्पयित्वा। तत्र सोपकुम्भाष्टकं सकरकं महाकुम्भं संस्थाप्य। कुम्भस्य पश्चिमे होमार्थं कुण्डं कल्पयित्वा। महाकुम्भे ओं नमो भगवते प्रद्युम्नाय इति प्रद्युम्नमावाह्य। करके सुदर्शनम् -उपकुम्भाष्टकेषु इन्द्रादीन् आवाह्याभ्यर्च्य। पायसान्नं निवेद्य। नीराज्य। अग्निमध्ये प्रद्युम्नमावाह्य। उपचारान् हुत्वा। समिदन्नाज्यहोमानन्तरं प्रद्युम्नमन्त्रेण आज्येन अष्टोत्तरशताहुतीः हुत्वा। पूर्णाहुतिं हुत्वा। अग्निस्थमुद्वास्य। उद्यानस्य परितः अष्टासु दिक्षु इन्द्रादिभ्यः पायसान्नेन बलिं दद्यात्॥ ततः दमनीं प्रार्थ्य।

नमो दमनकतरो नमो मदनवल्लभ!।
श्रीमुकुन्द प्रीत्यर्थं पूजये त्वा नमन्नये॥

इति प्रार्थ्य। ओं नमो भगवते प्रद्युम्नाय इति मन्त्रेण दमनं छित्वा। स्वर्णादिपात्रेषु सङ्गृह्य। तत्रस्थ वेदिकासमीपे संस्थाप्य। महाकुम्भजलेन प्रद्युम्नमन्त्रेण दमनानि संप्रोक्ष्य। तदनु आचार्यः दमनपात्राण्यादाय। छत्र -चामर -वेद -वाद्यघोष -शाकुनसूक्त -पठनेन ग्राम-धामं प्रदक्षिणीकृत्य। आलयं प्रविश्य। शुचौ देशे दमनपात्रान् संस्थाप्य। श्रीवैष्णवैः मालाकारनिपुणैः मूलबेरादि -आलयाश्रित सर्वबेराणां -तत्तद्बिम्ब

-प्रमाणानुसारेण दमनैः मालाः कारयित्वा। विमान -गोपुर -स्थूण -द्वार -कुम्भ -मण्डल -कुण्डादि युक्त दमनस्रजाञ्च कल्पयित्वा। एवं दमनसंस्कारं कारयेत्*1॥ सर्वालङ्कार संयुक्तः आचार्यः आलयमासाद्य। सायमाराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। दमनोत्सवार्थं भगवन्तं प्रार्थ्य।

श्रीमाधव! मधुजनितैर्दमनिकपुष्पैः प्रियाहृतैर्यक्ष्ये।
प्रतिवार्षिक सत्पूजापराधशान्त्यै सदानन्द!॥
भो भो श्रीललिते कान्ते मालत्यानन्दमन्दिरे।
ममापराधशान्त्यर्थं कुरुष्व दमनार्पणम्॥
परमामोदमुदित मदनानन्दसुन्दरम्।
पुष्पं दमनकस्यैतज्जगदीश! गृहाण मे॥
भगवन्! देवदेवेश! शङ्खचक्र -गदाधर।
दमनिकार्पणं कर्तुम् अनुज्ञां देहि मे प्रभो!॥

अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर----मास----दिन दमनोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन---- विष्णो अनुमन्यताम् इति प्रार्थ्य। सभानुज्ञां लब्ध्वा। पूर्ववत् सङ्कल्प पूर्वकं विष्वक्सेनाराधनं –वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्च कुर्यात्॥ परस्मिन् दिवसे प्रातः दमन सङ्ग्रहणं कृत्त्वा।

1) கல்ஹாரோத்ஸவம் போல் தமனோத்ஸவத்திலும் முதல் நாள் மட்டும் ஹோமம் பலிதானம் ஆசரித்தால் போதும். மற்றைய நாளில் தமன ப்ராத்தனை செய்து ஆஹரணம் செய்ய வேண்டும்.

अधिवासमालां कल्पयित्वा। सायाह्न-पूजानन्तरम् आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया---- दमनोत्सवकर्मणि दमनमालाशुद्ध्यर्थं -स्नानोपकरण-द्रव्यशुद्ध्यर्थं -कुम्भ - मण्डल -वह्निशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि -दमनमालानि च प्रोक्ष्य। देव्याः देवस्य -बलिबेरस्य -आचार्यस्य च रक्षाबन्धनं कृत्वा। देव्याः सह देवं यानमारोप्य। स्नपनमण्डपे द्वादशकलशैः संस्नाप्य। प्रादक्षिण्येन यागशालायां पश्चिमेभागे भद्रविष्टरे कल्याणकौतुकं संस्थाप्य। देवस्य पुरतः शाली -तण्डुल -तिलैः पीठं परिकल्प्य। तदुपरि दमनमालापात्रं संस्थाप्य। यागशालायां पूर्ववत् द्वारपूजा पुरस्सरं चतुस्थानार्चनं कृत्वा। बलिबेरं यागशालायां संस्थाप्य। सम्पूज्य। अग्नौ समिदन्नाज्य -होमानन्तरं (मूलमन्त्रेण) सप्तसमिद्धोमं*1 कृत्वा। तदनन्तरम् आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्मिन्नग्नौ दमनदलैः मूलमन्त्रेण अष्टोत्तरसहस्राहुतीः होष्यामि इति सङ्कल्प्य। आज्यावसिक्तैः दमनैः मूलमन्त्रेण हुत्वा। पूर्णाहुतिं हुत्वा। द्वारबलिं दत्वा। तदनन्तरं सदेवीनां मूल -उत्सव बिम्बयोः कुम्भ -मण्डलयोरपि एकैकम् अधिवास-दमनमालां समर्प्य। ततः कल्याणकौतुकं शयने शाययित्वा। कम्बलैः अच्छाद्य। नीराज्य। आचार्यः यजमानेन सह जागरेण निशां नीत्वा।

प्रभाते नित्यानुष्ठान निर्वृतेन आचार्यः आलयमासाद्य। कल्याणकौतुकं

---

1) पुष्प -धूपद्रव्य -मधुपर्क-बीजानि -आज्य -अन्न समित् एते सप्तसमिधः

शयनात् उत्थाप्य। सर्वेषाम् अधिवास-दमनमालां विसृज्य। नित्यपूजां बल्यन्तं कृत्वा। पूर्ववत् दमनं सङ्गृह्य। मालाः कल्पयित्वा। पृथक् पृथक् पात्रेषु विन्यस्य। कल्याणकौतुकं स्नानविष्टरे संस्थाप्य। अष्टोत्तरशतकलशैः संस्नाप्य। अलङ्कृत्य। यागशालायां पश्चिमे-भागे दमनदलैः अलङ्कृतमण्डपमध्ये भगवन्तं निवेश्य। यथाविधि पूजयित्वा।

## दमनमालापूजा

देवस्याग्रे पूर्ववत् धान्यपीठे दमनमालापात्राणि संस्थाप्य। ततः आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया---- दमनोत्सवकर्मणि प्रथमोत्सवे दमनपूजां करिष्ये तदङ्गं दमनमालाशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन दमनमालाः संप्रोक्ष्य। दमनमालानां शोषणादिभिः संशोध्य। सुरभिमुद्रया अमृतीकृत्य। आधारादि पद्मान्तम् अभ्यर्च्य।

| | |
|---|---|
| ओं किरीटाय नमः | ओं कौस्तुभाय नमः |
| ओं श्रीवत्सायै नमः | ओं वनमालायै नमः |

इत्यावाह्य। अर्घ्यादि-दीपान्तं संपूज्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य। ततः यागशालायां यथाविधि चतुस्थानार्चनं कृत्वा। बलिप्रदानानन्तरं गुरुः दमनमाला-पात्राण्यादाय। गर्भगेहं प्रविश्य। मूलमूर्तेः दमनमालां समर्प्य। शिरोप्रभृति लाञ्छन -भूषणानां -कट्यन्तं - पादान्तञ्च दमनमालां समर्प्य। श्रियादीनाञ्च एवं कृत्वा।

यागशालां प्रविश्य। देव्याः सह उत्सवबिम्बस्य दमनमालां समर्प्य। एवं कुम्भ -मण्डल -कुण्डेषु -द्वार -पालिकादिषु च दमनमालां समर्प्य। पश्चात् समस्तपरिवारेषु -द्वारावरणदेवतासु -विमान -गोपुर -द्वार -स्थूणेषु -अर्घ्यादिपात्रेषु –सर्वोपकरणेषु च दमनमालां समर्प्य। नीराजयेत्॥

सायाह्न-समये यागशालाहवनं बल्यन्तं कृत्वा। तदनु दमलमालालङ्कृतं भगवन्तं यानमारोप्य। सर्ववीथिषु परिभ्रमणं कृत्वा। घटदीपं नीराजनञ्च दर्शयित्वा। सन्निधौ निवेश्य। सर्वेषां दमनमालां विसृज्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥ एवं त्रिदिनं वा पञ्च -सप्त -नव -एकादशदिनानि वा उत्सवं विधाय। प्रथमोत्सवादि उत्सवान्तं प्रतिदिनं नूतनदमनमालां संस्कृत्य -सम्पूज्य -सन्धार्य। रात्रौ विसृज्य। उत्सवावसाने सायाह्ने पूर्णाहुत्यनन्तरं पालिकादर्शनं कृत्वा। पूर्ववत् महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च कृत्वा। नीराज्य। भगवन्तं विज्ञाप्य।

उत्सवं देवदेवेश! दमनीदल कल्पितम्।
अस्मासु दयया देव! गृहाण परमेश्वर!॥

इति प्रार्थ्य। तत्काले यजमानः गुरवे -ऋत्विजानाञ्च दक्षिणां दद्यात्॥ अर्धरात्रिपूजां कारयेत्॥

*****दमनोत्सवविधिः सम्पूर्णम्*****

श्रीः

## ज्येष्ठस्नपनोत्सवविधिः

अथ ज्येष्ठस्नपनोत्सव-विधिरुच्यते। ज्येष्ठाभिषेकार्थं सर्वाणि द्रव्याणि एकोत्तराशीतिकलश स्नपनद्रव्याणि च सम्पाद्य। स्नपनमण्डपम् अलङ्कृत्य। स्नपनार्थं सुवर्णादि निर्मितान् कलशान् विष्णुगायत्र्या प्रक्षाल्य। प्रत्येकं सव्यकरेण गृहीत्वा - दक्षिणकरेण "इन्द्रन्नत्वा" इति मन्त्रेण तन्तुना आवेष्ट्य।

## कोष्ठार्थं सूत्रपातनविधिः

स्नपनमण्डपे देवस्य पुरतः कलशस्थापनार्थं चन्दनार्द्राणि सूत्राणि प्रागायतानि चतुर्दश निपात्य। उदगायतानि च चतुर्दश निपात्य। एकोन सप्तति-शतकोष्ठं सम्पाद्य। तत्कोष्ठानां मध्ये नवकोष्ठं सङ्गृह्य। अन्तराल-पङ्क्तिविसर्जनेन अष्टदिक्षु नवकोष्ठानि सङ्गृह्य। एकोत्तर अशीतिकोष्ठं ज्ञात्वा। कोष्ठानाम् आयामविस्तारं षोडशाङ्गुलं विधाय। अथवा कलशानां मानेन कोष्ठानि कृत्वा। प्रतिकोष्ठेषु प्रत्याच्छादनेन आढकेन तदर्धेन तदर्धेन वा शालिपीठं कृत्वा। तदुपरि तदर्धेन तण्डुलेन तदुपरि तदर्धेन तिलेन पीठं कल्पयित्वा। सर्वेषु धान्यपीठेषु पूर्वाग्रान् द्वे द्वे दर्भान् निक्षिप्य।

## कलशे निक्षेपणीयद्रव्याणि

सप्तदश प्रधान-कलशानादाय। मध्य-प्रधानकलशे घृतेनापूर्य।

**मध्य-नवकस्य** पूर्वकुम्भे उष्णोदकेनापूर्य।

**आग्नेयकुम्भे** - माणिक्य, पद्मराग, नील, वज्र, पुष्पक, प्रवाल, मौक्तिक,

मरकत, वैडूर्याणि च निक्षिप्य।

**दक्षिणे** - कदली, बीजपूर, आम्र, आमलक, बिल्व, नालिकेरफल, पनस, मातुलङ्गफलानि च सम्भिन्नेन निक्षिप्य।

**निर्ऋते** - स्वर्ण, रजत, ताम्र, सीस, त्रपु, कांस्य, अयसानि च प्रत्येकं निष्कमानेन निक्षिप्य।

**पश्चिमे** - रजनी, सूर्यवर्तिनी, सहदेवी, शिरीषा, सदाभद्रा, कुशाग्राणि च प्रत्येकं मुष्टिमानेन निक्षिप्य।

**वायव्ये** - कुङ्कुम, कोष्ठ, गन्ध, अगरु, उशीरमूलानि, ह्रीबेर, गिरिसम्भव, मांसी, मुराणि च प्रत्येकं पलमानेन निक्षिप्य।

**उत्तरे** - नीवार, वेणु, शाली, प्रियङ्गु, यव, कङ्कु, षाष्टिक, गोधूम, तण्डुलानि च प्रत्येकं मुष्टिमानेन निक्षिप्य।

**ऐशान्ये** - यव, वेणु, व्रीहीन् च प्रत्येकं कुडुपमानेन निक्षिप्य।

**पूर्व-नवकस्य मध्यकुम्भे** - तुलसी, पद्म, दूर्वा, अक्षत, श्यामाक, विष्णुपर्णी बिल्वपत्र, चन्दनानि च मुष्टिमात्रया निक्षिप्य।

**आग्नेय-नवकस्य मध्यकुम्भे** - दध्ना आपूर्य।

**दक्षिण-नवकस्य मध्यकुम्भे** - सिद्धार्थ, अक्षत, कुशाग्र, फल, यव, तिलानि च प्रत्येकं मुष्टिमात्रया, चन्दनं त्रिनिष्कमानेन, सुपक्वेन-फलञ्च निक्षिप्य।

**निर्ऋति-नवकस्य मध्यकुम्भे** - पयसा आपूर्य।

**पश्चिम-नवकस्य मध्यकुम्भे** - तक्कोल, चम्पकमुकुल, घनसार, जाति, एला, लवङ्गत्वक्, चन्दन, सुरभियुक्तपुष्पाणि च प्रत्येकं पलार्धमानेन निक्षिप्य।

**वायव्य-नवकस्य मध्यकुम्भे** - मधुना आपूर्य।

**उत्तर-नवकस्य मध्यकुम्भे** - गुणमेकं घृतं, तस्मात् द्विगुणं दधि, त्रिगुणं पयः, चतुर्गुणं शकृद्वारि, षड्गुणं गोजलञ्च सङ्गृह्य। विधिवत्सम्मेलनं कृत्वा। कुम्भे निक्षिप्य।

**ऐशान्य-नवकस्य मध्यकुम्भे** - शमी, पलाश, खदिर, बिल्व, अश्वत्थ, विकङ्कत, औदुम्बर, न्यग्रोधादि वृक्षाणां त्वचानि प्रत्येकं पलमानेन निक्षिप्य। इतराणि कलशाणि शुद्धोदकेनापूर्य।

आचार्यः मूर्तिपाः प्राङ्मुखः उदङ्मुखः वा धान्यपीठोपरि विष्णुगायत्र्या सप्तदश-प्रधानकुम्भान् संस्थाप्य। इतर-शुद्धोदक-कुम्भान् द्वादशाक्षरेण संस्थाप्य। अशीति कलशेषु दर्भैः सप्तभिः पञ्चभिः त्रिभिर्वा कृतानि कूर्चानि अवागग्रं विन्यस्य। प्रधानकलशे चतुर्विंशदर्भैःकृतकूर्चम् अवागग्रं निक्षिप्य। सर्वेषां कलशानां कण्ठेषु युवासुवासा इति मन्त्रेण नवैः वासोभिः वेष्टयित्वा। चक्रमन्त्रेण शरावेण पिधाय (आम्रपल्लव -नालिकेरैः पिधाय)। सर्वेषां कुम्भानां गन्धाक्षत -पुष्पमाल्यैः अलङ्कृत्य। कलशस्य पूर्वे होमार्थं कुण्डं वा स्थण्डिलं वा कल्पयित्वा। यागशालावत् द्वार -तोरण -कुम्भान् संस्थाप्य। सर्वान् स्नानोपकरणान् सम्पाद्य। ज्येष्ठाभिषेकमारभेत्॥

आचार्यः आलयमासाद्य। प्रातराराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। ज्येष्ठाभिषेकार्थं भगवन्तं प्रार्थ्य।

भगवन्! पुण्डरीकाक्ष! लक्ष्मीकान्त! दयानिधे!।
महाभिषेकं भगवतः कर्तुं सम्प्रार्थयाम्यहम्।
अनुगृह्णातु मत्पूजां कर्मार्चायां प्रविश्य च॥

अस्य देवदेवस्य----लोकक्षेमार्थं ग्रीष्मकाल-श्रमशान्त्यर्थं ज्येष्ठाभिषेककर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम् इति प्रार्थ्य। पूर्ववत् सभानुज्ञां कुर्यात्॥

श्रीभगवदाज्ञया----लोकक्षेमार्थं ग्रीष्मकाल-श्रमशान्त्यर्थं ज्येष्ठाभिषेककर्म करिष्ये तदङ्गं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -कुम्भ -वह्निशुद्ध्यर्थं - स्नानोपकरण -द्रव्यशुद्ध्यर्थं -कवचशुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं -वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं समस्तकार्याणां निर्विघ्नेन परिसमाप्त्यर्थम् आदौ विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। विधिवत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनञ्च कृत्वा। ज्येष्ठाभिषेकार्थं पूर्ववत् पुष्पाङ्कुरान् अर्पयित्वा। देव्याः सह उत्सवबेरस्य रक्षाबन्धनं कृत्वा। तान् यानमारोप्य। वेद -वाद्यघोषेण स्नपनमण्डपं प्रविश्य। तत्र स्नानविष्टरे देवं देव्यौ च संस्थाप्य। आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----लोकक्षेमार्थं ग्रीष्मकाल-श्रमशान्त्यर्थं ज्येष्ठाभिषेकोत्सवे एकोत्तर अशीतिघटैः स्नपनकर्म करिष्ये तदङ्गं द्वारतोरण -ध्वज -कुम्भदेवता-पूजनं करिष्ये इति सङ्कल्प्य। अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य। पात्राणि साधयित्वा। पुण्याह जलेन सर्वाणि द्रव्याणि संप्रोक्ष्य। पूर्ववत् द्वारपूजां कृत्वा। अनन्तरं कलशपूजां कुर्यात्॥

सर्वेषां कलशानाम् आधारादि-पद्मान्तमभ्यर्च्य। तत्तन्मन्त्रेण धूपं समर्प्य।

**मध्ये घृतकुम्भे** - ओं नमो भगवते वासुदेवाय इति वासुदेवमावाह्य।

**मध्य-नवकस्य पूर्वे उष्णोदके** - ओं नमो भगवते पुरुषात्मने।

**दक्षिणे फलोदके** - ओं नमो भगवते सत्यात्मने।

**पश्चिमे मार्जनोदके** - ओं नमो भगवते अच्युतात्मने।

**उत्तरे अक्षतोदके** - ओं नमो भगवते अनन्तात्मने।

**आग्नेये रत्नोदके** - ओं नमो भगवते कं ओं केशवाय।

**निर्ऋते लोहोदके** - ओं नमो भगवते नं ओं नारायणाय।

**वायव्ये गन्धोदके** - ओं नमो भगवते मं ओं माधवाय।

**ऐशान्ये यवोदके** - ओं नमो भगवते गं ओं गोविन्दाय।

**पूर्व-नवकस्य मध्यकुम्भे पाद्ये** - ओं नमो भगवते वं ओं विष्णवे।

**दक्षिण-नवकस्य मध्यकुम्भे अर्घ्ये** - ओं नमो भगवते मं ओं मधुसूदनाय।

**पश्चिम-नवकस्य मध्यकुम्भे आचामे** - ओं नमो भगवते त्रं ओं त्रिविक्रमाय।

**उत्तर-नवकस्य मध्यकुम्भे पञ्चगव्ये** - ओं नमो भगवते वं ओं वामनाय।

**आग्नेय-नवकस्य मध्यकुम्भे दध्नि** - ओं नमो भगवते श्रीं ओं श्रीधराय।

**निर्ऋति-नवकस्य मध्यकुम्भे पयसि** - ओं नमो भगवते हृं ओं हृषीकेशाय।

**वायव्य-नवकस्य मध्यकुम्भे मधुनि** - ओं नमो भगवते पं ओं पद्मनाभाय।

**ऐशान्य-नवकस्य मध्यकुम्भे कषाये** - ओं नमो भगवते दं ओं दामोदराय।

**सर्वेषु शुद्धोदक-कुम्भेषु** - ओं नमो नारायणाय इति नारायणम् आवाह्य।

## स्नपनाङ्गहोमः

कुम्भस्य पुरतः कुण्डे स्थण्डिले वा अग्निप्रतिष्ठां कृत्वा। अग्निमध्ये भगवन्तम् आवाह्य। समिदन्नाज्यहोमान्तं कृत्वा। अनन्तरम् आचार्यः अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----लोकक्षेमार्थं ग्रीष्मकाल श्रमशान्त्यर्थं ज्येष्ठाभिषेककर्मणि स्नपनाङ्गहोमं करिष्ये इति सङ्कल्प्य। अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य। तत्तत् प्रधानकलशाधिदेवता-मन्त्रेण आज्येन प्रत्येकम् अष्टाहुतीः हुत्वा ( ओं नमो भगवते वासुदेवाय स्वाहा----ओं नमो भगवते दं ओं दामोदराय स्वाहा)। पृथक् पृथक् सम्पाताज्यं सङ्गृह्य। तत्तन् मन्त्रहोमानन्तरं तत्तत्सम्पाताज्यं तत्तत् कलशेषु संस्पृश्य। शुद्धोदक कलशार्थं ओं नमो नारायणाय स्वाहा इति अष्टोत्तरशताहुतीः हुत्वा। पूर्ववत् सम्पाताज्यं गृहीत्वा। शुद्धोदक-कलशेषु संस्पृश्य। स्विष्टकृदादि-पूर्णाहुत्यन्तं कृत्त्वा। ततः देवस्य कवचबन्धनकृतं चेत् कवचं मुत्त्वा। श्री - भूदेव्यौ च एवं कृत्वा। स्नानवस्त्रैः अलङ्कृत्य। अनन्तरं मन्त्रासन प्रभृति देवं सम्पूज्य। स्नानासन उपचारैः उपचर्य। विधिवत् स्नपनं कृत्वा। प्रथमं पाद्यकलशेन संस्नाप्य। तदनन्तरं पाद्यकलशस्य परितस्थ शुद्धोदक-कलशैः संस्नाप्य। एवं दिक्विदिक्क्रमेण पाद्य -अर्घ्य -आचाम -पञ्चगव्य -दधि -क्षीर -मधु -कषाय -उष्णोदक -फलोदक -मार्जनोदक -अक्षतोदक -रत्नोदक -लोहोदक -गन्धोदक -यवोदक -घृतद्रव्यकलशैः तत्तन् मन्त्रमुच्चरन् संस्नाप्य।

## पाद्यादि-द्रव्यकलश-मन्त्राणि

१) विष्णुगायत्र्या पाद्यकुम्भेन - अष्टाक्षरेण शुद्धोदक-कुम्भैः।

२) तद्विष्णोरिति अर्घ्यकुम्भेन।

३) नते विष्णोरिति आचमनकुम्भेन।

४) विष्णोः कर्माणीति पञ्चगव्यकुम्भेन।

५) दधिक्राव्णो इति दधिकुम्भेन।

६) आप्यायस्वेति क्षीरकुम्भेन।

७) मधुवातेति मधुकुम्भेन।

८) ओषधयस्संवदन्ते सोमेन सहराज्ञा।

यस्मै करोति ब्राह्मणस्तꣳराजन् पारयामसि। इति कषायकुम्भेन।

९) तद्विष्णोरिति उष्णोदकेन।

१०) याः फलिनीरिति फलोदकेन।

११) शन्नोदेवीति मार्जनोदकेन।

१२) सावित्र्या (ओंतत्सवितुर्वरेण्यं---प्रचोदयात्) अक्षतोदकेन।

१३) त्रातारमिन्द्रमिति रत्नोदकेन।

१४) अष्टाक्षर्या लोहोदकेन।

१५) गन्धद्वारेति गन्धोदकेन।

१६) शतधारमिति यवोदकेन।

१७) घृतस्नात साम्ना घृतकुम्भेन संस्नाप्य। शङ्ख -पद्म -सहस्रधारा

अभिषेकानन्तरं भगवन्तम् अलङ्कृत्य। भक्ष्यभोज्यादीन् निवेद्य। नीराज्य।

निवेदित भक्ष्य-भोज्यादीन् आचार्येभ्यः श्रीवैष्णवेभ्यः भक्तेभ्यः दद्यात्॥

ततः शिल्पिना कवचं शुद्धीकृत्य। पुण्याहजलेन पञ्चगव्येन च प्रोक्ष्य।

सलिलैः शोधयित्वा। श्रीभगवदाज्ञया----ज्येष्ठाभिषेककर्मणि भगवत्

कवचस्य नवकलशस्नपनं करिष्ये इति सङ्कल्पपूर्वकं नवभिः कलशैः कवचं

संस्नाप्य। अनन्तरं देवस्य कवचबन्धनं कृत्वा। पूर्ववत् देवं देव्यौ च

यानमारोप्य। गर्भालये निवेश्य। पुष्पाङ्कुरं देवस्य पादयोः समर्प्य। रक्षां

विसृज्य। यथाभागमन्नं निवेद्य। नीराज्य। भगवन्तं प्रार्थ्य।

ज्येष्ठताराभिषेकोऽयं त्वत्प्रियार्थं मया कृतम्।

यत्किञ्चिद्विपरीतं चेत् तत्र तत् क्षन्तुमर्हसि॥

इति विज्ञाप्य। यजमानः गुरवे -शिल्पिनः -कैङ्कर्यपराणाञ्च उक्त दक्षिणां

दद्यात्॥ अन्यत्सर्वं पूर्ववत् कारयेत्॥ *1

*****ज्येष्ठाभिषेकविधिः सम्पूर्णम्*****

श्रीः

## गङ्गोत्पत्युत्सवः

अथ गङ्गोत्पत्युत्सव-विधिरुच्यते। कटकमासे अष्टादशदिने आचार्यः

भगवत्सन्निधौ सायमाराधनानन्तरं गङ्गोत्पत्युत्सवार्थं प्रार्थ्य।

1) ஜ்யேஷ்டாபிஷேகத்தில் 81 கலசத்தோடு மண்டலாராதனம் சேர்த்து சதுஸ்தானார்ச்சனம் செய்வது என்பது சோழநாட்டில் பல கோயில்களில் அனுஷ்டானத்தில் உள்ளது. ஆனால் ப்ரக்ருதம் இருக்கிற ஸம்ஹிதைகளில் எதிலும் மண்டலாராதன ப்ரமாணம் இல்லை. ஸ்ரீப்ரச்ன ஸம்ஹிதையில் மட்டும் தான் ஜ்யேஷ்டாபிஷேகவிதி சொல்லப்பட்டுள்ளது.

पुण्यतीर्थपदाम्भोज त्रिविक्रम जगद्धित।

नदीनां शुद्धये देव बिम्बेऽस्मिन् सन्निधिं कुरु॥ इति प्रार्थ्य देवीभ्यां सह देवं याने समलङ्कृत्य। वेदवाद्यघोषैः धाम प्रादक्षिण्येन नदीतीरमासाद्य। तत्रस्थ मण्डपे सिह्मविष्टरे देवं संस्थाप्य। देवस्य पुरतः शालि -तण्डुल -तिलैः धान्यपीठं परिकल्प्य। तदुपरि सोपकुम्भाष्टकं सकरकं महाकुम्भं संस्थाप्य। देवम् अर्घ्यादिभिः अभ्यर्च्य। महान्नं निवेद्य। नीराज्य। आचार्यः तत्र आसने उपविश्य। अस्य देवदेवस्य---- लोकक्षेमार्थं----वत्सरे कटकमासे गङ्गोत्पत्तिकाले नद्याराधनकर्म करिष्ये तदङ्गं कुम्भ -करक -कलशशुद्ध्यर्थं -नदीशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं समस्त----विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। विधिवत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनञ्च कृत्त्वा। तज्जलेन कलशान् संप्रोक्ष्य। सर्वान् आधारादि पद्मान्तम् अभ्यर्च्य। मध्यकुम्भे

विष्णुपादोद्भवे! गङ्गे! सर्वपापविनाशिनि!।

नदीनां शुद्धये देवि! कुम्भेऽस्मिन् सन्निधिं कुरु॥

ओं गं गङ्गायै नमः आगच्छ आगच्छ इत्यावाह्य।

उपकुम्भेषु पूर्वादिक्रमेण ओं लं इन्द्राय नमः-----ओं शं ईशानाय नमः इत्यावाह्य। करके - ओं सहस्रार हुं फट् इति सुदर्शनमावाह्य। सर्वेभ्यः अर्घ्यादिभिरभ्यर्च्य। फलवर्गताम्बूलादीन् निवेद्य। नीराज्य। आचार्यः नदी समीपङ्गत्वा। नदीं पुण्याहजलेन प्रोक्ष्य। उपकुम्भान्

उद्वास्य। करकवारिधारया कुम्भस्थां विष्णुपादजां गङ्गां नद्यां संयोज्य। वस्त्र -पुष्प -गन्ध -फलादिभिः नदीं सम्पूज्य। नीराज्य।

त्रिविक्रमपदाम्भोजादुत्पन्ने देवसेविते।

अस्यां नद्यां स्थितान् सर्वान् स्नातान् पापाद्विमोचय॥

इति नदीं प्रार्थ्य। देवं वेद -वाद्यघोषैः मन्दिरान्तः प्रविश्य। मूलालये संस्थाप्य।

अष्टादशदिने ह्यस्मिन् उत्सवोऽयं मया कृतम्।

अङ्गीकुरु जगन्नाथ! भक्तस्य प्रियकाम्यया॥

इति भगवन्तं विज्ञाप्य। अर्धरात्रिपूजां कारयेत्॥ इदमुत्सवं शयनोत्सव मध्ये प्राप्तेऽपि कृते न दोषाः भवन्ति॥

*****गङ्गोत्पत्युत्सवं संपूर्णम्*****

श्रीः

## श्रीजयन्त्युत्सवः

अथ कृष्णजन्मोत्सव-विधिरुच्यते। उत्सवार्थं सम्भारान् पूर्वं सम्पाद्य। प्रासादस्य पुरोभागे चतुर्द्वारयुक्तं मण्डपं कल्पयित्वा। तं ध्वजतोरणैः -विविध -विचित्रवितानैः -मुक्तासरैः -विविधपुष्पमाल्यैः -कदली -जम्बू -जम्बीर नालिकेरादि विविधफलैः -रम्भास्तम्भैः -पूगफलैः -स्तबकैः – दर्पणैः -दीपमालाभिः -परितः चित्रकौशेय-यवनिकाभिः अलङ्कृत्य। गोमयेन अनुलिप्य। सर्वत्र कुङ्कुमागरु-कस्तूरिकादिभिः समालिप्य।

अगरुधूपेन धूपयित्वा। सुधाचूर्णेन अलङ्कृत्य। पूर्वादि चतुर्दिक्षु बहुदीपान् उद्दीप्य। मण्डपमध्ये चतुष्पाद- रत्न दिव्यसिह्मासनं निधाय। सितपुष्पान् विकीर्य। पीठस्य ऐशान्ये उपकुम्भाष्टकं सकरकं महाकुम्भं संस्थाप्य। कुम्भस्य पुरतः चक्राब्जमण्डलं लिखित्वा। मण्डपस्य पुरोभागे होमार्थं कुण्डं कल्पयित्वा। अर्घ्यशङ्ख-स्थापनार्थं श्रीकृष्णबिम्ब स्थापनार्थञ्च धान्यपीठद्वयं कल्पयित्वा। द्वारकुम्भाञ्च संस्थाप्य। स्नपनार्थं कलशान् तत्तद्द्रव्याणि च सम्पाद्य। उत्सवं कारयेत्॥

आचार्यः भगवत्सन्निधिं समासाद्य। सायं नित्याराधन संपूर्णेन विशेषयजनं कृत्त्वा। भगवदालयाश्रित श्रीकृष्णसन्निधिं समासाद्य।जन्मोत्सवार्थं प्रार्थ्य।

शङ्खचक्रगदाशार्ङ्गिन् तूणखङ्गधर! प्रभो!।
वासुदेव! जगद्योने! सृष्टिस्थित्यन्तकारक!।
अवातरः पूर्वकाले यो हरिः कृष्णरूपधृत्।
तस्योत्सवस्य ते कालो जयन्त्याख्यस्य वै हरे।
तमुत्सवं कर्तुमिच्छन् प्रार्थये सुरसत्तम!।
भक्तवत्सल! भक्तानां प्रीतये कृष्णविग्रहे।
सन्निधत्स्व चिरं देव! यावत् पूजावसानकम्॥

इति प्रार्थ्य। आसने उपविश्य। अस्य देवदेवस्य----लोकक्षेमार्थम् आलयाश्रित श्रीकृष्ण स्वामिसन्निधौ श्रीकृष्णजन्मोत्सवकर्म करिष्ये तदङ्गं पुष्पाङ्कुरावापनं करिष्ये तदङ्गं----शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। विधिवत् विष्वक्सेनाराधनं -

वासुदेवपुण्याहवाचनञ्च कृत्त्वा। तज्जलेन सर्वाणि द्रव्याणि मण्डपञ्च संप्रोक्ष्य। कृष्णबिम्बं यानमारोप्य। वेद -वाद्यघोषेण सह उत्सवमण्डपान्तः प्रविश्य। आचार्यः सिह्मासनमभ्यर्च्च्य

ओं धर्माय नमः----ओं ऐश्वर्याय नमः इत्यभ्यर्च्च्य। श्रीकृष्णं सिह्मासने निवेश्य। विधिवत् पुष्पाङ्कुरं -रक्षाबन्धनञ्च कृत्त्वा। आचार्यः भगवन्तं छत्र -चामर उपचारैः सम्पूज्य। परमान्नं निवेद्य। नीराज्य। देवस्य दक्षिणे पार्श्वे आसने उपविश्य। चन्द्रोदयावत् न्यासपूर्वकम् अष्टाक्षर -द्वादशाक्षर मन्त्रान् जप्त्वा। जितन्ता स्तोत्रं पठित्वा। श्रीकृष्णमाहात्म्यं -वैष्णवीकथा च सर्वेभ्यः श्रावयित्वा। मूर्तिपैः कृष्णबिम्बस्य तालवृन्तैः वीजयित्वा। नृत्त -गीताद्यैः भगवन्तं तोषयित्वा।

<u>चतुस्थान -शङ्ख पूजाक्रमः</u>

चन्द्रोदये आचार्यः अस्य देवदेवस्य----श्रीकृष्णजन्मोत्सव कर्मणि चतुस्थानार्चनं करिष्ये तदङ्गं <u>श्रीकृष्णस्य</u> जातशान्त्यर्थम् एकोत्तर अशीति घटैः(पञ्चविंशति कलशैः) स्नपनकर्म करिष्ये इति सङ्कल्प्य। कृष्णस्य शिरसि मङ्गलाभ्यङ्गं सेचयित्वा। अवशिष्टं श्रीवैष्णवेभ्यः भक्तेभ्यः दद्यात्। भगवन्तं माषचूर्ण -गन्धामलक -रजनीचूर्णैः समालिप्य। यथाविधि संस्नाप्य। अलङ्कृत्य। पूर्ववत् द्वारपूजां कृत्त्वा। बिम्बस्थापनार्थ-धान्यपीठे देवक्याङ्कस्थं बालरूपकं कृष्णबिम्बं संस्थाप्य। तस्य परितः दक्षिणे वसुदेवं बलरामञ्च -पश्चिमे यशोदाम् -उत्तरे नन्दगोपञ्च संस्थाप्य। तेषां परितः अष्टकुम्भान् संथाप्य। तेषु इन्द्रादीन् क्रमेणावाह्य। वसुदेवादि बिम्बानाम्

अलाभे धान्यपीठे श्रीकृष्णस्य परितः पूर्वादि दिक्षु चतुष्कुम्भान् संस्थाप्य।

पूर्वकुम्भे - ओं देवक्यै नमः

दक्षिणकुम्भे - ओं वसुदेव आनकदुन्दुभिने नमः -ओं बलरामाय नमः

पश्चिमकुम्भे - ओं यशोदायै नमः

उत्तरकुम्भे - ओं नन्दगोपाय नमः इति क्रमेणावाह्य। सम्पूज्य। ततः महाकुम्भे कृष्णमूलमन्त्रेण तम् आवाह्य। उपकुम्भेषु पूर्वादिषु वासुदेवादीन् -आग्नेयादिषु पुरुषादींश्च आवाह्य। करके सुदर्शनम् आवाह्य। सर्वोपचारैः सम्पूज्य। चक्राब्जमण्डलमध्ये षडध्वार्चनानन्तरं ओं क्रौं कृष्णाय नमः आगच्छ आगच्छ श्रीकृष्णचन्द्रम् आवाहयामि इति श्रीकृष्णम् आवाह्य। पूजयित्वा। तत् समीपे धान्यपीठे क्षीरपूरितं शङ्खं संस्थाप्य। शङ्खस्य अग्रे ओं चन्द्रमसे नमः इति चन्द्रम् आवाह्य। मूले श्रीकृष्णम् आवाह्य। सम्पूज्य। सर्वेभ्यः परमान्नं निवेद्य। नीराज्य।

## श्रीजयन्ति होमः

कुण्डे अग्निं प्रतिष्ठाप्य। श्रीकृष्णम् आवाह्य। समिदन्नाज्यैः प्रत्येकं पञ्चविंशति सङ्ख्या श्रीकृष्णमूलमन्त्रेण हुत्वा। मधु -क्षीर -दधि -घृतेन अष्टाक्षरेण (यथाशक्ति सङ्ख्या) हुत्वा। तदनु कृष्णमूलमन्त्रेण सप्तसमिद्धोमं कृत्त्वा। स्विष्टकृदादि पूर्णाहुत्यन्तं हुत्वा। अग्निस्थं मण्डलस्थं च बिम्बे नियोज्य। द्वारबलिं दत्वा। द्वारकुम्भस्तान् देवस्य पादयोः नियोज्य। महाकुम्भप्रोक्षणादि सर्वं कृत्वा। धान्यपीठस्थ कृष्णं सिह्मासने निवेशय्। तस्य समीपे वसुदेवादिकान् संस्थाप्य। कुम्भं चेत् देवस्याङ्गे नियोज्य।

## चन्द्रमण्डल लेखनं -पूजनम्

देवस्य पुरतः भूमौ गोमयेन अनुलिप्य। सुधाचूर्णेन अलङ्कृत्य। पिष्टेन पूर्णचन्द्राकारेण वा अर्धचन्द्राकारेण वा चन्द्रमण्डलं लिखित्वा। तन्मध्ये ओं रोहिण्यैः नमः ओं चन्द्रमसे नमः इति रोहिणीसमेतं चन्द्रम् आवाह्य। सोममन्त्रेण अर्घ्यादिभिरभ्यर्च्य। फलवर्गादीन्निवेद्य नीराज्य। श्रीकृष्णं मन्त्रासनप्रभृति सम्पूज्य। क्षीरार्घ्यदानं दत्वा।

## अर्घ्यदानम्

आचार्यः अर्घ्यशङ्खमादाय देवस्य समीपे जानुमवनं स्थित्वा यद्वा तिष्ठन् प्रथमं कृष्णप्रीतिकरं चन्द्रार्घ्यं दत्त्वा। चन्द्रं ध्यात्वा

ज्योत्स्नांपते! नमस्तुभ्यं नमस्ते ज्योतिषां पते!।
नमस्ते रोहिणीकान्त! सुधाकुम्भ! नमोऽस्तु ते॥ इति ध्यात्वा
क्षीरोदार्णवसम्भूत! अत्रिनेत्र समुद्भव!।
गृहाणार्घ्यं शशीनाथ*1 रोहिण्या सहितो मम॥

ओं चन्द्रमसे नमः इदमर्घ्यं इति चन्द्रस्य शङ्खप्रदर्शनेन अर्घ्यं दत्वा। ततः कृष्णमवलोक्य

जातः कंसवधार्थाय भूभारोद्धारणाय च।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च॥
कौरवाणां विनाशाय दैत्यानां निधनाय च।
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे!॥

---

1) गृहाणार्घ्यं शशाङ्केदं

ओं क्रौं कृष्णाय नमः इदमर्घ्यम् इति त्रिवारम् अर्घ्यं दत्वा। यजमानोऽपि एवम् अर्घ्यदानं कृत्त्वा। तत्काले यजमानेन - आचार्यादि विप्रेभ्यः गो -भू -हिरण्य -वस्त्र -धान्य -दानानि दत्वा। ततः भगवतः भोज्यासने मधुपर्कं -बहुनवनीतं -दधि -घृतं -शर्करां -घृतसंयुक्त बहुगोक्षीरं -जम्बूफलानि -पनसानि - सर्व फलानि -पृथुकान् -शर्करा-सम्युत शुण्ठी चूर्णानि-गुडखण्डान्वित उपहारान् -गोघृतेन पाचित विविधभक्ष्यानि -अष्टविधान्नराशिं -शष्कुली -शर्कराघृत संयुक्त सक्तून् -शीतलं तर्पणजलं -पानकं -लेह्यं -मुखवास ताम्बूलादींश्च निवेद्य। नरैः यत्तत्संपाद्यते तत्सर्वं निवेद्य। नीराज्य।

## डोलारोपणम्

तदनु रत्नमयीं -सुवर्णश्रृङ्खलालम्बितां -किङ्किणीयुक्तां -सर्वालङ्कारयुतां डोलामादाय। पुष्पादिभिः क्षौमवितान मुक्तादामैश्च अलङ्कृत्य। तूलिका रत्नकम्बल मृद्वास्तरणान् निक्षिप्य। कुङ्कुमाद्यैः चन्दनाद्यैश्च अधिवास्य। सुगन्धधूपैः सन्धूपयित्वा। तस्मिन् अनन्तमावाह्य। श्रीकृष्णबिम्बमादाय। शयने मूलमन्त्रेण शाययित्वा। कृष्णस्य दक्षिणे बलभद्रं शाययित्वा। तयोः वस्त्रेण आच्छाद्य। सितपुष्पैः अर्चयित्वा। बलभद्रेण सहितं वा रहितं वा डोलायां कृष्णं संपूज्य। शङ्ख -दुन्दुभिघोषैः -वीणा -वेणुवाद्यैः भगवन्तं तोषयित्वा। वाल -व्यजनेन संवीज्य। इतिहास -पुराणानि पठित्वा। तत्काले नारायणसूक्तादि सर्ववेदाध्ययनं कृत्वा। नवनीतं -शर्करां -

सितशर्करायुक्त गोक्षीरं -पृथुकानि -चतुर्विधान्नानि च निवेद्य। मुखवास-ताम्बूलादीन् निवेद्य। सहस्रकुम्भ नीराजनं दर्शयित्वा।

अंसालम्बित हेमकुण्डलधरं मन्दोन्नतभ्रूलतं
किञ्चित्कुञ्चित कोमलाधरपुटं साचीप्रसारेक्षणम्।
आलोलाङ्गुलपल्लवैः मुरलिकामापूरयन्तं मुदा
मूले कल्पतरोत्रिभङ्गलसितं ध्यायेज्जगन्मोहनम्॥

इति प्रार्थ्य। भगवन्निवेदित क्षीरं वन्ध्यास्त्रीणां दत्त्वा। सर्वविध भक्ष्य भोज्यानि चतुर्धा विभज्य। एकांशम् आचार्यः स्वयं गृहीत्वा। एकांशं स्त्रीणाम् एकांशं मूर्तिपानां च दत्वा। एकांशं सर्वेभ्यः श्रीवैष्णवेभ्यः भक्तेभ्यः दद्यात्॥ श्रीकृष्णं शयनात् उत्थाप्य। स्वसन्निधौ निवेश्य। दिवोपोषण-ब्राह्मणान् भोजयित्वा।

पीताम्बर! जगन्मूर्ते! जयन्त्युत्सवमद्य ते।
अकार्षं तत्र शास्त्रीयं शास्त्रमार्गात् स्युतं तु वा॥
वेत्तुं समर्थो नाभूवं तत्र शास्त्रपथच्युतिम्।
भक्तस्य तव मे देव क्षन्तुमर्हसि मामिकाम्॥ इति प्रार्थ्य।

रात्रि शेषं कृष्णलीला नाटकं चरित्रनाटकञ्च कृतेन नीत्वा।

## शिक्योत्सवः

### शिकिकल्पनम्

शिक्योत्सवार्थं गोपुरस्य पुरोभागे चतुस्तम्भ संयुतं मण्डपं कल्पयित्वा। चित्रवस्त्रवितानेन -फलपल्लवैः अलङ्कृत्य। मध्ये क्षीर -दधि -हरिद्राजल

घटान् लम्बयित्वा। एवं सर्ववीथिषु बहुमण्डपं कल्पयित्वा। तत्तन्मण्डपे शिक्ये शिक्ये दधि -क्षीरघटान् न्यस्य। प्रभाते सर्व वीथिशोधनं कृत्त्वा। भगवत् सन्निधौ प्रातर्नित्याराधनात्परं शिक्योत्सवार्थं प्रार्थ्य।

देवदेव! जगन्नाथ! सर्वलोकप्रियङ्कर!।

शिक्योत्सवार्थं बिम्बेऽस्मिन् सन्निधत्स्व श्रियःपते!॥

इति प्रार्थ्य। श्रीकृष्णं कल्याणकौतुकं वा तौ यद्वा यानं वा रथे वा हये - शिबिकायां वा कुञ्जरे वा समारोप्य। गोपुराद्बहिः शिक्योत्सवमण्डपस्य पुरोभागे देवं संस्थाप्य। गोपालबालान् आहूय। दण्डं दत्वा। तैः शिक्यभाण्डानि ताडयेत्॥ ताडितेभ्यः भाण्डेभ्यः दधि-क्षीराणि बालकाः पिबेयुः। सर्व वीथिषु शिकिमण्डपानाम् अन्तराले तैल -चन्दन -रजनी चूर्णैः श्रीवैष्णवानां परस्परं सेचयित्वा। नवनीतान् -दधीनि च परस्परं रूषित्वा। विविधैः यन्त्रैः हरिद्राजलं सेचयित्वा। एवं सर्ववीथिषु कारयित्वा। कृष्णविग्रहे नवनीतानि गोप्यश्च क्षिपेयुः। एवं सर्वावरणेषु वेद-वाद्यैः देवं परिभ्रम्य। आलयान्तः प्रविश्य। घटदीपं समर्प्य। बहिर्मण्डपे देवं संस्नाप्य। स्वसन्निधौ निवेश्य। यथाभागमन्नं निवेद्य। नीराज्य।

यन्मयानुष्ठितो देव! शिक्योत्सव इति स्मृतः।

तस्मिन्नज्ञानतस्त्यक्तं क्षन्तुमर्हसि माधव!॥

इति क्षमापनं कृत्त्वा। एवं श्रीकृष्णजयन्त्योत्सवं गर्भोत्सव जननोत्सव विधानेन वा मासं -पक्षं वा नव -सप्त -पञ्च -त्रि दिनानि वा एकाहं वा उत्सवं कृत्त्वा। उत्सवे श्री कृष्णबिम्बं वा नवनीतनटनं वा सर्पनृत्तं वा

चतुर्भुजवेणुगानं वा कल्याणकौतुकं यद्वा संपूज्य। अलाभे मूलबिम्बे वा अथवा लब्धबिम्बे वा उत्सवं कारयेत्॥

******श्रीजयन्त्युत्सवं सम्पूर्णम्******

श्रीः

## नवरात्र्युत्सवविधिः

(महानवम्युत्सवः)

अथ नवरात्र्युत्सव-विधिरुच्यते। वीरलक्ष्म्युत्सवार्थं सर्वं सम्पाद्य। उत्सवमण्डपं नानाविधपुष्पैः -फलैः -दीपमालाभिः अलङ्कृत्य। वासनावस्तुभिः अनुलिप्य। भगवदुत्सववत् यागशालालङ्करणं कृत्त्वा। उत्सवं कारयेत्॥

आचार्यः आलयमासाद्य। वीरलक्ष्म्याः सन्निधौ सायमाराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। नवरात्र्युत्सवार्थं देवीं प्रार्थ्य।

नमः क्षीराब्धितनये! वासुदेवकुटुम्बिनी!।
महानवम्युत्सवार्थं प्रार्थये कर्मकौतुके॥
आगच्छागच्छ कमल! नमश्चन्द्रसहोदरि!॥

अस्याः देवदेव्याः -जगज्जनन्याः -श्रीवत्सवासिन्याः -पुरुषाकारस्वरूपिण्याः -भगवत्याः -महालक्ष्म्याः----नायक्याः सन्निधौ राजराष्ट्राभिवृद्ध्यर्थं लोकक्षेमार्थं नवरात्र्युत्सवकर्म कर्तुम् अनुज्ञां देहि मे रमे। स्वामिनि अनुमन्यतां----नायिके अनुमन्यताम् इति प्रार्थ्य।

आचार्यः सभानुज्ञां कृत्त्वा। प्राणानायम्य। देशकालौ सङ्कीर्त्य।
श्रीभगवदाज्ञया----अस्याः देवदेव्याः -जगज्जनन्याः -श्रीवत्सवासिन्याः -पुरुषाकारस्वरूपिण्याः -भगवत्याः -महालक्ष्म्याः----नायक्याः सन्निधौ राजराष्ट्राभिवृद्ध्यर्थं लोकक्षेमार्थं नवरात्र्युत्सवकर्म करिष्ये इति सङ्कल्प्य।
पूर्ववत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणञ्च कृत्त्वा।
(अथवा ओं सुमुख्यै नमः इति सुमुखी आराधनं कृत्त्वा)

## भगवत्याः अङ्कुरार्पणम्

मध्यकुम्भ सहितम् अष्टपालिकाः संस्थाप्य। मध्यकुम्भे - ओं धियायै नमः
पालिकासु

| | |
|---|---|
| ओं वीरलक्ष्म्यै नमः | ओं धान्यलक्ष्म्यै नमः |
| ओं धनलक्ष्म्यै नमः | ओं धैर्यलक्ष्म्यै नमः |
| ओं सन्तानलक्ष्म्यै नमः | ओं राजलक्ष्म्यै नमः |
| ओं जयलक्ष्म्यै नमः | ओं महालक्ष्म्यै नमः |

इत्यावाह्य। पूर्ववत् सम्पूज्य। होमे - ओं धियायै स्वाहा इति हुत्वा।
सम्पाताज्यं पालिकासु न्यस्य। ओं श्रीं श्रियै नमः इति बीजावापं कृत्त्वा।
प्रभाते महूर्ते देव्याः सन्निधौ नित्याराधनात्परं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -यागशालाशुद्ध्यर्थं –स्नानोपकरण-द्रव्यशुद्ध्यर्थं - रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन रक्षासूत्रादीन् संप्रोक्ष्य। ततः उत्सवदेव्याः -यागबिम्बस्य वामकरे -आचार्यस्य दक्षिणकरे च रक्षाबन्धनं कृत्त्वा। अपूपादीन्निवेद्य। नीराज्य।

## यागशालापूजा

तदनु यागदेवीं शिबिकायाम् आरोप्य। यागशालां प्रविश्य। तत्र भद्रासने यागदेवीं संस्थाप्य। आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----नवरात्र्युत्सवकर्मणि चतुस्थानार्चनं करिष्ये तदङ्गं द्वार-तोरण-ध्वज-कुम्भदेवता पूजनं -पालिकाराधनञ्च करिष्ये इति सङ्कल्प्य। अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य। पात्राणि साधयित्वा। द्वारपूजां कुर्यात्॥

## लक्ष्म्याः यागद्वारपूजा

**पूर्वद्वारे**

द्वारमध्ये - ओं ऋग्वेदाय नमः

पार्श्वयोः - ओं विजयायै नमः -ओं गरुडाय नमः

द्वारशाखयोः - ओं वनमालिकायै नमः -ओं शचीदेव्यै नमः

कुम्भयोः - ओं ज्येष्टायै नमः -ओं विद्यायै नमः

पताकयोः - ओं धृत्यै नमः -ओं लज्जायै नमः

**दक्षिणद्वारे**

द्वारमध्ये - ओं यजुर्वेदाय नमः

पार्श्वयोः - ओं विजयायै नमः -ओं गरुडाय नमः

द्वारशाखयोः - ओं बलाकिन्यै नमः -ओं कालनायिकायै नमः

कुम्भयोः - ओं श्रद्धायै नमः -ओं कान्त्यै नमः

पताकयोः - ओं सावित्र्यै नमः -ओं मायायै नमः

**<u>पश्चिमद्वारे</u>**

द्वारमध्ये - ओं सामवेदाय नमः

पार्श्वयोः - ओं विजयायै नमः -ओं गरुडाय नमः

द्वारशाखयोः - ओं विभीषिकायै नमः -ओं शीतलायै नमः

कुम्भयोः - ओं सृष्ट्यै नमः -ओं क्रियायै नमः

पताकयोः - ओं शुद्धायै नमः -ओं तुष्ट्यै नमः

**<u>उत्तरद्वारे</u>**

द्वारमध्ये - ओं अथर्ववेदाय नमः

पार्श्वयोः - ओं विजयायै नमः -ओं गरुडाय नमः

द्वारशाखयोः - ओं शाङ्कर्यै नमः -ओं सम्पद्देव्यै नमः

कुम्भयोः - ओं क्षमायै नमः -ओं जयायै नमः

पताकयोः - ओं शान्त्यै नमः -ओं कीर्त्यै नमः

इत्यभ्यर्च्य। अर्घ्यादि नीराजनान्तं सम्पूज्य। पालिकाराधनं कृत्वा। ततः मण्डलं संपूज्य।

<u>श्रियाः मण्डलाराधनम्</u>

भगवन् मण्डलाराधनवत् षडध्वानम् अभ्यर्च्य।

<u>ध्यानम्</u>

(चक्राब्जकर्णिकामध्ये धर्मकामार्थमोक्षदाम्।

सर्वलक्षणसम्पन्नां सद्रत्नमकुटोज्ज्वलाम्।

श्वेतमाल्याम्बरधरां हारकेयूरभूषिताम्।

चतुर्भुजां महालक्ष्मीं रत्नताटङ्कशोभिताम्।

अभीतिवरदां हस्तां हेमपङ्कजधारिणीम्।

श्रीशात्महेमवर्णाभां ध्यायेदादित्यमण्डलात्॥)

कर्णिकायाम् आधारादि पद्मान्तम् अभ्यर्च्य। कर्णिकामध्ये –

ओं श्रीं श्रियै नमः आगच्छागच्छ इत्यावाह्य।

द्वादश अरेषु –

| | |
|---|---|
| ओं श्रियै नमः | ओं इच्छायै नमः |
| ओं वागीश्वर्यै नमः | ओं प्रीत्यै नमः |
| ओं कान्त्यै नमः | ओं रत्यै नमः |
| ओं क्रियायै नमः | ओं मायायै नमः |
| ओं शक्त्यै नमः | ओं धियायै नमः |
| ओं विभूषिकायै नमः | ओं महिमायै नमः |

इत्यभ्यर्च्य।

पूर्वद्वारे – ओं चण्ड्यै नमः - ओं प्रचण्ड्यै नमः

ऐशान्ये – ओं ह्रीमत्यै नमः

प्राङ्मुखे – ओं गरुडाय नमः

आग्नेयादिकोणेषु –

| | |
|---|---|
| ओं वसुधायै नमः | ओं वारुण्यै नमः |
| ओं नरकेसर्यै नमः | ओं विद्यायै नमः |

इत्यभ्यर्च्य। अर्घ्यादिभिः सम्पूज्य। चतुर्विधान्नं निवेद्य। नीराज्य। ततः महाकुम्भपूजां कृत्वा।

महाकुम्भे – ओं श्रीं श्रियै नमः आगच्छागच्छ इत्यावाह्य।

उपकुम्भेषु दिक्षु -ओं लक्ष्म्यै नमः -ओं कीर्त्यै नमः

-ओं जयायै नमः -ओं मायायै नमः

विदिक्षु -ओं हरिण्यै नमः -ओं प्रीत्यै नमः

-ओं वाग्देव्यै नमः -ओं अमृतवारुण्यै नमः

करके - ओं विजयायै नमः इत्यावाह्य। यथाविधि षडासनयुक्तं सम्पूज्य। चतुर्विधान्नं निवेद्य। नीराज्य। यागबेरश्रियञ्च सम्पूज्य। कुण्डे अग्निप्रतिष्ठां कृत्वा। अग्निमध्ये ओं श्रीं श्रियै नमः इति श्रियमावाह्य। उपचारान् हुत्वा। ओं श्रीं श्रियै स्वाहा इति समिद्भिः यथोक्त सङ्ख्यया हुत्वा। पुरुषसूक्तेन षोडशाहुतीर्हुत्वा। आज्येन श्रीमन्त्रेण पूर्वोक्त समित्सङ्ख्यया हुत्वा। पूर्णाहुतिं हुत्वा। द्वारबलिं दत्त्वा।

पूर्वद्वारे – ओं चण्ड्यै नमः बलिं ददामि - ओं प्रचण्ड्यै नमः बलिं ददामि।

दक्षिणद्वारे – ओं बलाकिन्यै नमः - ओं वनमालिन्यै नमः

पश्चिमद्वारे – ओं विभीषिकायै नमः - ओं शाङ्कर्यै नमः

उत्तरद्वारे – ओं शङ्खनिधये नमः - ओं पद्मनिधये नमः इति बलिं दद्यात्॥

तदनु श्रियाः उत्सवकौतुकं स्नानविष्टरे संस्थाप्य। नवकलशैः पूर्ववत् संस्नाप्य। अलङ्कृत्य। यथाभागमन्नं निवेद्य। नीराज्य। गर्भगृहे निवेश्य। सायाह्ने देवीं याने वा वाहने वा आरोप्य। यात्रोपकरणैस्सार्धं धामं

प्रदक्षिणीकृत्य। उत्सवार्थमण्डपे सिह्मविष्टरे देवीं संस्थाप्य। तां मन्त्रासनप्रभृति सम्पूज्य। भोज्यासने चतुर्विधान्नानि - भक्ष्यानि -पृथुक -पानक -चणक -नालिकेररसञ्च मुखवास-ताम्बूलादीञ्च निवेद्य। नीराज्य। देव्याः पुरतः गीत -नृत्त -वाद्यादिकं प्रदर्श्य। अनन्तरं देवीं प्रार्थ्य।

मातर्भयापहन्त्री त्वं बालं पालय सर्वथा।
देवि! विष्णुप्रिये! अम्ब! पूजयामि कृपाकुरु!।
यथालब्धेन भागेन साधनेन सुखायमे॥

इति प्रार्थ्य। निवेदितान्न -भक्ष्य -चणकादीन् सर्वेभ्यः -श्रीवैष्णवेभ्यः - भक्तेभ्यः दद्यात्॥ तत्काले यागशालायां यथाविधि चतुस्थानार्चनं बल्यन्तं कृत्त्वा। पश्चात् देवीं पूर्वोदित यानमारोप्य। प्रादक्षिण्येन स्वसन्निधौ निवेश्य। अर्धरात्रिपूजां कारयेत्॥

## महानवमि

एवं नवमदिनावधि कालद्वयं चतुस्थानार्चन -यानारोपण -मण्डपपूजाश्च कृत्वा। नवमदिने बहुदीपैः मण्डपं समलङ्कृत्य। सायाह्ने वीरलक्ष्मीं कल्याणकौतुकञ्च पृथक् पृथक् यानमारोप्य। प्रादक्षिण्येन पूर्वोक्तमण्डपे एकविष्टरे देवं वीरलक्ष्मीं च संस्थाप्य। यथाविधि संपूज्य। नीराजनविधिवत् सहस्त्रकुम्भनीराजनं कृत्वा। यागशालायां चतुस्थानार्चनं बल्यन्तं विधाय। द्वार -पालिका -कुण्ड -मण्डल उद्वासनं कृत्वा। पूर्ववत् देवं देवीं च मण्डपात् स्वस्व सन्निधौ निवेश्य। वीरलक्ष्म्याः सन्निधौ पालिकादर्शनं -

महाकुम्भप्रोक्षणं –रक्षाविसर्जनञ्च कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। देवीं प्रार्थ्य।

नमो भगवति! ब्रह्माणी समर्चित पदाम्बुजे।

अङ्गीकुरु जगद्धात्री नवरात्र्युत्सवं परम्॥

इति पुष्पाञ्जलिं समर्प्य। यजमानः गुरोः -सर्वेषाञ्च यथावित्तं सम्मानं समर्प्य। अर्धरात्रिपूजां कारयेत्॥

*****नवरात्र्युत्सवविधिः सम्पूर्णम्*****

श्रीः

## विजयोत्सवविधिः

विजयोत्सवार्थम् आयुधानि -स्नपनद्रव्याणि -सर्वाणि च सम्पाद्य। उत्सवमारभेत्॥ आचार्यः आलयमासाद्य। प्रातर्नित्याराधनानन्तरं याने सायुधान् -तुरगवाहनम् आरोप्य। तटाक -नदीतीरं वा गत्वा। तत्र सर्वान् अवरोप्य। तज्जलेन तुरगम् आयुधानाञ्च संक्षाल्य। पुनः यानमारोप्य। आलयमासाद्य। वाहनमण्डपे संस्थाप्य।

ततः आचार्यः महामण्डपे आसने उपविश्य। प्राणानायम्य। श्रीभगवदाज्ञया----लोकक्षेमार्थं विजयोत्सवकर्म करिष्ये तदङ्गं पञ्चविंशतिघटैः स्नमनं करिष्ये तदङ्गं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -तुरगशुद्ध्यर्थं -रक्षासूत्रशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य।

पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि संप्रोक्ष्य। रक्षासूत्रं पूजयित्वा। कल्याणकौतुकं स्नानविष्टरे संस्थाप्य। यथाविधि पञ्चविंशतिकलशैः स्नपनं कृत्वा। अलङ्कृत्य। देवं गर्भगृहे निवेश्य।

## तुरगपूजा

आचार्यः वाहनमण्डपमासाद्य। तुरगं पुण्याहजलेन प्रोक्ष्य। ओं गं गरुडाय नमः इति गरुडमन्त्रेण सम्पूज्य। अर्घ्यादिभिरभ्यर्च्य। तुरगस्य (हस्ते) रक्षाबन्धनं कृत्वा। चणकादीन् निवेद्य। नीराज्य। सायाह्ने नित्यपूजानन्तरं देवं तुरगे समारोप्य। यात्रोपकरणैस्सार्धं ग्रामप्रादक्षिण्येन महावनं प्रविश्य। तत्र तत्र स्थित वानप्रस्थैः तापसाद्यैः समर्पित कन्दमूलफलानि च देवाय विनिवेद्य। तत्रस्थ वह्निवृक्षसमीपे गत्त्वा। वृक्षं प्रदक्षिणीकृत्य। तत्समीपे मण्डपे देवं संस्थाप्य।

## शमी - आयुधपूजा - बाणविसर्जनम्

सर्वान् आयुधान् वह्निवृक्षमूले निधाय। आचार्यः आसने उपविश्य। वह्निवृक्षशुद्ध्यर्थं -धनुर्बानादि आयुधानां शुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन वृक्षम् -आयुधानि च संप्रोक्ष्य। आयुधेषु आधारादिपद्मान्तम् अभ्यर्च्य। तत्तत् आयुधमन्त्रैः सम्पूज्य (अथवा अस्त्रमन्त्रेण सम्पूज्य)। अर्घ्यादि नीराजनान्तं कृत्त्वा। आचार्यः वह्निपल्लवानि सङ्गृह्य। देवस्य शिरसि-पादयोश्च मूलमन्त्रेण समर्प्य। देवम् अर्घ्यादिभिरभ्यर्च्य। ताम्बूलादीन् निवेद्य। नीराज्य। समर्पित शमीपल्लवानि गृहीत्वा। आचार्यः स्वशिरसि धृत्त्वा। सर्वेभ्यः -श्रीवैष्णवेभ्यः -भक्तेभ्यः शमीपल्लवानि

दद्यात्॥ ततः देवं मण्डपादुद्धृत्य। धनुर्बाणान् आदाय चतुर्दिक्षु - ऊर्ध्वोऽधश्च इति षड्-बाणान् "धन्वनागा----जयेम" इति मन्त्रेण – ओं सहस्रोल्कायस्वाहा वीर्याय अस्त्राय फट् इति वा प्रयुञ्जयेत्॥ ततः वेद -वाद्यघोषैः सह देवं वनात् ग्रामप्रादक्षिण्येन मन्दिरान्तः प्रविश्य। देवं तुरगात् अवरोप्य। स्नपनमण्डपे स्नानासने निवेश्य। विधिवत् नवकलशस्नपनं कृत्त्वा। अलङ्कृत्य। कल्याणकौतुकं गर्भगृहे निवेश्य। अपराधक्षमापनं कृत्त्वा। यजमानेन सर्वेभ्यः आचार्यस्य च दक्षिणां दत्त्वा। अर्धरात्रिपूजां कारयेत्॥

*****विजयोत्सवविधिःसम्पूर्णम्*****

श्रीः

## डोलोत्सवविधिः

अथ डोलोत्सव-विधिरुच्यते। डोलोत्सवार्थं सर्वाणि द्रव्याणि सम्पाद्य। प्रथमाद्यावरणेषु एकस्मिन् आवरणे षोडशस्तम्भयुतं सलक्षणं मण्डपं कल्पयित्वा। तस्मिन् मुक्तादामैः -विविधदर्पणैः -रम्भास्तम्भैः -पुष्पमाल्यैः -आम्रपत्रादि तोरणैः -विविध वितानैः -विचित्र ध्वज -छत्रैः -घृतपूरितदीपैः -नालिकेरादि समस्त फलादिभिः -पूग-स्तबक-मालाभिः समलङ्कृत्य। मण्डपस्य आभ्यन्तरे गोमयेन अनुलिप्य। सुगन्ध जलेन अवोक्ष्य। नाना वर्ण सुधाचूर्णैः -पुष्पाक्षतैः अलङ्कृत्य। मण्डपमध्ये

सुवर्णादिलोहमयं वा दारुमयं वा चतुस्तम्भसमायुक्तं -तद्विमानसदृशश्रृङ्गं -नाना रत्नविराजितं -चतुरश्रं वा वृत्तंवा डोलां कल्पयेत्॥

आचार्यः भगवत्सन्निधिं समासाद्य। सायाह्नपूजानन्तरं विशेषयजनं कृत्त्वा। यथाभागमन्नं निवेद्य। नीराज्य। डोलोत्सवार्थं प्रार्थ्य।

ओं नमो भगवते तुभ्यं पूर्णषाड्गुण्यविग्रह!।
देवदेव! जगन्नाथ! प्रसन्नो भव मेऽच्युत!।
नैवेद्यान्तं समभ्यर्च्य ततो डोलां प्रसन्नधीः॥
शेषाङ्गशायिन्! लक्ष्मीश! राजराष्ट्राभिवृद्धये।
डोलोत्सवार्थं बिम्बेऽस्मिन् सन्निधत्स्व जगत्पते!॥

अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर----मास----दिन डोलोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम् इति प्रार्थ्य। सभानुज्ञां लब्ध्वा। पूर्ववत् सङ्कल्प पूर्वकं विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्च कुर्यात्॥

प्रभाते मुहूर्ते नित्यपूजानन्तरं कुम्भ -मण्डल -वह्निशुद्ध्यर्थं रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहवाचनं कृत्वा। सर्वाणि द्रव्याणि संप्रोक्ष्य। तदनु देव्याः सह देवस्य बलिबिम्बस्य -तीर्थबिम्बस्य -आचार्यस्य च रक्षाबन्धनं कृत्वा। यागशालां प्रविश्य। बलिबेरं यागाशालायां संस्थाप्य। डोलोत्सवकर्मणि चतुस्थानार्चनं करिष्ये इति सङ्कल्प्य। द्वारपूजा पुरस्सरं चतुस्थानार्चनं कृत्वा। विधिवत् मण्डलम् अभ्यर्च्य। महाकुम्भे मूलमूर्तिम्

आवाह्य। अग्नौ समिदन्नाज्यहोमानन्तरम् -आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया----डोलोत्सवकर्मणि प्रथमोत्सवे प्रातर्हवनाख्य काले अस्मिन्नग्नौ मूलमन्त्रेण आज्येन अष्टोत्तरशताहुतीः होष्यामि इति सङ्कल्प्य। मूलमन्त्रेण हुत्वा। पूर्णाहुतिं -द्वारबलिं च दत्त्वा। अनन्तरं देव्यौ देवं सह यानमारोप्य। स्नपनमण्डपं प्रविश्य। तत्र स्नानविष्टरे देवं संस्थाप्य। स्नानासन उपचारैः उपचर्य। एकोत्तर-अशीतिघटैः संस्नाप्य। अलङ्कृत्य। निवेद्य। नीराज्य। गर्भगृहे निवेश्य। (एवम् उत्सवावसानं प्रतिदिनं कालद्वये चतुस्थानार्चनं बल्यन्तं कृत्वा।) ततः सायाह्नसमये यागशालाहवनं बल्यन्तं कृत्वा। आचार्यः तत्र आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----डोलोत्सवकर्मणि प्रथमोत्सवे डोलापूजां करिष्ये तदङ्गं डोलामण्डपशुद्ध्यर्थं -डोलाशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पुण्याहं वाचयित्वा। तज्जलेन डोलामण्डपं -डोलाञ्च संप्रोक्ष्य। तदनु देव्याः सह देवं शिबिकायाम् आरोप्य। छत्र -चामर -ध्वज -तूर्य -वेद -वाद्यघोषैः साकं डोलोत्सवमण्डपं नीत्वा। तत्र देवं डोलाग्रे संस्थाप्य। डोलापूजां कुर्यात्॥

## डोलापूजा

### (प्रथमदिनोत्सवावेव)

प्रक्षालितां डोलाम् आधारादि-पद्मान्तम् अभ्यर्च्य। तत्तन्मन्त्रेण धूपं समर्प्य। **डोलामध्ये** - ओं अं अनन्ताय नमः आगच्छ आगच्छ इत्यावाह्य

**स्तम्भेषु** –

| | |
|---|---|
| ओं सत्याय नमः | ओं तार्क्ष्याय नमः |
| ओं सुपर्णाय नमः | ओं गरुडाय नमः |

**पट्टिकायाम्** - ओं श्रीं श्रियै नमः

**डोलारज्जुषु** - ओं ऋग्वेदाय नमः----ओं अथर्ववेदाय नमः

**अष्टदिक्षु** - ओं इन्द्राय नमः----ओं ईशानाय नमः

**सिह्मपादेषु** - ओं धर्माय नमः----ओं ऐश्वर्याय नमः

ओं अधर्माय नमः----ओं अनैश्वर्याय नमः

**ध्वजेषु** - ओं तत्सवितुर्वरेण्यं----प्रचोदयात् (ओं सावित्र्यै नमः)

**छत्रे** - ओं भूर्भुवस्सुवः (ओं व्याहृतीभ्यो नमः)

**पताकासु** - ओं ओं नमः (ओं प्रणवाय नमः)

**तोरणेषु** - ओं स्वराक्षरेभ्यो नमः - ओं व्यञ्जनाक्षरेभ्यो नमः

इत्यभ्यर्च्य। अर्घ्यादि-दीपान्तं सम्पूज्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य। (यवनिकाम् आच्छाद्य) तदनु सुमुहूर्ते -सुलग्ने डोलाप्रादक्षिण्येन भगवन्तं मूलमन्त्रेण डोलायां समारोप्य। तत्काले जितन्तास्तोत्रं - पुरुषसूक्तञ्च पठित्वा। (यवनिकां व्यापोह्य) नीराज्य। स्नानासनं-विना मन्त्रासनप्रभृति भगवन्तं सम्पूज्य। भोज्यासने विविध चित्रान्नानि - अपूपानि -फलोदकाणि -पानकं -ताम्बूल-मुखवासञ्च निवेद्य। नीराज्य। ततः आचार्यः डोलारज्जुं गृहीत्वा मूर्तिपैः चामर -वाल-व्यजन वीजनेन मन्दं मन्दं डोलां संचाल्य। तत्समये देवस्य पुरतः चतुर्वेदपठनञ्च -

भगवच्छास्त्रपठनञ्च -नानाविध वाद्य -गीत -नृत्त -नाटकानि च दर्शयित्वा। डोलाचालन-मध्ये मध्ये देवस्य श्रमशान्त्यर्थं पानीयं -मुखवास-ताम्बूलञ्च समर्प्य। हस्त -मुख -पादशाटीं समर्प्य। डोलाचालनान्ते नीराज्य। देव्याः सह देवं पूर्ववत् शिबिकायाम् आरोप्य। प्रादक्षिण्येन गर्भगेहं प्रविशेत्॥ एवं त्रिदिनं वा पञ्च -सप्त -नव -एकादशदिनानि वा उत्सवं कृत्त्वा। उत्सवान्तदिने प्रातर्हवनानन्तरं देव्याः सह देवेशं तीर्थबेरञ्च शिबिकायाम् आरोप्य। तटाकसमीपङ्गत्वा। विधिवत् संस्नाप्य। पूर्ववत् अवभृथं कृत्वा। अलङ्कृत्य। मन्दिरान्तः प्रविश्य। देव देव्यौ -तीर्थबेरञ्च गर्भगृहे संस्थाप्य। सायाह्नसमये यागशालाबल्यनन्तरं द्वारतोरण -पालिकान् उद्वास्य। देवस्य पालिकादर्शनं कृत्वा। यागशालायां मण्डल -कुण्डञ्च उद्वास्य। सोपकुम्भाष्टकं महाकुम्भमादाय। गलन्तिका-वारिधारया वाद्यघोषेण साकं गर्भालयं प्रविश्य। पूर्ववत् महाकुम्भप्रोक्षणं रक्षाविसर्जनञ्च कृत्वा। नीराज्य। भगवन्तं विज्ञाप्य।

डोलोत्सवं जगन्नाथ! मया त्वत्प्रीतये कृतम्।
तस्मिंस्तु सम्भवेद्यद्यदपचारं जगत्पते!।
प्रेष्यस्य क्षमितव्यं मे तत्सर्वं भक्तवत्सल!॥

इति प्रार्थ्य। तत्काले यजमानेन गुरवे ऋत्विजानाञ्च दक्षिणां दापयित्वा॥ अर्धरात्रिपूजां कारयेत्॥

*****डोलोत्सवविधिः सम्पूर्णम्*****

श्रीः

## नरकचतुर्दशि उत्सवः

(दीपावल्युत्सवः)

आश्वयुज कृष्ण चतुर्दश्याम् अरुणोदये देवस्य विश्वरूप-पूजानन्तरं

नरकान्तक शार्ङ्गेश! चतुर्दश्युत्सवाय ते।

कृपया कर्मबिम्बेऽस्मिन् सन्निधत्स्व रमापते!॥ इति प्रार्थ्य।

नीराज्य। कल्याणकौतुकं स्नपनमण्डपे संस्थाप्य। देवस्य तैलाभ्यङ्गं कृत्त्वा। तत्तैलम् आचार्यः स्वयं गृहीत्त्वा। शिरसि सन्धार्य। शरीराङ्गेषु न लेपनं विधाय। सर्वेभ्यः भक्तेभ्यः दत्त्वा। देवं विधिवत् (नव)कलशैः संस्नाप्य। सन्निधौ संथाप्य। आचार्यः देवस्य पुरतः महामण्डपे धान्यपीठं कल्पयित्वा। तन्मध्ये वस्त्रभाण्डं निक्षिप्य। हैमजान् पट्टजान् वस्त्रान् भाण्डे विन्यस्य। समीपे नालिकेरफल ताम्बूलशोभित पात्रं निक्षिप्य। तच्छुद्ध्यर्थं पुण्याहं वाचयित्वा। वस्त्राणि संप्रोक्ष्य। वस्त्रेषु आधारादि पद्मान्तम् अभ्यर्च्य। तस्मिन् ओं चन्द्रमसे नमः इति चन्द्रमावाह्य। उपचारान् कृत्त्वा। फलानि निवेद्य। नीराज्य। परिचारकमाहूय। वस्त्रपात्रं तन्मूर्ध्नि निक्षिप्य। तं गजं वा यानं वा आरोप्य। छत्र -चामर -वाद्यघोषेण सहितं धामप्रदक्षिणं कृत्त्वा। गर्भालयं प्रविश्य। मूलबेरादि सर्वेषां नूतनाम्बरान् समर्प्य। चतुर्विधान्नं -भक्ष्य -भोज्यादीञ्च निवेद्य। नीराज्य। भगवन्निवेदितान्नं भक्तेभ्यः दद्यात्॥

सायाह्ने नित्यपूजानन्तरम् आलयस्य सर्वस्तम्भेषु -प्राकारेषु –गोपुरेषु

पङ्क्तियुक्तं नानाकारदीपान् उद्दीप्य। देवीभ्यां सह देवेशं गजवाहने(शिबिका) आरोप्य। ग्राम धामं वा परिभ्रम्य। सन्निधौ निवेश्य।

चतुर्दश्युत्सवं विष्णो! मया भक्त्या ह्यनुष्ठितम्।
अत्र किञ्चित् परित्यक्तं ज्ञानतोऽज्ञानतोऽपि वा।
मद्भक्त इति तत्सर्वं क्षन्तुमर्हसि माधव!॥

इति विज्ञाप्य। अर्धरात्रिपूजां कारयेत्॥

*****नरकचतुर्दश्युत्सवं संपूर्णम्*****

श्रीः

## कैशिकोत्सवः

अथ कैशिकोत्सव-विधिरुच्यते। तत्काले दिव्य-द्राविडगाथाभिः -स्वरान्वितेन कैशिकरागेन -चतुर्वेदैः -एकायनैः -गीथैः -नृत्तैः-वाद्यविशेषैः भगवन्तं तोषयित्वा। भगवत् सन्निधौ प्रातराराधनं बल्यन्तं कृत्त्वा। अथवा उषःकाले विश्वरूपपूजानन्तरं कैशिकोत्सवार्थं भगवन्तं प्रार्थ्य।

त्वद्दर्शनं प्रतीक्षन्तो ब्रह्माद्या देवतागणाः।
अप्सरोभिश्च गन्धर्वा नृत्यन्ते नृत्यमण्डपे॥
ऋग्यजुःसामभिर्वेदैः स्तुवन्ति त्वां द्विजोत्तमाः।
तेषामनुग्रहं कर्तुं बिम्बेऽस्मिन् सन्निधिं कुरु॥

इति प्रार्थ्य। नीराज्य। देवं यानमारोप्य। नृत्तमण्डपमाविश्य(बहिर्मण्डपे)।

देवं भद्रविष्टरे संस्थाप्य। तत्र देवस्य विशेषयजनं कृत्त्वा। अर्घ्यादिभिरभ्यर्च्य। चतुर्विधान्न-भक्ष्यादीन् निवेद्य। नीराज्य। पौराणिकमाहूय। देवस्याभिमुखं संस्थाप्य। दैत्यारिकैङ्कर्यफलानि -अपचारं कृतवतां च फलानियुक्त पुराणं कैशिकरागेण वाचयित्वा। तं धनैः तोषयित्वा। आचार्यः देवस्य अपराधक्षमापणं कृत्त्वा। नीराज्य। भगवन्निवेदितान्न-भक्ष्यादीन् सर्वेभ्यः श्रीवैष्णवेभ्यः दत्त्वा। देवं सन्निधौ निवेश्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

*****कैशिकोत्सवम् संपूर्णम्*****

श्रीः

## कृत्तिकादीपोत्सवविधिः

अथ कृत्तिकादीपोत्सव-विधिरुच्यते। दीपोत्सवार्थं सर्वं सम्पाद्य। आलयस्य सर्वावरणानां -समस्तमण्डपानाम् अन्तर्बहिश्च सलिलैः संक्षाल्य। गोमयेन अनुलिप्य। सुधाचूर्णैः अलङ्कृत्य। अक्षतान् विकीर्य। बहिर्वीथिषु एवं विधाय। शिलामयं -लोहमयं वा विष्णुदीपस्तम्भं प्रक्षाल्य। गन्ध -पुष्पमाल्यैः अलङ्कृत्य। अथवा सद्यःकाल दारुस्तम्भ पक्षे

### स्तम्भलक्षणं - स्थापनम्

खदिरेण वा चन्दन -साल -ताल -नालिकेरवृक्षेन वा स्तम्भं कल्पयित्वा। तन्मानं शततालं वा तदर्धं तदर्धं वा गोपुरोच्छ्रायं वा कल्पयित्वा। महापीठ-गोपुरयोर्मध्ये वा आलयाद्बहिः वा दीपस्तम्भं संस्थाप्य। स्तम्भाग्रे

दीप-स्थापनार्थं वृत्तं वा चतुरश्रं वा पीठं परिकल्प्य। स्तम्भमूले गन्ध -पुष्पाक्षतैः अलङ्कृत्य। स्तम्भस्य परितः आज्यावसिक्तवस्त्रैः तैलावसिक्तैर्वा वस्त्रैः आच्छाद्य। अथवा तालपत्रसमूहैर्वा स्तम्भम् आवेष्ट्य। स्तम्भस्य समीपे चतुस्तम्भप्रपां कल्पयित्वा। ततः दीपार्थं सुवर्णादिनिर्मितं वा मृण्मयं वा चतुरश्र -वृत्ताकारं वा महादीपपात्रम् -अष्ट उपदीपशरावाञ्च सम्पाद्य। कपिल -गोघृतं वा अलाभे तिलतैलं वा सङ्गृह्य। आलये सर्वावरणेषु -विमान -गोपुरेषु -सर्वमण्डपेषु -समस्तभित्तिषु -कूटशालेषु -वस्त्र -धान्य -आभरण आगारेषु -श्रियादि देवीनां -समस्तपरिवाराणां सन्निधिषु -यागशाला -महानसे च दीपपात्राणि संस्थाप्य। सर्वावरणेषु दीपमालाभिः अलङ्कृत्य। आलयस्य आवरणे अष्टदिक्षु शरावदीपस्थापनार्थं कनीयसस्तम्भान् संस्थाप्य। सर्ववीथिषु द्वयोः पार्श्वयोः मालादीपैः अलङ्कृत्य। तत्र तत्र कूटदीप-स्तम्भदीपान् संस्थाप्य। उत्सवं कारयेत्॥

आचार्यः अपराह्णसमये आलयमासाद्य। सन्निधौ विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। दीपोत्सवार्थं भगवन्तं प्रार्थ्य।

पुण्यकीर्ते! महायोगिन्! साधुसेवितविग्रह!।
दीपोत्सवार्थं बिम्बेऽस्मिन् सन्निधत्स्व भुवःपते!॥
भगवन्! देवदेवेश! शङ्खचक्र -गदाधर!।
दीपोत्सवक्रियां कर्तुम् अनुज्ञां देहि मे प्रभो!॥

अस्य देवदेवस्य----लोकक्षेमार्थम् अग्नितृप्त्यर्थं----वत्सरे वृश्चिकमासे-

पौर्णम्यां दीपोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम् इति प्रार्थ्य। सभानुज्ञां कृत्वा। आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----लोकक्षेमार्थम् अग्नितृप्त्यर्थं----वत्सरे वृश्चिकमासे -पौर्णम्यां दीपोत्सवकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनञ्च कृत्वा। श्रीभगवदाज्ञया----दीपोत्सवकर्मणि पुष्पाङ्कुरकर्म करिष्ये इति सङ्कल्प्य। विधिवत् पुष्पाङ्कुरान् अर्पयित्वा। देवीभ्यां सह मूलबेर -उत्सवबेर -बलिबेरादीनाम् -आचार्यस्य च यथाविधि रक्षाबन्धनं कृत्वा। ततः देव्याः सह कल्याणकौतुकं स्नानविष्टरे निवेश्य। पञ्चविंशतिघटैः वा सप्तदश -नवकलशैः वा संस्नाप्य। अलङ्कृत्य। गर्भगेहे संस्थाप्य। अनन्तरं सायाह्नपूजां बल्यन्तं कारयेत्॥

तदनु अर्धमण्डपे देवस्य पुरतः शाली -तण्डुल -तिलैः पीठं परिकल्प्य। तन्मध्ये पद्मं विलिख्य। तस्मिन् महादीपपात्रं संस्थाप्य तस्य परितः अष्टशरावान् पूर्वादिक्रमेण संस्थाप्य। कपिल -गोघृतेन वा तैलेन वा सम्पूर्य। नूतन वस्त्रगण्डवर्तीन् निक्षिप्य। गन्धपुष्पैः अलङ्कृत्य। स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -सर्वदीपशुद्ध्यर्थं -दीपस्तम्भशुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन सर्वाणि दीपपात्राणि सम्प्रोक्ष्य। दीपानादाय महानसे संस्थाप्य। गार्हपत्याग्निना

ओं तेजोल्कायस्वाहा तेजसे नेत्राभ्यां वौषट् इति नेत्रमन्त्रेण

नवदीपान् उद्दीप्य। विष्णुमुखाम्भोजादुत्पन्नमग्निं ध्यात्वा। वाद्येन सह

आचार्यः दीपानादाय। प्रादक्षिण्येन अर्धमण्डपं नीत्वा। पूर्वस्मिन् धान्यपीठे पूर्वोक्त क्रमेण संस्थाप्य।

## महादीपपूजा

आचार्यः तत्र आसने उपविश्य। श्रीभगवदाज्ञया----दीपोत्सवकर्मणि दीपपूजां करिष्ये इति सङ्कल्प्य। सर्वान् दीपान् आधारादि पद्मान्तम् अभ्यर्च्य। धूपं समर्प्य। ओं रं अग्नये नमः इति प्रतिदीपम् अर्चयित्वा। आवाहनादि षण्मुद्राः प्रदर्श्य। ओं रां इत्यादि षडङ्गन्यासं कृत्वा। किरीट -शङ्ख -चक्र -बनमाला -दीपमुद्राः प्रदर्श्य। ओं रं अग्नये नमः अर्घ्यं समर्पयामि----अपूपं निवेदयामि। फलवर्ग-ताम्बूलादीन् निवेदयामि। पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। समस्तोपचारान् समर्पयामि। नीराजनं समर्पयामि। एवं पूजयित्वा। ततः बलिबेरं शिबिकायाम् आरोप्य। यागशालायां संस्थाप्य। आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया----दीपोत्सवकर्मणि चतुस्थानार्चनं करिष्ये तदङ्गं द्वारतोरण-ध्वज-कुम्भदेवता-पूजनं करिष्ये इति सङ्कल्प्य। पूर्ववत् द्वारपूजा पुरस्सरं चतुस्थानार्चनं कृत्वा। होमे - समिदन्नाज्यहोमानन्तरं श्रीमन्त्रेण आज्येन अष्टोत्तरशताहुतीः हुत्वा। पूर्णाहुतिं हुत्वा। बलिं दद्यात्। द्वार -कुण्ड -मण्डलादीन् उद्वास्य। तदनु आचार्यः मूलालयान्तः प्रविश्य। भगवन्तम् अर्घ्यादिभिरभ्यर्च्य। महाहविर्निवेद्य। अनन्तरम् भगवतः पुरस्थं महादीपमादाय। ओं उद्दीप्यस्व----परिपातय इति मन्त्रेण देवस्य नीराजनं कृत्वा। तन्महादीपात् पूर्वस्थापित आलयाङ्गस्थ सर्वदीपपात्रेषु

दीपम् उद्दीप्य। अष्टशरावदीपान्यादाय। आवरणे स्थित कनीयस-स्तम्भेषु पूर्वादिक्रमेण संस्थाप्य।

## विशेषाकार-दीपस्थापनम्

आलयस्य मुख्यस्थानेषु नानाविधाकारभेद् दीपाणि वक्ष्यमाण प्रकारेण संस्थाप्य। गोपुरेषु चक्राकृतिदीपान् संस्थाप्य। शयनागारे(आदर्शमण्डपे) शङ्खाकृतिदीपं - पुष्पागारे मत्स्याकारदीपं -महानसे कूर्माकृतिदीपं - धनधान्यागारे धनुराकृतिदीपं -महापीठस्य समीपे कूपसमीपे च कोणेषु च कूटाकारदीपाञ्च संस्थाप्य। ततः देवीभ्यां सह कल्याणकौतुकं यानमारोप्य। वेद -वाद्यघोषेण -महादीपेन सह प्रादक्षिण्येण गोपुरद्वाराद्बहिः निर्गत्य। तत्रस्थ प्रपामध्ये मन्दिराभिमुखं देवं संस्थाप्य।

## स्तम्भपूजा

दीपस्तम्भं पुण्याहजलेन प्रोक्ष्य। पूर्वादिक्रमेणाभ्यर्च्य।

| | | |
|---|---|---|
| ओं ब्रह्मणे नमः | ओं विष्णवे नमः | ओं रुद्राय नमः |

| | |
|---|---|
| ओं शङ्खाय नमः | ओं मारुतये नमः |
| ओं चक्राय नमः | ओं गरुडाय नमः |

इति स्तम्भमभ्यर्च्य। धूपदीपादिकं समर्प्य। नीराज्य। आचार्यः देवस्याभिमुखं स्तम्भाग्रे महादीपं संस्थाप्य। स्तम्भस्य परितः आज्यावसिक्तवस्त्रान् तालपत्रान् वा समुद्दीप्य। देवस्य नीरजनं कृत्वा। अनन्तरं सर्ववीथिषु देवं परिभ्रम्य। आलयमासाद्य। मुखमण्डपे घटदीपं -

नीराजनञ्च दर्शयित्वा। देवं गर्भगृहे निवेश्य। देवस्य पादयोः पुष्पाङ्कुरं समर्प्य। पूर्ववत् महाकुम्भप्रोक्षणं कृत्वा। रक्षां विसृज्य। अपूपान् -पृथुकान् -लाजान् -पायसं -शर्करायुक्त-नालिकेरं -लाजपिष्टं -फलानि च निवेद्य। नीराज्य।

बलिना प्रार्थितः पूर्वमुत्सवस्तु मया कृतः।
अज्ञानात् स्खलितं त्वस्मिन् तत्क्षमस्व दयानिधे!॥

इति भगवन्तं विज्ञाप्य। निवेदितान्न-भक्ष्याणि श्रीवैष्णवेभ्यः भक्तेभ्यश्च दद्यात्॥ तत्काले यजमानः आचार्यस्य -मूर्तिपानां -ऋत्विजानां -सर्वेषां कैङ्कर्यपराणां -महादीपोक्त वृक्ष आहर्तृणां यथावित्तानुसारम् उक्तदक्षिणां दद्यात्॥ ततः अर्धरात्रिपूजां कारयेत्॥

*****कृत्तिकादीपोत्सवं सम्पूर्णम्*****

श्रीः

## नीराजनोत्सवविधिः*1

### (वर्तमान सहस्रदीपालङ्कारः)

अथ नीराजनविधिं वक्ष्ये। नीराजनार्थं बहिर्मण्डपं वितान -तोरणाद्यैः - बहुदीपैः समलङ्कृत्य। आचार्यः (सायमाराधनात्परं)

---

1) இந்த நீராஜனோத்ஸவம் தான் காலப்போக்கில் மறுவி ஸஹஸ்ரதீபாலங்கரண சேவை என்று மாறி இருக்கலாம்.

दीपारोपण-मण्डपशुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन मण्डपं संप्रोक्ष्य। तदनु देव्यौ सह देवं यानमारोप्य। वेद -वाद्यघोषैः प्रादक्षिण्येन दीपारोपणमण्डपं नीत्वा। तत्र कल्याणकौतुकं यथाविधि पूजयित्वा। अलङ्कारासने दीपारोपणसमये आचार्यः महानसे गार्हपत्याग्निना सहस्रं तदर्धं वा तदर्धं वा यद्वा शतं वा तदर्धं तदर्धं वा घटदीपान् उद्दीप्य। सर्वान् घटदीपान् देवदासीभिः महानसात् दीपारोपणमन्डपान्तं समानीय। ज्ञानादि-षडङ्गन्यासपूर्वकं देवम् अर्घ्यादिभिरभ्यर्च्य। एकैकं घटदीपमादाय। देवस्य पुरतो विन्यस्य। ओं नमो नारायणाय इति दीपमभ्यर्च्य। घटस्य अर्घ्यं -पुष्पञ्च समर्प्य। ततः आचार्यः दीपमादाय। देवस्य दक्षिणपादमारभ्य वामपादान्तं भ्रमणेन उद्दीप्यस्वेति मन्त्रेण घटदीपं दर्शयित्वा। एवं सर्वान् घटदीपान् दर्शयित्वा। देवदासीभिः पुनः घटदीपं ग्राहयित्वा। महाबलिपीठाद्बहिः दीपान् विसृज्य (वर्तिविसर्जनम्)। मण्डपे देवस्यपुरतः वेदघोषं -वाद्यघोषं -गीतं -नृत्तञ्च दर्शयित्वा। अपूपान् – विविधान्नानि च निवेद्य। नीराज्य। देवं मण्डपात् वीथिभ्रमणेन गर्भगेहं प्रविश्य। अर्धरात्रिपूजां कारयेत्॥

नीराजनहीने तु सर्वकर्मासुरं भवेत्॥

**********

श्रीः

## धनुर्मासपूजाविधिः

सूर्ये स्थिते धनुर्राशौ तन्मासे विशेषेण उषःकालपूजां विधाय। देवानां प्रातःकालः मार्गशीर्षमासः इति स्मृतः। अरुणोदयात्पूर्वम् उषःकालः प्रकीर्तितः। तत्काले मुद्गान्न -गुलान्न -पायसान्नेति सात्विकान्नैः देवस्य पूजनं निवेदनञ्च कृत्त्वा। विश्वरूपात् परम् उषःकाल-विशेषपूजामारभ्य। तत्पूजाविधानं वक्ष्ये। उषःकालपूजायां मन्त्रासन प्रभृति अलङ्कारासनान्तं सम्पूज्य। तत्काले नानाविधैः स्तोत्रैः प्राकृत -सांस्कृत -द्राविडैः देवपारम्य सूचकैः मानस -वाचिक -कायिकेति त्रिविधैः भक्तप्रणीत गाथया च श्रीवैष्णवैः देवं तोषयित्वा। भोज्यासने सघृतं -क्षीरं -मरीच्यादि समन्वितं सोपदंशं मुद्गान्नं निवेद्य। सशर्करा -घृतसम्युतं पायसान्नं -गुलान्नञ्च निवेद्य। नीराज्य। भगवन्निवेदितान्नं भक्तबिम्बानाञ्च निवेद्य। तदनु नित्याग्नौ विशेषकाल होमं हुत्वा। चतुर्विधान्नमध्यस्थ मुद्गान्नेन*1 नित्यहोमविधानेन हुनेत्॥ तदन्नेन विशेषकाल बलिं कृत्त्वा ( नित्ये त्रिकाल बलिरस्तु मार्गशीर्षे उषःकालबलिः अधिकःस्यात् -तेन तन्मासे चतुष्काल बलिः भवति)। अनन्तरं वेदादीन् समापनं कुर्यात्॥ सर्वेभ्यः श्रीवैष्णवेभ्यः –

1) முத்கான்னம் என்பது அரிசி பருப்பு பழங்கள் சேர்த்து தான் செய்ய வேண்டும் என்று பாத்ம ஸம்ஹிதையில் சொல்லப்பட்டுள்ளது. தனுர்மாஸ பூஜையில் முத்கான்னம் மிளகு வெல்லம் சேர்த்து செய்ய வேண்டும் என்று பல ஸம்ஹிதைகளில் சொல்லப்பட்டுள்ளது. இரு போன்ற முத்கான்னங்களை ஹோமம் செய்யலாம். ஆனால் தற்கால முத்கான்னத்தில் உப்பு சேர்ப்பதால் அதை ஹோமம் செய்ய கூடாது. உப்பு சேர்த்த பதார்த்தத்தை ஹோமம் செய்யக்கூடாது என்பது பொதுவிதி.

वैष्णवस्तुति-गायकेभ्यः -भक्तेभ्यः - भगवत्प्रतिग्रहतीर्थं -पादुकाञ्च दत्त्वा। भगवन्निवेदितान्नं दापयेत्॥ तदनन्तरं प्रातर्नित्याराधनं बल्यन्तं कृत्त्वा। एवं मासान्तं प्रतिदिनं सम्पूज्य। तस्मिन्मासे दिने दिने प्रातःकाले तिलतैलैः वा आज्येन वा दीपारोपनमाचरेत्॥

*****धनुर्मासपूजाविधिःसम्पूर्णम्*****

श्रीः

## अध्ययनोत्सव विधिः

अथ अध्ययनोत्सव-विधिरुच्यते। उत्सवार्थं सर्वाणि द्रव्याणि पूर्ववत् सम्पाद्य। तदर्थं बहिर्मण्डपं वितानाद्यैः समलङ्कृत्य। तन्मण्डपे देवस्याभिमुखं भक्तबिम्बानां स्थापनार्थं विष्टरं कल्पयित्वा। उत्सवारम्भ पूर्वेद्युः भक्तबिम्बादीनां प्रत्येकं नवकलशैः संस्नाप्य। अलङ्कृत्य। उत्सवं कारयेत्॥

आचार्यः आलयमासाद्य। प्रातराराधनानन्तरं देवं स्नानविष्टरे संस्थाप्य। श्रीभगवदाज्ञया----अध्ययनोत्सवस्य पूर्वाङ्गत्वेन देवस्य----कलशैः स्नपनकर्म करिष्ये इति सङ्कल्प्य। विधिवत् पुण्याहपुरस्सरं

स्नपनं कृत्त्वा। देवं समलङ्कृत्य। गर्भगृहे निवेश्य। सायमाराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। अध्ययनोत्सवार्थं भगवन्तं प्रार्थ्य।

पीताम्बरधर! श्रीमन्! कौस्तुभानतकन्धर!।
मखायाध्ययनायास्मिन् बिम्बेसन्निधिमावह॥

अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर----मास----(दश)दिन अध्ययनोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम् इति प्रार्थ्य। आचार्यः आसने उपविश्य। प्राणानायम्य। देशकालौ सङ्कीर्त्य। श्रीभगवदाज्ञया----लोकक्षेमार्थं----वत्सर----मास----(दश)दिन अध्ययनोत्सवकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं -पुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्च कुर्यात्॥

प्रभाते मुहूर्ते उषःकाल पूजानन्तरं यागशालाशुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं पुण्याहं वाचयित्वा। तान् पुण्याहजलेन प्रोक्ष्य। ततः देव्यौ सह देवस्य -बलिबेरस्य -आचार्यस्य च रक्षाबन्धनं कृत्वा। बलिबिम्बं शिबिकायामारोप्य। यागशालायां संस्थाप्य। विधिवत् चतुस्थानार्चनं कृत्वा। ततः आचार्यः बहिर्मण्डपं पुण्याहजलेन प्रोक्ष्य। श्री -भूमियुतं देवं यानमारोप्य। भक्तबिम्बादीनाञ्च पृथक् पृथक् यानमारोप्य। वेद-वाद्यघोषैः प्रादक्षिण्येण अध्ययन-मण्डपमासाद्य। तत्रवितानमध्ये भद्रविष्टरे देवं संस्थाप्य। एकैकशः भक्तबिम्बानानाय्य। हरेः पुरतः संस्थाप्य। तेषां

भगवद्धारित -गन्ध -माल्य -वस्त्रादीन् दत्वा(भगवत्पादुकां धारयित्वा)। देवस्य पुरतः विष्टरेषु भक्तबिम्बान् देवस्याभिमुखं संस्थाप्य। भगवन्तं मन्त्रासनप्रभृति संपूज्य। यथाभागमन्नं निवेद्य। नीराज्य। भगवन्निवेदितान्नं -भक्तबिम्बानां निवेद्य। तेभ्यः नीराजनं कृत्वा। ततः अध्ययनमारभ्य।

अध्यायिनां स्थापनक्रमः

भगवतः पूर्वे ऋग्वेदं संस्थाप्य। दक्षिणे यजुर्वेदं -पश्चिमे सामवेदम् -उत्तरे अथर्ववेदम् -आग्नेये पुराणं -नैर्ऋते स्तोत्रं -वायव्ये धर्मशास्त्रम् -ऐशान्ये भगवच्छास्त्रञ्च संस्थाप्य। तेषां परितः देशभाषानुसारित -भक्तैः विरचित स्तोत्रपठनञ्च -श्रीवैष्णवैः मानस -वाचिक -कायिकेति त्रिविधैः भगवन्तं तोषयित्वा। वेदादि समस्तपठनानन्तरं पूर्ववत् महाहविर्निवेद्य। नीराज्य। ततः भगवन्तं भक्तबिम्बान् च यानमारोप्य। स्वस्व सन्निधौ निवेश्य। सायाह्ने पूर्ववत् यागशालायां चतुस्थानार्चनं कृत्वा। एवं दशदिनं प्रातरुत्सवं ज्ञात्वा। शुक्लदशम्यां दशमोत्सवे प्रातरुत्सवसम्पूर्णेन देवं बहुकलशैः संस्नाप्य। अलङ्कृत्य। सर्वान् यानमारोप्य। पूर्ववत् स्वस्व सन्निधौ निवेश्य। सायमाराधनानन्तरं चतुस्थानार्चनं कृत्वा। पूर्णाहुतिं -बलिञ्च दत्त्वा। पालिकादर्शनं -महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च पूर्ववत् कृत्वा। नीराज्य। भगवन्तं प्रार्थ्य।

त्वत्प्रीतये जगन्नाथ! मयाद्यध्ययनोत्सवः।
तस्मिन् मोहाच्छास्त्रहीनं तत्क्षमस्व दयानिधे!॥ इति विज्ञाप्य

## मोक्षोत्सवविधिः

तदनु तद्रात्रौ आचार्यः मोक्षोत्सवार्थं विशेषयजनं विधाय। यथाभागमन्नं निवेद्य। नीराज्य। देवेशं प्रार्थ्य

प्रलयाब्धिजले शायिन्! मधुकैटभ सेवित!।
प्रार्थितंतूत्सवं ताभ्यामुत्सवं कर्तुमारभे॥
अनुज्ञां देहि देवेश! वैकुण्ठालय भूषण!।
मोक्षोत्सवमहं कर्तुं तव दैत्यनिषूदन!॥
इच्छामि कर्मबिम्बेऽस्मिन्नायाहि जगतीपते!॥

अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सर----मास----दिन(दश) मोक्षोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन---- विष्णो अनुमन्यताम्। इति प्रार्थ्य। ततः आचार्यः देशकालौ सङ्कीर्त्य श्रीभगवदाज्ञया----लोकक्षेमार्थं----वत्सर----मास----(दश)दिन मोक्षोत्सवकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं -पुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्चकुर्यात्॥ अपरेऽहनि शुक्ल-एकादश्यां प्रभाते मुहूर्ते उषःकाल पूजानन्तरं यागशालाशुद्ध्यर्थं -मण्डपशुद्ध्यर्थम् -उत्तरकवाटशुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं पुण्याहं वाचयित्वा। तज्जलेन रक्षासूत्रान् -यागशालाम् -अध्ययनमण्डपम् -उत्तरद्वारञ्च संप्रोक्ष्य। ततः देव्यौ सह देवस्य -बलि -तीर्थबिम्बयोश्च -आचार्यस्य च रक्षाबन्धनं कृत्वा। सर्वालङ्करणेन देवीभ्यां सह देवं यानमारोप्य। वाद्यघोषैः आवरण-प्रादक्षिण्येन उत्तरद्वार-समीपमासाद्य।

तत्रदेवम् अर्घ्यादिभिरभ्यर्च्य। मुखवास-ताम्बूलादीन् निवेद्य। ऋग्गादिवेदान् पठित्वा। नीराज्य। उत्तरद्वारं गन्धपुष्पैः अभ्यर्च्य। धूप-दीपं समर्प्य। नीराज्य। सवेद-मङ्गलवाद्येन द्वारकवाटमुद्घाट्य। पश्चातेन देवं नयेत्॥ बहिर्मण्डपे विष्टरे देवं संस्थाप्य। मन्त्रासनप्रभृति सम्पूज्य। (अपराह्णे) बहुकलशैः पूर्ववत् संस्नाप्य। तत्काले यागशालायां बलिबिम्ब-स्थापनेन चतुस्थानार्चनं कृत्वा। पूर्णाहुतिं -बलिञ्च दत्त्वा। एवं सायाह्नहवनं बल्यन्तं कृत्वा। अध्ययनमण्डपस्थ देवस्य परितः पूर्ववत् ऋग्गादिवेदपाठकान् संस्थाप्य। भक्तबिम्बानाञ्च यथापूर्वं भगवत् बहुमानानन्तरं देवस्याभिमुखं विष्टरेषु संस्थाप्य। भक्तप्रणीत देशभाषानुसारित गाथया श्रीवैष्णवैः मानस -वाचिक -कायिकैः भगवन्तं तोषयित्वा। ततः देवं यथाविधि सम्पूज्य। यथाभागमन्नं निवेद्य। तदन्नं भक्तबिम्बानाञ्च निवेद्य। देवस्य पिष्टदीपं दर्शयित्वा। नीराज्य। अनन्तरं सर्वान् स्वस्व सन्निधौ निवेश्य। अर्धरात्रिपूजां कारयेत्॥

एवं दशदिनोत्सवं विधाय। तानि रात्र्युत्सवं ज्ञात्वा। दशमोत्सवे प्रातर्हवनानन्तरं देवं -तीर्थबिम्बञ्च बहुकलशैः संस्नाप्य। यथाविधि कटाहे वा तटाके वा मोक्षोत्सव-सम्पूर्णता-सिध्यर्थम् अवभृथं कुर्यात्॥

कल्याणकौतुकं तीर्थबिम्बञ्च अलङ्कृत्य। महाहविर्निवेद्य। नीराज्य। तीर्थबिम्बं गर्भगृहे निवेश्य। तस्मिन् दिने सायाह्न-हवनं बल्यन्तं कृत्वा। पूर्ववत् देवस्य-परितः वेद -गाथा -स्तोत्राणि पठित्वा। भक्तबिम्बानां मर्यादादनन्तरं स्वस्व सन्निधौ निवेश्य। कल्याणकौतुकं मूलालये निवेश्य।

पालिकादर्शनं -महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। भगवन्तं प्रार्थ्य।

मोक्षोत्सवो मयातेऽद्य क्रियते भक्तवत्सल!।
आयासस्तव सम्प्राप्तः क्षन्तुमर्हसि तं हरे!॥

इति विज्ञाप्य। तत्काले यजमानः आचार्यस्य -मूर्तिपैः -ऋत्विजानां -सर्वेषां वेदादिपाठकानां -वाद्यवादकानां -समस्त कैङ्कर्यपराणाञ्च उक्तदक्षिणां दद्यात्॥ सन्निधौ अर्धरात्रिपूजां कारयेत्॥

*****अध्ययन -मोक्षोत्सवञ्च सम्पूर्णम्*****

श्रीः

## मृगयात्रोत्सवः

मकरमास-द्वितीय-दिने विशेष मृगयोत्सवं कृत्त्वा। नित्यपूजानन्तरं देवम् अश्वरत्ने आरोप्य। वीथि भ्रमणेन महावनं प्रविश्य। तत्रस्थ मण्डपे देवं संस्थाप्य। तस्य पुरतः दूरतः मृगकल्पनं कृत्वा। मध्ये वराह -वारण -व्याघ्र -कृष्णसार -शशान् संस्थाप्य (अलाभे तादृशं रूपं संस्थाप्य)। तेषां परितः सेनां परिकल्प्य। तत्र मध्ये अतिशूरभटाः संविश्य। जीवान् मृगान् सङ्ग्राह्य। बध्वा। देव सन्निधौ गत्वा। सर्वान् मृगान् एकैकशः विमोच्य। मृगाणां पुण्यगतिर्ध्रुवं ज्ञात्वा। यथाभागमन्नं निवेद्य। नीराज्य। पुनः आलयं प्रविश्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

**********

श्रीः

## आग्रयणोत्सवविधिः

अथ आग्रयणोत्सव-विधिरुच्यते। आग्रयणार्थं सर्वं सम्पाद्य। आचार्यः आलयमासाद्य। देवस्य सायमाराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। आग्रयणार्थं भगवन्तं प्रार्थ्य।

भगवन्! देवदेवेश! शङ्खचक्र-गदाधर!।
आग्रयणोत्सवं कर्तुम् अनुज्ञां देहि मे प्रभो!॥

अस्य देवदेवस्य----लोकक्षेमार्थं----वत्सरे----मासे आग्रयणोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम् इति प्रार्थ्य। सभानुज्ञां लब्ध्वा। पूर्ववत् सङ्कल्पपूर्वकं विष्वक्सेनाराधनं - वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्चकुर्यात्॥

प्रभाते कृतकृत्यो गुरुः नित्यपूजानन्तरं देव्याः सह देवस्य आचार्यस्य च रक्षाबन्धनं कृत्वा। अनन्तरं तार्क्ष्यं -विष्वक्सेनञ्च पृथक् पृथक् यानयोः आरोप्य। छत्र -चामर -वेद -वाद्यघोषेण साकं क्षेत्रदेशमासाद्य (शालिक्षेत्रम्)। तत्र प्रपां कल्पयित्वा। तन्मध्ये सेनेशं -तार्क्ष्यञ्च संस्थाप्य। तत्र आचार्यः आसने उपविश्य। क्षेत्रदेशशुद्ध्यर्थं -लवित्राणां शुद्ध्यर्थं - कर्षकाणां शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। कर्षकाणां -लवित्राणां -क्षेत्रदेशञ्च सम्प्रोक्ष्य। कर्षकाणां रक्षाबन्धनं कृत्वा। आचार्यः क्षेत्रदेशमासाद्य। लवित्राणि भूमौ निधाय। ओं भूं भूम्यै नमः इति क्षेत्रदेशमर्चयित्वा।

ओं नमो नारायणाय इति लवित्राणि अर्चयित्वा। तेषाम् अर्घ्यादि-दीपान्तं सम्पूज्य। फलवर्ग-ताम्बूलादीन् निवेद्य। नीराज्य। क्षेत्रदेशे पायसान्नेन दध्योदनेन वा ओं क्षं क्षेत्रपालकाय नमः इति बलिं दद्यात्॥

सुमुहूर्ते मूलमन्त्रमनुस्मरन् लवित्रेण धान्यानां लवनं कृत्वा। कृषीवलैः कारयित्वा। एवं फलाणि -पल्लवाणि च सङ्गृह्य। धान्यभारेषु निक्षिप्य। सर्वं सम्भारानन्तरं धान्यभारं कर्षकाणां शिरसि आरोप्य। वाद्यघोषेण विष्वक्सेनपुरस्कं धान्यानि वाहयित्वा। तेषां पश्चात् गरुडेन वेदघोषेण साकं मन्दिरान्तः प्रविश्य। देवस्य दक्षिणे करे धान्यानि किञ्चित् प्रदर्श्य। सर्वाणि धान्यानि कोष्ठाकारेषु निक्षिप्य। अन्ते अर्धरात्रिपूजां कारयेत्॥

## धान्यसंस्कारः

प्रभाते गुरुः सन्निधौ नित्यपूजानन्तरं पक्वार्थम् उक्त धान्यानि सङ्गृह्य। आतपे शोषयित्वा। प्रक्षालितम् उलूखलं -मुसलञ्चादाय। शुचौ देशे सुधाचूर्णैरलङ्कृत्य तस्मिन् उलूखल -मुसलञ्च संस्थाप्य। अलङ्कृत्य। तयोः अर्घ्यादि-नैवेद्यान्तं सम्पूज्य। नीराज्य। उलूखले धान्यं निक्षिप्य। श्रीवैष्णवैः ब्राह्मणैः स्त्रीभिः देवदासीभिः मङ्गलवाद्येन मुसलेन अवघातं कृत्वा। शूर्पेण तूषानपोह्य। पाकशालायां निक्षिप्य। ततः देव्याः सह देवं यानमारोप्य। बहिर्मण्डपे विष्टरे संस्थाप्य। मन्त्रासनप्रभृति सम्पूज्य। आचार्यः यागशालां गत्वा। आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----लोकक्षेमार्थम् आग्रयणोत्सवकर्मणि चतुस्थानार्चनं करिष्ये तदङ्गं सर्वोपकरणशुद्ध्यर्थं -कुम्भ -मण्डल

-वह्निशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि संप्रोक्ष्य। बलिबेरं यागशालायां संस्थाप्य। विधिवत् द्वारपूजापुरस्सरं चतुस्थानार्चनं कृत्वा। अग्नौ समिदन्नाज्यहोमानन्तरम् आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया----आग्रयणोत्सव कर्मणि अस्मिन्नग्नौ नवैः तण्डुलैः मूलमन्त्रेण अष्टोत्तरशताहुतीः होष्यामि इति सङ्कल्प्य। नूतन तण्डुलैः हुत्वा। पूर्णाहुतिं हुत्वा। तत्काले पाकशालायां नूतनान् धान्यजातान् शुद्धवारिणा संक्षाल्य। धान्यानि गुडेन पाचयित्वा। तस्मिन् मरीची -जीरक -नालिकेर -फलाणि तत्तदन्नानुसारेण सम्मिश्र्य। मूलबेरादीनां -कल्याणकौतुकञ्च निवेद्य। यागशालायां चतुस्थानस्थितानां च निवेद्य। तदन्नेन बलिं कृत्वा। सर्वेभ्यः नीराज्य। चतुस्थानस्थान् उद्वास्य। पूर्ववत् महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च कृत्वा। नूतनधान्यैः पाचितान्नं सर्वेभ्यः श्रीवैष्णवेभ्यः -ब्राह्मणेभ्यः भक्तेभ्यश्च दद्यात्। कल्याणकौतुकं गर्भगृहे निवेश्य। भगवन्तं प्रार्थ्य।

कृपानाथ! दयासिन्धो! त्वदनुग्रह-काम्यया।
त्वया पक्केन धान्येन मखोऽयं योजितश्शुभः॥
तुभ्यं समर्पये सर्वं त्वद्दत्तं मधुसूदन!।
प्रसन्नो भव गोविन्द! शेमुषीं पक्कतां नय!॥

इति विज्ञाप्य। अपरेऽहनि कदलीदलेषु -सुपक्क -मधुररसेन सम्युतैः -नवान्नैः ब्राह्मणान् भोजयित्वा। ततः नूतन भाण्डान् समादाय।

अलङ्कृत्य। श्रीसूक्तेन अभ्यर्च्य। कोष्ठाकारस्थ धान्यानि नूतनभाण्डेषु प्रत्येकं निक्षिप्य। धान्यागारे संस्थाप्य। अवशिष्ट धान्यानि आचार्यादीनां -मूर्तिपानां -कर्षकाणां -सर्वेषां जनानां दद्यात्॥

तत्काले यजमानः गुरवे -मूर्तिपानां -कर्षकाणाञ्च दक्षिणां समर्पयेत्॥

*****आग्रयणोत्सवविधिः सम्पूर्णम्*****

श्रीः

## प्रणयकलहोत्सवः*1

अथ प्रणय-कलहोत्सव विधिरुच्यते। आचार्यः अरुणोदयात् पूर्वं नित्यानुष्ठान समाप्तेन आलयमासाद्य। प्रातर्नित्याराधनं बल्यन्तं समाप्य। अनन्तरं विशेषयजनं कृत्वा। मुद्गान्नं निवेद्य। नीराज्य। प्रणयकलहोत्सवार्थं भगवन्तं प्रार्थ्य।

भगवन्! पुण्डरीकाक्ष! भक्तरक्षणदीक्षित!।
लक्ष्म्यास्तव प्रियार्थाय प्रणयाद्युवयोर्हरे!॥
कलहोत्सवमद्याहं कर्तुमिच्छामि माधव!।
तदर्थं कौतुके बिम्बे सन्निधत्स्व कृपानिधे!॥

इति प्रार्थ्य। नीराज्य। कल्याणकौतुकं याने समारोप्य। सर्व वीथिषु

---

1) ப்ரணயகலஹோத்ஸவம் தனியாக அனுஷ்டிக்கும் பக்ஷத்தில் இதுபோன்ற உத்ஸவ விதிகளை ஆசரிக்கவேண்டும். மஹோத்ஸவத்தில் பத்தாம் நாள் கதவுசாத்துதல் முதல் ப்ரணயகலஹபடனம் மட்டும் வாசிக்கவேண்டும்.

परिभ्रम्य। आलयात् क्वचिद्दूरात् मण्डपे भगवन्तं स्थापयित्वा। तत्र देवस्य श्रमशान्त्यर्थम् अर्घ्यादिभिः अभ्यर्च्य। सर्वभक्ष्याणि निवेद्य। नीराज्य। सायाह्नसमये देवं गन्धाद्यैः अलङ्कृत्य। पुनः यानमारोप्य। वीणादि वाद्यघोषैः -नृत्तैः -गानैः सह देवम् आलायान्तः प्रविश्य। महाद्वारे देव्या प्रतिषेधं कृत्त्वा। एवं त्रि -चतुरो वारान् प्रतिषिध्य। ततः आचार्यः कलहोत्सवगाथां पठित्वा।

प्रणयकलहः

लक्ष्मीं लीलाशयननिलये वञ्चयित्वातिरम्ये
रात्रौ राधामभिसृतवतस्संनिवृत्य प्रभाते।
भूयो वेगादुपगतवतः शार्ङ्गपाणेश्च देव्योः
संवादोऽयं भुवननिवहं सर्वदा सन्तनोतु॥

श्रियः पतिயான सर्वेश्वरன் केलिशयनத்திலே निद्रापरवशैயான

லக்ஷ்மியை வஞ்சித்து ராத்திரியிலே राधागृहத்திலே வஸித்து

प्रातःकालத்திலே அதிவேகமாகத் திரும்பிவந்த ஶ்ரீபகவானுடையவும்

ஶ்ரீதேவியினுடையவும் प्रणयकलह संवादம் ஸர்வருக்கும் மங்கலப்ரதமாகக் கடவது.

தோழிமார்களும், ஸகிகளும் நாச்சியாரிடம் சென்று ஸேவித்து

பகவானின் धूर्तवेषத்தை தெரியப்படுத்தினவளவிலே,

அந்த நாச்சியாரும் தன்னுடைய பரிகரமான தோழிமார்களையும், ஸகிகளையும் கூட்டி முன்னையமரர் முதல்வன், மணிவண்ணன், வாசுதேவன் எழுந்தருளியிருக்கிற ஸமயத்தில் கோயில் திருக்காப்பைச் சேர்த்து பெருமானுக்கு திருக்காப்பை நீக்காதே கொள்ளுக்கோள் என்று நியமித்து அறுதியிட்டு இருக்குமளவிலே காயாமலர் வண்ணன் கருமுகில்வண்ணன்

அந்த धूर्तवेषத்தோடே திருக்காப்பினருகே எழுந்தருளி அருளிச்செய்தார்.
தேசமுடையாய் திறவாய், மாமான்மகளே மணிக்கதவம் தாழ்திறவாய், செந்தாமரைக்கையால் சீரார் வளையொலிப்ப வந்து திறவாய், என்றருளிச்செய்ய

त्रातुं जगत्परिबृढः कृपया स्वभक्तान् देवोऽनुभूय सुमहोत्सवमम्बुजाक्षः।

राधागृहे निशि समागमकालमेव स्थित्वा जवेन कमलागृहमाजगाम॥

मृषाङ्गरागमवकीर्णशिरोरुहं तं दष्टाधरं कररुहक्षतमीक्षणं च।

प्रत्यग्रगन्धममितां तमुपाङ्गशेषं स्विन्नास्यमङ्गमभिवीक्ष्य रमा जगाद॥

रमोवाच-

निद्रावशां निशि विहाय विहारतल्पे

क्व प्रस्थितोऽसि वद वञ्चक तत्त्वतो माम्।

अन्यादृशीं गतमनङ्गचरित्रशंसी

वेषस्तु ते पिशुनयत्यरविन्द नेत्र!॥

வாரீர் வஞ்சகரே! क्रीडाशयनத்திலே निद्रापरवशैயான நம்மை ராத்திரியிலே வஞ்சித்து எங்கே எழுந்தருளினீர்? வாஸ்தவமாகச் சொல்லும். நீர் சொல்லாமல் போனீராகிலும் உம்முடைய வேஷமே நமக்கு सुस्पष्टங்களாக रतिचिह्नங்களை ஸூசிப்பிக்கிறது என்று நாச்சியார் அருளிச்செய்தார்.

( शय्यां निशान्ते निशि वञ्चयित्वा स्थितोऽसिमां कुत्र निशान्तमेनम्।

त्वक्त्वा सदा त्वत्पदसक्तचित्तां युक्तं किमेतद्वद देवदेव!॥ )

श्रीभगवानुवाच-

भद्रे! पयोधितट काननवाटिकासु घाटीपरस्सह भटैः तुरगाधिरूढः।

गत्वा विहृत्य कतिचित् समया पुनश्च

प्रत्यागतो मृगधुरस्मि न किञ्चिदन्यत्॥

यातोऽस्मि देवि मृगराजमृगाशनाद्यैः दुष्टैर्मृगैरपि सदा क्षणदाचरैश्च।

श्रुत्वार्तिघोषमटवीं निशि बाधितानां क्लेशोपशान्तिकरणाय तपोधनानाम्॥

வாரீர் பங்கஜவாஸிநியே! समुद्रतटाटविप्रदेशाங்களிலே

அநுசராங்களோடு கூடி तुरगाधिरूढனாய் வேட்டையாடி விஹரித்து வந்தோமல்லது வேறொன்றுமில்லை என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

कुत्रास्ति लोके मृगया पराणां दान्तेक्षणादन्तनखक्षतं च।

कीर्णालकं स्विन्तमुखं नितान्तं समीक्षिताङ्गं कितवस्य सव्यः॥

जलजनयनजालं वीक्षणैर्दिक्षु कृत्वा प्रमुषितनिजवेषः पल्लवाकारधारी।

मृगधुरसि निशायां नूनमेणीदृशां त्वं हृदयहरिणबृन्दं मन्दमन्दं गृहीत्वा॥

வாரீர் புருஷோத்தமரே! ராத்திரி நான்கு திக்குகளிலும் பார்வையாகிற வலையைக்கட்டி வேஷமருத்து, வல்லவாகாரம் தரித்து,

हरिणाक्षिகளான மான் கூட்டத்தை தன் வசம் வரும்படி பண்ணின வேட்டைக்காரனானீர்.

श्रीभगवानुवाच-

गन्धः काननपुष्पजः कचचयः कीर्णोनिलादाननम्

स्विन्नं बृघ्नकरैः गतागतवशात् क्लान्तिर्विशत्येव नः।

तान्तं नेत्रमपाङ्गशोणमभवत् रोषाच्च युद्धोद्धवात्

मृष्टं चन्दनमम्बरस्य कषणाज्जातं क्षतं कण्टकैः॥

किं मां विशंकयसि पङ्कजवासिनि त्वं

हन्तुं निशाचरगणान् अटवीं गतोऽस्मि।

विश्वासहेतुरभवद्यदि मे न वाक्यं पृच्छस्व मे परिजनं शपथं विधाय॥

வாரீர் பங்கஜநாயகியே! நம்மை நீர் எதுக்காக शङ्कि्க்கிறீர்? நாம் रात्रिचरங்களான ராக்ஷஸர்களை संहरिக்கிற நிமித்தமாக வநாந்தரத்தை அடைந்தோம். அதனாலிந்த காரணமுண்டாயிற்று.

இந்த வார்த்தையும் உமக்கு विश्वासहेतुவாகாவிட்டால் நம்முடைய பரிஜனங்களை ஆஜ்ஞையிட்டு கேட்டருளீர் என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

वक्त्रं श्रमाम्बुनिकुरुम्बकरम्बितं ते बिम्बाधराक्षियुगले धवलारुणत्वम्।

व्यक्तत्वमावहति फालतले विशाल-कस्तूरिकाक्ततिलकं न विलोकयामि॥

வாரீர் புருஷோத்தமரே! உம்முடைய முகம் संभोगश्रमத்தினாலுண்டான स्वेतத்தினாலே அலங்கரிக்கப்பட்டது. திருவதரம் வெளுப்பையடைந்தது கண்கள் சிகப்பை வஹித்தது. கஸ்தூரிகாதிலகமும் கலைந்து நமக்கு பார்க்க ஸஹ்யமின்றிக்கே யிரா நின்றது என்று நாச்சியார் அருளிச்செய்தார்.

श्रीभगवानुवाच-

वेगादुपागतवतो वदने श्रमाम्बुजातं शनैस्तिलक माकुलितं च तेन।

नैसर्गिकं नयनयोः नलिनारुणत्वं त्वद्वक्त्रशीधुमपिबन् धवलाधरो मे॥

வாரீர் भृगुபுத்ரியே! நாம் வேட்டையாடி அதிவேகமாய் வருகையினாலே முகம் வேர்வையடைந்தது. அந்த வேர்வையினால் திலகமும் களைந்தது. செந்தாமரைக்கண்ணன் என்று நமக்குப் பெயர் ப்ரஸித்தம். உம்முடைய திருவதரபானம் இல்லாமல் அதரம் வெளுப்பையடைந்தது என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

विविध-नखपदाङ्कैरङ्कितं चापि- वक्षोरुह-सरस-हरिद्रामुद्रितोरःस्थलं ते।

वपुरिदमुपभुक्तं भाग्यकृत्पांसुलाभिः

मम नयनपथात् द्राग् गच्छ गोविन्द शीघ्रम्॥

வாரீர் கோவிந்தனே! உம்முடைய திருமார்பு உம்முடைய விலாஸ ஸ்த்ரீகளுடைய नानाविध दन्त नखक्षत ங்களாலும், அவர்களுடைய स्तनचन्दनकुङ्कुमங்களாலும், அலங்க்ருதமாயிருக்கிற

இந்த விக்ரஹம் எப்படிப்பட்ட भाग्यवतिகளான ஸ்த்ரீகளினாலே புஜிக்கப்பட்டதோ, நம்முடைய கண்முன்னே நில்லாமல் அங்கேதானே போம் என்று நாச்சியார் அருளிச்செய்தார்.

श्रीभगवानुवाच-

सत्यं वदामि कमले श्रुणु काननान्ते मत्वा स्तनस्तबकसन्नतवल्लरीं त्वाम्।

आश्लिष्य तत्प्रसवपांसुभिरङ्कितोऽस्मि वक्षस्थले क्षतिरभूत् वनकण्टकैश्च॥

வாரீர் கமலவாஸிநியே! உம்மைக்காட்டிலே நினைத்து உம்முடைய स्तनस्तबकलोलனாய் உமக்கு सदृशமான வனத்திலுள்ள பூங்கொடிகளை உம்முடைய போகத்தினாலே ஆலிங்கனம் பண்ணிக் கொண்டபடியினாலே அந்தக்கொடியின் புஷ்பத்தூள்களினாலே கிழிக்கப்பட்டது என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

स्मेर प्रसून मधु लुब्धमधुव्रताली- रज्यत्कचां विपुलपीनघनस्तनीं च।

त्वं पुष्पिणीं मदनविभ्रमजातमोहात्

आलिङ्ग्य काञ्चनलतां किल वल्लभोऽसि॥

வாரீர் வஞ்சகரே! நீர் இப்போது पुष्पमधुलुब्धமாய் இருக்கிற வண்டுகள் போலே கருத்திருக்கிற தலைமயிர்களையுடையவராய்,

स्तनस्तम्बक-नम्रैயாய், புஷ்பிணியாய் இருக்கிற பொற்கொடியாளை ஆலிங்கனம் பண்ணிக்கொண்டு வல்லவாகாரமடைந்தீர் என்று நாச்சியார் அருளிச்செய்தார்.

सर्वाणि पञ्चशरसायक सञ्चितानि चिह्नानि वञ्चक कथंचिदपह्नुतानि।

शक्यानि चाटुवचनैः परिहर्तुमद्य बिम्बाधरक्षतिरियं धियमातनोति॥

வாரீர் வஞ்சகரே! உம்முடைய वेषसम्भोग चिह्नங்களை

சாடுவார்த்தைகளினாலே மறைத்தாலும் இந்த अधरक्षतं உம்முடைய

மின்னிடை மடவார் संश्लेषத்தை வ்யக்தமாக ஸூசிப்பிக்கிறது என்று நாச்சியார் அருளிச்செய்தார்.

पीताम्बरं कनकभूषणमन्यनार्यै दत्वा तदीयवसनाभरणानि धृत्वा।

वेषं प्रविश्य बहुदोषविदूषितस्त्वं खेदं करोषि पुरुषोत्तम मानसे मे॥

வாரீர் புருஷோத்தமரே! தேவரீர் சாத்தியருளின पीताम्बरத்தையும்,

दिव्याभरणங்களையும் அவர்களுக்குக்கொடுத்து, அவர்களுடைய வஸ்த்ரங்களையும் ஆபரணங்களையும் சாற்றிக்கொண்டு

धूर्तवेषத்துடனே எங்கள் முன்னே நிற்க வேண்டாம். நம்முடைய

மனஸ்ஸானது மிகவும் अवसादத்தை அடையா நின்றது என்று நாச்சியார் அருளிச் செய்தார்.

श्रीभगवानुवाच-

देवि प्रसीदसि न चेत् मयि का गतिर्मे त्वत्प्रत्ययार्थमधुना पुरतस्तवाहम्।

वह्निं प्रविश्य पुनरेव विषं पिबामि मज्जामि वांबुषु तुलां प्रविशामि वाऽथ॥

मज्जाम्यंभसि वा स्पृशामि फणिनश्शीर्षं विशामि क्षणात्

ज्वालामालसमाकुले शिखिनि वा नोचेत् प्रसादो मयि।

अत्युग्रेष्वपि निर्झरेषु कथितं दिव्यं त्वया विश्रुतम्

कृत्वाहं दयिते शुचित्वमधुना यास्यामि रोषेण किम्॥

வாரீர் प्राणेश्वरिயே! நீர் நம்முடைய விஷயத்தில் கோபித்தீராகில் நமக்கே கதி எங்ஙனே. இனி நாம் உமக்கு நம்பிக்கையுண்டாகும்படி அக்நியிலே ப்ரவேசிக்கிறோம். காலகூட விஷத்தை பாநம் பண்ணக்கடவோம் அல்லது துலாரோபணம் பண்ணுகிறோம். நாம் ஸமுத்திரத்திலே மூழ்குகிறோம். ஸர்பத்தினுடைய தலையை தொடுகிறோம். இப்படிப்பட்ட சபதங்களாலே நாம் உமக்கு

प्रत्ययத்தை உண்டாக்கக்கடவோம் என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

रोषस्तवैष दहनो वदनात्प्रसूतः स्तन्यं बभूव गरलं शयनं फणीन्द्रः।

पाथो निकेतनमभूत् प्रथमावतारे कुक्षौ द्विसप्तभुवनानि कथं तुला ते॥

कल्पान्तवारिणि शयस्य जलेन किं ते

शय्या तवोरगपतिः गरुडध्वजस्त्वम्।

संक्रन्दनादिमरुतस्तव सेवकास्ते कः कृष्णवर्त्मनि करिष्यति मानशुद्धिम्॥

வாரீர் புருஷோத்தமரே! मुखादिन्द्रश्चाग्निश्च என்று தேவரீருடைய முகத்திலே நின்று அக்னியானது உண்டாயிற்று,

सहस्रादित्य सङ्काशं सहस्ररविवह्नीन्दु लक्षकोटिसमप्रभं

கதிராயிரமிரவி கலந்தெரித்தாலொத்த நீண்முடியன் என்னுஞ்சொல்லுகிறபடியே தேவரீருடைய திருமேனியொளியிலே பரமாணுமாத்ரமாயிருக்கிற அக்னியானவன் தன்னுடைய

दाहकशक्तिயை தேவரீர் திறத்தில் காட்ட க்ஷமனோ?

स्तन्यं सद्विषंमिश्रं रस्यमासीज्जगद्गुरोः என்று விஷமம்ருதமாயிற்று,

भोगिभोगेसुखासीनः என்றும்,
சென்றால் குடையாம் இருந்தால் சிங்காசனமாம்
நின்றால் மரவடியாம் நீள்கடலுள் என்றும் புணையாம்
மணிவிளக்காம் பூம்பட்டாம் புல்கும் அணையாம் திருமாற்கரவு –
என்கிறபடியே எப்போதும் திருவனந்தாழ்வான் பேரில்

வீற்றிருந்தருளும் स्वभावमிருக்க அர்ப ஸர்பத்தின் தலையில்
கைவைப்பது வருத்தமோ? ஸதா நிரபேக்ஷமாய், நிர்விகாரராய்
எழுந்தருளியிருக்கிற தேவரீருக்கு பாற்கடலுள் பையத்துயின்றபரமன்
என்றும் பார்கடலில் பள்ளியமர்ந்ததுவும் என்றும் இத்யாதிகளில்
சொல்லுகிறபடியே திருப்பாற்கடலிலே கண்வளர்ந்தருகை

எப்போதுமுண்டாயிருக்க प्रथमावतारமான मत्स्यावतारத்தில்
ஸமுத்ரம் வாஸஸ்தானமானதாலும் ஜலத்துக்குள்ளே
அமிழ்ந்திருக்கை பெரிய வருத்தமோ?

मुग्धशिशुः वटतले शयितोतितन्व्या तन्वा जगन्ति बिभृषे सविकाशमेव
அண்டமும் நாடுமடங்க விழுங்கிய கண்டமென்றும்,
உலகேழும் விழுங்கியுமிழ்ந்திட்ட பெருந்தேவன் என்றும்
சொல்லுகிறபடியே பதினாறு லோகங்களையும் வயிற்றிலே
அடக்கிவைத்திருக்கிற தேவரீருக்கு எதிராக ஒருவஸ்து
இல்லாமையாலே துலாரோஹணமும் செல்லாது. இனி உமக்கு
ப்ரமாணமாவது எது ஏன்? என்று நாச்சியார் அருளிச்செய்தார்.

श्रीभगवानुवाच-

भूत्वा रघूद्वहकुले भुवनेश्वरोऽहं त्वामेव देवि जनकेन्द्रसुतामवाप्य।

पत्न्यन्तरे विमुखवृत्तिरशेषलोके प्रख्यातशुद्धचरितः खलु ते वियोगे॥
வாரீர் ஜநகேந்தர புத்ரியே! நாம் ரகு குலத்திலே அவதரித்து

मण्डलाधिपत्यத்தையடைந்து உம்மை பத்நியாயடைந்த

ராமாவதாரத்தில் நம்முடைய एकदारव्रततत्त्वம் ஸமஸ்தரும் அறியும்படி
நீரும் அறிவீர் என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

कृत्वा हि जन्म वसुदेवकुले निगूढं गोपालभूपतनयत्वमवाप्य भूयः।

जानामि षोडश-सहस्रवराङ्गनाभिः आलिङ्ग्य तस्य तव कंसरिपोश्चरित्रम्॥

गोपिकासु विविधैरभ्यस्तवाक्यैरलम्।

வாரீர் க்ருஷ்ணனே! உம்முடைய மாஹாத்ம்யம் ஸகலரும் அறியும்படியாக வஸுதேவ குலத்தில் அவதரித்து, நந்தகோபால க்ருஹத்தில் வளர்ந்தருளி பஞ்சலக்ஷம் गोपகந்யகைகளையும் परिग्रहिத்து, பின்பு अष्टमहिषिகளையும் பரிணயித்து, பதினாராயிரம் ராஜ கன்னிகைகளையும் ஒரு முஹூர்த்தத்தில் விவாஹம் பண்ணியும், இப்படி बहु विनोदமான சரித்ரத்தை நாங்கள் அறிவோம் என்று நாச்சியார் அருளிச்செய்தார்.

श्रीभगवानुवाच-

सम्भूतदिव्यमणिना च सहत्वयाते रम्भोरु पीनकुचकुम्भयुगेन सङ्ख्या।

गम्भीरभावमभवन् शपथं करोमि सम्भावयाशु परिरम्भणपात्रमेनम्॥

வாரீர் ரம்போருவே! உம்மோடே கூட பிறந்த कौस्तुभमणिதன்னை நமக்கு அத்யந்தம் व्यामोहविषयமாய் परमभोग्यமான உம்முடைய कुचकुम्भத்தாணை நமக்கு प्राणेभ्योऽपिगरीयसिயான தேவரீராணை. உமக்கு ஸகிகளான பூமி நீளைகளாணை, இப்படி शपथंபண்ணுகிற நம்மையும் நம் வார்த்தையையும் विश्वसिத்து கடாக்ஷித்தருள வேணும் என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

विलासविपिनान्तरे विगलितं सखीहस्ततः

गृहीतमतुलं त्वया दयित कन्दुकं मामकम्।

प्रदाय पुनरेहि मे मणिगृहं प्रविश्य स्थितिं

करोतु सुकरीकृता त्वयि दया हि मां बाधते॥

வாரீர் புருஷோத்தமரே! நாம் ஸகிகளுடன் விளையாடும் சூழலிலே பந்தாடுகிற ஸமயத்தில் தரையிலே விழுந்த மாணிக்கப்பந்தை எடுத்துக்கொண்டீர். இப்போது அந்த பந்தை நமக்குக் கொடுத்து நம்மோடே ஸ்நேஹம் பண்ணக்கடவீர் என்று
நாச்சியார் அருளிச்செய்தார்.

श्रीभगवानुवाच-

अलङ्कृतं यातु सुकन्तुकोऽयं करारविन्दे विधृतो भवत्या।

अयं जनोप्यंबुधि-राजकन्ये विलासवीक्षोत्पलदामभिस्ते॥

வாரீர் க்ஷீரஸாகர கன்னிகையே! உம்முடைய மணிப்பந்தை திருவுள்ளம் பற்றவேணும். இந்த பந்தை திருக்கையிலே தரித்து நம்மை கடாக்ஷித்தருளீர் என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

हा हन्त हन्त मणिकन्दुकमस्मदीयं रन्तुं प्रदाय कितवः कुटिलालकानाम्।

अन्यं ममार्पयति संप्रति निस्त्रपोऽसौ

कौटिल्यमेव भजते कठिनः कृशोऽपि॥

வாரீர் ஸகிகாள்! நம்முடைய மணிப்பந்தை இவர் தமக்கு வேண்டினபேருக்குக் கொடுத்து அவர்களுடைய பந்தைக்

கொண்டுவந்து பயமில்லாமல் நம்மெதிரே நிற்கிறார். धूर्तனானவன்

தமக்கு बहु ஆபத்து வந்தாலும் தன்னுடைய வஞ்சனையை விடான் என்கிறபடியைக்காணீர் என்று நாச்சியார் அருளிச்செய்தார்.

सख्यः शमं मम गिरा करुणां विहाय स्वैरं प्रहृत्य परिचारजनं च तस्य।

गेहादितः सरभसं च निरासयध्वं द्वारं कवाटविहितं कुरुत प्रगल्भाः॥

வாரீர் தோழிகாள்! धूर्तधुरन्धरனான இவரையும் இவருக்கு ஸ்நேஹிகளான பரிஜனங்களையும் கூட

दाक्षिण्यத்தை விட்டு गाढமாக ப்ரஹரித்து நம் கோயில் நின்றும் வெளியிலே தள்ளி நேசநிலைக்கதவையும் சாத்திப்போருங்கள் என்று நாச்சியார் அருளிச்செய்தார்.

श्रीभगवानुवाच-

मध्यस्थ एव कुसुमाद्युदितेषु योगिषु अब्जालये प्रणयरोषवतीमसौ त्वाम्।

श्रुत्वा त्वदीयपदयोः प्रणतिं विधाय कर्तुं समां भगवति स्वयमागतोऽत्र॥

त्यज हृदि वलमानं मानमेनं निरीक्ष्य

प्रणिपतनपरोऽस्मि प्राप्तसान्द्रापराधः।

सुतनु जनकपुत्रि कोमलाभ्यां कराभ्याम्

अनितरशरणोऽस्मिन् अङ्गपालीं विधेहि॥

வாரீர் ஜனகபுத்ரியே! உம்முடைய திருவுள்ளத்து கலக்கமறிந்து

मध्यस्थராக நம் ஸேனைமுதலியார் உம்முடைய திருவடிகளில்

ஸாஷ்டாங்கமாக தண்டன் ஸமர்ப்பித்து நம்முடன் बद्धाञ्जलिपुटராய் ஸேவித்து இருக்கிறார். அவரை கடாக்ஷித்து நம்முடைய

सर्वापराधங்களையும் க்ஷிமித்து தேவரீர் திருக்கைகளாலே நம்மை

गाढालिङ्गनंபண்ணி கடாக்ஷித்தருள வேணும் என்று பெருமாள் அருளிச்செய்தார்.

श्रीरमोवाच-

आद्येषु भक्तकविषु प्रथमश्च सोऽयम् अद्यागतः कविवरो मम पादपद्मम्।

अस्मिन् प्रसादकलया शमितारुषो मे मत्पार्श्वभागमवलम्बय माधवेहि॥

வாரீர் மாதவனே! நம்முடைய ஸந்நிதியிலே உமக்காக ஸாஷ்டாங்கமாக தண்டன் ஸமர்ப்பித்து விண்ணப்பம் செய்த நம்

ஸேனைமுதலியாரைக் கடாக்ஷித்து உம்முடைய सर्वापराधங்களையும்

க்ஷிமித்தோம். இனியாகிலும் माधवன் என்கிற திருநாமத்தை

स्थिरமாக்கக் கடவீர் என்று நாச்சியார் அருளிச்செய்தார்.

श्रीभगवानुवाच-

नाम्नां सहस्रमिति ये नलिनाक्षि लोके

शंसन्ति सात्त्विकजनाः पुनरन्यदेतत्।

लक्ष्मीपदाम्बुजयुगाञ्चितमस्तकोऽयं

सन्ताड्यतां त्रिषु जगत्स्विति डिन्डिभो मे॥

வாரீர் நளினாக்ஷியே! லோகத்தில் ஸாத்விகஜீவகோடிகள் நம்மை

பேராயிரமுடையான் என்றும் देवो नामसहस्रवान् என்றும்

शाशனிக்கிறார்கள். அதில் நமக்கு पर्याप्तिயில்லாமையாலே,

இப்போது நம்மை लक्ष्मीपादाम्बुजाञ्चितमस्तकன் என்று ஒரு திருநாமம்

प्रसिद्धமாகக்கடவது என்று डिन्डिभ வாத்யமானது மூன்று லோகங்களுக்கும் கேட்கும்படி அடிக்கத்தக்கினது என்று பெருமாள் அருளிச்செய்தார்.

रोषं विहाय जगतां जननी कथञ्चित् प्राणेश्वरं प्रणतमौलिमथाशु हर्षात्।

उत्थाप्य बाहुलतया परिरभ्य गाढम् आनन्दसागरनिमग्नममुं चकार॥

सर्वलोकमाताவான பிராட்டியார் प्रणतमस्तकராயும் लोकभर्ताவான

பெருமாளை भर्तारं परिषस्वजे என்று தம்முடைய திருக்கைகளாலே

गाढालिङ्गनம் பண்ணி आनन्दसागरान्तर्निमग्नராகப் பண்ணி

तच्छायानुवृत्तिनिயாய் நின்ற நிலை. கொந்தலரும் பொழில் சூழ் தென்ராசையில் வாழும் கோவிந்தரே எங்கள் நாச்சியார் தேவரீரைத்திருவுள்ளமுகந்து அருளினமையாலே தேவரீரை

வஞ்சமிலா நெஞ்சராய் இங்கேயே எழுந்தருளியிருமென்று அருளப்பாடு இட்டருளா நிற்கிறார்கள். ஆகையாலே,

தென்ராசை மன்னனே, மாணிக்கமே लीलाविलासोपकரணங்களை திருமுன்காணிக்கையாகக் கொண்டு, எங்கள் நாச்சியாரும் தேவரீரும் சாத்தியருளின திருப்பரிவட்டமும், சூடிக்களைந்த பரிமளஸுகந்தத் திருமாலையும் இருபேரும் மாறி மாறி விநியோகம் கொண்டருள அருளப்பாடு.

इति पठित्वा। भगवतीं प्रार्थ्य।

हे लक्ष्मीर्भगवानद्य भक्तरक्षणकाम्यया।
बहिर्गतो नान्यथा त्वं मन्तुमर्हसि पद्मजे॥

इति प्रार्थ्य। देव्या सह देवस्य नीराज्य। एकासने देवदेव्यौ सन्निवेश्य। यथाविधि पूजयित्वा। चतुर्विधान्नं -फलवर्गताम्बूलादीन् निवेद्य। नीराज्य। विविधैः स्तोत्रैः स्तुत्वा। ततः तौ यानमारोप्य। आदर्शमण्डपे शय्यायां तौ निवेश्य। अर्धरात्रिपूजां कृत्त्वा। प्रभाते स्वस्व सन्निधौ निवेश्य। मूले शक्तिं नियोज्य। उत्सवान्त-क्षमापनं कृत्त्वा।

गजार्तिहर लक्ष्मीश प्रणयोत्सवमद्य ते।
कृतं त्वनादरं किञ्चित् तत्क्षन्तव्यं दयानिधे॥

इति प्रार्थ्य। अनन्तरं प्रातर्नित्याराधनं कारयेत्॥

*****प्रणयकलहोत्सव विधिः सम्पूर्णम्*****

## फाल्गुनोत्सवः

अथ फाल्गुनोत्सव-विधिरुच्यते। शिञ्जानपक्षिसङ्कुले -महाबिल्ववने -मध्ये पुष्करशोभित-महातटाकतीरे -प्राकारपरिवेषण -सौवर्ण-बहुकल्याण-रत्नस्तम्भसमन्वित -कल्पकद्रुममण्डित -चतुर्द्वारयुत-मण्डपं कल्पयित्वा। अथवा आलये बहिर्मण्डपं वा समलङ्कृत्य। तन्मध्ये कर्णिका-केसरोपेत -महाष्टदलपद्मसंयुत -रत्नसिह्मासनं निधाय। तत्र होमार्थं कुण्डं कल्पयित्वा। चतुर्द्वारेषु पालिका -पूर्णकुम्भैः -पक्षिभिः -तोरणैः -मुक्तादामैः अलङ्कृत्य। सर्वाणि द्रव्याणि सम्पाद्य। उत्सवमारभेत्॥

आचार्यः भगवत् सन्निधौ नित्याराधनानन्तरम् अस्य देवदेवस्य----फाल्गुनोत्सवकर्म करिष्ये तदङ्गं मण्डपादीनां शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं समस्त----विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं पुण्याहवाचनञ्च कृत्त्वा। तज्जलेन मण्डपं -होमकुण्डं -द्रव्याणि च संप्रोक्ष्य। तदनु कल्याणकौतुकं यानमारोप्य। वीरलक्ष्म्याः च एवं कृत्त्वा। तौ वेद -वाद्यघोषैः प्रादक्षिण्येन उत्सवमण्डपान्तः प्रविश्य। तत्रस्थ सिह्मासने देव्या समेतं देवं संस्थाप्य। आसनादिषु संपूज्य। भद्रासन दलेष्वष्टसु पूर्वादि चतुर्दलेषु - ओं वासुदेवाय नमः----ओं अनिरुद्धाय नमः आग्नेयादि चतुर्दलेषु –

| | |
|---|---|
| ओं गुग्गुलवे नमः | ओं दमकाय नमः |
| ओं कुरण्डाय नमः | ओं शललाय नमः |

सिह्मासन पादपार्श्वयोः - ओं शङ्खनिधये नमः - ओं पद्मनिधये नमः

सिह्मासनस्य परितः अष्टदिक्षु - ओं व्याप्त्यै नमः----ओं शान्त्यै नमः

ओं इन्द्राय नमः----ओं ईशानाय नमः

पूर्वादि चतुर्द्वारेषु –

| | |
|---|---|
| ओं बलाकिन्यै नमः | ओं वनमालिन्यै नमः |
| ओं विभीषिकायै नमः | ओं शाङ्कर्यै नमः |

इत्यभ्यर्च्य। देव्या सह देवम् अर्घ्यादिभिरभ्यर्च्य। अर्हण -उपवीतोपचार वर्जितेन देवीं सम्पूज्य। यथाभागमन्नं निवेद्य। नीराज्य। तयोः पुरतः कुण्डे अग्निं प्रतिष्ठाप्य। अग्निमध्ये श्रियं –वासुदेवञ्च आवाह्य। समिदन्नाज्य होमानन्तरं नानाविधपुष्पैः -पद्मैः -बिल्वपल्लवैः -समिद्भिः -आज्येन च श्रियाः मूलमन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। भगवदष्टाक्षरेण च एवं हुत्वा। तत्समये चतुर्दिक्षु ऋत्विजः श्रीसूक्तं पठित्वा। पूर्णाहुतिं हुत्वा। अग्निस्थौ उद्वास्य। देवीं विविधैः स्तोत्रैः स्तुत्वा।

## लक्ष्मीस्तोत्रम्

नमामि देवि! लोकानां जनयित्र्यब्जसम्भवे।
सर्वलोकेश्वरेशेश-वल्लभे दुर्लभेऽधमैः॥८८॥
वासुदेवाङ्गसंस्पर्श-सुखैकरसभाजने।
नमस्ते शुभदे देवि! देवानामधिदेवते॥८९॥
यदृच्छयापि ते येषु कटाक्षाः पतितास्सकृत्।
क्षुद्रेष्वपि प्रगल्भन्ते ते त्रिलोकेश्वराः क्रमात्॥९०॥
न स्पृशन्ति त्रिलोकेशानपि यान् वीक्षणानि ते।

सम्पाद्यन्ते क्षणात् क्षुद्रा नाकपृष्ठादपि च्युताः॥९१॥

लावण्यादिगुणा यत्र काष्ठामश्नुवते पराम्।

तानि त्वदीयान्यङ्गानि देवि कः स्तोतुमर्हति॥९२॥

त्वं माया त्वमविद्यासि वंशन्ती(त्वं शक्तिः) कर्मणामपि।

चैतन्यशक्तिस्त्वमसि प्रकृतिस्त्रिगुणात्मिका॥९३॥

त्वमेव विद्या त्रय्यन्ता त्रयी च त्वं परावरे।

यस्यास्तवायुतांशांशे देव्यो वागादयस्थिताः॥९४॥

सच्चिदानन्दरूपस्य परस्य परमात्मनः।

आनन्दादिमयी मूर्तिरविभक्ता भवत्यसि॥९५॥

प्रभासि तस्य नित्या त्वं भास्वतः परमात्मनः।

सन्ध्या त्वमसि विप्राणां वन्दनीया दिने दिने॥९६॥

भूर्भुवः स्वस्त्रयी च त्वं भूरसि त्वं भुवोऽसि च।

स्वरसि व्याहृतिश्चासि ऋग्यजुस्सामकारणम्॥९७॥

त्वमाहुतिस्त्वमिष्टिश्च दक्षिणासि त्वमेव च।

सिद्धिश्च कर्मणां त्वत्तो नान्यास्ति कमलालये॥९८॥

नीतिरान्वीक्षकी वार्ता विद्या चान्यासि लौकिकी।

दृष्ट्वा देवि त्वया हीनं मृतप्रायं जगत्त्रयम्॥९९॥

यत्नैरम्भोधिमथन-प्रायैराविर्बभूविथ।

आनुषङ्गिकमुत्पन्नं प्राप्तमप्सरसामपि॥१००॥

तादृगेवामृतादन्यदिन्दिरे हरिमन्दिरे।

हालाहलविषं चापि जन्मनः श्रेयसे तव॥ १०१॥

प्रत्यूहरूपेणोत्पन्नं क्षीरवारिधिसम्भवे।

अभ्यर्हिता तवोत्पत्तिरेवं नाम मधुद्विषः॥ १०२॥

कूर्मादितिर्यग्योनित्वं यत्प्राप्तं परमात्मना।

त्वं सर्वलोकजननी जनको जगतां हरिः॥ १०३॥

त्वया च विष्णुना चैतद्व्याप्तं स्थावरजङ्गमम्।

मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम्॥ १०४॥

मा शरीरं कलत्रं च त्यजेथा मा च सन्ततिम्।

श्रुतवान् शीलवान् दक्षो बुद्धिमान्वित्तवानृजुः॥ १०५॥

वृत्तवान् बन्धुमान् श्रीमान् पशुमान् धान्यवानपि।

गुणवान् कीर्तिमान् लोके तथाभिजनवान् प्रभुः॥ १०६॥

आयुष्मान् विजयी भूमांस्तथैवारोग्यवानपि।

श्लाघ्यवान् देवि पुरुषः कटाक्षविषयात्तव॥ १०७॥

गुणैर्यथोक्तै रहितस्त्वद्दर्शनविवर्जितः।

क्रीडाभूमिर्हरेर्यस्या वक्षोभूमिस्सनातनी॥ १०८॥

आनन्त्यात्तव कल्याणि गुणानां वर्णने क्षमः।

न वाचस्पतेरन्येषां दूरे स्यान्मादृशां स्थितिः॥ १०९॥

प्रसीद देवि पद्मे त्वं पद्महस्ते शुचिस्मिते।

पद्मासने पद्मयोनेर्जनयित्रि हरिप्रिये॥ ११०॥

पद्मप्रिये नमस्तुभ्यं विष्णोर्वक्षःस्थलालये।

स्तुत्यन्तमित्थमाराध्या देव्यस्सर्वाः श्रियादयः॥१११॥ - पाद्मे - १५

इति प्रार्थ्य। पुष्पाञ्जलिं समर्प्य। नीराज्य। तयोः निवेदितान्नं सर्वेभ्यः श्रीवैष्णवेभ्यः भक्तेभ्यः दद्यात्॥

देव्या सह देवं यानमारोप्य। स्वस्व सन्निधौ निवेश्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

*****फाल्गुनोत्सवविधिः संपूर्णम्*****

श्रीः

## श्रियाः महोत्सवः

अथ लक्ष्मीमहोत्सव-विधिरुच्यते। वीरलक्ष्म्युत्सवार्थं सर्वं सम्पाद्य। भगवदुत्सववत् यागशालालङ्करणं कृत्त्वा। उत्सवं कारयेत्॥

आचार्यः आलयमासाद्य। वीरलक्ष्म्याः सन्निधौ सायमाराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। महोत्सवार्थं देवीं प्रार्थ्य।

ओं नमस्सिन्धुसंभूते! नमश्चन्द्रसहोदरि!।
नमस्सरोरुहावासे! वासुदेवकुटुम्बिनि!॥
त्वन्महोत्सवसिद्ध्यर्थमनुज्ञां देहि मे रमे।
नियोजयतु सेनान्यं मृत्सङ्ग्रहण कर्मणि॥ इति प्रार्थ्य।

अस्याः देवदेव्याः -जगज्जनन्याः -श्रीवत्सवासिन्याः -

पुरुषाकारस्वरूपिण्याः -भगवत्याः -महालक्ष्म्याः----नायक्याः सन्निधौ

राजराष्ट्राभिवृद्ध्यर्थं -लोकक्षेमार्थं----वत्सर----मास----दिन महोत्सवकर्म

कर्तुम् अनुज्ञां देहि मे रमे। स्वामिनि अनुमन्यतां----नायिके अनुमन्यताम्

इति प्रार्थ्य। आचार्यः सभानुज्ञां लब्ध्वा। देशकालौ सङ्कीर्त्य।

अस्याः देवदेव्याः----लोकक्षेमार्थं----वत्सर----मास----दिन

महोत्सवकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं -

वासुदेवपुण्याहवाचनं कृत्त्वा। (अथवा ओं सुमुख्यै नमः इति सुमुखी

आराधनं कृत्त्वा) मृत्सङ्ग्रहणे -स्वातन्त्र्ये ह्रीमतीम् आहूय।

लक्ष्मीमहोत्सवार्थं त्वं देव्याज्ञप्त मया सह।

मृदमानेतु मा याहि विष्वक्सेनकुटुम्बिनि॥

इति ह्रीमतीं प्रार्थ्य। पारतन्त्र्ये -विष्वक्सेनमाहूय। मृत्सङ्ग्रहणं कृत्त्वा।

नवरात्र्युत्सव विधिवत् अङ्कुरार्पणं कुर्यात्॥ भगवन् महोत्सव विधिवत्

ध्वजप्रतिष्ठां कृत्त्वा। ध्वजे गरुडम्*1 आवाह्य। प्रभाते महूर्ते देव्याः

सन्निधौ नित्याराधनात्परं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -यागशालाशुद्ध्यर्थं

-ध्वजस्तम्भशुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा।

तज्जलेन रक्षासूत्रादीन् संप्रोक्ष्य। पूर्ववत् रक्षाबन्धनं कृत्त्वा।

1) பெருமாளைப் போலவே தாயாருக்கும் கருடன் தான் வாஹனம், புராணங்களிலோ, பாஞ்சராத்ரத்திலோ தாயாருக்கென்று தனியாக ப்ராதான்ய வாஹனம் சொல்லப்படவில்லை. ஆகையால் கருடக்கொடி எழுதுவதே சுபம். சிம்மக்கொடி, யானைக்கொடி இவைகள் அனுஷ்டானத்தில் இருந்தாலும் அதற்கு ப்ரமாணங்கள் இதுவரையில் கிடைக்கவில்லை.

अनन्तरं देवीं ध्वजारोहणमण्डपे संस्थाप्य। विधिवत् गरुडतालं ध्वजारोहणञ्च कृत्त्वा।

महालक्ष्मि! महादेवि! त्वन्मुखोल्लास सिद्धये।

महोत्सव ध्वजारोहो बालिशेन मया कृतः॥

प्रमादात् स्खलितं यद्यत् तत्क्षमस्वाब्जमालिनि।

इति विज्ञाप्य। देवताह्वाने – "श्रीदेव्युत्सव सेवार्थम् आगच्छन्तु महोत्सवे" इति वचनेन सर्वान् देवान् आहूय। देव्याः नवरात्र्युत्सव विधिवत् यागशाला-द्वारपूजा -चयुस्थानार्चनञ्च कृत्त्वा। होमे - सर्वद्रव्यैः ओं श्रीं श्रियै नमः स्वाहा इति हुत्वा।

<u>बलिदान विधिः</u>

गर्भगृहद्वारे - ओं चण्ड्यै नमः - ओं प्रचण्ड्यै नमः

अर्धमण्डपद्वारे - ओं बलाकिन्यै नमः - ओं वनमालायै नमः

महामण्डपद्वारे - ओं जयायै नमः - ओं विजयायै नमः

अग्रे - ओं गरुडाय नमः

ऐशान्ये - ओं सुमुख्यै नमः इति प्रासादबलिं दत्त्वा। देव्याः रथ्यावरणमध्ये ओं ब्रह्मणे नमः इत्यारभ्य इन्द्रादिषु च बलिदानं कृत्त्वा। महापीठे – ओं सर्वाभ्यो श्रीमहालक्ष्मिपार्षदाभ्यो नमः इति पूर्ववत् बलिं दद्यात्॥

देव्याः प्रथमोत्सवादि नवमोत्सवान्तं क्रमेण गज -सिह्म -हंस -गरुड -शेष -चन्द्र -सूर्य -अश्व -रथ वाहनेषु देवीम् आरोप्य। पूर्ववत् प्रासादान्तर्भ्रमणं कृत्त्वा। स्वातन्त्र्ये वीथिभ्रमणं कृत्वा। नवमोत्सवे रथोत्सवान्ते

तीर्थदेवीं संस्नाप्य। ताटाकादिषु वा आलये कटाहे वा अवभृथं कुर्यात्।
सायाह्ने चतुस्थानार्चनं पूर्णाहुत्यन्तं विधाय। कर धृताङ्कुरपात्रेण आचार्यः पालिकादर्शनं कृत्त्वा।

नमः पद्मालये पद्मे पद्मजादिभिरर्चिते।
विचित्रमणिमञ्जीर विलसत्पादपल्लवे॥
दुकूल दिव्यवसने मेखलाद्यैरलङ्कृते।
विचित्रकञ्चुकेनाढ्ये रत्नग्रैवेयकोज्ज्वले॥
मुक्ताप्रवालहारादि माङ्गल्यमणिभूषिते।
रत्नताटङ्कसंलग्न कपोलस्थलशोभिते॥
विलसद्रत्नखचित किरीटेन विराजिते।
यथोक्तं न कृतंकर्म बालिशेन मया रमे॥
न्यूनाधिक्योपशान्त्यर्थं गृहाणाङ्कुरपूजनम्। इति विज्ञाप्य।

श्रियाः पादयोः श्रीसूक्तेन अङ्कुरान् समर्प्य। देवीं शिबिकायाम् आरोप्य। पूर्ववत् परिभ्रम्य। ध्वजस्तम्भाभिमुखं संस्थाप्य। ध्वजावरोपणं - गरुडोद्वासनञ्च पूर्ववत् कृत्त्वा।

उद्वासन पटने - "एनं स्वस्थानयानार्थमाज्ञापय हरि प्रिये" इति वाचयित्वा।
ततः देवीं सन्निधौ निवेश्य। महाकुम्भ प्रोक्षणादि सर्वं पूर्ववत् कृत्त्वा।
भगवतीं प्रार्थ्य।

नमः श्रीवत्सनिलये श्रुतितत्त्वस्वरूपिणी।
पूर्णेन्द्वयुततुल्याभे फुल्लपद्मोदर प्रभे॥

सर्वलक्षण सम्पन्ने सर्वज्ञादि गुणैर्युते।

सुपार्श्वद्वयरुद्राणी वाणी वीजितचामरे॥

आद्रापराध देवारिपत्नि संरक्षणक्षमे।

नमस्त्रय्यन्त निलये मन्त्रशक्तिस्वरूपिणी॥

मया कृत्याकृतं यद्यदकृतं तत्क्षमस्व मे।

तत्सर्वं पूर्णमेवास्तु सुतृप्ता भव भार्गवि॥ इति प्रार्थ्य।

पुष्पाञ्जलिं समर्प्य। दण्डवत् प्रणम्य। यजमानः गुरोः ऋत्विजानाञ्च उक्त दक्षिणान् दत्त्वा। अर्धरात्रिपूजां कारयेत्॥

***** श्रीलक्ष्मी महोत्सवं सम्पूर्णम्*****

श्रीः

## श्रीराम जन्मोत्सवः

अथ परतन्त्रालय श्रीरामजन्मोत्सव-विधिरुच्यते। उत्सवार्थं सम्भारान् पूर्वं सम्पाद्य। उत्सव दिनात् पूर्वेऽहनि आचार्यः भगवत्सन्निधौ सायं नित्याराधन संपूर्णेन विशेषयजनं कृत्त्वा। भगवदालयाश्रित श्रीरामसन्निधिं समासाद्य। जन्मोत्सवार्थं प्राथ्र्य।

देवया सीतया सार्धं लक्ष्मणेनानुजेन च।

रावणस्य वधार्थाय राक्षसेशस्य सत्तम!॥

सम्भूतो मानुषे लोके तस्मै रामाय ते नमः।

जन्मोत्सवमहंकर्तुम् अनुज्ञां देहि मे प्रभो॥

इति प्रार्थ्य। आसने उपविश्य। अस्य देवदेवस्य----लोकक्षेमार्थम् आलयाश्रित श्रीसीता लक्ष्मण हनुमत् समेत श्रीरामचन्द्र स्वामि-सन्निधौ ----दिनात्मक श्रीरामजन्मोत्सवकर्म करिष्ये तदङ्गं तत् पूर्वाह्ने अङ्कुरावापनार्थं मृत्सङ्ग्रहणकर्म करिष्ये तदङ्गं----शुद्ध्यर्थं वासुदेव पुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। विधिवत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणञ्च कृत्त्वा। अङ्कुरान् अर्पयेत्॥

प्रभाते भगवन्नित्याराधनात्परं श्रीसीता लक्ष्मण हनुमत् समेत श्रीरामचन्द्रस्य उत्सवबिम्बानां (मूलबिम्बे वा) रक्षाबन्धनं कृत्त्वा। तान् यानमारोप्य। स्नपनमण्डपे स्नानासने संस्थाप्य। तैलाभ्यङ्गं मङ्गलचूर्णस्नानञ्च कृत्त्वा। ततः मध्यमोत्तममार्गेन*1 वा अधमोत्तमेन*2 वा नवकलशैः वा श्रीरामं संस्नाप्य। सर्वाभरणैः -क्षौमवस्त्रैः -धनुर्बाणायुधैः श्रीरामं परिकरञ्च अलङ्कृत्य। यानमारोप्य। गेह प्रादक्षिण्येन यागशालायां संस्थाप्य। चतुस्थानेषु सम्पूज्य। महाकुम्भे -मण्डलमध्ये अग्नौ च ओं नमो भगवते वासुदेवाय चतुर्मूर्तिमयाय अभिरामशरीराय रामाय स्वाहा इति मन्त्रेण वासुदेवात्मकं श्रीरामचन्द्रम् आवाह्य। भगवदुत्सवविधिवत् सर्वं कृत्त्वा। अग्नौ समिधः मूलमन्त्रेण आज्येन -प्रणवेन प्रत्येकम् अष्टाविंशत्याहुतीः हुत्वा। चरुणा पुरुषसूक्तेन हुत्वा।

---

१)मध्यमोत्तम-कलशानि -२७७, २)अधमोत्तम-कलशानि - ८१

अनन्तरम् आज्येन विष्णुसूक्तेन हुनेत्॥

अथोदेवा----सप्तधामभिः स्वाहा।

इदं विष्णु----सुरे स्वाहा।

त्रीणिपदा----दारयन् स्वाहा।

विष्णोःकर्माणि----सखा स्वाहा।

तद्विष्णो----आततम् स्वाहा।

तद्विप्रासो----पदम् स्वाहा।

विष्णोर्नुकं----रुगाय स्वाहा।

विष्णोरराटमसि----विष्णवेत्वा स्वाहा।

तदस्वप्रिय----मदन्ति स्वाहा।

उरुक्रमस्य----मध्व उत्स स्वाहा।

प्रदद्विष्णु----गिरिष्ठाः स्वाहा।

यस्योरुषु----विश्वा स्वाहा।

परोमात्रया----श्नुवन्ति स्वाहा।

उभेते----विथ्से स्वाहा।

विचक्रमे----दशस्यन् स्वाहा।

ध्रुवासो----चकार स्वाहा।

त्रिर्देवः----हित्वा स्वाहा।

प्रविष्णु----नाम स्वाहा

इति हुत्वा। राममूलमन्त्रेण आज्येन शताहुतीः हुत्वा।

ओं नमो भगवते वासुदेवाय वौषट् स्वाहा इति आज्येन हुत्वा। स्विष्टकृदादि पूर्णाहुत्यन्तं दत्त्वा। सर्वान् उद्वास्य। महाकुम्भजलेन श्रीरामं सीतादीञ्च संप्रोक्ष्य। तान् यानमारोप्य। उत्सवार्थं बहिर्मण्डपे भद्रासने डोलायां वा संस्थाप्य।

## अर्घ्यदानम्

रामस्य समीपे कौसल्या समेत दशरथं संस्थाप्य। सर्वेभ्यः विधिवत् सम्पूज्य (दशरथ अभावे रामस्य समीपे कुम्भं निधाय तौ आवाह्य)। श्वेतपद्मैः -बिल्वपत्रैः -करवीरैः -चम्पकैः -नन्द्यावर्तैः -अशोकैः रामम् अर्चयित्वा। ओं दाशरथाय विद्महे धनुर्धराय धीमहि तन्नो रामः प्रचोदयात् इति राम-गायत्र्या ओं रां रामाय नमः इदमर्घ्यम् इति शङ्खेन क्षीरार्घ्यं दत्त्वा। अथवा

दशानन वधार्थाय भक्तानां रक्षणाय च।

गृहाणार्घ्यं मयादत्तं कौसल्यातनय प्रभो!॥ ओं रां रामाय नमः इदमर्घ्यम्

राक्षसानां विनाशाय दैत्यानां निधनाय च।

गृहाणार्घ्यं मयादत्तं कौसल्यातनय प्रभो!॥ ओं रां रामाय नमः इदमर्घ्यम्

धर्मसंस्थापनार्थाय जातोरामस्वयं हरिः।

गृहाणार्घ्यं मयादत्तं भ्रातृभिस्सहितोऽनघ!॥ ओं रां रामाय नमः इदमर्घ्यम्

इति वा क्षीरार्घ्यं दत्त्वा। तत्काले यजमानेन आचार्याय हेमाङ्गुलीयं -गो -भू -तिल -हिरण्य -आज्य -रौप्य -गोग्रास दानानि च दत्त्वा। ततः आचार्यः सर्वेभ्यः विप्रेभ्यः यथाशक्ति दानादि(धान्य) च कृत्त्वा। भोज्यासने

सूपसहितं -घृताप्लुतं -सोपदंशं -महाहविः निवेद्य। गुड -पायस -कृसरान्नानि च दध्यन्नानि च पानकानि सक्तूञ्च -अपूपादि भक्ष्यानि -फलवर्गानि -पञ्चचूर्णानि च सुगन्ध-मुखवास ताम्बूलादीञ्च निवेद्य। नीराज्य। विविधैः स्तोत्रैः स्तुत्वा।

वामे भूमिसुता पुरस्तु हनुमान् पश्चत्सुमित्रासुतः

शत्रुघ्नो भरतश्च पार्श्वदलयोरग्न्यादिकोणेषु च।

सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्

मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम्॥ - (शेषसंहिता – ९)

रावणस्य वधार्थाय राक्षसेशस्य सत्तम!।

सम्भूतो मानुषे लोके तस्मै रामाय ते नमः॥ - (पाराशर्यै – ६)

श्रीमते श्रीनिवासाय रामाय श्रीधराय च।

इक्ष्वाकु-कुलरत्नाय सर्वभूतहिताय वै॥

कौसल्यानन्दन! देव! प्रणमामि पुनः पुनः।

प्रसन्नो भव देवेश! स्वीकुरु पूजनं मम॥ - (वैहायसी - १५)

परात्परं विभुं देवं वैशेषपरमात्मकम्।

चापबाणधरं धीरं रामं सीतापतिं भजे॥ - (शेषसंहिता - ५३)

आकर्णमाकृष्ट धनुर्गुणोद्यद्ब्रह्मास्त्र लक्ष्मीकृतराक्षसेन्द्रम्।

रथाधिरूढं रणरङ्गधीरं रामं भजे रक्तसरोरुहाक्षम्॥ - (शेषसंहिता - २६)

इति प्रार्थ्य। भगवन्निवेदितान्नं सर्वेभ्यः भक्तेभ्यः दद्यात्। ततः ब्राह्मणान् भोजयित्वा। सायाह्ने सीता लक्ष्मण हनुमत्समेत रामचन्द्रं याने वा पुष्पकविमाने वा समारोप्य। मङ्गलवाद्यैः सह वीथिभ्रमणं कृत्त्वा। वीथिषु देवस्य पुरतः जनाः चन्दनचूर्णैः -तैलैः -अङ्गरागैः -जलमिश्रितैः हरिद्राचूर्णैः -पुष्पैः अन्योन्यं सिञ्चेत्। सर्वनृत्त -गीतादीन् दर्शयित्वा। आलयान्तः प्रविश्य। पुनः तान् संस्नाप्य। अलङ्कृत्य। स्वसन्निधौ निवेश्य। अर्धरात्रि पूजां कृत्त्वा। रामागारं नास्तिचेत् वा रामबिम्बाभावे पूर्वं सर्वं भगवदुत्सवबिम्बेन कुर्यात्॥

यजमानः आचार्याय सर्वेभ्यश्च उक्त दक्षिणां दद्यात्॥

परेऽहनि पुष्यनक्षत्रे -मीनलग्ने माण्डवी समेतं भरतं ओं भं भरताय नमः ओं माण्डव्यै नमः इति सम्पूज्य। विशेषोत्सवं कृत्त्वा। तदपरेऽहनि आश्लेषा नक्षत्रे कटकलग्ने ऊर्मिला समेतं लक्ष्मणं ओं लं लक्ष्मणाय नमः ओं ऊर्मिलायै नमः इति सम्पूज्य। तत्समानकाले श्रुतकीर्ति समेतं शत्रुघ्नं ओं शं शत्रुघ्नाय नमः ओं श्रुतकीर्त्यै नमः इति सम्पूज्य। विशेषोत्सवं विधाय। यद्वा रामस्य जन्मोत्सवे सर्वेभ्यः सम्पूजयेत्॥

***** श्री परतन्त्रालय रामजन्मोत्सवं सम्पूर्णम्*****

श्रीः

## <u>श्रीराम महोत्सवः</u>

अथ स्वतन्त्रालय श्रीरामजन्मोत्सव-विधिरुच्यते। पूर्ववत् सम्भारान् पूर्वं सम्पाद्य। भगवदुत्सववत् यागशालालङ्करणादि सर्वं कृत्वा। उत्सवं कुर्यात्॥

आचार्यः आलयमासाद्य। श्रीराम-सन्निधौ सायमाराधनानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। महोत्सवार्थं श्रीरामं प्रार्थ्य। अस्य देवदेवस्य----सुग्रीव-विभीषणादि संसेव्यमानस्य -आञ्जनेयादि समस्त वानरसैन्य नमित पादपद्मस्य -जगत्कुटुम्बिनः -जगद्रक्षणार्थमवतीर्णस्य -दिव्य साकेत श्रीमदयोध्यापुरीशस्य -श्रीसीता लक्ष्मण हनुमत् समेत श्रीरामचन्द्र-स्वामि-सन्निधौ -राजराष्ट्राभिवृद्ध्यर्थं -लोकक्षेमार्थं श्रीरामजनन-महोत्सवकर्म कर्तुम् अनुज्ञां देहि मे प्रभो। भगवतो बलेन----श्रीरामचन्द्र स्वामिन् अनुमन्यताम् इति प्रार्थ्य। आचार्यः सभानुज्ञां लब्ध्वा। देशकालौ सङ्कीर्त्य। अस्य देवदेवस्य----श्रीरामजनन-महोत्सवकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं (अथवा गुहं वा नीलं वा आराध्य) -वासुदेवपुण्याहवाचनञ्च कृत्वा। मृत्सङ्ग्रहणे <u>विष्वक्सेनम्</u> आहूय। मृत्सङ्ग्रहणं कृत्वा। भगवन् महोत्सव विधिवत् अङ्कुरार्पणं -ध्वजप्रतिष्ठाञ्च कृत्वा। ध्वजे गरुडं वा हनुमन्तं वा लिखित्वा। तत्तन्मन्त्रेण कुम्भादिषु आवाह्य। हनुमन्तं चेत् हनुमत् मूलमन्त्रन्यास -ध्यानादीन् कृत्वा। तन्मूलमन्त्रेण -गायत्र्या च सर्वं

विधाय। प्रभाते महूर्ते श्रीरामसन्निधौ नित्याराधनात्परं ध्वजस्तम्भशुद्ध्यर्थं - रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन रक्षासूत्रादीन् संप्रोक्ष्य। सर्वेभ्यः पूर्ववत् रक्षाबन्धनं कृत्त्वा। अनन्तरं श्रीसीता लक्ष्मण हनुमत् समेत श्रीरामं ध्वजारोहणमण्डपे संस्थाप्य। विधिवत् गरुडतालं ध्वजारोहणञ्च कृत्त्वा। हनुद्ध्वजं चेत् गरुडतालं विना सर्वं कृत्त्वा। देवताह्वाने - "श्रीरामोत्सव सेवार्थम् आगच्छन्तु महोत्सवे" इति वचनेन सर्वान् देवान् आहूय। भगवदुत्सववत् यागशाला-द्वारपूजा - चतुस्थानार्चनञ्च कृत्त्वा। महाकुम्भे -मण्डले -अग्नौ च
"ओं नमो भगवते वासुदेवाय चतुर्मूर्तिमयाय अभिरामशरीराय रामाय स्वाहा" इति मन्त्रेण रामम् आवाह्य। होमे - सर्वद्रव्यैः
ओं नमो भगवते वासुदेवाय चतुर्मूर्तिमयाय अभिरामशरीराय रामाय स्वाहा-स्वाहा॥ इति हुत्वा। अन्यत् सर्वं पूर्ववत् कृत्त्वा।

## बलिदान विधिः

**गर्भगृहद्वारे**

ओं नलाय नमः - ओं जाम्भवाय नमः

**प्रथमावरणे प्रागादिषु**

| | |
|---|---|
| ओं भरताय नमः | ओं जाम्भवाय नमः |
| ओं सुग्रीवाय नमः | ओं नलाय नमः |
| ओं जानक्यै नमः | ओं लक्ष्मणाय नमः |
| ओं विभीषणाय नमः | ओं शत्रुघ्नाय नमः |

विष्वक्सेन स्थाने - ओं नीलाय नमः

( ओं विष्वक्सेनाय नमः अथवा ओं गुहाय नमः)

द्वितीयावरणे प्रागादिषु

| | |
|---|---|
| ओं वसिष्ठाय नमः | ओं भरद्वाजाय नमः |
| ओं वामदेवाय नमः | ओं कौशिकाय नमः |
| ओं जाबालये नमः | ओं वाल्मीकये नमः |
| ओं गौतमाय नमः | ओं नारदाय नमः |

तृतीयावरणे

ओं इन्द्राय नमः----ओं ईशानाय नमः

अग्रे - ओं हनुमते नमः ( ओं गरुडाय नमः ) इति अन्तर्बलिं दत्त्वा।

रामस्य रथ्यावरणमध्ये ओं ब्रह्मणे नमः इति- आलयवीथिषु

ओं कुमुदाय नमः----ओं सुप्रतिष्ठाय नमः इत्यावाह्य। बलिं दत्त्वा।

महापीठे - ओं सर्वेभ्यः श्रीरामपार्षदेभ्यो नमः इति पूर्ववत् बलिं दद्यात्॥

प्रथमोत्सवादि नवमोत्सवान्तं विविध वाहनेषु श्रीरामम् आरोप्य। पूर्ववत् वीथिभ्रमणं कृत्त्वा। प्रतिदिनं मध्याह्ने श्रीरामं बहुकलशैः संस्नाप्य। सायाह्नोत्सवं कृत्त्वा। अष्टमोत्सवे अश्वारोहणं विधाय। नवमोत्सवे रथभ्रमणान्ते तीर्थतीरे तीर्थबेरं संस्नापय। तटाकादिषु वा आलये कटाहे वा अवभृथं कृत्त्वा। अपरेऽहनि भगवदुत्सववत् द्वादशाराधनं पुष्पयागञ्च कुर्यात्। सायाह्ने चतुस्थानार्चनं पूर्णाहुत्यन्तं कृत्त्वा। श्रीरामस्य पादयोः श्रीसूक्तेन पालिकाङ्कुरान् समर्प्य। रामं पुष्पकविमाने आरोप्य। पूर्ववत्

वीथिषु परिभ्रम्य। ध्वजस्तम्भाभिमुखं संस्थाप्य। ध्वजावरोहणं - गरुड(मारुति)उद्वासनञ्च पूर्ववत् कृत्त्वा। उद्वासन पठने – "एनं स्वस्थानयानार्थमाज्ञापय रमापते" इति वाचयित्वा। ततः तान् सन्निधौ निवेश्य। महाकुम्भ प्रोक्षणादि सर्वं यथाविधि कुर्यात्। पुष्पाञ्जलियुक्तम् अपराधक्षमापनं कृत्त्वा। दण्डवत् प्रणम्य। यजमानः आचार्यस्य मूर्तिपानां ऋत्विजानाञ्च उक्त दक्षिणां दत्त्वा। अर्धरात्रिपूजां कारयेत्॥

*****स्वतन्त्रालय श्रीराम महोत्सवं सम्पूर्णम्*****

श्रीः

## कल्याणोत्सव विधिः

अथ कल्याणोत्सव-विधिरुच्यते। आचार्यः भगवत्सन्निधौ प्रातर्नित्याराधनानन्तरं विवाहोत्सवार्थं देवीभ्यां सह कल्याणकौतुकं गन्धतैलाद्यैः संस्नाप्य। वीरलक्ष्मी विवाहोत्सवं चेत् ताः संस्नाप्य। सर्वलक्षण-क्षौमवस्त्रैः अलङ्कृत्य। यथाभागमन्नं निवेद्य। नीराज्य। विवाहोत्सवार्त्थं प्रथमं श्रियं प्रार्थ्य। श्री भू विवाहं चेत् तयोः प्रार्थ्य।

नमस्ते सिन्धु तनये नमश्चन्द्रसहोदरि!।
नमः श्रीवत्सवासिन्यै त्रय्यन्ताद्यै नमो नमः॥
वैवाहिकोत्सवार्थं त्वां प्रार्थयामि हरिप्रिये।

अतः कर्मणि बिम्बेऽस्मिन् सान्निध्यं कुरु भार्गवि!॥

इति प्रार्थ्य। अनन्तरं भगवन्तं प्रार्थ्य।

नमो देवादिदेवेड्य! सर्वलोकमहेश्वर!।

षाड्गुण्याम्भोनिधे! शार्ङ्गिन्! दोषशून्य निरञ्जन!॥

उद्वाहोत्सवसिद्ध्यर्थं बिम्बेऽस्मिन् सन्निधिं कुरु।

इति प्रार्थ्य। तान् यानमारोप्य। वेद-वाद्यघोषेण सह विवाहसदनमासाद्य। तत्र देवीभ्यां सह देवं सिह्मासने समारोप्य। आचार्यः आसने उपविश्य। अस्य देवदेवस्य----लोकक्षेमार्थं लोककल्याणार्थं भगवद्वैवाहिकोत्सवकर्म करिष्ये तदङ्गं पुष्पाङ्कुरार्पणं करिष्ये तदङ्गं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -रक्षासूत्र -माङ्गल्यसूत्रशुद्ध्यर्थं -सर्वद्रव्योपकरण शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं समस्तकार्याणां निर्विघ्नेन परिसमाप्त्यर्थम् आदौ विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। विधिवत् विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनं -पुष्पाङ्कुरं च कृत्त्वा। ततः देवं यथाविधि सम्पूज्य। रक्षाबन्धनं कृत्त्वा। नीराज्य। देवस्य पुरतः चतुरश्रस्थण्डिले अग्निं प्रतिष्ठाप्य। अग्निमध्ये श्री भूमि समेतं भगवन्तम् आवाह्य। समिदन्नाज्यहोमान्तं कृत्त्वा। तदनु माङ्गल्यसूत्रम् अपराजितमन्त्रेण अभिमन्त्र्य। यथाविधि पूजयित्वा। वरप्रेषणं पठित्वा।

## वरप्रेषणम्

### भगवान्

चतुस्सागरपर्यन्तं गो-ब्राह्मणेभ्यः शुभं भवतु।

(काश्यप -आवत्सार -नैद्रुव त्रैयार्षेय प्रवरान्वित काश्यपगोत्रोद्भवाय।) चतुर्वेदशाखात्मने। अखिलभुवनादीश्वराय। समस्तलोकसंरक्षणार्थम् अस्मिन् भूमण्डले अर्चारूपेण अवतीर्णाय। श्री वासुदेवशर्मणो नप्त्रे। नारायणशर्मणः पौत्राय। महाविष्णुशर्मणः पुत्राय। श्री----परब्रह्मणे वराय। लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

### श्रीदेवी

### (वीरलक्ष्म्याः अपि)

(भार्गव -च्यावन -आप्नवान -और्व -जामदग्नय पञ्चार्षेय प्रवरान्वित श्रीवत्स गोत्रोद्भवां) चतुर्वेदशाखात्मनीम्। अखिलभुवनादीश्वरीम्। भगवतः श्रीवक्षस्थलवासिनीम्। भृगु शर्मणो नप्त्रीम्। भार्गवशर्मणः पौत्रीम्। क्षीरसागर शर्मणः पुत्रीम्। श्रीमहालक्ष्मीं श्रीदेवी नाम्नीम् (----नाम्नीं)। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

### भूमिदेवी

(आत्रेय -आर्चनानस -श्यावाश्व त्र्यार्षेय प्रवरान्वित आत्रेयगोत्रोद्भवां) चतुर्वेदशाखात्मनीम्। अखिलभुवनादीश्वरीम्। अयोनिजाम्। भूमिदेवी नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं -वृणीमहे। इति पठित्वा। कन्यकादानं कृत्त्वा।

## कन्यकादानम्

ओं नमः पुण्डरीकाक्ष! नारायण! जगन्मय!।
अभिरामशरीरेश! पीताम्बरसमुज्ज्वल!॥
क्षीरसागरसम्भूतां पारिजातादिसोदरीम्।
सर्वलक्षणसम्पन्नां सर्वाभरणभूषिताम्॥
महालक्ष्मीमिमां कन्यां तुभ्यं दास्यामि विष्णवे।
गृहाण जगतां योगक्षेमाय पुरुषोत्तम!॥
कन्यां कनकसंपन्नां सर्वाभरणभूषिताम्।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोक जिगीषया॥

इमां श्रियं संप्रददे। इमां भूमिदेवीं संप्रददे। इति वारिपूर्वकं देवस्य करे देव्यौ दद्यात्॥ तत्काले यजमानेन आचार्याय हिरण्य -गो -भूमि दानञ्च दत्त्वा। ततः आचार्यः वेद वाद्यघोषैः माङ्गल्यसूत्रमादाय

क्षीरोदमथनायासे फले रूपे मधुद्विषः।
नमश्चन्द्रसहोदर्यै नमस्तेऽमृतयोनये॥
समुद्रतनये मातर्लक्ष्मीस्त्वां प्रार्थयाम्यहम्।
माङ्गल्यसूत्रं देवेन युष्मत्कण्ठे समर्पणे॥
नियोजितोऽहं बध्नामि गृहाण परमेश्वरि!।
मङ्गलं भगवान् विष्णुः मङ्गलं मधुसूदनः।
मङ्गलं पुण्डरीकाक्षः मङ्गलं गरुडध्वजः॥
माङ्गल्यतन्तुनानेन जगद्रक्षण हेतुना।

कण्ठे बध्नामि शुभगे लोकानां मङ्गलं कुरु॥

इति गाथया भगवत् स्मरणेन देव्योः कण्ठे माङ्गल्यसूत्रं बद्ध्वा। फलवर्गताम्बूलादीन् निवेद्य। नीराज्य। माङ्गल्यधारण मुहूर्तः शुभमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु -सुमुहूर्तोऽस्तु - इत्युच्चार्य

वैवाहिकोत्सव होमः

ततः आचार्यः भगवद्वैवाहिकोत्सवे प्रधानहोमं करिष्ये इति सङ्कल्प्य। अग्नौ चरुणा विष्णुगायत्र्या चतुर्विंशाहुतीः हुत्त्वा। श्रीसूक्तेन -भूसूक्तेन च आज्येन हुत्वा।

पञ्चवारुणिकमन्त्राणि

इमम्मे वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युरा चके स्वाहा॥

तत्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः।

अहेडमानो वरुणेह बोध्युरुशꣳ स मा न आयुः प्रमोषीस्स्वाहा॥

त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासि सीष्ठाः।

यजिष्ठोवह्नितम श्शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥

स त्वन्नो अग्नेऽवमोभवोती नेदिष्ठो अस्या उषसो व्युष्टौ।

अव यक्ष्व नो वरुणꣳरराणो वीहि मृडीकं सुहवो न एधि स्वाहा॥

त्वमग्ने अयास्ययासन्मनसा हितः।

अयासन् हव्यमूहिषेऽयानो धेहि भेषजꣳ स्वाहा॥

इति पञ्चवारुणिक मन्त्रैः आज्येन हुत्वा। अनन्तरम् आचार्यः वीरलक्ष्म्याः पादुकाम् आदाय। सप्तपदीम् -अश्मारोहणञ्च कृत्त्वा।

श्री भू विवाहे देवस्य पादुकायां श्री भू पादपद्मं ध्यात्वा। तया मूलमन्त्रेण अश्मारोहणं कृत्त्वा।

एकमिषे विष्णुस्त्वान्वैतु।

द्वे ऊर्जे विष्णुस्त्वान्वैतु।

त्रीणि व्रताय विष्णुस्त्वान्वैतु।

चत्वारिमायोभवाय विष्णुस्त्वान्वैतु।

पञ्च पशुभ्यो विष्णुस्त्वान्वैतु।

षड्रायस्पोषाय विष्णुस्त्वान्वैतु।

सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वान्वैतु। इति मन्त्रैः सप्तपदीं विधाय।

ओं महादेव्यै च विद्महे विष्णुपत्नै च धीमहि। तन्नो लक्ष्मी प्रचोदयात् - इति पादुकाम् अश्मे आरोप्य। अनल प्रादक्षिण्येन देवस्य समीपे संस्थाप्य। लाजहोमं कृत्त्वा। लाजान् आज्येन अभिघार्य। हस्ते गृहीत्वा। देवस्य देव्याः च दर्शयित्वा। ओं इदंविष्णु---सुरे स्वाहा

ओं त्रीणिपदा---धारयन् स्वाहा

ओं विष्णोःकर्माणि---सखा स्वाहा इति लाजान् प्रत्येकं हुत्वा। अवशिष्टं प्रणवेन अग्नौ निक्षिप्य। होमशेषं समाप्य। चतुर्विधान्न-भक्ष्यादीन् निवेद्य। नीराज्य। देवस्य परितः दिक्षु अन्नपिण्डान् निक्षिप्य। घृतारोपणमाचरेत्॥ स्वर्णादि पात्रे घृतमादाय। हस्ताभ्यां दूर्वाङ्कुरं गृहीत्वा। घृते निमज्ज्य। हस्त व्यत्यासमार्गेण देवस्य पादयोः -सुशोभनं, कट्यां -सुभद्रकं, मूर्ध्नि - सुमङ्गलम् इति दूर्वाङ्कुरैः सिञ्चेत्॥ ततः देव देव्यौ यानमारोप्य।

वाद्येन सह मन्दिरान्तः प्रविश्य। सन्निधौ निवेश्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## प्रवराणि

### श्रीरामः

(श्रीमद्रामायणोक्तम्)

वासिष्ठ -मैत्रावरुण -कौण्डिण्य त्र्यार्षेय प्रवरान्वित वासिष्ठ गोत्रोद्भवाय। इक्ष्वाकु-वंशोद्भवाय। सूर्यवंशपावनाय। पितृवाक्य परिपालनाय। धर्म संरक्षणार्थम् अवतीर्णाय। नाबाधमहाराज-वर्मणो नप्त्रे। अजमहाराज-वर्मणः पौत्राय। दशरथमहाराज-वर्मणः पुत्राय। श्रीरामचन्द्रवर्मणे वराय।

### सीता

आङ्गीरस -आयास्य -गौतम त्र्यार्षेय प्रवरान्वित गौतमगोत्रोद्भवाम्। निमिवंशोद्भवाम्। मिथिलानगरीश्वरीम्। स्वर्णरोम-महाराज-वर्मणो नप्त्रीम्। ह्रस्वरोम-महाराज-वर्मणः पौत्रीम्। जनकमहाराज-वर्मणः पुत्रीम्। श्री सीता-नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

### श्रीकृष्णः

(श्रीमद्भागवतोक्तम्)

चतुर्वेदशाखात्मने। सर्व -श्रुति -स्मृति -पुराणेतिहास -शास्त्रगम्याय - शरणागतोद्धार गोत्राय। चतुर्दशभुवनादीश्वराय। अखिलाण्डकोटिब्रह्माण्ड

नायकाय। ब्रह्माण्डस्य ऊर्ध्वदेशे। सर्वश्रुतिविदित रविकोटिप्रकाश गोलोकवासिन्याः श्री भू नीला विरजासेवित पादपङ्कजाय। तत्त्वातीताय। परात्पराय। सच्चिदानन्दविग्रहाय। सोमवंशपावनाय। श्रीयदुकुलवंशोद्भवाय। विदूरथमहाराज-वर्मणो नप्त्रे। शूरसेनदेवमीडा-महाराज-वर्मणः पौत्राय। श्रीवसुदेव-आनकदुन्दुबि-महाराज-वर्मणः पुत्राय। श्रीकृष्णचन्द्र-वर्मणे वराय।

## रुक्मिणी

यदुकुलवंशोद्भवाम्। महाभोजराज-वर्मणो नप्त्रीम्। भोजराज-वर्मणः पौत्रीम्। भीष्माक महाराजवर्मणः पुत्रीम्। श्री रुक्मिणी नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

## सत्यभामा

यदुकुलवंशोद्भवाम्। निघ्न-महाराज-वर्मणः पौत्रीम्। सत्राजित्-महाराज-वर्मणः पुत्रीम्। श्रीसत्यभामा नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

## राधा

(उत्तर सम्प्रदायोक्तं - गोस्वामीकृतम्)

सर्व श्रुति स्मृति पुराणेतिहास शास्त्रार्थ स्वरूपिणीम्। सकृत् प्रपन्नजन संरक्षण वीक्षित कटाक्षिणीम्। उद्धारित गोत्रोद्भवाम्। चतुर्दशभुवनादीश्वरीम्। ब्रह्माण्डस्य ऊर्ध्वदेशे। सर्वश्रुतिविदित रविकोटिप्रकाश गोलोकवासिनीम्। तत्त्वार्थ दीपिकाम्।

अद्वितीय अखण्डित ज्ञानानन्दपरिपूर्णतमाम्। आब्रह्मकीटजननीम्। भानुनाथ वंशोद्भवाम्। सुवर्णभानु-गोनायक-वर्मणो नप्त्रीम्। सुरभानु-गोनायक-वर्मणः पौत्रीम्। वृषभानु-गोनायक-वर्मणः पुत्रीम्। श्री राधा नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

<u>श्री निवासस्य प्रवरः</u>

(वेङ्कटाचल माहात्म्योक्तं - वेङ्कटाचले अनुष्ठितम्)

(अच्युत -परब्रह्म -नारायण -निराकार -साकार पञ्चार्षेय प्रवरान्वित अच्युत गोत्रोद्भवाय)

- अनन्त वेदाध्यायिने। अच्युत परब्रह्मणे। अनन्त कल्याण गुणगण गाम्भीर्यस्य -दिव्यमङ्गलविग्रहस्य। शङ्ख -चक्र नन्दकासि -गदा धरस्य। श्रीमतो वैकुण्ठनायकस्य। आङ्गीरस -बार्हस्पत्य -भारद्वाज त्र्यार्षेय प्रवरान्वित भारद्वाजगोत्रोद्भवाय। पञ्चमेन प्रवर्तमानस्य। अर्चावतारे वासुदेवावतारस्य। श्रीमहाविष्णोः परब्रह्म-शर्मणो नप्त्रे।
- आङ्गीरस -बार्हस्पत्य -भारद्वाज त्र्यार्षेय प्रवरान्वित भारद्वाजगोत्रोद्भवाय। पर -व्यूह -विभव -अन्तर्यामि -अर्चावताररूपस्य। जगत्कारण भूतस्य। मूलप्रकृति स्वकीयमानस्य। त्रिगुणात्मकस्य। गुणत्रयकर्मणोभियादि-वशात् उत्पत्ति -स्थिति -लय कारणभूतस्य। अर्चावतारे सङ्कर्षणावतारस्य। श्रीमहाविष्णोः परवासुदेव- शर्मणः पौत्राय।

- आङ्गीरस -बार्हस्पत्य -भारद्वाज त्र्यार्षेय प्रवरान्वित भारद्वाजगोत्रोद्भवाय। समस्त देवता निकुट -मकुट मणिगण विजृम्भित पादारविन्दस्य। अर्चावतारे प्रद्युम्नावतारस्य। श्रीमहाविष्णोः आदिनारायण-शर्मणः पुत्राय।
- आङ्गीरस -बार्हस्पत्य -भारद्वाज त्र्यार्षेय प्रवरान्वित भारद्वाजगोत्रोद्भवाय। भक्तलोकपरिपालनाय। किरीट -हार -केयूर -दिव्याभरण भूषिताय। कौस्तुभालङ्कृताय। दिव्यपीताम्बरधराय। दिव्यमाल्योपशोभिताय। प्रपन्न पारिजाताय। निजावताराय। अचिन्त्य-दिव्याद्भुत नित्य-यौवन स्वभाव-लावण्य तेजो रत्नाकराय। अखिल गोत्रपवित्राय। श्रवणनक्षत्रे मकरराशौ जाताय। श्री श्रीनिवास-स्वामि परब्रह्मणे वराय।

श्रीदेव्याः प्रवरः

(भार्गव -च्यावन -आप्नवान -और्व -जामदग्न्य -पञ्चार्षेय प्रवरान्वित भार्गव गोत्रोद्भवीं) ईश्वर -विश्वम्बर -सौभाग्य -श्रीवत्स -श्रीः पञ्चार्षेय प्रवरान्वित श्रीवत्स गोत्रोद्भवीम्। भृगोः सङ्कल्प तनयाम्। सर्वालङ्कारवतीम्। श्रीमहाविष्णोः वक्षस्थलनिवासिनीम्। आनन्दकलात्मिकाम्। मूलप्रकृतिरूपाम्। उत्तरफल्गुणीनक्षत्रे कन्याराशौ जाताम्। अयोनिजां रमाम्। श्रीदेवी नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

भूदेव्याः प्रवरः

काश्यप -आवत्सार -नैद्रव त्रयार्षेय प्रवरान्वित काश्यप गोत्रोद्भवीम्।

सर्वालङ्कारवतीम्। सुराङ्करराज संसेवित पदारविन्दाम्। श्रीमहाविष्णोः अत्यन्त मनोहरीम्। अत्यन्त सौन्दर्यवतीम्। श्यामलाङ्गीम्। रेवतीनक्षरे मीनराशौ जाताम्। कश्यपप्रजापती- सङ्कल्पतनयाम्। भूमिदेवी नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

श्रीपद्मावती प्रवरः

अनन्त वेदात्मिकाम्। अत्रिगोत्रोद्भवाम्। सुवीर वर्मणो नप्त्रीम्। सुधर्मवर्मणः पौत्रीम्। आकाशराज वर्मणः पुत्रीम्। श्रीपद्मावती नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं - वृणीमहे।

श्रीगोदाप्रवरः

विश्वामित्र -अघमर्षण -कौशिक त्र्यार्षेय प्रवरान्वित शालावृत गोत्रोद्भवाम्। सर्वालङ्कारवतीम्। नीलादेव्यंश-सम्भूताम्। तुलसीमूल समुद्भवाम्। त्रिभङ्गीकृत-देहस्थ हार-कञ्चुकमेखलैः शोभिताम्। अनेकरत्न सङ्कीर्ण सूर्य -चन्द्राङ्कित धम्मिल्ल अलकराजिविराजितां। कस्तूरि-कलितोर्ध्वपुण्ड्र-तिलक -कर्णान्तलोलेक्षणां। श्री लक्ष्मीनारायण-शर्मणो नप्त्रीम्। मुकुन्द-शर्मणः पौत्रीम्। विष्णुचित्त शर्मणः पुत्रीम्। श्रीगोदा नाम्नीम्। इमां कन्यां लोकसंरक्षणार्थं वृणीध्वं -वृणीमहे।

महासङ्कल्पः

अस्य श्री आदिविष्णोः आदिनारायणस्य। अचिन्त्य -अपरिमितशक्त्या भ्रियमाणस्य। महाजलौघस्य मध्ये परिभ्रमाणानाम्। अनेक-

कोटिब्रह्माण्डानाम्। अन्यतमे। अव्यक्त महदहङ्कार -पृथिव्यप्तेजो वाय्वाकाशाख्यैः आवरणैः आवृते। अस्मिन्महति ब्रह्माण्ड करण्डमध्ये। आधारशक्ति -कूर्मानन्तादि -ऐरावत -पुण्डरीक -वामन -कुमुद -अञ्जन -पुष्पदन्त -सार्वभौम -सुप्रतीकाश्चेति अष्टदिग्गजानाम् उपरितले। अतल -वितल -सुतल -रसातल -तलातल -महातल -पातालाख्य सप्तलोकानाम् उपरिप्रतिष्ठिते। भुवः -सुवः -महः -जनः -तपः -सत्याख्य लोकषट्कस्य अधोभागे। महानालायमान फणिराजशेषस्य सहस्रफणामणि मण्डलमण्डिते। दिग्दन्ति शुण्ठा दण्डोद्दम्भिते। अनन्तसूर्यकिरण तेजसा प्रकाशितेन लोकालोकाचलेन वलयिते। लवण -इक्षु -सुरा -सर्पिः -दधि -क्षीर शुद्धोदकाख्य सप्तार्णवैश्च परिवृते। जम्बू -प्लक्ष -कुश -क्रौञ्च -शाक -शाल्मली -पुष्कराख्य सप्त द्वीपैः परिवृते। महासरोरुहाकारे। पञ्चाशत्कोटि-योजन विस्तीर्ण भूमण्डले। सुमेरु -बदरि -निषद -हेमकूट -हिम -विन्ध्य -गन्धमादन -माहेन्द्र माल्यवदाख्य स्तम्भायमान-मर्यादा पर्वतमध्यगते। नवसहस्र-योजन विस्तीर्ण विस्तृतायां कर्मभूमौ। भारत -किम्पुरुष -रम्यक -कुरु -हिरण्मय -भद्राश्व -इलावृत- हरि -केतुमालाख्य नववर्षभूषिते। इन्दुखण्ड -कशेरुखण्ड -ताम्रखण्ड -गभस्तिखण्ड -नागखण्ड -भौमखण्ड -गन्धर्वखण्ड -शरभखण्ड -भरतखण्डाख्य नवखण्ड मण्डिते। चैत्र -रथ -गन्धमादन -वैभ्राज -नन्दनाख्य दिव्योद्यानैः परिशोभिते। अरुणोदय -महाभद्र -सीतोदकाख्य दिव्यसरोवरैः विराजिते। गङ्गा -यमुना -गोदावरी -सरस्वती -नर्मदा -

सिन्धु -कृष्णवेणी -सरयू -तुङ्गभद्रा -कावेर्याख्य पुण्यनदीभिः परिशोभिते। अयोध्या -मथुरा -माया -काशी -काञ्ची -द्वारावती -अवन्ती -कुरुक्षेत्रादि नानामुक्तिक्षेत्रवत्याम् - अस्यां कर्मभूमौ समभूमि मध्यरेखायाः सालग्रामस्य पूर्वदिग्भागे। विन्ध्यस्य दक्षिणदिग्भागे। श्रीशैलस्य आग्नेयदिग्भागे। सेतुबन्धनस्य उत्तरदिग्भागे। दण्डकारण्य -विन्ध्यारण्य -वीक्षारण्य -बिल्वारण्य -चम्पकारण्य -कृष्णारण्य -वल्कलारण्य - नैमिशारण्य -बदरिकारण्यादि पुण्यारण्य मध्ये। प्रजापतिक्षेत्रे। जगत्स्रष्टुः। प्रार्थद्वज-जीविनः ब्रह्मणः - द्वितीये परार्धे। पञ्चाशद्वर्षेषु प्रथमेवर्षे, प्रथमे ऋतौ, प्रथमे मासे, प्रथमे पक्षे, प्रथमे दिवसे, अहनि-पूर्वाह्ने, द्वितीये यामे, तृतीये मुहूर्ते, स्वायम्भुव -स्वारोचिष -उत्तम -तामस -रैवत -चाक्षुषाख्येषु षड्सु -मनुषु व्यतीतेषु सप्तमे वैवस्वत मन्वन्तरे। कृत -त्रेता -द्वापरेषु त्रिषु युगेषु अतीतेषु इदानीन्तन कलियुगे। प्रभवादि षष्टिसंवत्सराणां मध्ये।----नाम संवत्सरे----अयने----ऋतौ----मासे----पक्षे----शुभतिथौ----वासरयुक्तायाम्----नक्षत्रयुक्तायाम्----(शुभ)योग ----(शुभ)करण एवङ्गुण सकल विशेषण विशिष्टायाम् अस्यां----शुभतिथौ अस्मिन् भूमण्डलस्योपरि भुवस्सुवर्मह-ज्जनस्तपस्सत्यलोकानामुपरि ब्रह्माण्ड कटाहस्योपरिभागे। आवरणजलस्य बहिः महाऽन्धकारस्योपरि स्थिते। अनेककोटि वह्न्यर्केन्दु दिव्यविमाने। श्रीमद्वैकुण्ठाख्ये दिव्यनगरे विराजमानस्य। दिव्यरत्नमयानन्द-मण्डपे -भगवदाधारशक्ति -प्रकृति -कूर्मानन्त -धर्माद्यष्टमूर्ति परिशोभितस्य। महासदाशिव संसेव्यमानस्य।

ऋग्यजुस्साम -अथर्ववेदाः कृतयुगादि चतुर्युगाश्च परिभूषितस्य। वैकारिकादि अहङ्कारत्रय शेखरस्य। सात्विकादि त्रिगुणान्वितस्य। अग्निमण्डलादि त्रिमण्डल मण्डितस्य। दिव्य सहस्रदलपरिमित महापद्मस्य उपरि द्वादशदले पुष्पाञ्जलियुक्त श्रीवत्सादि शक्तयः परिवृतस्य। उपरि अष्टदलेषु व्याप्ताद्यष्टशक्त्या चामरवीजितस्य। उपरिदलेषु इन्द्रादिभिः शङ्खाद्यायुध-धरैश्च सेव्यमानस्य। अनेक कोटिसूर्य प्रकाश दिव्य सिह्मासनस्योपरि प्रतिष्ठितस्य। अपरिमित तेजोराशिभिः अखिलजगन्मातृ श्री -भूमि -नीला समेतस्य। तत्परितः आवरणेषु आदिवराहादि अष्टविद्येश्वरैः - सुदर्शनादि दिव्य आयुध-धारिभिः -अनन्त गरुड विष्वक्सेनादि नित्यैः -द्वाराध्यक्षैः -चण्डादि द्वारपालैः -इन्द्राद्यष्टदिक्पालैः -कुमुदाद्यष्टपार्षदेश्वरैः परिसेव्यमानस्य। तद्बहिः पञ्चकालपरायणैः -भगवच्छेषकर्मनिष्ठैः -सालोक्यादिपदस्थितैः -नित्यतृप्तैः संस्तूयमानस्य। सालोक्यादि व्यूह वैकुण्ठेषु शक्त्या सहितेन वासुदेवादि मूर्तिरूपेण प्रतिष्ठितस्य। अखिल जगत्सृष्टि स्थिति संहारकारणकर्तृभूतस्य भगवतोवासुदेवस्य। अव्याहत दिव्याज्ञया प्रकारेण। भगवत् कैङ्कर्यम्। अस्य देवदेवस्य-----(वैवाहिकोत्सव) कर्म करिष्ये। इति सङ्कल्प्य।

*****कल्याणोत्सव-विधिः सम्पूर्णम्*****

श्रीः

## फलोत्सव विधिः

आचार्यः देवसन्निधौ प्रातराराधनानन्तरं महावनं प्रविश्य। फलसञ्चय-समीपे गत्वा। तत्रस्थ कदलीन् -चूतान् -पनसान् -नालिकेरान् -मातुलङ्गान् -खर्जूरान् -द्राक्षाः -कुरुविन्दान् -बदरीन् -जम्बून् -बर्बरफलानिच समाहृत्य। वेत्रैः वा पर्णैः कृत भाण्डेषु निक्षिप्य। तान् परिचारकमूर्ध्नि निक्षिप्य। मन्दिरान्तः प्रविश्य। आलये बहिर्मण्डपे गोमयेन आलिप्य। सुधाचूर्णेन अलङ्कृत्य। तत्र श्वेतान् -अविरलान् पटानास्तीर्य। तदुपरि फलौघम् आरोप्य। रक्षां कृत्त्वा। जिह्वाचापल्यवर्जितैः -श्रीवैष्णवैः -ब्राह्मणैः शोधनार्हाणि फलानि संशोध्य। क्षालनार्हाणि संक्षाल्य। निस्त्वक्करणयोग्यानि त्वचं व्यपोह्य। पृथक् पृथक् पात्रेषु निक्षिप्य। आचार्यः आसने उपविश्य। अस्य देवदेवस्य----फलोत्सवकर्म करिष्ये तदङ्गं यागशालाशुद्ध्यर्थं -फलादीनां शुद्ध्यर्थं -वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं -वासुदेव पुण्याहवाचनं कृत्त्वा। तज्जलेन फलानि -यागशालां च संप्रोक्ष्य। ततः बलिबेर स्थापनेन यागशालायां चतुस्थानार्चनं कृत्त्वा। तदनु मूलबेरादि समस्त बेराणां -श्रियादीनां -सर्वेषां परिवाराणां फलौघं निवेद्य। कुम्भ -मण्डलादीनाञ्च निवेद्य। फलेन (मूलमन्त्रेण) अष्टोत्तरशताहुतीः हुत्वा। पूर्णाहुत्यनन्तरं बलिं दत्त्वा। महाकुम्भप्रोक्षणादि सर्वं पूर्ववत् कृत्त्वा। फलशेषं किञ्चित् सेनेशाय दत्त्वा। सर्वेभ्यः श्रीवैष्णवेभ्यः

फलान् दापयेत्॥ अनन्तरं देवीभ्यां सह देवं यानमारोप्य। वीथि भ्रमणं कृत्त्वा। आलयान्तः प्रविश्य। देवं सन्निधौ निवेश्य। अर्धरात्रि पूजां कारयेत्॥

*****फलोत्सव विधिः सम्पूर्णम्*****

श्रीः

## स्वापोत्सवः

## (शयनोत्सवः)

### शयनागार कल्पनम्

अथ स्वापोत्सव-विधिरुच्यते। प्रासादस्य उत्तरे पार्श्वे -पुरोभागे वा शयनागारं परिकल्प्य। गर्भगृहे यद्वा मूलबेरस्य दक्षिणे शयनं कल्पयित्वा। तस्मिन् चतुर्द्वारयुक्तं सुवर्णश्रृङ्कलाभिः सम्बन्धमुपरिस्थल-मध्ये वेधिकां कल्पयित्वा। तदुपरि दशभारशालीन् वितीर्य। तदुपरि समान तण्डुलान् तदुपरि तिलान् च उपर्युपरि पटाच्छादनेन वितीर्य। उपरि तूलिका रत्नकम्बल -क्षौमचित्रवस्त्रैः -व्याघ्रचर्मेन च समास्तीर्य। तस्मिन् सपादगण्डुकानि उपधानानि च निधाय। पर्यङ्कस्य परितः अष्टासु दिक्षु लोक -दारु -मृण्मयान् वा अनिर्वाणान् दीपान् आरोप्य। मुक्ताजालाभिराबद्ध क्षौमवितानं कल्पयित्वा। मुक्तादामभिः -पुष्पमालाभिः शयनागारं समलङ्कृत्य। गन्धवस्तुभिः आलिप्य। सुगन्धधूपैः धूपयित्वा। सर्वाणि द्रव्याणि च सम्भारान् पूर्वं सम्पाद्य। आषाढ -शुक्ल एकादश्यां

सायाह्ने आचार्यः भगवत्सन्निधिं समासाद्य। नित्यपूजां होमान्तं समाप्य। अनन्तरं विशेषयजनं कृत्त्वा। यथाभागमन्नं निवेद्य। नीराज्य। स्वापोत्सवार्थं प्रार्थ्य।

वासुदेव! श्रियःकान्त! सर्वाधारजगन्मय!।
भक्तानामार्तिहरण! योगनिद्रापते! प्रभो!।
योगनिद्रां निषेवस्व देव! मासचतुष्टयम्।
भगवन्! योगनिद्रायाः कालोऽयं समुपागतः।
तस्मादुत्थानपर्यन्तं बिम्बेऽस्मिन् सन्निधिं कुरु॥ इति प्रार्थ्य।

नीराज्य। ततः आचार्यः आसने उपविश्य। अस्य देवदेवस्य---- भगवद्योगनिद्राकालात् उत्थापनावधि देवस्य चातुर्मास्यशयनोत्सवकर्म करिष्ये तदङ्गम् अङ्कुरावापनं करिष्ये तदङ्गं स्थलशुद्ध्यर्थम् -आत्मशुद्ध्यर्थं -पालिका-धान्यादीनां शुद्ध्यर्थं -रक्षासूत्रशुद्ध्यर्थं -यागशालाशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं वासुदेवपुण्याहवाचनञ्च कृत्त्वा। अङ्कुरान् अर्पयित्वा। भगवन्तं संपूज्य। शयनबेरस्य -(आचार्यस्य च) रक्षाबन्धनं कृत्त्वा। बलिबिम्ब स्थापनेन यागशालायां चतुस्थानार्चनं कृत्त्वा। चतुर्विधान्नं निवेद्य। मण्डलपूजानन्तरम् आचार्यः गर्भगेहमासाद्य। शयनबेरं यानमारोप्य प्रादक्षिण्येन यागशालां प्रविश्य। तत्र मण्डलस्याभिमुखं शयनबेरं सौवर्णे विष्टरोत्तमे संस्थाप्य। अर्घ्यादिभिः संपूज्य। परमान्नं निवेद्य। कुम्भ -मण्डलयोश्च निवेद्य। नीराज्य। अग्नौ

सप्तसमिद्धोमम् -आज्येन मूलमन्त्रेण अष्टोत्तरशताहुतीश्च हुत्वा। पूर्णाहुतिं बलिञ्च दत्वा। शयनबेरं गर्भगृहे निवेश्य। स्वापोत्सवार्थम् अधिवास्य। अर्धरात्रिपूजां कारयेत्॥

प्रभाते द्वादश्यां शयनबेरम् उत्थाप्य। नित्यपूजानन्तरं चतुस्थानार्चनं बल्यन्तं कृत्त्वा। ततः आचार्यः शयनागारशुद्ध्यर्थं -स्नानोपकरण-द्रव्यशुद्ध्यर्थं वासुदेवपुण्याहं वाचयित्वा। तज्जलेन सर्वाणि स्नपनद्रव्याणि शयनागारं च संप्रोक्ष्य। तदनु शयनबेरं पञ्चविंशति कलशैः -नव कलशैः वा संस्नाप्य। पायसादि चतुर्विधान्नं निवेद्य। यागशाला उद्वासनं कृत्त्वा। शयनबेरं महाकुम्भजलेन संप्रोक्ष्य। सायाह्ने श्री भू सहितेन वा रहितेन वा शयनबेरं यानमारोप्य। प्रादक्षिण्येन शयनागारं प्रविश्य। पर्यङ्कस्य पश्चिमे विष्टरे संस्थाप्य। पर्यङ्कं सम्पूज्य। पर्यङ्कमध्ये - ओं अं अनन्ताय नमः

विष्टरपादेषु - ओं धर्माय नमः----ओं ऐश्वर्याय नमः

स्तम्भेषु - ओं सत्याय नमः----ओं गरुडाय नमः

विमाने - ओं विराड्रूपिणे हरये नमः

शृङ्खलासु - ओं ऋग्वेदाय नमः----ओं अथर्ववेदाय नमः

ध्वजे - ओं सावित्र्यै नमः

पताकासु - ओं गायत्र्यै नमः

छत्रे - ओं व्याहृतिभ्यो नमः (ओंभूर्भुवस्सुवः)

विताने - ओं सोमाय नमः

तोरणेषु - ओं स्वराक्षरेभ्यो नमः

इति सम्पूज्य। धूपदीपादिकं दत्त्वा। फलवर्गादीन्निवेद्य। नीराज्य। तन्मध्ये शयनबेरं प्राक्शिरस्कं दक्षिणासा शिरस्कं वा शाययित्वा। कण्ठादूर्ध्वं वर्जितेन देवं नवेन वाससा संवेष्ट्य। शुद्धान्नं निवेद्य। रक्षार्थं देवस्य परितः अष्टदिक्षु शङ्ख -चक्र -गदा -खड्ग -पद्म -मुसल -शार्ङ्ग -वज्रेति अष्टायुधान् संस्थाप्य (आयुधरहितं चेत् तत्तत् सुवर्णप्रतिमां संस्थाप्य)। भगवन्तं विज्ञाप्य।

लक्ष्मीनाथ! जगन्नाथ! सर्वलोकैकसंश्रय!।
भक्तानामार्तिहरणे सर्वदा दीक्षित प्रभो!॥
योगनिद्रां निषेवस्व देव! मासचतुष्टयम्।
सर्वलोकहितार्थाय कृतार्थीकुरु मां प्रभो!॥

इति प्रार्थ्य। बहिः वेद -गीत -नृत्तादिभिः भगवन्तं तोषयित्वा। ततः सायाह्ने कल्याणकौतुकं यानमारोप्य। वीथिभ्रमणं कृत्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥ तदा प्रभृति सर्वाश्रमिनां चातुर्मास्ये व्रतानुष्ठानम् आचर्य। शयनबिम्बाभावे कूर्चेन सकलं कृत्त्वा। प्रत्यहं त्रिसन्ध्यां पूजयित्वा। शयनागारं स्तोत्रपठनेन प्रदक्षिणीकृत्य। दक्षिणद्वाररहितेन सर्वद्वारं सर्वथा बन्धयित्वा। दक्षिणद्वारेण प्रवेश -निवेशनञ्च कृत्वा। पूजान्ते दक्षिणद्वारञ्च बन्धयेत्॥

## परिवर्तनम् - उत्थापनम्

भाद्रपद शुक्ल द्वादश्याम् आचार्यः अस्य देवदेवस्य----चातुर्मास्यशयने अस्मिन् मासे देवस्य परिवर्तनकर्म करिष्ये इति सङ्कल्प्य। स्नपनरहितेन चतुस्थानार्चनं समाप्य। देवस्य परिवर्तनं कृत्त्वा। वीथिभ्रमणान्तं सर्वं पूर्ववत् कृत्त्वा। आश्वयुज शुक्ल द्वाश्याम् एवं विधानेन आसीनं*1 ध्यात्वा। कार्तिक शुक्ल द्वादश्यां प्रातराराधनानन्तरं आचार्यः अस्य देवदेवस्य----चातुर्मास्यशनान्ते देवस्य उत्थापनकाले उत्थापनोत्सवकर्म करिष्ये इति सङ्कल्प्य। विधिवत् पुण्याह पूर्वकं चतुस्थानार्चनं कृत्त्वा। शयनबेरं संप्रार्थ्य

प्रबुद्धत्वं जगन्नाथ प्रबुद्ध परमेश्वर।
प्रबुद्ध पुण्डरीकाक्ष भक्तानामनुकम्पया॥
त्वयि प्रबुद्धे देवेश तवाग्रे परमेश्वर।
लौकिकानि हि यज्ञानि तानि निर्वर्तयाम्यहम्॥
अग्रतः सर्व यज्ञानां त्वं प्रभुर्नामतः सदा।
नापरेषु जगन्नाथ पूजितेषु सुरेषुच॥
मयि यज्ञ समाप्तिस्यात् त्वयि सन्तर्पितेऽनले।
सर्वे देवानलमुखाः सचाग्निस्त्वन्मुखे कृतम्॥
ब्रह्मास्वयं ब्रह्मलोके स्वर्गे स्वर्ग निवासिनः।

---

1) ஆச்வயுஜ மாஸ சுக்ல த்வாதசியில் பெருமாள் ஆஸீனகாலம் என்று பாராசர்ய ஸம்ஹிதையில் சொல்லப்பட்டுள்ளது. அன்று பெருமாள் அமர்ந்ததாக த்யானம் செய்து சதுஸ்தானார்ச்சனம் செய்யவேண்டும். ஆஷாட மாதம் முதல் கார்த்திக மாதம் வரை ப்ரதி சுக்ல த்வாதசியிலும் சதுஸ்தானார்ச்சனம் செய்ய வேண்டும்.

सात्विका मानुषे लोके नागाद्याश्च रसातले॥

त्वयिप्रबोधयन्त्ये ते स्वार्थ संसिद्धयेसदा।

त्यज योगमयीं निद्रां कृपां कुरु सनातन॥ इति प्रार्थ्य।

शयनस्थं भगवन्तम् उत्तिष्ठ ब्रह्मणस्पते इति मन्त्रेण मूलमन्त्रेण च शयनात् उत्थाप्य। देवस्य दर्पणं -पूर्णकुम्भं -दन्तावलं -गवांपृष्ठं -वाजिमुखं - सर्वाङ्गशोभनां कन्यां च दर्शयित्वा। क्षीरं -सितशर्करां -दध्यन्नं च निवेद्य। नीराज्य। शयनबेरं यानमारोप्य स्नपनमण्डपे संस्नाप्य। सन्निधौ निवेश्य। महाकुम्भ प्रोक्षणादीनि कृत्त्वा। सायाह्ने कल्याणकौतुकं पूर्ववत् वीथिषु परिभ्रम्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥ तदा प्रभृति सर्वाश्रमिनां व्रतादीन् विसृज्य। स्वापोत्सवमध्ये नैमित्तिक काम्योत्सवानां निषेधं ज्ञात्वा। श्रीजयन्ती -पवित्रोत्सवञ्च करणे न दोषाः। चातुर्मास्यं वा पक्षचतुष्कं वा उत्सवं विधाय। पक्षचतुष्कं चेत् परिवर्तनं न कुर्यात्॥

*****स्वोपोत्सव विधिः सम्पूर्णम्*****

श्रीः

## हिण्डोलिकोत्सवः*1

(क्षेत्रपरिक्रमोत्सवः)

श्रावणे मासि शुक्ल-पुष्ये दिव्यक्षेत्र-प्रदक्षिणं कृत्त्वा। देवस्य यथाभागमन्नं निवेद्य। नीराजयेत्॥

**********

---

1) இது வடநாட்டில் மட்டும் அனுஷ்டானத்தில் உள்ளது.

श्रीः

## रासःकेली उत्सवः*1

आश्विने मासि शुभे दिने देवं सायमाराधनानन्तरं यानमारोप्य। बहिर्मण्डपे भद्रासने संस्थाप्य। अर्घ्यादि नीराजनान्तं संपूज्य। रासः केलीनृत्तज्ञाः तद्दण्डयुक्ताः कन्यकाः आहूय। देवस्य परितः रासःकेली नृत्तं कारयित्वा। अनन्तरं देवस्य यथाभागमन्नं निवेद्य। नीराज्य। भगवन्निवेदितान्नं कन्यकानां दद्यात्। देवं पुनः यानमारोप्य। सन्निधौ निवेश्य। अर्धरात्रिपूजां कारयेत्॥

**********

श्रीः

## अन्नकूटोत्सवः

आचार्यः आलयमासाद्य। प्रातराराधनं बल्यन्तं कृत्वा। अनन्तरं भगवन्तं प्रार्थ्य। अस्य देवदेवस्य----लोकक्षेमार्थम् अस्मिन् सन्निधौ पाकैः -शाकैः सम्भावित समस्तदोष प्रायश्चित्तार्थम् अन्नकूटोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन-----विष्णो अनुमन्यताम्। इति प्रार्थ्य। महानसे द्विगुण -त्रिगुण वृद्धिना षड्रसेन नानाविध भक्ष्येन मधुररसेन सह महान्नं पाचयित्वा। अनन्तरं स्वर्णादिनिर्मितपात्रेषु अन्नं निक्षिप्य। भक्ष्यादीनि च पृथक् पृथक् पात्रेषु निक्षिप्य। माध्याह्निक-पूजाकाले

1) இந்த கோலாட்ட உத்ஸவம் வடநாட்டிலும் தமிழ்நாட்டில் மன்னார்குடி ஸ்ரீராஜகோபால ஸ்வாமி ஆலயத்தில் மட்டும் வழக்கத்தில் உள்ளது.

देवस्याभिमुखं महामण्डपे अन्नकूटानि निक्षिप्य। भगवन्तं यथाविधि सर्वोपचारैः सम्पूज्य। कूटान्नं निवेद्य। नीराज्य। आलयस्थानां सर्वेषां कैङ्कर्यपराणां -श्रीवैष्णवानां -ब्राह्मणानां -भक्तानाञ्च कूटान्नं दद्यात्॥

*********

श्रीः

## <u>वनभोजनोत्सवः</u>

अथ वनभोजनोत्सव-विधिरुच्यते। सन्निधौ प्रातर्नित्याराधनानन्तरं देवीभ्यां सह देवेशं शिबिकायाम् आरोप्य। वनं वा उद्यानं वा समासाद्य। तत्रस्थ चतुस्तम्भमण्डपे देवं भद्रासने विनिवेश्य। आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया-----लोकक्षेमार्थं वनभोजनोत्सव कर्मणि----दिने पञ्चविंशति कलशैः स्नपनकर्म करिष्ये इति सङ्कल्प्य। विधिवत् देवं संस्नाप्य। तत् वनान्तरादाहृत पुष्पैः देवदेव्यौ अलङ्कृत्य। तत्र सुगुप्ते स्थले चुल्यां महान्नम् -उपदंशं -वनान्तरादाहृत शाकैश्च विविधान्नं पाचयित्वा। देवस्य पुरतः स्थण्डिले अग्निं प्रतिष्ठाप्य। (मूलमन्त्रेण)विशेष यजनं कृत्त्वा। पूर्णाहुतिं हुत्वा। अनन्तरं भोज्यासने गुडान्वित मुद्गापूपं महान्नं च निवेद्य। वनान्तरादाहृत सर्वफलानि ताम्बूलञ्च निवेद्य। नीराज्य। भगवन्निवेदितान्नं सर्वेभ्यः दापयेत्॥

**********

श्रीः

## तिलपद्मोत्सवः

(पितृपूजाख्य तिलदानः)

आचार्यः रात्रौ उपोषणानन्तरं प्रातर्नित्यानुष्ठानसम्पूर्णेन भगवत्सन्निधौ समासाद्य। प्रातर्नित्याराधनानन्तरं विशेषयजनं कृत्त्वा। आचार्यः आसने उपविश्य। अस्य देवदेवस्य----लोकक्षेमार्थं सर्वेषां महाजनानां स्वःपितृणाम् अक्षय्य मोक्षसाम्राज्य प्राप्त्यर्थं एकदिनात्मक तिलपद्ममोत्सवकर्म करिष्ये तदङ्गं पुष्पाङ्कुर –रक्षाबन्धनञ्च करिष्ये तदङ्गं तिलशुद्ध्यर्थं -हिरण्यशुद्ध्यर्थं -मण्डपशुद्ध्यर्थं -स्नपनद्रव्यशुद्ध्यर्थं -यागशालाशुद्ध्यर्थं -रक्षासूत्रादीनां शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। पूर्ववत् विष्वक्सेनाराधनं वासुदेवपुण्याहवाचनञ्च कृत्त्वा। तज्जलेन सर्वाणि द्रव्याणि -मण्डपञ्च संप्रोक्ष्य। विधिवत् पुष्पाङ्कुरं -रक्षाबन्धनञ्च कृत्त्वा। कल्याणकौतुकं यानमारोप्य। प्रासादस्य अग्रे वा पश्चिमे -उत्तरे -आग्नेये -निर्ऋते -रौद्रे वा बहिर्मण्डपे देवं संस्थाप्य। तत्र न्यासपूर्वकं सम्पूज्य। बहुकलशैः संस्नाप्य। अलङ्कृत्य। देवस्य पुरतः भूतलं गोमयेन अनुलिप्य। तत्र भेदना च्छेदन वर्जितेन द्वयायामं वा चतुरायाम विस्तृतियुतं वस्त्रम् आच्छाद्य। तदुपरि व्याघ्राजिनं वा कृष्णाजिनं वा आस्तीर्य। तदुपरि पुनः पूर्वायामविस्तृतं वस्त्रम् आच्छाद्य। तदुपरि एकभारं वा भारद्वयं वा तिलान् निक्षिप्य। तान् त्रिमेखलायुतं विधाय। ऊर्ध्वे कर्णिका केसरयुतं द्वादशदलपद्मं विलिख्य।

कर्णिकामध्ये पद्माकार त्रिनिष्कप्रमाण स्वर्णपुष्पं निक्षिप्य। तस्य परितः अष्टासुदिक्षु नवरत्नानि पृथक् पृथक् पात्रेषु संस्थाप्य। तिल -बिम्बयोः परितः अष्टासु दिक्षु प्रतिदिशासु द्वे द्वे पात्राणि संस्थाप्य। सर्वेषु पात्रेषु धान्यान् पूरयित्वा। तस्य दक्षिणे प्रस्थतैलपूरितं कुम्भं संस्थाप्य। उत्तरे प्रस्थघृतपूरितं कुम्भं संस्थाप्य। तस्यपुरतः प्रस्थचतुष्कपूरितम् दधिकुम्भं संस्थाप्य। आचार्यः -अस्य देवदेवस्य----तिलपद्मोत्सवे तिलपद्माराधनं करिष्ये इति सङ्कल्प्य। स्वर्णपद्मे ओं श्रीं श्रियै नमः इत्यावाह्य। परितः दिक्षु द्वे द्वे धान्यपात्रेषु क्रमेण आवाह्य।

| | |
|---|---|
| ओं इन्द्राय नमः | ओं वरुणाय नमः |
| ओं पुरुषाय नमः | ओं अच्युताय नमः |
| ओं अग्नये नमः | ओं सदागतिने नमः |
| ओं सनाय नमः | ओं अनिरुद्धाय नमः |
| ओं यमाय नमः | ओं धनदाय नमः |
| ओं सत्याय नमः | ओं हरये नमः |
| ओं निर्ऋतये नमः | ओं शशिशेखराय नमः |
| ओं नारायणाय नमः | ओं कृष्णाय नमः |

इत्यावाह्य। तैलकुम्भे - ओं ब्रह्मणे नमः

घृतकुम्भे - ओं रुद्राय नमः

दधिकुम्भे - ओं गरुडाय नमः इत्यावाह्य। सर्वेभ्यः अर्घ्यादिभिः संपूज्य। धूपदीपादिकं दत्त्वा। फलवर्गादीन्निवेद्य। नीराज्य। वेदपारगैः

विष्णुसूक्तादीन् जपित्वा। आचार्यः यागशालायां पूर्ववत् चतुस्थानार्चनं कृत्त्वा। अग्नौ तिलैः मूलमन्त्रेण सहस्राहुतीः हुत्वा। पूर्णाहुतिं -बलिञ्च दत्त्वा। मण्डपस्थं भगवन्तं सम्पूज्य। तिलान्नं -मधुपर्कादीन् निवेद्य। नीराज्य। आचार्यः आसने उपविश्य। अस्य देवदेवस्य----तिलपद्मोत्सवे सर्वेषां पितृणाम् अक्षय्य मोक्षलोकावाप्त्यर्थं पिण्डप्रदानं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। अन्नं पिण्डीकृत्य। देवस्य पुरतः स्थण्डिले पूर्वाग्रान् दर्भानास्तीर्य। तदुपरि तिलं विकीर्य। आचार्यः अन्नपिण्डमादाय। पितृणाम् अक्षय्य मोक्षलोकावाप्त्यर्थम् इदम् अन्नपिण्डम्। इति दर्भेषु पिण्डं निधाय। एवं त्रयादिकं दत्त्वा। ततः यजमानेन आचार्याय तिलं-स्वर्णपद्मञ्च सर्वेभ्यः श्रीवैष्णवेभ्यः पञ्चकालपरायणेभ्यः ब्राह्मणेभ्यः आहिताग्नीन् च वारिपूर्वकं तिलान् दद्यात्॥ सर्वेभ्यः प्रीयतां भगवान् विष्णुः इति वाचयित्वा। कल्याणकौतुकं स्वसन्निधौ निवेश्य। महाकुम्भप्रोक्षणादि सर्वं कृत्त्वा। यजमानेन आचार्याय दक्षिणां दद्यात्॥ ब्राह्मणान् श्रीवैष्णवान् भोजयित्वा। अन्यत् सर्वं पूर्ववत् कारयेत्॥

*****तिलपद्मोत्सवं संपूर्णम्*****

श्रीः

## होलाक्रीडोत्सवः*1

फाल्गुने मासि पौर्णम्यां होलाक्रीडोत्सवं कृत्त्वा। देवं यानारोपणेन वीथिषु परिभ्रम्य। तत्र तत्र सर्वेजनाः होलाचूर्णं परस्परं विकिरेयुः। देवं सन्निधौ निवेश्य। संपूज्य। नीराजयेत्॥

**********

श्रीः

## पूरणोत्सवविधिः

अथ पूरणोत्सव-विधिरुच्यते। पूरणार्थं सर्वाणि द्रव्याणि सम्पाद्य।

### पञ्जरकल्पणम्

वेणुना वा -पत्रैः -काष्ठैः वा -सुवर्णादिलोहजां वा सलक्षणं पञ्जरं कारयित्वा। पञ्जरस्य अर्गलं मधूच्छिष्टेन वा -लोहेन -मृदेन -शालिपिष्टेण वा कृत्वा। पञ्जरस्य पीठं शिलया वा -लोहैः -मधूच्छिष्टेन वा कृत्वा। पूर्ववत् यागशालां कल्पयेत्॥ आचार्यः आलयमासाद्य। देवस्य सायाह्नपूजानन्तरं विशेषयजनं कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य। पूरणोत्सवार्थं प्रार्थ्य।

भगवन्! देवदेवेश! शङ्खचक्र-गदाधर!।
पूरणोत्सव सेवार्थम् अनुज्ञां देहि मे प्रभो!॥

अस्य देवदेवस्य----लोकक्षेमार्थं -लोकेऽस्मिन् सर्वसम्पूरणार्थं----वत्सर

1) இது வடநாட்டில் மட்டும் அனுஷ்டிக்கும் ஹோலிப்பண்டிகையாகும்.

----मास----दिन पञ्जरपूरणोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम् इति प्रार्थ्य। सभानुज्ञां लब्ध्वा। पूर्ववत् सङ्कल्प पूर्वकं विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनं -मृत्सङ्ग्रहणम् -अङ्कुरार्पणञ्च कुर्यात्॥ प्रभाते गुरुः नित्यपूजानन्तरं देव्याः सह देवस्य -बलिबेरस्य -आचार्यस्य च विधिवत् रक्षाबन्धनं कृत्वा। ततः कल्याणकौतुकं यानमारोप्य। यागशालायाः पश्चिमे भागे भद्रविष्टरे संस्थाप्य। देवस्य पुरतः वेदिकां कल्पयित्वा। तदुपरि शाली -तण्डुल -तिलैः पीठं परिकल्प्य। तन्मध्ये पञ्जरं संस्थाप्य। तत्र आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----पूरणोत्सवकर्मणि <u>प्रथमोत्सवे</u> पञ्जरशुद्ध्यर्थं -पूरणीयद्रव्यशुद्ध्यर्थं कुम्भ -मण्डल -वह्निशुद्ध्यर्थं स्नानोपकरण-द्रव्यशुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये इति सङ्कल्प्य। पात्राणि साधयित्वा। पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि द्रव्याणि संप्रोक्ष्य। तत्रस्थ देवं मन्त्रासनप्रभृति संपूज्य। यथाभागमन्नं निवेद्य। नीराज्य। बलिबेरं यागशालायां निवेश्य। आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया----पूरणोत्सवकर्मणि <u>प्रथमोत्सवे</u> प्रातर्हवनाख्य-काले चतुस्थानार्चनं करिष्ये इति सङ्कल्प-पूर्वकं द्वारपूजा पुरस्सरं कुम्भ -मण्डल -देवताश्च सम्पूज्य। हवनात्पूर्वं पूरणं कृत्वा।

## <u>पूरणम्</u>

आचार्यः पञ्जरसमीपङ्गत्वा। पञ्जरं पुण्याहजलेन प्रोक्ष्य। शोषणादिभिः संशोध्य। आधारादि पद्मान्तम् अभ्यर्च्य। नीराज्य। ततः वेद -वाद्यघोषेण

-छत्र -चामर उपचारेण सह कल्याणकौतुकमानीय मन्दं मन्दं
"भद्रङ्कर्णेभिः----दधातु" इति मन्त्रेण पञ्जरमध्ये संस्थाप्य। तदनु
पूरणीयद्रव्येण देवं निमज्जनेन वासुदेवादि चतुर्मूर्तिमन्त्रैः पूरणं कृत्त्वा।
तत्काले वेदादयः -विष्णुसूक्तञ्च पठित्वा। नीराज्य। पञ्जरस्य परितः
चतुर्वेद -भगवच्छास्त्र -स्तोत्रपठनञ्च कारयेत्॥
"सहिरत्नानि----मीमहे" इति मन्त्रेण रत्नानि सम्पूर्य।
"हिरण्यपात्रं मधोः----आयुस्तेजो दधाति" इति मन्त्रेण
सुवर्णादिलोहैः सम्पूर्य।
"याः फलिनीः----त्वꣳहसः" इति मन्त्रेण फलैः सम्पूर्य।
"आप्यायस्व----सङ्गथे" इति मन्त्रेण आज्येन सम्पूर्य।
"मधुवाता----भवन्तुनः" इति मन्त्रेण मधुना सम्पूर्य।
पूर्वोक्तैः द्रव्यैः एकेन पूरयित्वा। प्रथमोत्सवादि उत्सवान्तं पूरणीयद्रव्यं
द्विगुणं -त्रिगुणं -चतुर्गुणं इति क्रमेण अभिवृध्य। पूरणं दशनाडिका कालं
ज्ञात्वा। ततः आचार्यः यागशालायां हवनमारभ्य। अग्नौ
समिदन्नाज्यहोमान्तं कृत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----
पूरणोत्सवकर्मणि प्रथमोत्सवे प्रातर्हवनाख्य काले पूरणीयद्रव्येन
मूलमन्त्रेण सहस्राहुतीः होष्यामि इति सङ्कल्प्य। तत्तद्दिनोक्त अवशिष्ट
पूरणीय द्रव्येण हुत्वा। पूर्णाहुतिं हुत्वा। तद्द्रव्येण बलिं दद्यात्॥ तदनु
भगवन्तं पञ्जरात् उद्धृत्य। स्नानविष्टरे संस्थाप्य। यथाविभवैः कलशैः
संस्नाप्य। अलङ्कृत्य। महाहविर्निवेद्य। नीराज्य। कल्याणकौतुकं गर्भगृहे

निवेश्य। एवम् उत्सवावसानमहर्निशं चतुस्थानार्चनं -पूरणं -बलिञ्च कृत्वा। उत्सवावसानदिने रात्रौ पूर्ववत् यागशालाहवनं -बल्यन्तं कृत्वा। पालिकादर्शनं -महाकुम्भप्रोक्षणं -रक्षाविसर्जनञ्च विधिवत् कृत्वा। यथाभागमन्नं निवेद्य। नीराज्य।

यन्मयानुष्ठितं ब्रह्मन्! पूरणं पापनाशनम्।

तत्सर्वं क्षम्यतां देव! स्वीकुरु त्वं जगत्पते!॥

इति प्रार्थ्य। तत्काले यजमानः गुरोः ऋत्विजानाञ्च दक्षिणां दद्यात्॥

अर्धरात्रिपूजां कारयेत्॥

## पूरणीयद्रव्य विशेषाः तत्तत् फलञ्च

अन्नपूरणेन - अग्निष्टोमफलं सर्वक्रतुफलञ्च चातुर्मास्यफलं गृहसिद्धिश्च भवन्ति।

रसैः पूरणेन पूर्वमेवं फलम्।

घृतपूरणेन -ऐहिकामुष्मिक फलम्।

तैलपूरणेन -षोडशीफलं मोक्षञ्च भवति।

पयसा - वाजपेयफलं विष्णुसायुज्यञ्च भवति।

मधुना - अतिरात्रफलं विष्णुसायुज्यञ्च भवति।

अपूपैः - अप्तोर्यामफलं विष्णुसायुज्यञ्च भवति।

सक्तुना - गोसवस्य-फलं विष्णुसायुज्यञ्च भवति।

फलैः - अश्वमेधफलं विष्णुसायुज्यञ्च भवति।

पुष्पैः - नरमेधफलं विष्णुसायुज्यञ्च भवति।

गन्धेन - राजसूयफलं विष्णुसायुज्यञ्च भवति।

गुडेन - विष्णुयागफलं विष्णुसायुज्यञ्च भवति।

तण्डुलैः - पुष्पयागफलं विष्णुसायुज्यञ्च भवति।

तिलैः - महायागफलं विष्णुसायुज्यञ्च भवति।

दध्ना - सर्वतीर्थफलं विष्णुसायुज्यञ्च भवति।

लोहैः - हरिस्स्तोमफलं विष्णुसायुज्यञ्च भवति।

रत्नैः - सर्वक्रतुफलं विष्णुसायुज्यञ्च भवति।

रात्रौ -तिल -अन्न -फलाणि -रत्न -लोहानि च न पूरयेत्॥

<u>पूरणीयद्रव्येषु श्रेष्ठत्वम्</u>

अन्नेषु चतुर्विधान्नं श्रेष्ठं, फलं - दशगुणं भवेत्।

रसेषु नालिकेर -इक्षुरसञ्च श्रेष्ठं, फलं - दशगुणं भवेत्।

घृतेषु - गव्य -कपिलघृतञ्च श्रेष्ठं, फलं - दशगुणं भवेत्।

तैलेषु - महातिलोत्पन्नः -कृष्णतिलोत्पन्नतैलश्च श्रेष्ठं,

फलं - दशगुणं भवेत्।

क्षीरेषु - गव्यपयः -कपिलपयः -जरापयश्च श्रेष्ठं, फलं - दशगुणं भवेत्।

दधिषु - गव्य -कपिल -जरा-दधीणि श्रेष्ठं, फलं - दशगुणं भवेत्।

मधुषु - उद्यानजं -शैलजञ्च श्रेष्ठं, फलं - दशगुणं भवेत्।

अपूपे - उत्कारिका घृतसंयुतं श्रेष्ठं, फलं - दशगुणं भवेत्।

सक्तुषु - यव -गोधूम -शालिजाश्च श्रेष्ठं, फलं - दशगुणं भवेत्।

फलेषु - कदली -आम्र -पनसफलाणि श्रेष्ठं, फलं - दशगुणं भवेत्।

पुष्पेषु - जाती -तुलसी -रक्तोत्फलाणि श्रेष्ठं, फलं - दशगुणं भवेत्।

तण्डुलेषु - शालीतण्डुलं -प्रियङ्गुश्च श्रेष्ठं, फलं - दशगुणं भवेत्।

तिलेषु - कृष्ण -शुक्लश्च श्रेष्ठं, फलं - दशगुणं भवेत्।

गन्धेषु - उशीर -गन्ध -कुङ्कुमाणि च श्रेष्ठं, फलं - दशगुणं भवेत्।

लोहेषु - स्वर्ण -रजतश्च श्रेष्ठं, फलं - दशगुणं भवेत्।

रत्नेषु - मुक्ता -वज्रश्च श्रेष्ठं, फलं - दशगुणं भवेत्। एवं ज्ञात्वा।

*****पूरणोत्सवविधिः सम्पूर्णम्*****

श्रीः

## पत्रच्छेदनविधिः

अथ पत्रच्छेदन-विधिरुच्यते। पूर्ववत् सर्वाणि द्रव्याणि सम्पाद्य।

### पत्रच्छेदनार्थयन्त्राणि -पत्राणि -त्वचाः

सूचीमुखं -यवग्रीवं -नालिका -कुठारिका -एकपत्रं -नाराचं -द्विमुखं -त्रिमुखं -द्विपत्रं -छेदनी -वृत्तरूपं -क्षुरम् -अर्धक्षुरं -शलाका इति चतुर्दश छेदनयन्त्रं सङ्गृह्य।

कदलीपत्रं -तालपत्रं -गङ्गापत्रं -रजनीपत्रं -पद्मपत्रं -कुमुदपत्रम् -उत्पलपत्रं -सुगन्धिकापत्रं -कल्हारपत्रं -किंशुकपत्रञ्च छेदनार्हपत्राणि सङ्गृह्य।

कदलीत्वक् -नालिकेरस्यपत्रं वा केतकीपत्रं तालीपत्रं तालपत्रं वा कार्पासजं सूत्रं वा बन्धनार्थं सम्पाद्य। पत्रच्छेदनमारभेत्॥

आचार्यः भगवत्सन्निधौ प्रातर्नित्याराधनानन्तरं पत्रच्छेदनार्थं विशेषपूजां कृत्त्वा। यथाभागमन्नं निवेद्य। नीराज्य। भगवन्तं प्रार्थ्य।

पत्राण्याच्छिद्य देवेश! नानाकृतीनि सारतः।
समर्पयामि ते भक्त्या शोभावृद्धिकराणि वै॥
विशिष्टमर्चनं प्रोक्तं कर्तव्यं कुशलेन च।
कौशल्यं भक्तिभावश्च सर्वेषां वृद्धिकारणम्॥
तदर्थं देवदेवेश! अनुज्ञां देहि मे प्रभो॥

अस्य देवदेवस्य----लोकक्षेमार्थं सर्वेषां जनानां कौशल्याभिवृद्ध्यर्थम् अस्मिन् दिने पत्रच्छेदनोत्सवकर्म कर्तुं भगवदनुज्ञां देहि मे प्रभो। भगवतो बलेन----विष्णो अनुमन्यताम्। इति प्रार्थ्य। आचार्यः विषमत्व -उत्क्रमवर्जनेन पूर्वोक्त पत्राण्यादाय। आतपे -दीपोर्ध्वे वा न हरितेनातितप्तेन -नातिशीतेन -मध्यमेन पत्राणि तप्त्वा। पश्चात् मषीं-नीलाञ्जनञ्च अङ्गुलीभ्यां पत्रेषु विमृज्य। द्विगुणीकृत्य पत्राणि पुनः द्विगुणीकृत्य। अनन्तरं यन्त्रैः विविधाकारछेदनं कुर्यात्॥

छेदनाकारभेदाः

चतुरश्र -वृत्त -अर्धवृत्त -दलत्रय -चतुर्दल -दलषट्क -अष्टदल -द्वादशदल -शङ्खाकार -चक्राकार -गदाकार -पद्माकार -गजाकार -रथाकार -हयाकार -मयूराकार -हंसाकार -आलयाकृतिः(विमान) -तोरणाकृतिः -कुम्भाकृतिः पुष्पमालायितेति आकारभेदाः ज्ञात्वा। अनुतोऽङ्गुलि पर्यन्तं सूक्ष्मं -हस्तमानं स्थूलं -तालं तालादिकं मध्यमम् इति त्रिविधं स्मृत्वा।

एवम् आकारभेदेन पत्राणि छेदयित्वा। तैः पत्रैः सह उक्तपुष्पाणि सम्योज्य। पूर्वोदितैः सूत्रैः नानाविधाकारेण पत्राणि -पुष्पेन बन्धयित्वा। पत्रबन्धने पल्लवं -पेनकं -प्रकीर्णकं -नन्दी -रज्जुबन्धं -रूपकं इति षड्विधाः भवन्ति। तान् ज्ञात्वा। पक्षिणीरात्रिरेव-कालः पत्रच्छेदन -बन्धनञ्च कृत्वा। अहोरात्रबन्धने दशनाडिका-कालः ज्ञात्वा। दशनाडिका-काले बन्धने अनिर्माल्यं स्मृतः। अन्यथा निर्माल्यं भवेत्॥

पत्रसमर्पणम्*1

बन्धनीय नानाविधाकार पत्र -पुष्प -मालानि पृथक् पृथक् पात्रेषु निक्षिप्य। तान् महामण्डप मध्ये संस्थाप्य। तत्र आचार्यः आसने उपविश्य। अक्षतान् गृहीत्वा। प्राणानायम्य। श्रीभगवदाज्ञया----लोकक्षेमार्थं सर्वेषां जनानां कौशल्याभिवृध्यर्थम् अस्मिन् दिने पत्रच्छेदनोत्सव-कर्मणि स्थलशुध्यर्थम् -आत्मशुध्यर्थं -पत्रपुष्पादीनां शुध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं समस्तकार्याणां निर्विघ्नेन परिसमाप्त्यर्थम् आदौ विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य।अक्षतान् उत्तरतो निरस्य। अप उपस्पृश्य। पात्राणि साधयित्वा। विधिवत् विष्वक्सेनाराधनं - पुण्याहवाचनञ्च कृत्वा। तज्जलेन सर्वाणि बन्धन-पत्र-पुष्पाणि सम्प्रोक्ष्य।

---

1) இந்த பத்ரசேதனம் என்பது தான் தற்பொழுது ஸ்ரீரங்கம் நம்பெருமாளுக்கு சாற்றப்படும் கிளிமாலையாகும். மயூராகாரம் என்ற மயில்போல் உள்ள கிளிமாலை சாற்றப்படுகிறது. இந்த உத்ஸவத்தில் பல்லவம், பேனகம், ப்ரகீர்ணம், நந்தீ, ரஜ்ஜுபந்தம், ரூபகம் என்று ஆறு விதங்கள் உள்ளன ஆனால் இவவைகள் எந்த கோயிலிலும் அனுஷ்டானத்தில் இல்லாததால் அந்த ரூபங்கள் என்னவென்று தெரியவில்லை.

तदनु देवम् अर्घ्यादिभिरभ्यर्च्य। विविधाकार बन्धन पत्राण्यादाय। देवस्य आपादतल-मस्तकान्तम् अलङ्कृत्य। कल्याणकौतुकस्य परितः पूर्वे पल्लवीं -दक्षिणे पेनकं -पश्चिमे प्रकीर्णम् -उत्तरे नन्दिकम् -उभयोः पार्श्वयोः नन्दिक -रूपकञ्च क्रमेण विन्यस्य। पत्र-पुष्प बन्धन मालया कल्याणकौतुकम् अलङ्कृत्य। एवं गर्भगृह-भित्तिपार्श्वयोः -वितानञ्च -प्रथमावरणञ्च नानाविधाकार -पत्रबन्धनेन अलङ्कृत्य। देवस्य यथाभागमन्नं निवेद्य। नीराज्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

*****पत्रच्छेदनोत्सवविधिः सम्पूर्णम्*****

श्रीः

## भक्तोत्सवविधिः

भक्तबिम्बोक्त जन्मदिनोत्सवे देवस्य (स्नपनं -वीथिभ्रमणं) उत्सवं कृत्वा। भक्तोत्सवे न ध्वजं -होमः -बलिश्चसर्वं न कारयेत्॥ भक्तबिम्बं नवकलशैः संस्नाप्य। अलङ्कृत्य। भगवन्निवेदितान्नं निवेद्य। तद्भक्तप्रणीतगाथया देवं सन्तोष्य। भक्तबिम्बं शिबिकायाम् आरोप्य। महामण्डपे देवस्याभिमुखं संस्थाप्य। भगवद्धारित -वस्त्र -गन्ध -माल्यादीन् भक्तबिम्बाय दद्यात्। भगवत् पादुकां धारयित्वा। अनन्तरं वीथ्यां परिभ्रम्य। घटदीपं विना आलयान्तः प्रविश्य। स्वसन्निधौ निवेश्य। तन्निवेदितान्नं सर्वेभ्यः श्रीवैष्णवेभ्यः भक्तेभ्यः दद्यात्॥

**********

श्रीः

## <u>गरुडजयन्त्युत्सवः</u>

पौषमासे आर्द्रानक्षत्रे श्रीगरुडजन्मोत्सवं कृत्त्वा। सन्निधौ प्रातराराधनानन्तरम् आचार्यः अस्य देवदेवस्य----गरुडजन्मोत्सवे देवस्य----कलश स्नपनकर्म करिष्ये इति सङ्कल्प्य। देवेन गरुडबिम्बं नियोज्य। विधिवत् संस्नाप्य। पायसान्नं -गुलान्नञ्च निवेद्य। देवेन सह गरुडबिम्बस्य वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

**********

श्रीः

## <u>हनुमज्जयन्त्युत्सवः</u>

वैशाखमासे -अनूराधे -हनुमज्जयन्ती दिने श्रीरामस्य -भगवत् सन्निधौ वा नित्याराधनानन्तरम् आचार्यः अस्य देवदेवस्य----हनुमज्जयन्त्युत्सवे श्रीसीता लक्ष्मन हनुमत्समेत श्रीरामचन्द्रस्य----कलशैः स्नपनकर्म करिष्ये (हनुमत् सहितेन देवस्य----स्नपनकर्म करिष्ये) इति सङ्कल्प्य। देवेन सह वा सीता -लक्ष्मण -राघवेण सहितं वा हनुमन्तं बहुकलशैः संस्नाप्य। अलाभे केवलं हनुमन्तमेव संस्नाप्य। यथाभागमन्नं निवेद्य। नीराजयेत्॥

**********

श्रीः

## जयन्त्युत्सवाः

## मत्स्यजयन्त्युत्सवः

भगवत्सन्निधौ प्रातराराधनानन्तरं मत्स्य-सन्निधिं समासाद्य। मत्स्यरूपिणं भगवन्तं बहु कलशैः संस्नाप्य। अलङ्कृत्य। तुलस्या अर्चयित्वा। मत्स्यदेवस्य पुरतः स्थण्डिले विधिवत् अग्निं प्रतिष्ठाप्य। "ओं नमो भगवते मत्स्यरूपाय" इति मन्त्रेण मत्स्यमूर्तिम् आवाह्य। घृतेन अपामार्गसमिद्भिश्च तेन मन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। मत्स्यमूलमन्त्रेण द्वादशवारम् अर्घ्यं दत्त्वा। यथाभागमन्नं निवेद्य। ओं तीक्षणदंष्ट्राय विद्महे ज्वालाचक्राय धीमहि तन्नो मत्स्यः प्रचोदयात् इति प्रार्थ्य। नीराजयेत्॥

दंष्ट्राकरालमत्युग्रं शङ्ख-चक्रधरं विभुम्। (शेष सं- २२)
मत्स्यरूपं हरिं ध्यायेत् सर्वविद्याप्रदायकम्॥ इति ध्यात्वा

**********

## कूर्म जयन्त्युत्सवः

भगवत्सन्निधौ प्रातराराधनानन्तरं कूर्मदेव-सन्निधिं समासाद्य। कूर्मरूपिणं भगवन्तं बहु कलशैः संस्नाप्य। अलङ्कृत्य। पाटलपुष्पैः अर्चयित्वा। कूर्मदेवस्य पुरतः स्थण्डिले विधिवत् अग्निं प्रतिष्ठाप्य। "ओं नमो भगवते वासुदेवाय कूर्मरूपाय" इतिमन्त्रेण कूर्ममूर्तिम् आवाह्य।

घृतेन -अपामार्गसमिद्भिश्च तेन मन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। कूर्ममूलमन्त्रेण अर्घ्यं दत्त्वा। यथाभागमन्नं निवेद्य।

ओं दीर्घकण्ठाय विद्महे महीधराय धीमहि तन्नः कूर्मः प्रचोदयात् इति प्रार्थ्य। नीराजयेत्॥

शङ्खचक्र धरं देवं सर्वाभरणभूषितम्।
सर्वाकारमजं देवं कूर्मरूपं हरिं भजे॥ - (शेष सं - २२) इति ध्यात्वा

**********

## <u>वराह जयन्त्युत्सवः</u>

भगवत्सन्निधौ प्रातराराधनानन्तरं भूवराह-सन्निधिं समासाद्य। भूलक्ष्मी समेत वराहभगवन्तं बहु कलशैः संस्नाप्य। अलङ्कृत्य। शतपत्रैः अर्चयित्वा। भूवराहस्य पुरतः स्थण्डिले विधिवत् अग्निं प्रतिष्ठाप्य। "ओं वराहाय नारायणाय नमः" इति मन्त्रेण भूलक्ष्मी समेत वराहमूर्तिम् आवाह्य। श्वेतपद्मैः -बिल्वपत्रैः -चण्डपुष्पैः -तिलैः -अपामार्गसमिद्भिः -घृतेन च तेन मन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। वराहमूलमन्त्रेण अर्घ्यं दत्त्वा। यथाभागमन्नं -विविधभक्ष्यं -मुस्ताचूर्णञ्च निवेद्य।

ओं भूवराहाय विद्महे हिरण्यगर्भाय धीमहि तन्नः क्रोडः प्रचोदयात् इति प्रार्थ्य। नीराजयेत्॥

शङ्ख-चक्र-धरं देवं सर्वाभरण-भूषितम्।
श्रीभूनीलादि सहितं भजे यज्ञवराहकम्॥ - शेषसंहिता - २३

भूवराह महोत्साह सर्वशत्रुविनाशन।

वैरिसंहार मां रक्ष देहि दापय मे श्रियम्॥ इति प्रार्थ्य - शेषसंहिता - ७

एवं भूवराह -लक्ष्मीवराह -यज्ञवराह इति सर्व स्वरूपाणां पूजां विधाय। स्वतन्त्रवराहं चेत् जयन्तिकाले भगवदुत्सववत् महोत्सवं वा कारयेत्॥

**********

## <u>नरसिह्म जयन्त्युत्सवः</u>

भगवत् सन्निधौ सायमाराधनानन्तरं नृसिह्मसन्निधिं गत्वा। श्री भू सहितं वा श्रिया समेतं वा नृसिह्मम् अर्घ्यादिभिः अभ्यर्च्य। यथाभागमन्नं निवेद्य। नीराज्य। उत्सवार्थं प्रार्थ्य।

अतितीक्ष्णमहाकाय! कल्पान्तदहनोपम!।

नृसिंहाय नमस्तुभ्यमनुज्ञां दातुमर्हसि॥ इति प्रार्थ्य

तदनु नरसिह्म उत्सवबिम्बं बहिर्मण्डपे संस्थाप्य। (एकोनपञ्चाशत्) बहुकलशैः संस्नाप्य। अलङ्कृत्य। अशोकपुष्पैः -करवीरैः -बिल्वपत्रैः -रक्तपुष्पैः -तुलसीदलैश्च नृसिह्मम् अर्चयित्वा। तस्य पुरतः स्थण्डिले विधिवत् अग्निं प्रतिष्ठाप्य। "ओं नमो भगवते नारसिह्माय" इति मन्त्रेण श्रीनृसिह्मम् आवाह्य। अर्कसमिद्भिः -कटुत्रयैः -निम्बकाष्टैः -तिलैः -खादिरसमिद्भिः -करवीरपुष्पैः -अपामार्गसमिद्भिः -घृतेन च तेन मन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। नृसिह्ममूलमन्त्रेण अर्घ्यं दत्त्वा। अथवा हिरण्यासुर वधार्थाय स्तम्भादुद्भूत केसरिन्।

गृहाणार्घ्यं मयादत्तं कल्याण नरकेसरिन्॥

ओं नमो भगवते नारसिह्माय इदमर्घ्यम्

देवतानां हितार्थाय दैत्यानां निधनाय च।

गृहाणार्घ्यं मयादत्तं कल्याण नरकेसरिन्॥

ओं नमो भगवते नारसिह्माय इदमर्घ्यम्

प्रह्लादवरदार्थाय स्थूणोत्पन्न महामते।

गृहाणार्घ्यं मयादत्तं श्रियासार्धं जगत्पते॥

ओं नमो भगवते नारसिह्माय इदमर्घ्यम्

इति शङ्खेन क्षीरार्घ्यं दत्त्वा। दध्योदनं गुलान्नञ्च शीतलादीन्निवेद्य।

ओं नारसिह्माय विद्महे वज्रनखाय धीमहि तन्नो नृसिह्मः प्रचोदयात्

इति प्रार्थ्य नीराज्य। विविधैः स्तोत्रैः स्तुत्वा।

उद्यद्भास्वत्-सहस्त्रप्रभमशनि-निभं त्रीक्षणैर्विस्फुरन्तम्

वह्नावह्नाय विद्युत्ततिविततसटा भूषणं भूषणैश्च।

दिव्यैरादीप्तदेहं निशितनिखिलसद्-बाहुदण्डैरनेकैः

संभिन्नं भिन्नदैत्येश्वरतनुमतनुं नारसिह्मं नमामि॥ (शेष-२३)

इति ध्यात्वा। भगवन्निवेदितान्नं सर्वेभ्यः दद्यात्॥ एवं योगनृसिह्म - लक्ष्मीनृसिह्म -हिरण्यवधादि सर्व स्वरूपाणां पूजां विधाय। स्वतन्त्रनृसिह्मं चेत् जयन्तिकाले भगवदुत्सववत् महोत्सवं कारयेत्॥

**********

## वामन - त्रिविक्रम जयन्त्युत्सवः

(त्रिविक्रम सन्निधावेव एवं विधिः प्रशस्यते)

भगवत्सन्निधौ प्रातराराधनानन्तरं वामनस्य सन्निधिं समासाद्य। वामनरूप भगवन्तं बहु कलशैः संस्नाप्य। अलङ्कृत्य। तुलसीदलैः अर्चयित्वा। वामनस्य पुरतः स्थण्डिले विधिवत् अग्निं प्रतिष्ठाप्य। तस्मिन् "ओं नमो भगवते वामनाय" इति मन्त्रेण वामनमूर्तिम् आवाह्य। पद्मैः - मधुना -क्षीरेण -दध्ना -तिलैः -गुग्गुलैः -अपामार्गसमिद्भिः -लाजैः -घृतेन च तेन मन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। वामनमूलमन्त्रेण अर्घ्यं दत्त्वा। यथाभागमन्नं निवेद्य।

ओं त्रैविक्रमाय विद्महे विश्वरूपाय धीमहि तन्नो विश्वः प्रचोदयात्
इति प्रार्थ्य। नीराजयेत्॥

कमण्डलुं यज्ञसूत्रं शिखा छत्रं च धारिणम्।
तेजः पुञ्जमयं देवं वामनं पुरुषं भजे॥
शङ्ख चक्र धरं देवं विभुं तेजोमयं प्रभुम्। (शेष सं - २५)
त्रिविक्रमं वासुदेवं भजे तं विश्वतोमुखम्॥ इति ध्यात्वा

**********

## परशुराम जयन्त्युत्सवः

भगवत्सन्निधौ सायमाराधनानन्तरं परशुराम-सन्निधिं समासाद्य। परशुरामं बहु कलशैः संस्नाप्य। अलङ्कृत्य।

"ओं नमो भगवते जामदग्न्यरामाय हुं फट्" इति मन्त्रेण पूजयित्वा।

यथाभागमन्नं निवेद्य। नीराजयेत्॥

**********

## बलराम जयन्त्युत्सवः

भगवत्सन्निधौ प्रातराराधनानन्तरं बलराम-सन्निधिं समासाद्य। रोहिणी समेत बलरामं बहु कलशैः संस्नाप्य। अलङ्कृत्य। तुलस्या अर्चयित्वा। तस्य पुरतः स्थण्डिले विधिवत् अग्निं प्रतिष्ठाप्य।

"ओं नमो भगवते रामाय बलभद्राय" इति मन्त्रेण रोहिणी समेत बलरामम् आवाह्य। घृतेन -अपामार्गसमिद्भिश्च तेन मन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। तन्मन्त्रेण अर्घ्यं दत्त्वा। यथाभागमन्नं निवेद्य। ओं श्वेतवर्णाय विद्महे बलरामाय धीमहि तन्नो रामः प्रचोदयात् इति प्रार्थ्य। नीराजयेत्॥

शङ्ख चक्र धरं देवं वरदं हलधारिणम्। (शेष सं - २६)
सर्व शान्तिकरं देवं बलरामहरिं शुभम्॥ इति ध्यात्वा

**********

## कल्कि जयन्त्युत्सवः

भगवत्सन्निधौ प्रातराराधनानन्तरं कल्क्यंशहरि-सन्निधिं समासाद्य। कल्किरूपिणं बहु कलशैः संस्नाप्य। अलङ्कृत्य।

"ओं नमो भगवते कल्किरूपाय" इति मन्त्रेण पूजयित्वा। यथाभागमन्नं निवेद्य। नीराजयेत्॥

**********

## हयग्रीव जयन्त्युत्सवः

भगवत् सन्निधौ सायमाराधनानन्तरं हयग्रीवसन्निधिं गत्वा। श्रिया समेतं हयग्रीवम् अर्घ्यादिभिः अभ्यर्च्य। यथाभागमन्नं निवेद्य। नीराज्य। बहुकलशैः संस्नाप्य। अलङ्कृत्य। पद्मपुष्पैः हयग्रीवम् अर्चयित्वा। तस्य पुरतः स्थण्डिले विधिवत् अग्निं प्रतिष्ठाप्य। "ओं नमो भगवते हयग्रीवाय" इति मन्त्रेण हयग्रीवम् आवाह्य। मुण्डीद्रवैः -वचाभ्यः -गुग्गुलैः -मधुनि -क्षीरेण -दध्ना -घृतेन च तेन मन्त्रेण प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। हयग्रीवमूलमन्त्रेण अर्घ्यं दत्त्वा। गुलान्नादीन् निवेद्य।

ओं ज्ञानप्रदाय विद्महे हयग्रीवाय धीमहि तन्नो ज्ञानः प्रचोदयात्

इति प्रार्थ्य। नीराज्य। विविधैः स्तोत्रैः स्तुत्वा।

वन्देपूरित चन्द्रमण्डल गतं श्वेतारविन्दासनं
मन्दाकिन्यमृतांशु-कुन्दकुमुदक्षीरेन्दु हासाननम्।
मुद्रापुस्तक-शङ्ख-चक्रविधृत श्रीमद्भुजामण्डलं (शेष सं- ५)
निर्यन्निर्मलभारतीपरिमळं विश्वेशमश्वाननम्॥ इति ध्यात्वा

भगवन्निवेदितान्नं सर्वेभ्यः दद्यात्॥

**********

## सुदर्शन - सुदर्शन नरसिह्म जयन्त्युत्सवः

भगवत्सन्निधौ प्रातराराधनानन्तरं सुदर्शन-सन्निधिं समासाद्य। श्रीसुदर्शनं (षोडशकलशैः)बहु कलशैः संस्नाप्य। अलङ्कृत्य। यथाभागमन्नं निवेद्य। नीराज्य।

भगवन् सर्वविजयि सहस्रारापराजित।
शरणं त्वां प्रपन्नोस्मि श्रीकरं श्रीसुदर्शनम्॥ -(पराशरे -१६)
सहस्रादित्यसङ्काशं सहस्रवदनाम्बुजम्।
सहस्रदोस्सहस्रारं प्रपद्येहं सुदर्शनम्॥ - (शेष सं - २४)

इति प्रार्थ्य सुदर्शननृसिह्म जयन्त्यां श्रीनृसिह्मजयन्ती विधिवत् सर्वं कृत्त्वा।

बिभ्राणं शक्तिखड्गं ज्वलनमथसृणीकुन्तदन्तो कुठारं
चक्रं शङ्खाब्जपाशान् हलमुसलगदाखेटशूलांश्च दोर्भिः।
प्रत्यालीढं तमीडे त्रिनयनलसितं पिङ्गकेशं सुदंष्ट्रं
देवं पश्चार्ध योगासनलसित चतुश्चक्रभास्वन् नृसिंहम्॥
- (पराशरे-१६)

विश्वरूपमुदाराङ्गं सुदर्शननृकेसरिम्।
ज्वालामालाधरं देवं भजे तं विश्वतोमुखम्॥
इति प्रार्थ्य (शेष सं-२४)

*********

श्रीः

## मासपूजाविधानम्

## शुक्लपक्ष तिथिषु विशेषपूजा

### प्रथमायाम्

प्रथमायां देवस्य विशेषकिरीटं समर्प्य। वासुदेवात्मकम् अग्निदेवं सम्पूज्य। रक्तगन्धं -रक्तवस्त्रं -रक्तवर्णपुष्पमालाश्च समर्प्य। रक्तवर्णपुष्पेण अर्चयित्वा। (मूलमन्त्रेण) होमं कृत्त्वा। महाहविर्निवेद्य। नीराजयेत्॥

तेन पूजनेन शोभा -कीर्ति प्राप्तिश्च दारिद्र्यं नश्यति ध्रुवम्।

### द्वितीयायाम्

द्वितीयायां देवस्य गदां समर्प्य। पीतगन्धं -पीतवस्त्रं -पीतवर्णपुष्पमालाश्च समर्प्य। पीतवर्णपुष्पेण अर्चयित्वा। महाहविर्निवेद्य। तद्दिने सरस्वतीं श्वेतपुष्पेण सम्पूज्य। तस्याः सन्निधौ वेद -इतिहास -पुराण -लौकिकविद्यानाञ्च पठित्वा। यथाभागमन्नं निवेद्य। नीराजयेत्॥

तेन पूजनेन सर्वविद्यां प्राप्नोति।

### तृतीयायाम्

तृतीयायाम् अनन्तम् -अनन्तशयन -अनन्तासन देवं च संपूज्य। पीतरक्त मिश्रित गन्ध -पुष्प -वस्त्र -माल्यादीनि समर्प्य। चरुणा (मूलमन्त्रेण) होमं हुत्वा। यथाभागमन्नं निवेद्य। नीराजयेत्॥

तेन पूजनेन मनस्थैर्यं प्राप्नोति।

<u>चतुर्थ्याम्</u>

चतुर्थ्यां गणाधीशं विष्वक्सेनञ्च संपूज्य। पत्रपुष्पैः समभ्यर्च्य। भगवन्निवेदितान्नं निवेद्य। नीराजयेत्॥ तेन पूजनेन सदा प्रसन्ने भवति - शाश्वतं सुखमाप्नोति॥

<u>पञ्चम्याम्</u>

पञ्चम्यां महालक्ष्मीं संपूज्य। पद्मपुष्पेन अभ्यर्च्य। श्रीसूक्तेन श्वेत -रक्त पुष्पैः -वस्त्रैः -गन्ध माल्यैः संपूज्य। चरुणा (श्रीमन्त्रेण) होमं हुत्वा। महाहविर्निवेद्य। नीराजयेत्॥ राजा राज्यमवाप्णोति -जयार्थी जयमश्नुते -ऐश्वर्यकामानाम् ऐश्वर्यं -धानार्थी लभते धनं -स्त्रीणां सौभाग्यं पुत्रपौत्रादिकं च लभते।

<u>षष्ठ्याम्</u>

षष्ठ्यां वासुदेवस्य हस्तपद्मं -पद्मस्य अधिष्टातृ वरुणञ्च संपूज्य। देवस्य रक्तगन्धं -रक्तवस्त्रं -रक्तवर्णपुष्पमालाश्च समर्प्य। रक्तवर्णपुष्पेण अर्चयित्वा। महाहविर्निवेद्य। नीराजयेत्॥ तेन पूजनेन यशःप्राप्तिः रत्नादीनां प्राप्तिश्च भविष्यति।

<u>सप्तम्याम्</u>

सप्तम्यां देवस्य वक्षसि कौस्तुभं समर्प्य -संपूज्य। तद्दिने एक-चक्ररथ-स्थिताय वासुदेवांशभूताय ओं भास्कराय नमः इति सूर्यं संपूज्य। करवीर -पद्म -दाडिम -विविध रक्तपुष्पैः मालां समर्प्य। तैः अर्चयित्वा। महाहविर्निवेद्य। नीराजयेत्॥ तेन पूजनेन निधिकुम्भम् अवाप्नोति

-अक्षय्यं सुखं भवति -दारिद्र्यं नश्यति -व्याधितः स्वस्थतां व्रजेत्॥

<u>अष्टम्याम्</u>

अष्टम्यां सुदर्शन सन्निधौ विशेष स्नपनं -रक्तवर्ण पुष्पेन पूजनम् -अलङ्करणञ्च कृत्त्वा। यथाभागमन्नं निवेद्य। नीराजयेत्॥ तेन पूजनेन तेजस्वी -बलवान् -वाग्मी भवति -निर्विघ्नं भविष्यति।

<u>नवम्याम्</u>

नवम्यां देवस्य वनामालां संपूज्य। ओं वनमालायै नमः इत्यभ्यर्च्य। पीतवर्णपुष्पेन पूजनम् -अलङ्करणञ्च कृत्त्वा। पयो-घृतमिश्रेण तण्डुलेन (मूलमन्त्रेण) होमं हुत्वा। यथाभागमन्नं निवेद्य। नीराजयेत्॥ तेन पूजनेन दुःखं तरति -जयं श्रियं च प्राप्नुयात्॥

<u>दशम्याम्</u>

दशम्यां देवस्य शङ्खं संपूज्य। श्वेतहारैः अलङ्कृत्य। महाहविर्निवेद्य। नीराजयेत्॥ तेन पूजनेन रत्नानि -कीर्तिञ्च प्राप्नुयात्॥

<u>मासेशाः</u>

चैत्रादिषु द्वादशसु मासेषु द्वादशाधिपाः॥ १२१॥
अर्चनीयाः क्रमाद्विष्णुस्तथैव मधुसूदनः।
त्रिविक्रमो वामनश्च श्रीधरस्तदनन्तरम्॥ १२२॥
हृषीकेशः पद्मनाभो दामोदरसमाह्वयः।
केशवो नामधेयेन तथा नारायणः स्मृतः॥ १२३॥
माधवोऽन्यश्च गोविन्दो द्वादशैते प्रकीर्तिताः। -(पाद्मे-१५)

## <u>द्वादशि पूजा</u>

## <u>(मासेशाराधनम्)</u>

मासि मासि द्वादशिद्वये विशेषयजनं कृत्त्वा। पूर्वरात्रौ अस्य देवदेवस्य---- श्वः करिष्यमाण द्वादशिपर्वण पूजार्थम् अङ्कुरार्पण/रक्षाबन्धनकर्म करिष्ये तदङ्गं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। यथाविधि अङ्कुरान् अर्पयित्वा। रक्षाबन्धनं कृत्त्वा। परेद्युः द्वादशिदिने नित्यार्चनानन्तरं देवं यागशालायां संस्थाप्य। आचार्यः अस्य देवदेवस्य----द्वादशिपर्वणे चतुस्थानार्चनं करिष्ये तदङ्गं द्वारपूजां करिष्ये इति सङ्कल्प्य। विधिवत् द्वारपूजा पालिकाराधन पुरस्सरं चतुस्थानार्चनं कृत्त्वा। कुम्भे -वह्नौ च मासेशमावाह्य। (मासेशमन्त्रेण) होमं कृत्त्वा। पूर्णाहुतिं द्वारबलिञ्च दत्त्वा। वह्निस्थम् उद्वास्य। अनन्तरं देवं स्नपनमण्डपे संस्थाप्य। (द्वादश)कलशैः संस्नाप्य। अलङ्कृत्य। महाहविर्निवेद्य। नीराज्य। सायाह्ने देवं याने वा शिबिकायां वा समारोप्य। वीथिभ्रमणं कृत्त्वा। सन्निधौ निवेश्य। मण्डलस्थं बिम्बे नियोज्य। महाकुम्भप्रोक्षणं कृत्त्वा। अर्धरात्रिपूजां कारयेत्॥

### <u>चतुर्दश्यां</u>

चतुर्दश्यां गरुडं संपूज्य। गरुडस्य स्नपनम् - अलङ्करणञ्च कृत्त्वा। भगवन्निवेदितान्नं निवेद्य। नीराजयेत्॥ तेन पूजनेन विषनाशनं भवति।

## पौर्णमीपूजाक्रमः

पौर्णमास्यां - हयग्रीवं -चन्द्रं च संपूज्य। यथाभागमन्नं निवेद्य। नीराजयेत्॥

## मासेशाराधनम्

पूर्वेद्युः अङ्कुरार्पणं -रक्षाबन्धनञ्च कृत्त्वा। पौर्णमास्यां देवस्य इन्द्रनील-मणि-चित्रविचित्रशोभित स्वर्णकिरीटं समर्प्य। सायं नित्यार्चनानन्तरं चन्द्रोदये द्वादशी विधिवत् चतुस्थानार्चनं कृत्त्वा। अस्य देवदेवस्य---- पौर्णमास्यां चतुस्थानार्चनं करिष्ये इति सङ्कल्प्य। कुम्भ -वह्नौ च मासेशमावाह्य। पूर्णाहुत्यनन्तरं देवं विधिवत् (षोडश) कलशैः संस्नाप्य। पश्चात् देवं यानमारोप्य। समुद्रतीरमासाद्य। अस्य देवदेवस्य---- पौर्णमास्याम् अवभृथस्नानकर्म करिष्ये इति सङ्कल्प पूर्वकं यथाविधि अवभृथं कृत्त्वा। आलयान्तः प्रविश्य। यथाभागमन्नं निवेद्य। नीराज्य। देवं सन्निधौ निवेश्य। कुम्भप्रोक्षणादि सर्वं कृत्वा। अर्धरात्रिपूजां कारयेत्॥

## अमावास्या पूजाक्रमः

## मासेशाराधनम्

मासि मासि अमावास्यायां पूर्वेद्युः देवस्य सायमाराधनानन्तरं कल्याणकौतुकं बहुकलशैः संस्नाप्य। महाहविर्निवेद्य। भगवदनुज्ञां कृत्त्वा। अनन्तरम् आचार्यः अस्य देवदेवस्य----श्वः करिष्यमाण अमावास्योत्सव कर्माङ्गम् अङ्कुरार्पण/रक्षाबन्धन/शयनाधिवासकर्म करिष्ये तदङ्गं

वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। षोडशं -द्वादशं वा पालिकाः संस्थाप्य। विधिवत् अङ्कुरार्पणं कृत्त्वा। ततः बहिर्मण्डपे मध्यवेदिकायां शालि -तण्डुलैः पीठं परिकल्प्य। तन्मध्ये चतुष्पादासनं निवेश्य। चतुष्पादेषु ओं धर्माय नमः----
ओं ऐश्वर्याय नमः इत्यभ्यर्च्य। तन्मध्ये कल्याणकौतुकं निवेश्य। देवम् अर्घ्यादिभिरभ्यर्च्य। छत्र -चामर -आदर्श उपचारैः उपचर्य। रक्षाबन्धनं कृत्त्वा। अपूप -मुखवासादीन् निवेद्य। नीराज्य। सन्निधौ निवेश्य। कल्याणकौतुकं शयने शाययित्वा। अर्धरात्रिपूजां कारयेत्॥ प्रभाते अमावास्यायां प्रातर्नित्याराधनानन्तरं कल्याणकौतुकं वा बलिबिम्बं वा यागशालायां संस्थाप्य। आचार्यः अस्य देवदेवस्य----अमावास्योत्सव कर्मणि चतुस्थानार्चनं करिष्ये तदङ्गं द्वारपूजां करिष्ये इति सङ्कल्प्य। पूर्ववत् द्वारपूजां कृत्त्वा। चक्राब्जं -भद्रकं वा अर्चयित्वा। कुम्भे मासेशमावाह्य -संपूज्य। अग्नौ समिदन्नाज्यहोमानन्तरम् अमावास्योत्सवाङ्गहोमं करिष्ये इति सङ्कल्प्य। समिद्भिः मूलमन्त्रेण -घृतेन प्रणवेण -चरुणा विष्णुगायत्र्या -लाजेन प्रणवेन च प्रत्येकम् अष्टोत्तरशताहुतीः हुत्वा। पूर्णाहुतिं हुत्त्वा। अग्निं विसृज्य। वीथिषु मार्गशोधनं कृत्त्वा। पायसान्नेन गुल -तुलसी -करवीर -श्वेत रक्ताक्षतैः -तिलैः मिश्रितेन बलिद्रव्येण, अथवा अन्नेन -तण्डुलेन वा पुष्पेन वा द्वारादिषु वीथिषु च बलिं दत्त्वा। अनन्तरं देवं स्नपनमण्डपे संस्थाप्य। नवकलशैः वा अष्टोत्तरशतकलशैः वा सहस्रकलशैः वा संस्नाप्य। ततः

सर्वेषां भक्तानां तमोनाशनार्थं देवं पञ्चायुधैः अलङ्कृत्य। यथाभागमन्नं निवेद्य। नीराज्य। तदनु कल्याणकौतुकं रथे वा शिबिकायां वा गजम् अश्वं वा आरोप्य। वीथिभ्रमणं कृत्त्वा। पश्चात् ह्रद -समुद्र -नदी -तटाक तीरं वा समासाद्य। अथवा आलये जलद्रोण्यां वा यथाविधि अवभृथं कृत्वा। मन्दिरान्तः प्रविश्य। सन्निधौ निवेश्य। मण्डलस्थं बिम्बे विचिन्त्य। महाकुम्भप्रोक्षणादि सर्वं पूर्ववत् कृत्वा। अर्धरात्रिपूजां कारयेत्॥

## श्रवणनक्षत्र पूजा (मासेशाराधनम्)

पूर्वेद्युः सायमाराधनानन्तरम् आचार्यः अस्य देवदेवस्य----श्वः करिष्यमाण श्रवणर्क्षपूजा कर्माङ्गम् अङ्कुरार्पणकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् अङ्कुरार्पणं कृत्त्वा। श्रवणर्क्षदिने प्रातराराधनानन्तरं चतुस्थानार्चनं कृत्त्वा। महाकुम्भे मासेशम् आवाह्य। अनन्तरं देवं सहस्रकलशैः (बहुकलशैः) संस्नाप्य। पश्चात् देवं यानमारोप्य। नदी -तटाक -ह्रदतीरं वा समासाद्य। यथाविधि अवभृथं कृत्त्वा। आलयान्तः प्रविश्य। महाहविर्निवेद्य। देवं सन्निधौ निवेश्य। अन्यत् सर्वं पूर्ववत् कारयेत्॥

एवं विधिवत् मासि मासि रोहिण्यां -पुनर्वसुनक्षत्रे च देवं बहुकलशैः संस्नाप्य। अवभृथं कृत्त्वा। यथाभागमन्नं निवेदयेत्॥

प्रति मास्यां विशेषेण उत्तराषाढे -पूर्वोत्तर फल्गुण्यां -पुष्ये च देवस्य विशेषार्चनमाचरेत्॥

***********

## सङ्क्रान्ति पूजा

प्रति सङ्क्रमणकाले विधिवत् चतुस्थानार्चनं कृत्त्वा। मूलमन्त्रेण अष्टोत्तरशताहुतीः हुत्वा। परमान्नं -चतुर्विधान्नानि च निवेद्य। विप्रेभ्यः भोजनं दक्षिणाञ्च दद्यात्॥

## मासपूजाविधानम् - मासेशाराधनम्

### वसन्त ऋतौ संवत्सरारम्भ पूजा

मेषमासे वत्सरारम्भे देवस्य विशेषस्नपनं कृत्त्वा। नवाभरण वस्त्र माल्यादीन् समर्पयेत्॥

## मेषमासपूजा

### मेषसङ्क्रमण -विषुपुण्यकाल पूजा

पूर्वेद्युः सायमाराधनानन्तरम् आचार्यः अस्य देवदेवस्य----श्वः करिष्यमाण विषुपुण्यकालार्चन कर्माङ्गम् अङ्कुरार्पण/रक्षाबन्धन/ शयनाधिवासकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् सर्वं कृत्त्वा। मेषसङ्क्रमणे विषुपुण्यकाले प्रातर्नित्याराधनानन्तरं देवं यागशालायां संस्थाप्य। आचार्यः अस्य देवदेवस्य----मेषसङ्क्रमण-विषुपुण्यकाले चतुस्थानार्चनं करिष्ये तदङ्गं द्वारपूजां करिष्ये इति सङ्कल्प्य। विधिवत् यागशालापूजां कृत्वा। अग्निमुद्वास्य। अनन्तरं देवं बहुकलशैः संस्नाप्य। सायाह्ने कल्याणकौतुकं गजे वा स्यन्दने -शिबिकायां वा आरोप्य। वीथिभ्रमणं कृत्वा। नद्यादि तीरमासाद्य। पूर्ववत् अवभृथं कृत्त्वा। सन्निधौ निवेश्य।

मण्डलोद्वासन -कुम्भप्रोक्षणादि सकलं पूर्ववत् कुर्यात्॥

<u>मेषमास शुक्ल एकादशीपूजा</u>

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरं कृत्त्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे रमा समेतं विष्णुम् आवाह्य। मूलमन्त्रेण (विष्णु मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। आम्रपुष्पमालया देवम् अलङ्कृत्य। तैः अर्चयित्वा। नालिकेरोदकयुक्त अर्घ्यं कल्पयित्वा। सक्तुं निवेद्य। यजमानेन सर्वेभ्यः मधु-क्षीर-घृतदानं दत्त्वा। देवं शिबिकायां वीथि भ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्यां -चित्रानक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं - वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

मेषमासे रोहिणीनक्षत्रे(अक्षय्य तृतीया) मध्याह्ने वा सायाह्ने देवं बहुकलशैः संस्नाप्य। विशेष हवनं कृत्त्वा। महाहविर्निवेदयेत्॥

चित्रानक्षत्रे विशेषेण देवस्य चम्पकमालारोपणं कृत्त्वा। तेन अर्चयित्वा। चम्पकानाम् अभावे पाटलीपुष्पमालारोपणम् -अर्चनञ्च कृत्त्वा। महाहविर्निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## <u>वृषभमास पूजा</u>

वृषभसङ्क्रमण काले देवं बहुकलशैः संस्नाप्य। सङ्क्रमात् मासान्तं देवस्य गुडान्नं निवेदयेत्॥

वृषभ शुक्ल तृतीयायां देवं संस्नाप्य। गन्ध -पुष्पमालाभिः देवम् अलङ्कृत्य। नवपाकान् निवेदयेत्॥

<u>वृषभमास शुक्ल एकादशीपूजा</u>

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरं कृत्त्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे माधवी समेतं मधुसूदनम् आवाह्य। मूलमन्त्रेण (मधुसूदन मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। मल्लिकापुष्पमालया देवम् अलङ्कृत्य। तेन अर्चयित्वा। पनसफलयुक्त अर्घ्यं कल्पयित्वा। पायसान्नं निवेद्य। यजमानेन सर्वेभ्यः शय्यादानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्यां -विशाखर्क्षे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

विशाखर्क्षे विशेषेण शतपत्रमालारोपणं -तेन सर्वबिम्बालङ्करणं कृत्त्वा। शतपत्रपुष्पैः देवम् अर्चयित्वा। महाहविर्निवेद्य। नृत्त -गीत -वाद्यादिभिः भगवन्तं तोषयेत्॥

## <u>मिथुनमास पूजा</u>

मिथुनसङ्क्रमण काले देवं बहुकलशैः संस्नाप्य। ग्रीष्मकालकारणेन भगवन्तं शीतलैः उपचर्य। मासान्तं दध्योदनादि शीतलान्नं निवेद्य।

<u>मिथुनमास शुक्ल एकादशीपूजा</u>

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरं कृत्त्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे पद्माक्षी समेत त्रिविक्रमम् आवाह्य। मूलमन्त्रेण (त्रिविक्रम मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। यूथिका(मल्लिका)पुष्पमालया देवम् अलङ्कृत्य। तेन अर्चयित्वा। आम्रफलयुक्त अर्घ्यं कल्पयित्वा। पायसान्नं निवेद्य। यजमानेन सर्वेभ्यः स्वर्ण- छत्रदानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्यां -ज्येष्ठानक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

ज्येष्ठानक्षत्रे देवस्य सर्व-विविध फलानि निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## <u>कटकमास पूजा</u>

ग्रीष्मकालकारणेन देवस्य शीतलैः उपचर्य। मासान्तं दध्योदनादि शीतलान्नं निवेद्य।

<u>दक्षिणायनपुण्यकाल पूजा</u>

पूर्वेद्युः सायमाराधनानन्तरम् आचार्यः अस्य देवदेवस्य----श्वःकरिष्यमाण दक्षिणायनपुण्यकालार्चन कर्माङ्गम् अङ्कुरार्पण/रक्षाबन्धन/शयनाधिवास कर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् सर्वं कृत्त्वा। दक्षिणायनपुण्यकाले

प्रातर्नित्याराधनानन्तरं विधिवत् चतुस्थानार्चनं कृत्त्वा। अग्निमुद्वास्य। अनन्तरम् आचार्यः अस्य देवदेवस्य----कटकसङ्क्रान्तौ दक्षिणायनपुण्यकाले च----घटैः स्नपनं करिष्ये इति सङ्कल्प्य। पूर्ववत् देवं संस्नाप्य। यथाभागमन्नं निवेद्य। सायाह्ने कल्याणकौतुकं गजे वा स्यन्दने शिबिकायां वा समारोप्य। वीथिभ्रमणं कृत्त्वा। नद्यादि तीरमासाद्य। पूर्ववत् अवभृथं कृत्त्वा। अन्यत् सर्वं पूर्ववत् कारयेत्॥

<u>कटकमास शुक्ल एकादशीपूजा</u>

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे कमला समेतं वामनम् आवाह्य। मूलमन्त्रेण (वामन मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। अपामार्गपुष्पमालया देवम् अलङ्कृत्य। तेन अर्चयित्वा। मातुलङ्गफलयुक्त अर्घ्यं कल्पयित्वा। लड्डुकान् निवेद्य। यजमानेन सर्वेभ्यः गोदानं दत्त्वा। देवं शिबिकायां वीथि भ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां शयनोत्सवप्राप्ते पृथक् चतुस्थानार्चनं न कुर्यात्॥

पौर्णमास्याम् -उत्तराषाढानक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

उत्तराषाढानक्षत्रे विशेषेण देवस्य नानाविध सर्वफलानि निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## सिह्ममास पूजा

सिह्मसङ्क्रमण काले देवं बहुकलशैः संस्नाप्य।

सिह्ममास शुक्ल एकादशीपूजा

(पवित्रोत्सवप्राप्ते एकादश्युत्सवं न कुर्यात्)

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे कान्तिमती समेत श्रीधरम् आवाह्य। मूलमन्त्रेण (श्रीधर मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। शतपत्रपुष्पमालया देवम् अलङ्कृत्य। तेन अर्चयित्वा। जम्बीरफलयुक्त अर्घ्यं कल्पयित्वा। अपूपान् निवेद्य। यजमानेन सर्वेभ्यः पादुकादानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्यां -श्रवणनक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

श्रवणनक्षत्रे विशेषेण देवस्य सर्वाणि कदलीफलानि -बीजापूरफलानि च निवेद्य। अभावे आर्द्रपूगी फलानि निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## कन्यामास पूजा

कन्यासङ्क्रमण काले देवं बहुकलशैः संस्नाप्य।

कन्यामास शुक्ल एकादशीपूजा

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा।

पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे अपराजिता समेतं हृषीकेशम् आवाह्य। मूलमन्त्रेण (हृषीकेशमन्त्रेण मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। काशपुष्पमालया देवम् अलङ्कृत्य। कूष्माण्डफलयुक्त अर्घ्यं कल्पयित्वा। तिलपिष्टं निवेद्य। यजमानेन सर्वेभ्यः वस्त्रदानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्याम् -उत्तरप्रोष्टपदानक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

उत्तरप्रोष्टपदा-नक्षत्रे विशेषेण देवस्य पङ्कजमालारोपणं कृत्त्वा। तेन अर्चयित्वा। अभावे कल्हारमालारोपणम् -अर्चनञ्च कृत्त्वा। महाहविर्निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## तुलामास पूजा

तुलासङ्क्रमणकाले आचार्यः(नद्यादिषु) विशेषस्नानं कृत्त्वा।

### तुला-विषुपुण्यकालपूजा

पूर्वेद्युः -श्वः करिष्यमाण तुला-विषुपुण्यकालार्चन कर्माङ्गम् अङ्कुरार्पण/ रक्षाबन्धन/ शयनाधिवासकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् सर्वं कृत्त्वा। तुला-विषुपुण्यकाले पूर्ववत् चतुस्थानार्चनं - बहुकलशैः स्नपनञ्च विधाय। सायाह्ने देवं गजे वा स्यन्दने वा शिबिकायां वीथिभ्रमणं कृत्त्वा। नद्यादि तीरमासाद्य। पूर्ववत् अवभृथं कुर्यात्॥

<u>तुलामास शुक्ल एकादशीपूजा</u>

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे पद्मावती समेतं पद्मनाभम् आवाह्य। मूलमन्त्रेण (पद्मनाभ मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। शमीपत्रेण देवम् अर्चयित्वा। कदलीफलयुक्त अर्घ्यं कल्पयित्वा। शालिपिष्टं निवेद्य। यजमानेन सर्वेभ्यः स्वर्णमुद्रादानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्याम् -अश्विनीनक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

अश्विनीनक्षत्रे विशेषेण देवस्य श्वेतपद्ममालारोपणं कृत्त्वा। तेन अर्चयित्वा। अभावे जातिपुष्पमालारोपणम् -अर्चनञ्च विधाय। तद्दिने मण्डलाराधने आदिपद्ममण्डलं वा नवपद्म मण्डलं वा अर्चयित्वा। महाहविर्निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## <u>वृश्चिकमास पूजा</u>

वृश्चिकसङ्क्रमण काले देवं बहुकलशैः संस्नाप्य।

<u>वृश्चिकमास शुक्ल एकादशीपूजा</u>

(शयनोत्थापनप्राप्ते एकादशीपूजां न कुर्यात्)

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा।

पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे वाग्देवी समेत दामोदरम् आवाह्य। मूलमन्त्रेण (दामोदर मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। श्वेतपद्मपुष्पमालया देवम् अलङ्कृत्य। तेन अर्चयित्वा। पद्मपुष्पयुक्त अर्घ्यं कल्पयित्वा। मुद्गचूर्णं निवेद्य। यजमानेन सर्वेभ्यः आज्यदानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -कृत्तिकानक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् - अवभृथञ्च पूर्ववत् कृत्त्वा।

पौर्णमास्यां कृत्तिकादीपोत्सव-कारणेन मासेशपूजां न कुर्यात्॥

कृत्तिकानक्षत्रे विशेषेण वृश्चिकाराधनं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## धनुर्मास पूजा (तिथि -नक्षत्र पूजा)

चापसङ्क्रमणकाले देवं बहुकलशैः संस्नाप्य।

विवाह -विष्णुपञ्चमी पूजा

धनुर्मास शुक्लपञ्चम्यां वरप्राप्तिदिने व्यञ्जनोत्सवं कृत्त्वा। देवस्य नानाविध पाक व्यञ्जनेन सहितं महान्नं निवेद्य। वरार्थीणां भगवन्तं प्रार्थ्य। ताभ्यः भगवन्निवेदितं दापयेत्॥

धनुर्मास शुक्ल एकादशी पूजा (मोक्षोत्सव प्राप्ते एकादश्युत्सवं न कुर्यात्) देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे मालती समेतं

केशवम् आवाह्य। मूलमन्त्रेण (केशव मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। रक्तपद्ममालया देवं अलङ्कृत्य। तेन अर्चयित्वा। नारङ्गफलयुक्त अर्घ्यं कल्पयित्वा। मोदकान् निवेद्य। यजमानेन सर्वेभ्यः सप्तधान्यानि दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्यां -मृगशीर्षनक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

मृगशीर्षनक्षत्रे कुमुदाम्रफलानि निवेद्य। तन्नक्षत्रे विशेषेण देवस्य गन्धालेपनं कृत्वा।

## गन्धालेपन विधिः

गन्धे कर्पूर -कुङ्कुम मिश्रेण मूलबेरस्य मूर्द्धादि पीठान्तं वा पादान्तं वा जानुपर्यन्तं नाभ्यन्तं वा आलिप्य। देवीभ्यां कटिपर्यन्तं लेपयित्वा। कर्मार्चायाश्च एवं विधाय। मूलबेरं लेप -भित्ति -पटं चेत् कर्मार्चायामेव संलिप्य। अनन्तरं देवस्य ह्रीबेरमालारोपणम् कृत्त्वा। महाहविर्निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## मकरमास पूजा

### उत्तरायणपुण्यकाल पूजा

पूर्वेद्युः सायमाराधनानन्तरम् आचार्यः अस्य देवदेवस्य----श्वःकरिष्यमाण उत्तरायणपुण्यकालार्चन कर्माङ्गम् अङ्कुरार्पण/रक्षाबन्धन/शयनाधिवास

कर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् सर्वं कृत्त्वा। उत्तरायणपुण्यकाले प्रातर्नित्याराधनानन्तरं विधिवत् चतुस्थानार्चनं विधाय। अग्निमुद्वास्य। अनन्तरम् आचार्यः अस्य देवदेवस्य----मकरसङ्क्रान्तौ उत्तरायणपुण्यकाले च पञ्चविंशतिघटैः स्नपनं करिष्ये इति सङ्कल्प्य। पूर्ववत् देवं संस्नाप्य। यथाभागमन्नं निवेद्य। यजमानेन सर्वेभ्यः गो -भू -स्वर्ण -कूष्माण्ड -व्रीहिदानानि दत्त्वा। सायाह्ने कल्याणकौतुकं गजे वा स्यन्दने शिबिकायां वा आरोप्य। वीथिभ्रमणं कृत्त्वा। नद्यादि तीरमासाद्य। पूर्ववत् अवभृथं कृत्त्वा। अन्यत् सर्वं पूर्ववत् कारयेत्॥

<u>मकरमास शुक्ल एकादशीपूजा</u>

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे पद्मा समेतं नारायणम् आवाह्य। मूलमन्त्रेण (नारायण मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। सर्वपुष्पमालया देवम् अलङ्कृत्य। तैः अर्चयित्वा। दाडिमफलयुक्त अर्घ्यं कल्पयित्वा। विविधचूर्णानि निवेद्य। यजमानेन सर्वेभ्यः मधु -आज्य -शर्करादानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

द्वादश्यां -पौर्णमास्यां -पुष्यनक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

पुष्यनक्षत्रे विशेषेण देवस्य हरिद्रालेपनं कृत्त्वा।

## रजनीलेपन विधिः

पूर्वेद्युः आचार्यः अस्य देवदेवस्य----श्वः करिष्यमाण रजनीलेपनोत्सवार्थं अङ्कुरार्पण/रक्षाबन्धन/शयनाधिवासकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् सर्वं कृत्त्वा। रजनीचूर्णस्थ-पात्रं धान्यपीठे संस्थाप्य। अधिवास्य। मूलबेरस्य आकण्ठात्पादान्तम् अधिवास रजनीलेपनं कृत्त्वा। परेद्युः मासर्क्षे(पुष्ये) प्रातराराधनानन्तरम् अधिवासलेपन चूर्णं विसृज्य। विधिवत् चतुस्थानार्चनं -स्नपनञ्च कृत्त्वा। मूलबेरस्य मूर्धादि नाभ्यन्तं वा कटिपर्यन्तं वा जान्वन्तं पादान्तं वा रजनीम् आलिप्य। देवीभ्यां नाभिपर्यन्तं लेपयित्वा। कर्मार्चायाश्च एवं विधाय। एवं प्रभा -पीठञ्च संलिप्य। कुम्भ -मण्डल -कुण्डानाञ्च हरिद्रालेपनं कृत्त्वा। सायाह्ने पूर्ववत् चतुस्थानार्चनं विधाय। महाहविर्निवेद्य। महाकुम्भप्रोक्षणादि सर्वं पूर्ववत् कुर्यात्॥ मूलबेरं लेप -भित्ति -पटं चेत् कर्मार्चायामेव कृत्त्वा। एवं रजनीलेपनं चेत् पुष्यर्क्षे मासेशाराधनं विना भवेत्॥

## कुम्भमास पूजा

कुम्भसङ्क्रमण काले देवं बहुकलशैः संस्नाप्य।

### कुम्भमास शुक्ल एकादशीपूजा

देवस्य नित्याराधनानन्तरं एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे नित्या समेतं माधवम् आवाह्य। मूलमन्त्रेण (माधव मन्त्रेण) होमं कृत्त्वा।

पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य। वकुलपुष्पमालया देवम् अलङ्कृत्य। तेन अर्चयित्वा। बीजापूरफलयुक्त अर्घ्यं कल्पयित्वा। मण्डकान्*1 निवेद्य। यजमानेन सर्वेभ्यः तिलपात्रदानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

कुम्भ -शुक्ल -पञ्चम्यां देवं बहुकलशैः संस्नाप्य। विशेषार्चनं विधाय।

माघ -शुक्ल -सप्तम्यां(रथसप्तमि) देवं बहुकलशैः संस्नाप्य। विशेषार्चनमाचरेत्॥

द्वादश्यां -पौर्णमास्यां -मघानक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

मघानक्षत्रे विशेषेण देवस्य दमनमालारोपणं कृत्त्वा। तेन अर्चयित्वा। महाहविर्निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

## मीनमास पूजा

मीनसङ्क्रमण काले देवं बहुकलशैः संस्नाप्य।

### मीनमास शुक्ल एकादशीपूजा

देवस्य नित्याराधनानन्तरम् एकादशी उत्सवार्थं पुष्पाङ्कुरान् अर्पयित्वा। पूर्ववत् यागशालायां चतुस्थानार्चनं विधाय। महाकुम्भे चन्द्रवती समेतं गोविन्दम् आवाह्य। मूलमन्त्रेण (गोविन्द मन्त्रेण) होमं कृत्त्वा। पूर्णाहुत्यनन्तरं देवं मध्यमोत्तम(२७७)कलशैः संस्नाप्य।

---

1) பாலாடையால் பண்ணப்பட்ட பதார்த்தம்.

मन्दारपुष्पमालया देवम् अलङ्कृत्य। तेन अर्चयित्वा। इक्षुरसयुक्त अर्घ्यं कल्पयित्वा। गोधूमान्नं निवेद्य। यजमानेन सर्वेभ्यः स्वर्णपात्रदानं दत्त्वा। देवं शिबिकायां वीथिभ्रमणं कृत्त्वा। अन्यत्सर्वं पूर्ववत् कारयेत्॥

मीन -शुक्ल -पञ्चम्यां देवं बहुकलशैः संस्नाप्य। (गोविन्दमन्त्रेण) विशेष होमं कृत्वा। सायाह्ने देवम् अश्वे -गजे -रथे -शिबिकायां वा आरोप्य। वीथिभ्रमणं कृत्त्वा।

द्वादश्यां -पौर्णमास्याम् -उत्तरफल्गुनीनक्षत्रे च अङ्कुरं -चतुस्थानार्चनं -स्नपनं -वीथिभ्रमणम् -अवभृथञ्च पूर्ववत् कृत्त्वा।

उत्तरफल्गुनी काले श्रियोत्सवं चेत् मासेशाराधनं न कुर्यात्॥

उत्तरफल्गुनीनक्षत्रे विशेषेण देवस्य तुलसीमालारोपणं कृत्त्वा। तेन अर्चयित्वा। महाहविर्निवेद्य। अन्यत्सर्वं पूर्ववत् कारयेत्॥

अधिकमास एकादशी दिने एकादशी उत्सववत् सर्वं कृत्त्वा। महाकुम्भे कमला समेतं पुरुषोत्तमम् आवाह्य। मूलमन्त्रेण(पुरुषोत्तम मन्त्रेण) होमं कृत्त्वा। स्नपन -वीथिभ्रमणादीन् यथाविधि कुर्यात्॥

********

## पुष्पोत्सवः

(एकदिनोत्सवः)

मासर्क्षे चम्पक -शतपत्र -कल्हार -श्वेतपद्म -दमन -तुलस्यादीनां मालारोपणं कृत्त्वा। तत्काले पूर्वेद्युः सायमाराधनानन्तरं कल्याणकौतुकं

बहुकलशैः संस्नाप्य। ततः आचार्यः अस्य देवदेवस्य----श्वः करिष्यमाण चम्पकारोपण/शतपत्रार्चन/कल्हारमालारोपण/पुण्डरीकारोपण/दमन मालारोपण/तुलस्यारोपण कर्माङ्गम् अङ्कुरार्पण/रक्षाबन्धन/ चतुस्थानार्चन/शयनाधिवासकर्म करिष्ये इति सङ्कल्प्य। पूर्ववत् सर्वं कृत्त्वा। परेद्युः प्रातराराधनानन्तरं कल्याणकौतुकं पूर्ववत् संस्नाप्य। मूलबेरस्य नाभ्यन्तं वा ऊरुमात्रं वा जान्वन्तं पादान्तं वा तत्तन्मालारोपणं कृत्त्वा। देवीभ्यां परिवाराणाञ्च नाभिमानं विधाय। कुम्भ -मण्डल -कुण्डेषु च एवं कृत्त्वा। यागशालायां चतुस्थानार्चनं समाप्य। सर्वेभ्यः महाहविर्निवेद्य। बलिदानादीन् कृत्त्वा। देवस्य पुरतः वेद -श्लोकपठनञ्च -गीत -नृत्त -वाद्यघोषञ्च कृत्त्वा। देवस्य विमानयुक्तयानम् आहृत्य। तं तत्तत्पुष्पैः पत्रैः विमानस्य अधस्तादूर्ध्वान्तम् अलङ्कृत्य। तन्मध्ये देवमारोप्य। सर्ववीथिषु तत्तत्पत्र -पुष्पवृष्टि युक्तेन देवं परिभ्रम्य। अनन्तरं मालाम् अवरोप्य। स्नपनं कुर्यात्। अन्यत्सर्वं पूर्ववत् कारयेत्॥

******

## प्रतिष्ठानक्षत्र पूजा

भगवत् सन्निधौ नित्याराधनानन्तरम् आचार्यः अस्य देवदेवस्य----प्रतिष्ठार्क्षदिने (संवत्सराभिषेक काले) चतुस्थानार्चनं करिष्ये इति सङ्कल्प्य। विधिवत् चतुस्थानार्चनं -(उत्तमोत्तम कलशैः ४७३) स्नपनम् -अवभृथञ्च कुर्यात्॥

******

## पर्वोत्सव क्रमः

(अन्यत्र विधिः - श्रीप्रश्नोक्ता)

भगवत्सन्निधौ नित्यार्चनानन्तरं विशेषार्चनं कृत्त्वा। महान्नं - सर्वविध भक्ष्यादींश्च निवेद्य। देवं यानमारोप्य। आलयान्तः प्राकारेषु भ्रमणं कृत्त्वा। तत्समये देवस्य श्रमशान्त्यर्थं मध्ये मध्ये मण्डपे अर्घ्याद्युपचारपूर्वकं विविधभक्ष्यान् -शर्करासंमिश्रमुद्गान् -नालिकेरजलान् -मुखवास ताम्बूलादीन् च निवेद्य। घटदीपं समर्प्य। सन्निधौ निवेश्य। सर्व पर्वेषु सहस्रनामार्चनं कृत्त्वा। नीराजयेत्॥

****************

## व्यतीपात पूजा

चतुस्थानार्चनं बहुकलशैः स्नपनं कुर्यात्॥

****

## युगादि -मन्वादि -कल्पादि पूजा

प्रातराराधनानन्तरं देवं (अधमोत्तम कलशैः ८१) बहुकलशैः संस्नाप्य। गन्ध -वस्त्र -पुष्पस्रग्मालाभिः अलङ्कृत्य। नवपाकान् निवेद्य। यजमानेन विशेषदानानि कृत्त्वा। आचार्यः जपम् -अर्चनञ्च पूर्ववत् कुर्यात्॥

कल्पादौ हंसरूप हरिं संपूजयेत्॥

*******************

## ग्रहणकाल पूजा

सोम-सूर्योपराग समये----उपराग पुण्यकाले चतुस्थानार्चनं करिष्ये इति सङ्कल्प्य। पूर्ववत् चतुस्थानार्चनं विधाय देवं बहुकलशैः संस्नाप्य।

अनन्तरं समुद्रादिषु अवभृथं कुर्यात्॥

## विशेषावभृथ कालानि

ग्रामजन्मर्क्षे वा -यजमान जन्मर्क्षे -राज्ञां जन्मर्क्षे वा -प्रासादारम्भ नक्षत्रे - राज्याभिषेक दिने अथवा नवम्यां वा यथाविधि अवभृथं कुर्यात्॥ विषुवद्वये अयनद्वये च रात्रौ अवभृथं कृतेऽपि न दोषाः भवन्ति। इतर कालेषु दिवावेव अवभृथं कुर्यात्॥

********

## महालक्ष्म्याः शुक्रवारपूजा

मासि मासि शुक्रवारे श्रियः विशेषोत्सवं कृत्वा। श्रियः सन्निधौ प्रातराराधनानन्तरं देवीं स्नपन मण्डपे संस्थाप्य। बहु कलशैः संस्नाप्य। अलङ्कृत्य। यथाभागमन्नं निवेद्य। नीराजयेत्॥

******मास-तिथि-नक्षत्र-मासेश-विशेषार्चनानि संपूर्णम्******

श्रीः

## महोत्सव प्रायश्चित्तः

- कौतुकयुक्त आचार्यस्य जनन -मरण आशौचं श्रुणुयादपि न त्वघः भवेत्॥
- अविमानालये उत्सवं न कुर्यात्। कुर्याद्वा याम्ये -वायव्ये वा ध्वजमारोप्य। शान्तिहोमं कुर्यात्। एकवत्सरान्तं स्तम्भं तत्रैव स्थापयेत्॥

- नित्योत्सवहीनालये ध्वजारोहणपूर्वकम् उत्सवं न कुर्यात्। मोहेन कुर्याद्वा शान्तिहोमं समाचरेत्॥
- स्तम्भं -ध्वजं च उक्तमानहीनं यदि स्यात् शान्तिहोमं कृत्त्वा। ध्वजं मूषिकाद्यैः दूषिते -अशुचिद्रव्यसंस्पर्शौ च अन्यध्वजं समारोप्य। शान्ति होमं कृत्त्वा। ब्राह्मणान् भोजयेत्॥
- ध्वजं -स्तम्भं च सकृदेव उपयोग्यः। पुनरुपयोगं न कुर्यात्। मोहेन कुर्याद्वा (देवस्य) उत्तमोत्तम (४७३) स्नपनं कृत्त्वा। शान्तिहोमं हुत्वा। ब्राह्मणान् भोजयेत्॥
- स्थापित ध्वजं वात -आतपादि दूषिते वर्णहीने च पुनः सृष्ट्वा -वातवेगेन येन केन हेतुना ध्वजं पतिते - पुनः उद्धृत्य -बद्ध्वा (देवस्य) मध्यमोत्तम(२७७) स्नपनं कुर्यात्॥
- वर्णहानौ तथा भिन्नः -च्छिन्नः अपि ध्वजं यष्टिश्चापि निपतितं त्यक्त्वा -अन्यध्वजं आरोपयेत्॥
- ध्वजपटं विपरीतेन आरोपणे -तं क्रमेण कृत्त्वा अथवा अन्यध्वजं वा आरोप्य -संस्नापयेत्॥
- ध्वजस्तम्भं पतिते -भिन्ने -सुषुरे वा दूषिते -अन्यस्तम्भं संस्थाप्य -स्नपनपूर्वकं शान्तिहोममाचरेत्॥
- ध्वजस्तम्भकम्पने -भ्रमणे -पतिते वा यदृच्छया पूर्ववत् शान्तिहोमं -मूलमन्त्रजपञ्च कुर्यात्॥

- ❖ गरुडकुम्भं भिन्ने वा नष्टे वा अस्पृष्यैः -प्राणिभिः स्पृष्टे अन्यकुम्भं संस्थाप्य पुनः गरुडमावाह्य -कर्मशेषं समापयेत्॥
- ❖ ध्वजस्तम्भं विगर्हितैः चण्डालाद्यैः -स्पर्शने -अन्यस्तम्भं संस्थाप्य -शान्तिहोमं समाचरेत्॥
- ❖ ध्वजस्तम्भं सूतकैः प्रेतकैः प्रतिलोमैश्च स्पर्शने -स्तम्भं पुण्याहजलेन प्रोक्षयेत्॥
- ❖ सकृन्नियोजितं अथवा त्यक्तं मृण्मय पालिकासु अङ्कुरान् अर्प्यते चेत् महान् दोषः -शान्तिहोममाचरेत्॥
- ❖ अङ्कुरान् -रक्त -श्याम वर्णयुते -अप्रूरूढे -तथा तिर्यग्गते -अस्पृश्य स्पर्शने -तेषां भिन्ने -च्छिन्ने -नष्टे च पतिते वल्मीकादि प्ररोहे मूषिकाद्यैश्च भक्षिते -शान्तिहोमं हुत्वा -ब्राह्मणान् भोजयेत्॥
- ❖ प्रारम्भितकर्म मध्ये नैमित्तिकं संभवति चेत् -तत्कर्मस्य पृथक् अङ्कुरान् अर्पयेत्॥
- ❖ अङ्कुरार्पणात् परं दैवाद्वा मानुषात्तुवा कर्मलोपे सति -अङ्कुरानपि त्यक्त्वा शान्तिहोमं मूलमन्त्र जपञ्च कुर्यात्॥
- ❖ रक्षाबन्धनस्य कर्ममध्ये नैमित्तिक-कङ्कणकर्मं संभवति चेत् -तदर्थं पुनः रक्षां बन्धयेत्॥
- ❖ कर्ममध्ये येन केनापि कारणेन नैमित्तिकस्नपनं संभवति चेत् -देवं संस्नाप्य अनन्तरम् उक्तकर्ममाचरेत्॥

- ग्रामादि शून्ये न बलिः वीथ्युत्सवञ्च कृत्त्वा -यदि क्रियते तदा सहस्त्रकलशैः स्नापयेत्॥
- उत्सवे वर्तमाने महावातादिना ग्रामादौ शिथिलं चेत् अष्टोत्तरशतकलशैः स्नपनं -शान्तिहोमं -मूलमन्त्रजपं -वित्तैः ब्राह्मणतोषणञ्च कृत्त्वा -पुन उत्सवमाचरेत्॥
- सर्वेषां कर्मणां मुहूर्तातिक्रमे -शान्तिहोमं कृत्त्वा -पश्चात्कर्ममारभेत्॥
- कर्ममध्ये दैवाद्वा मानुषाद्वा अधिकारिणां मूर्तिपानां च अभिधाने -तादृशैः द्विजैः कर्मशेषं समापयेत्॥
- दिनातिक्रमबलिप्रदाने -आदौ अतिक्रमबलिं दत्त्वा पश्चात् तद्दिनबलिं दद्यात्॥
- उद्यान -मृगया -जलद्रोण्यादि कल्पिते उत्सवाङ्गे -हीनं चेत् -शान्तिहोमं -मूलमन्त्रजपं -ब्राह्मणभोजनञ्च कुर्यात्॥
- तीर्थोत्सवलोपे -उत्तमोत्तम(४७३) स्नपनं कृत्त्वा -यथाविधि तीर्थोत्सवं कुर्यात्॥
- यथोक्त मास -नक्षत्रादौ अतिक्रमे मासान्तरे उत्सवं कृत्त्वा -यद्वा तदुत्सवं वत्सरातिक्रमे सहस्त्रकलश स्नपनं -शान्तिहोमं -मूलमन्त्रजपञ्च समाचरेत्॥
- पर्वोत्सव लोपे यथाशक्ति स्नपनमेव शान्तिः॥
- श्रवणाद्युत्सव लोपे -उत्तमोत्तम(४७३) स्नपनमाचरेत्॥
- वलिद्रव्यानां व्यत्यासे -सर्पिषा (मूलमन्त्रेण) शताहुतीर्हुनेत्॥

- ❖ बिम्बस्य वात -आतपादि संस्पृष्टे -स्नपनमाचरेत्॥
- ❖ यागशालायां प्रपादिषु अग्निना दग्धे -यथापुरं तत्सर्वं समाधाय -शान्तिहोमं -द्विजादीनां भोजनं दानञ्च दद्यात्॥
- ❖ सुदर्शनं बलिबिम्बम् (अन्नमूर्तिञ्च)अग्निना दाहे -नवकलश स्नपनमाचरेत्॥
- ❖ श्वान -शृगाल -चण्डालादिभिः यागशाला प्रवेशे -स्पर्शे च -तत्सर्वं त्यक्त्वा - अन्यवस्तून् पूर्ववत् संस्थाप्य -शान्तिहोमं ब्राह्मणभोजनञ्च कुर्यात्॥
- ❖ उत्सवाग्निः स्वयं शान्ते -नित्याग्नौ शान्तिहोमं कृत्त्वा -उत्सवाग्निं पुनरुत्पादयेत्॥
- ❖ विषुवे -अयने च रात्रौ तीर्थयात्रां न दोषः -इतरेषु दोषाः भवन्ति -मोहेन रात्रौ कुर्याद्वा उत्तमोत्तम(५७३) स्नपनमाचरेत्॥
- ❖ उत्सवे होमविच्छेदे द्विगुणं होममाचरेत्॥
- ❖ उत्सव मध्ये बिम्बं कर्मार्चाञ्च चोरादिभिः अपहृते - तादृशं बिम्बं उत्पाद्य -उत्सवमाचरेत्॥
- ❖ वीथ्युत्सव मध्ये बिम्बं वाहनात् पतिते तद्वाहने देवं पुनः समारोप्य शेषभ्रमणं समाप्य -आलये अधमोत्तम(८१) स्नपनमाचरेत्॥
- ❖ उत्सवमध्ये बिम्बस्य अङ्गहानिः चेत् अन्यबिम्बेन तद्दिनोत्सवं समाप्य -हीनाङ्गं समाधाय सद्यस्संप्रोक्षणं कृत्त्वा -संस्नाप्य ब्राह्मणान् तोषयेत्॥
- ❖ यानभङ्गे -अन्ययाने देवं समारोप्य भ्रमणं शान्तिहोमञ्च कुर्यात्॥

- ❖ रथोत्सवमध्ये रथसारथेः पतने अन्यसारथिं संस्थाप्य - अवशिष्टभ्रमणं कृत्त्वा अनन्तरं शान्तिहोममाचरेत्॥
- ❖ यानं बिम्बञ्च अस्पृश्यादिभिः वहने - वाहनं क्षालयित्वा -बहुकलशैः बिम्बं स्नापयेत्॥
- ❖ पुष्पयाग अभावे -उत्तमोत्तम(४७३) स्नपनमाचरेत्॥
- ❖ तीर्थदिवसात् पञ्चदिनावधि ध्वजावरोहणं कार्यम् - यदि पञ्चदिनात् पश्चात् ध्वजावरोहणे दोषाः भवन्ति -तच्छान्तये मध्यमोत्तम(२७७) स्नपनं कृत्त्वा -स्नपनानन्तरं ध्वजम् अवरोप्य -देवतान् उद्वास्य बलिं दद्यात्॥
- ❖ महोत्सवमध्ये वैशेषिक कार्याणां न लोपः -अथवा लोपे स्नपनमाचरेत्॥
- ❖ पवित्रोत्सवे पवित्रे -कुण्डे -मण्डले वा हीनमाने अस्त्रकुम्भं सम्पूज्य - अस्त्रमन्त्रं शतवारं जपेत्॥
- ❖ पवित्राः केशादि दूषिते -तत्सर्वं त्यक्त्वा पुनरुत्पाद्य -समर्प्य - शान्तिहोममाचरेत्॥
- ❖ पवित्रोत्सव यागकुम्भम् अस्पृश्यादिभिः स्पर्शने -भिन्ने -नष्टे -तं त्यक्त्वा अन्यकुम्भं संस्थाप्य पूजयेत्॥

****** उत्सव प्रायश्चित्तविधिः संपूर्णम्******

श्रीः

## पञ्चगव्यविधिः

### गोलक्षणम्

कपिलाया जराया वा पञ्चगव्यं प्रशस्यते।
तयोरभावे त्वन्यासं गवां गव्यं विधीयते॥
नार्ताया न च गर्भिण्या न वृद्धायाः कदाचन।
नावत्साया उपादेयं धेनोर्मूत्रं शकृद्वयम्॥ - पाद्मे -८

इत्युक्तवत् पञ्चगव्यार्थं कपिल -जरागावौ श्रेष्ठं स्मृत्वा। तयोः अलाभे अन्यगवां सम्पाद्य। गोषु आर्ताया -गर्भिणी -वृद्धा -अवत्सा च वर्जयेत्॥ कृम्याद्यदूषितं -सोष्णं -भूमिष्ठं गोमयं सङ्ग्राह्य। सन्निष्पीड्य- गोमयरसं गृहीत्वा। सद्यस्तप्तं घृतं सङ्गृह्य। अहोरात्रोषितं शुद्धं दधि गृहीत्वा। दशाहाज्जन्मनः परं गोः अतप्तं क्षीरं सङ्गृह्य। स्नपन -प्रोक्षण -प्राशन कर्मणि पञ्चगव्य सम्मेलनात्परं सर्वं कृत्त्वा। पञ्चगव्य-प्रोक्षण विषये- गव्यपञ्चकं सर्वं समगुणं भवेत्॥

गोजलं -गोमयं -क्षीरं -दधि -घृतञ्च पृथक् पृथक् पात्रेषु निक्षिप्य। सम्मेलन पात्रं धान्यपीठे निधाय।

### पञ्चगव्यसम्मेलन-विधिः

आचार्यः अक्षतान् गृहीत्वा। प्राणानायम्य। देशकालौ सङ्कीर्त्य। श्रीभगवदाज्ञया----कर्मणि पञ्चगव्यप्रोक्षणं करिष्ये तदङ्गं पञ्चगव्यसम्मेलनं करिष्ये (स्नपने पञ्चगव्यकलशार्थं सम्मेलने

- श्रीभगवदाज्ञया----कलश स्नपन कर्मणि स्नपनार्थं पञ्चगव्यसम्मेलनं करिष्ये) इति सङ्कल्प्य। अप उपस्पृश्य। पुण्याहजलेन सर्वं संप्रोक्ष्य। गोजलमादाय "ओं नारायणाय विद्महे----प्रचोदयात्" इति सम्मेलन पात्रे निक्षिप्य।

"गन्धद्वारा----श्रियम्" इति शकृद्वारिं निक्षिप्य।

"आप्यायस्व----सङ्गथे" इति क्षीरं निक्षिप्य।

"दधिक्राव्णो----तारिषत्" इति दधि निक्षिप्य।

"शुक्रमसि" इति आज्यं निक्षिप्य।

यद्वा सर्वं विष्णुगायत्र्या वा अथवा

ओं षौं नमः पराय परमेष्ठ्यात्मने नमः इति गोमयम्।

ओं यां नमः पराय पुरुषात्मने नमः इति गोजलम्।

ओं रां नमः पराय विश्वात्मने नमः इति दधि।

ओं वां नमः पराय निवृत्त्यात्मने नमः इति घृतम्।

ओं लां नमः पराय सर्वात्मने नमः इति क्षीरञ्च निक्षिप्य। एवं विधाय। सम्मेलनात्परं पवमानसूक्तेन पञ्चगव्येन प्रोक्षयेत्॥

**********

श्रीः

## <u>शान्तिहोम विधिः</u>

अथ शान्तिहोम-विधिरुच्यते। प्रासादस्य अग्रे वा प्रथमावरणादिके वा चतुर्द्वारयुतं मण्डपं कल्पयित्वा। यद्वा पूर्वकृत मण्डपे वा गोष्टाकारे वा

उद्याने वा यागशालायां महानसे वापि शान्तिहोमं कृत्त्वा।
तत्र द्विहस्तमेकहस्तं वा वृत्तं चतुरश्रं वा कुण्डं यद्वा स्थण्डिलं कल्पयित्वा।
कुण्डस्य दक्षिणे सोपकुम्भं सकरकं महाकुम्भं विन्यस्य। तत्पार्श्वे सलक्षणं शान्त्यर्थं कुम्भमेकं धान्यपीठे संस्थाप्य। होमार्थं सर्वाणि द्रव्याणि सम्पाद्य। रात्रौ समये यथाविधि शान्तिमाचरेत्॥

आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया----सन्निधौ----कर्मणि----मध्ये सम्भावित----दोष शान्त्यर्थं नृसिह्ममन्त्रयुक्त शान्तिहोमकर्म करिष्ये तदङ्गं स्थलशुद्ध्यर्थं----वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। पूर्ववत् भूतशुद्धिं -विष्वक्सेनाराधनं -वासुदेवपुण्याहवाचनञ्च सर्वं कृत्त्वा। द्वारपूजां समाप्य। महाकुम्भादीन् आधारादि पद्मान्तम् अभ्यर्च्य। महाकुम्भे ओं नमो भगवते नारसिह्माय आगच्छागच्छ इति नृसिह्मम् आवाह्य। दिक् कुम्भेषु वासुदेवादिकान् आवाह्य। विदिक्कुम्भेषु प्रभवाप्यययोगेन अनिरुद्धादिकान् आवाह्य। करके सुदर्शनम् आवाह्य। शान्त्यर्थ कुम्भे ओं शान्त्यै नमः ओं पुष्ट्यै नमः ओं तुष्ट्यै नमः इति प्रत्येकम् आवाह्य। विधिवत् सम्पूज्य। नीराज्य। कुण्डे अग्निप्रतिष्ठां कृत्त्वा। तन्मध्ये पूर्ववत् नृसिह्मम् आवाह्य। उपचारान् हुत्वा। नृसिह्म मूलमन्त्रेण सप्तसमिद्धोमं हुत्वा (पुष्पं -धूपद्रव्यं -मधुपर्कं -बीजानि -आज्यम् -अन्नं -समित् एतान् सप्त समिधः)। ततः मधु -आज्य -क्षीर -फल -तिल मिश्रितेन द्रव्येण ओं क्ष्रौं नमः ओं नमो भगवते नारसिह्माय----दोषं जहि जहि स्वाहा

(एतद्दोषं जहि जहि स्वाहा) इति अष्टोत्तरसहस्रं वा अष्टोत्तरशतं वा यथाशक्ति सङ्ख्या वा हुत्वा। पलाश -खादिर -बिल्ब -औदुम्बर -अश्वत्थ -प्लक्ष -न्यग्रोध -अपामार्ग इति अष्टसमिद्भिः मधु -क्षीर -घृत मिश्रित द्रव्यान्वितैः अष्टाक्षरेण पृथक् पृथक् अष्टोत्तरशताहुतीः हुत्वा। आज्येन द्वादशाक्षरेण अष्टोत्तरशताहुतीः -आज्यसम्मिश्रतिलैः षडक्षरेण शताहुतीः -बीजैः विष्णुगायत्र्या अष्टोत्तरशताहुतीश्च -पुरुषसूक्तेन चरुणा हुत्वा। स्विष्टकृद्धोमं -प्रायश्चित्त होमञ्च कृत्त्वा। नृसिह्ममन्त्रेण पूर्णाहुतिं हुत्वा। सम्पाताज्यं समादाय महाकुम्भे सेचयित्वा। कुम्भान् सम्पूज्य। फलवर्गादीन् निवेद्य। नीराज्य। ब्राह्मणैः सह आचार्यः शान्ति कुम्भं संस्पृष्ट्वा। नृसिह्ममन्त्रं जप्त्वा। शान्तिसूक्तं (घोषशान्तिः) पठित्वा। ततः द्वारबलिं दत्वा। अपरेऽहनि प्रभाते पूर्वमेवं होमं बल्यन्तं कृत्त्वा। अग्नि उद्वासनादीन् विधाय। महाकुम्भं -शान्तिकुम्भञ्च गृहीत्वा वेद वाद्यघोष सहितं मूलालयान्तः प्रविश्य। पुरुषसूक्तेन महाकुम्भतोयेन देवं संप्रोक्ष्य। शान्ति कुम्भजलेन दोषयुक्तं देवं वा प्रासादं वा सर्वोपकरणं वा शान्तिसूक्तेन सम्प्रोक्ष्य। एवं तत्तद्दोषानुसारेण सद्यः काले समाचरेत्॥

**************

श्रीः

## <u>सद्यस्संप्रोक्षण विधिः</u>

उत्सव मध्ये यादृच्छिकविपरीत/बेरस्य अङ्गभिन्न सम्भवे सद्यस्संप्रोक्षणं कृत्त्वा। तदर्थं सङ्कल्प्य। अस्य देवदेवस्य----उत्सवमध्ये

(देवस्य अङ्गभिन्ने) संप्रोक्षणकर्म करिष्ये तदङ्गं पुष्पाङ्कुरादिकं करिष्ये तदङ्गं सर्वोपकरण शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये तदङ्गं विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य। विधिवत् विष्वक्सेनाराधनं वासुदेव पुण्याहवाचनं पुष्पाङ्कुरञ्च कृत्त्वा (देवस्य शक्त्याकर्ष्णं विधाय)। बहिर्मण्डपे पूर्ववत् चतुस्थानार्चनं कृत्त्वा। हवनात्पूर्वं बिम्बशुद्ध्यादीनि कृत्त्वा। पञ्चविंशतिकलशैः देवं संस्नाप्य। सद्यः शयनं कल्पयित्वा। अग्निमध्ये भगवन्तम् आवाह्य। पूर्ववत् सप्तसमिद्धोमं हुत्वा। अनन्तरं शान्तिहोमवत् मधु -आज्य -क्षीर -फल -तिल मिश्रितेन द्रव्येण

ओं क्ष्रौं नमः ओं नमो भगवते नारसिह्माय----दोषं जहि जहि स्वाहा (एतद्दोषं - बिम्बभिन्नदोषं) इति अष्टोत्तरसहस्रं वा अष्टोत्तरशतं वा यथाशक्ति सङ्ख्या वा हुत्वा। ततः तत्त्वहोमं -प्राणादिदशवायुन्यास होमं - प्राणप्रतिष्ठाहोमञ्च हुत्वा। भूरादि चतुर्व्याहृत्या शान्तिहोमं -स्विष्टकृद्धोमं प्रायश्चित्तं -पूर्णाहुतिञ्च हुत्वा। सम्पाताज्येन देवं संस्पृष्ट्वा। शयनात् उत्थाप्य। रक्षाबन्धनं कृत्त्वा। कुण्ड -मण्डलस्थं बिम्बे विसृज्य। महाकुम्भतोयेन प्रतिष्ठाविधिवत् संप्रोक्ष्य। आवाह्य। सम्पूज्य। यथाभागमन्नं निवेद्य। नीराज्य। रक्षां विसृजेत्॥ सद्यस्ससंप्रोक्षणे न तिथिः न नक्षत्राणि कालवेलां न विद्यते। प्रायश्चित्तावलम्बितेन दिवा रात्रौ वा अकाले वा संप्रोक्षणं कुर्यात्॥

**************

श्रीः

श्रीमते रामानुजाय नमः

## उत्सवरत्नावल्यां प्रमाणावलिः प्रथमो भागः

## महोत्सव विषये प्रमाणानि

### महोत्सव कारण कथनम्

आराधनमिदं ब्रह्मन् मोक्षकामैरनुष्ठितम्।

पश्वादिफलकामैस्तु दुरनुष्ठानमद्भुतम्॥ ३॥

तोषणं मम कल्याणमनुष्ठितममानुषम्।

देवैरेव पुरा वृत्रवध पापापनुत्तये॥ ४॥

इन्द्रेणापि दिविष्ठेन मामुद्दिश्य कृतं शुभम्। - पाद्मे - १०

### उत्सवशब्दार्थः

सव इत्युच्यते यज्ञो विद्वद्भिः साधुसम्मतैः।

उद्गतस्तु सवो यस्मात् तस्मादुत्सव उच्यते॥ २॥ - नारदीये - १८

### उत्सवपद निरुक्तिः

सवो दुःखं समाख्यातं विनाश उपसर्गतः।

उद्गतस्तु सवो येन महोत्सवः प्रकीर्तितः॥ २॥ - पद्मोद्भवे - २७

### उत्सव शब्द निर्वचनम्

सवः सांसारिकं दुःखमुत्तरन्ति तदम्बुधिम्।

यष्टार इति विद्वांसो निर्ब्रुवन्त्युत्सवाह्वयम्॥ ६॥ - पाद्मे – १०

## <u>काल विचारः</u>

<u>ब्रह्मोत्सव कालः</u>

कुर्वीत कारयेच्चैव भक्तेर्वृद्धिर्यथा भवेत्।

प्रतिष्ठाजन्मनक्षत्रे ब्रह्मोत्सव समारभेत्॥२३॥

मासि मासि च कर्तव्य उत्सवः स्नेहवर्धकः। - पाराशर्ये - २४

<u>उत्सव कर्तव्य मासाः</u>

माघे वा मार्गशीर्षे वा चैत्रे वैशाख एव वा।

पौषे वा फाल्गुने कुर्यादुत्सवं बहुविस्तरम्॥३॥

प्रत्यब्दं नियतं कुर्याच्छक्त्या सर्वार्थसाधनम्। - विष्णु संहिता - २०

<u>विशेषपूजन कालः</u>

गुरोर्जन्मदिने शुद्धे तदीयानां गुरोर्गुरोः॥३॥

सम्प्रदायगुरोश्चापि मन्त्रप्राप्तिदिने तथा।

गुरोः समागमे चापि महतां च समागमे॥४॥

हरेर्जन्मदिने तस्य प्रियाणां जन्मवासर।

संस्कारेषु विशेषेषु कुर्यात्पूजामहोत्सवम्॥५॥ - शाण्डिल्ये - २५

<u>मासेषु विशेषपूजन दिनानि</u>

वैशाखस्य तृतीयायां सप्तम्यां ज्येष्ठके पुनः।

दशम्यामथ राकायां ज्येष्ठर्क्षे च प्रकीर्तितम्॥६॥

आषाढे चापि सत्षष्ठ्यां पूर्णायां हरिवासरे।

श्रावणैकादशीघस्रे तृतीयापूर्णिमासु च॥७॥

नवरात्रे दशम्यां तु त्रयोदश्यादिकत्रिके।

आश्विनस्याथ नन्दायां भद्रायां प्रान्तकत्रिके॥८॥

कार्तिके मार्गशीर्षेऽथ सप्तमीनवमीषु च।

पूर्णास्वमासु पौषेऽपि नन्दाभद्राजयासु च॥९॥

माघस्यापि च पञ्चम्यामेकादश्यां समर्चनम्।

पूर्णिमायां चतुर्दश्यामसितेऽथाप्यमादिने॥१०॥

फाल्गुनैकादशीपूर्णाप्रतिपत्सु सुपूजनम्। - शाण्डिल्ये - २५

<u>उत्सव काल निर्णयः</u>

उत्सवानां ततः कुर्यात् कारकस्यानुरूपतः॥९॥

शुभनक्षत्रयोगे च तिथिवारनिरीक्षिते।

प्रतिष्ठाऋक्षके वाथ नगरग्रामऋक्षके॥१०॥

राज्ञः स्वजन्मनक्षत्रे यजमानेच्छया कुरु। - विष्वक्सेने - २७

<u>प्रथमोत्सवे दोषादोष विचारः</u>

अधिके मासि शुक्रे च गुरौ चास्तमिते सति।

नोत्सवः प्रथमः कल्प्यः कल्पने राजराष्ट्रयोः॥४६॥

प्रजानां चैव दुःखं स्याद्व्याधिर्वा, मृतिरेव वा।

उत्सवे च द्वितीयादौ नोक्तदोषः कथञ्चन॥४७॥ - पाद्मे - १०

<u>शुभनक्षत्रे उत्सवं - यजमानानुकूल नक्षत्रम्</u>

कारकस्यानुकूले तु नक्षत्रे तिथिसंयुते॥३॥

शुभयोगेच्च तथोच्चस्थे शुभग्रह निरीक्षिते।

परीक्ष्य शकुनादीनि यात्रां देवस्य कारयेत्॥४॥ - वासिष्ठे – १२

<u>**त्रिविधोत्सव लक्षणम्**</u>

<u>नित्यपूजविहीनस्य प्रायश्चित्तं महोत्सवम्</u>

वत्सरे वत्सरे ब्रह्मन् कर्तव्यं परमं शुभम्॥१७०॥

नित्यपूजाविहीनस्य प्रायश्चित्तं महोत्सवम्। - विष्वक्सेने - २७

<u>त्रिविध उत्सवाः</u>

नित्यो नैमित्तिकः काम्यस्त्रिविधः स महोत्सवः।

तद्भेदानिह वक्ष्यामि क्षीराब्धितनये तव॥९॥ - श्रीप्रश्ने - ३०

<u>त्रिविध उत्सवाः</u>

प्रतिष्ठान्तोत्सवैकश्च जन्म ऋक्षदिनोत्सवः।

उत्सवः पञ्चपर्वाख्यः त्रिविधोत्सव उच्यते॥३६॥ - मार्कण्डेये - २१

<u>त्रिविधोत्सवकरणे फलम्</u>

नित्योनैमित्तिकः काम्यस्त्रिविधस्समहोत्सवः।

(नित्यं नैमित्तिकं काम्यमुत्सवं त्रिविधं स्मृतम्।)

पापापनोदनैकान्तं कर्तुरायुर्विवर्धनम्॥६॥

प्रजानामपि राष्ट्रस्य सर्वाभ्युदयसाधकम्।

दुर्भिक्ष दुर्निमित्तादि घोराणां शान्तिदं परम्॥७॥

धर्मार्थकाममोक्षाणां(मोक्षादि) पुरुषार्थप्रदं शुभम्। - पुरुषोत्तमे - २३

<u>नित्योत्सव कालः</u>

बिम्बाविर्भावऋक्षे वा प्रतिष्ठातारकेऽपि वा।

तत्तिथौ वा तीर्थयात्रां निश्चित्याङ्कुरपूर्वकम्॥१०॥

ध्वजमारोप्यते यस्मिन् स तु नित्यो महोत्सवः। - श्रीप्रश्ने - ३०

<u>नित्योत्सवः</u>

वत्सरे वत्सरे यस्तु क्रियते स तु नित्यकः॥४॥ - ईश्वरे - १०

<u>नैमित्तिकोत्सवः</u>

निमित्ते सति संजाते सतु नैमित्तिको भवेत्।

भूतादिदर्शने चैव दुर्भिक्षे व्याधिपीडने।

परचक्रप्रवेशे च व्योम्नि नेमिस्वने तथा॥४॥

दिव्यदुन्दुभिनिदे वालमीनस्य दर्शने।

दर्शने सुरचापस्य पूर्वभागे तथा निशि॥५॥

अपरे मध्यमे वापि उल्कापाते विशेषतः।

आलयस्य चाग्निना दाहे प्रासादपतने तथा॥६॥

प्राकारगोपुरादीनां चैत्यवृक्षादिपातने।

वल्मीकादि समुत्पन्ने मधुप्राप्ते तु मण्डले॥७॥

भूभुजानां विशेषेण रोगादीनामुपस्थितौ।

ग्रहदोषे तु संप्राप्ते कुहूदोषसमुद्भवे॥८॥

पुत्रदारादिके विप्र! रोगादीनां समुद्भवे।

अनावृष्टौ चातिवृष्टौ देवब्राह्मणघातुके॥९॥

पितृमातृवधे विप्र! प्रायश्चित्तार्थमाचरेत्।

उत्सवः परमो ब्रह्मन्! नित्यो नैमित्तकः स्मृतः॥१०॥ - अनिरुद्धे - २०

<u>नैमित्तिकोत्सव कालः</u>

ग्रहणे ग्रहयुद्धे च महोत्पातादिसम्भवे॥ ११ ॥

जीर्णोद्धारे तु देवस्य प्रोक्षणे राजविड्वरे।

गुरौ तु सिंहसम्बन्धमखायाते य उत्सवः॥ १२॥

ध्वजारोहणपूर्वस्तु स हि नैमित्तिकः स्मृतः। - श्रीप्रश्ने - ३०

<u>काम्योत्सवः</u>

यत्किञ्चित् कालमुद्दिश्य क्रियते यत् फलार्थिना॥ ३३॥

स काम्य इति विज्ञेयो यथेष्टफलदायकः। - मार्कण्डेये - २१

<u>काम्योत्सवः</u>

चतुर्णां पुरुषार्थानामुद्दिश्यान्यतमं फलम्॥ ८॥

उत्सवोऽनुष्ठितः काम्यः सङ्कल्पितफलप्रदः। - ईश्वरे - १०

<u>काम्योत्सव कालाः</u>

राज्ञो जन्मदिने वापि तत्साम्राज्याभिषेचने॥ १३॥

अर्थकामौ समुद्दिश्य मासर्क्षादिषु वै रमे।

रोहिण्यां च पुनर्वस्वोः श्रवणे सार्वमासिके॥ १४॥

ध्वजारोहणपूर्वस्तु काम्यः सोऽपि महोत्सवः। - श्रीप्रश्ने - ३०

<u>त्रिविध उत्सव निर्णयः</u>

ध्वजाद्यवभृथपर्यन्तं कर्तव्यं प्रतिवत्सरम्।

कारयेत्तु विशेषेण प्रतिष्ठान्तोत्सवः स्मृतः॥ ३७॥

अवताराणि सर्वाणि उद्भवन्ति महीतले।

जन्मऋक्षोत्सवो ज्ञेय इति शास्त्रस्य निश्चयः॥३८॥

दीपोत्सवपवित्रं च उत्सवो दमनीदलैः।

फलोत्सवश्च कल्हारपञ्चपर्वोत्सवः स्मृतः॥३९॥ - मार्कण्डेये - २१

<u>त्रिविधोत्सवे सात्विकादि भेदाः</u>

नित्यं तु सात्त्विकं प्रोक्तं नैमित्तं राजसं भवेत्॥१६॥

काम्यः स्यात्तामसः प्रोक्तः त्रिविधः सम्प्रकीर्तितः। - श्रीप्रश्ने - ३०

<u>नित्यादि उत्सवेषु ध्वजारोहनस्य अनुमतिः</u>

नित्ये नैमित्तिके काम्ये ध्वजसंस्थापनं मतम्॥२१२॥ - विष्वक्सेने - २६

<u>त्रिविधोत्सवे अवभृतः</u>

कल्पयित्वा नृपश्रेष्ठ तीर्थं तु त्रिविधोत्सवे॥४१॥ - मार्कण्डेये - २१

## <u>अवभृथकालाः</u>

<u>अवभृथ कालाः</u>

चैत्रादिषु च मासेषु श्रवणर्क्षे प्रशस्यते।

द्वादश्यां वा महाभाग पञ्चदश्यामथापि वा॥१२॥

यजमानस्य जन्मर्क्षे ग्रहणे विषुवे तथा।

अयने वा मुनिश्रेष्ठ नवम्यां वापि कारयेत्॥१३॥

नगरग्रामजन्मर्क्षे प्रतिष्ठादिवसे तथा।

प्रासादारम्भनक्षत्रे राज्ञो जन्मदिनेऽपि वा॥१४॥

एकस्मिन्नेषु सर्वेषु तीर्थयात्रा विधीयते। - नारदीये - १८

<u>श्रवणोत्सवः</u>

श्रवणान्तं तु सङ्कल्प्य तीर्थस्नानावसानिकम्॥५॥

कारयेदुत्सवं भक्त्या विष्णोर्विष्णुपरायणः। - विष्णु संहिता - २०

<u>अवभृथ तिथ्यादिकाल निर्णयः</u>

तिथि नक्षत्र योगे तु तीर्थं सर्वगुणोत्तरम्॥८४॥

कलयावापि विद्धा चेत् तिथिर्वा यदि तारका।

वर्जयित्वाऽथ तां विद्धां परेधु स्तीर्थमाचरेत्॥८५॥

कलामात्राऽवशेषा चेत् तिथिर्वा यदि तारका।

तत्रोत्सवं प्रकुर्वीत सा हि सर्वगुणोत्तरा॥८६॥

तीर्थोत्सवं विनिश्चित्य ध्वजारोहण माचरेत्। - विष्णुतिलके - ८

<u>अवभृथ कालाः</u>

कथ्यतेऽवभृथस्नानसमयस्त्रिविधोत्सवे॥१९॥

मासर्क्षे विषुवे चैव ग्रहणे चायनद्वये।

दर्शे च पौर्णमास्यां च श्रवणे सार्वमासिके॥२०॥

रोहिण्याञ्च पुनर्वस्वोः प्रतिष्ठादिवसे तथा।

राज्ञो जन्मदिने कुर्यादभिषेकदिने तथा॥२१॥ - पाद्मे - १०

<u>दर्शे पौर्णमासे समुद्रे अवभृथम्</u>

दर्शे च पौर्णमास्यां चा(प्य)र्वाक् चेद्योजनावधौ॥२२१॥

समुद्रतीरमथवा मण्डपे तत्र कल्पिते।

अवरोप्यासने यानान्निविष्टे तीर्थकौतुके॥२२२॥ - पाद्मे - ११

<u>विषु अयन कालेषु - तिथि ऋक्ष दोषाः नास्ति</u>

सङ्कल्पपूर्वमालोच्य मासे ऋक्षे तथा तिथौ॥२४॥

तीर्थावगाहनं यद्वा संयोगे तिथितारयोः।

विषुवे चायने चैव नादरस्तिथितारयोः॥२५॥

दुष्टवारादिसंयोगे शुभमेव यथोदितम्। - पाद्मे - १०

<u>ज्योतिश्शास्त्रज्ञैः मुहूर्त निर्णयम्</u>

ज्योतिश्शास्त्रेषु कुशलैर्ब्राह्मणैः सह देशिकः॥९॥

पूर्वं कृत्वा यथाशास्त्र तीर्थऋक्ष विनिर्णयम्। - ईश्वरे - १०

<u>मासेषु विविधोत्सवाः</u>

पुष्पोत्सवश्चैत्रमासे माधवे चन्दनोत्सवः ॥११॥

ज्येष्ठे जलोत्सवः कार्य आषाढे तु रथोत्सवः ।

हिण्डोलकोत्सवः प्रोक्तः श्रावणे भाद्रके हरेः ॥ १२ ॥

बाल्यक्रीडोत्सवः कार्यो रासः केल्यास्तथाश्विने।

मखोत्सवः कार्तिकेऽथ मार्गे प्रावरणोत्सवः ॥१३॥

पौषे पाकोत्सवो माघे वसन्तक्रीडनोत्सवः ।

होलाक्रीडोत्सवस्तस्य फाल्गुने तु विधीयते ॥१४॥ - शाण्डिल्ये – २५

<u>अङ्कुरार्पणादि उत्सवान्त दिनावधि आचार्यस्यानुष्ठान नियमाः</u>

अङ्कुरारोपणदिनात् पुष्पयागदिनान्तिमम्।

व्रतं कुर्याद्देशिकेन्द्रो दिनद्वादशके क्रमात्॥१८१॥

स्नानार्चनादिकं कृत्वा पीत्वा तच्चरणोदकम्।

कुशोदकसमायुक्तं जपेदष्टाक्षरंमनुम्॥ १८२॥

नैवेद्यप्राशनं पूर्वं कुर्यान्नक्ताशनं द्विजाः।

जपेत् द्वादशनामानि क्रमाद्वाच्यमनुस्मरन्॥ १८३॥ - ईश्वरे – ११

## <u>उत्सवदिनसङ्ख्या विषयाणि</u>

<u>उत्सव दिनसङ्ख्या</u>

एकाहं वा-त्र्यहं चैव पञ्च-सप्त-नवाह्निकम्।

द्वादशं चार्धमासं च एकविंश दिनं तथा॥८॥

सप्तविंशत्यहं मासं षण्मासं चाब्दमुच्यते।

एवं द्वादशभेदेन उत्सवः परिचक्ष्यते॥९॥ - कपिञ्जले -२२

<u>उत्सव दिनसङ्ख्या</u>

अष्टादशदिने यद्वा दशाहे तत्तथा न चेत्।

नवमे दिवसे वापि कुर्यादवभृथोत्सवम्॥८०॥ - विष्णुतिलके - ८

<u>उत्सव दिन सङ्ख्या</u>

तीर्थं समाचरेत्तीर्थात् प्राक्सप्त नवमेहनि॥३१॥

अष्टाविंशदिनं ब्रह्मन् नवाहस्य विधीयते। - वासिष्ठे – १२

<u>दिन सङ्ख्या भेदेन</u> <u>उत्तमादि त्रैविध्यम्</u>

उत्सव स्त्रिविधः प्रोक्त उत्तमादि विभेदतः॥ ११॥

उत्तमो मास इत्युक्त: मध्यमः पक्ष उच्यते।

नवाहस्त्वधमः प्रोक्त इति शास्त्रस्य निश्चयः॥ १२॥

एकाहे च त्र्यहे चैव पञ्चसप्तनवाहके।

द्वादशाहे तथा पक्षे मासादूर्ध्वं च कारयेत्॥ १३॥ - अनिरुद्धे – २०

<u>उत्तमोत्सव दिन सङ्ख्या</u>

नवाहं दैविकं प्रोक्तं सप्ताहं मध्यमं भवेत्।

पञ्चाहमधमं विद्यात् त्रिविधं चोत्सवं स्मृतम्॥ १४॥ - ईश्वरे - १०

<u>उत्सव दिन सङ्ख्या भेदेन सात्विकादि भेदाः</u>

महोत्सवः सात्विकः स्या त्तीर्थस्तु नवमेऽहनि॥ १५॥

सप्तमे पञ्चमे तीर्थौ राजसस्तामसः स्मृतः। - श्रीप्रश्ने - ३०

<u>उत्सव दिनभेदेन नामभेदाः - तत्तत् फलञ्च</u>

एकरात्रोत्सवो ब्राह्मः त्रियहः शैव उच्यते॥ ४॥

पञ्चाहश्चैन्द्र विज्ञेयः सप्ताहश्चार्षको भवेत्।

नवाहो दैविकः प्रोक्त उत्सवः पञ्चधोच्यते॥ ५॥

दैविकं सर्वशान्त्यर्थं राज्यवर्धनमार्षकम्।

ऐन्द्रं दुर्भिक्षनाशार्थं शैवं रोगविनाशनम्॥ ६॥

ब्राह्मं तु ब्रह्मवृद्धिः स्यात् उत्सवं पञ्चधा फलम्। - विष्वक्सेने - २७

<u>स्वयंव्यक्तादि भेदेन नैमित्तिकोत्सव दिन सङ्ख्या</u>

नैमित्तिकोत्सवे लक्ष्मि स्वयंव्यक्ते च दैविके॥ १७॥

नवाहं कारयेद् विद्वान् सप्ताहोऽन्यत्र वै रमे। - श्रीप्रश्ने - ३०

<u>नवाहोत्सव वैशिष्ट्यम्</u>

पक्षात्मकोऽथ मासात्मा उत्सवश्चापि सत्तमाः॥ ११४॥

तन्त्रेषु वर्णितो विप्राः कुर्यादर्थस्य वैभवे।

नवाह्नादप्यनूनाश्च प्रोक्तास्तन्त्रेषु मुक्तये॥ ११५॥

ज्ञात्वा देशेन कालेन वैभवेन च हेतुना।

कुर्याद् वैष्णवभक्तैस्तु वासुदेवस्य प्रीतये॥ ११६॥ - वैहायसी - १३

उत्सवदिन ह्रासे दोषाः

एकाहं त्रियहं वापि सप्ताहं तु नवाहकम्॥ ७॥

पञ्चाहमादिकालोयमुत्सवं ह्रासयेन्न तु।

वर्धयेत्तु यथाकामं ह्रासनं राष्ट्रनाशकृत्॥ ८॥

राजविभ्रमकृच्चापि दुर्भिक्षभयकृद्भवेत्। - विष्वक्सेने – २७

## उत्सवे कार्यक्रमाणि

उत्सवे कार्यक्रम दिन भेदाः

एककालं वा द्विकालं वा वीथिभ्रमणम्

तीर्थाधिवासनात्पूर्वं मृगयादिवसं भवेत्॥ ५३॥

मृगयादिवसापूर्वं जलक्रीडावगाहनम्।

जलक्रीडादिनात्पूर्वमुद्यानगमनं भवेत्॥ ५४॥

उद्यानगमनात्पूर्वं नदीयात्रां समाचरेत्।

नदीयात्रादिनात्पूर्वं व्रीहिमानमथोच्यते॥ ५५॥

व्रीहिमानदिनात्पूर्वं वनवासमथाचरेत्।

यात्राचोत्सवबिम्बस्य द्विकाले चोत्तमा भवेत्॥ ५६॥

एककालमथोवापि कर्तुरिच्छानुरूपतः।

अपूर्वाभरणैर्माल्यैरपूर्वैश्चाम्बरैस्तथा॥ ५७॥

अपूर्वोद्यानयानाद्यैर्यथाकौतूहलं भवेत्। - अनिरुद्धे - २१

<u>विशेष नवाहोत्सव पद्धतिः</u>

प्रथमेहनि कल्याणं वनविहारमनन्तरे॥७९॥

प्लवोत्सवं त्रितीयेऽह्नि चतुर्थे डोलिकोत्सवम्।

पञ्चमे पूरणं प्रोक्तं जलद्रोणीं तु षष्ठके॥८०॥

सप्तमेदिवसे प्राप्ते रथारोहणमाचरेत्।

अष्टमे मृगयात्रा च नवमेऽवभृथं तथा॥८१॥

इत्येवं कथितं ब्रह्मन् नवाहोत्सवपद्धतिः। - पुरुषोत्तमे - २४

<u>महोत्सवे कार्य क्रमाणि</u>

महोत्सवं प्रवक्ष्यामि विस्तरेण तवानघ!।

अङ्कुरावापनं पूर्वं पताकारोपणं तथा॥१॥

कौतुकस्योत्सवं पश्चात् उत्सवारम्भगं भवेत्।

स्नपनं देवदेवस्य यागदीक्षाद्यनन्तरम्॥२॥

चतुस्स्थानार्चनञ्चैव होमकर्माण्यनन्तरम्।

तीर्थाङ्कुरार्पणञ्चैव ग्रामस्य च बलिं तथा॥३॥

यात्राचोत्सवबिम्बस्य तथा तीर्थाधिवासनम्।

तीर्थस्नानं ततः कुर्यात्पुष्पयागमनन्तरम्॥४॥

ध्वजावरोहणकञ्चैव उद्वासनबलिं तथा।

विष्वक्सेनार्चनञ्चैव कर्मक्रममिमं विदुः॥५॥ - अनिरुद्धे - २१

<u>महोत्सवे देशान्तरादागतानां भक्तानां -शयन -भोजनादि व्यवस्था</u>

देशाद्देशादागतानां मद्भक्तानां वरानने॥४८॥

तृतीयावरणे वापि चतुर्थावरणेऽपि वा।

शयनार्थं भोजनाय पानीयार्थं सुखार्थकम्॥४९॥

पचनार्थं च विविधाः शालाः स्युः सुमनोहराः।

वैद्यशालाश्च कर्तव्याः समर्थैः सचिकित्सकैः॥५०॥

यजमानः प्रतिदिनं पश्यन् सर्वांश्च तोषयेत्। - श्रीप्रश्ने - ३१

<u>उत्सवे ग्रामालङ्करण विधिः</u>

यदा वै देवताह्वानं तदा प्रभृति नित्यशः॥८४॥

आलयं समलङ्कुर्यात् ग्रामस्यान्यतमं तु वा।

मार्जनं सर्ववीथीनां सक्तासक्तयथाविधि॥८५॥

उत्थापयित्वा केतूंश्च तोरणानि च शक्तितः।

ग्रामद्वारेषु सर्वेषु तथा चैव चतुष्पथे॥८६॥

सभाद्वारेषु सर्वेषु क्रमुकैस्तोरणैस्तथा।

तथैव कदलीस्तम्भैः केतुमालाविभूषितैः॥८७॥

अलङ्कुर्यात् विशेषेण ग्राममध्यं विशेषतः। - नारदीये – १८

## <u>उत्सवे आचार्यनियमानि</u>

<u>उत्सवे आचार्य ऋत्विजादीनां वपन कालः अलङ्काराश्च</u>

मृत्सङ्ग्रहदिने प्रातः ऋत्विग्भिः सह देशिकः।

महोत्सवस्य दीक्षार्थं स्नायाद्वपनपूर्वकम्॥३॥

शुद्धवस्त्रैर्यज्ञसूत्रैरूर्ध्वपुण्ड्रैरलङ्कृतः।

कटकाङ्गदकेयूरैर्गन्धमाल्यैरलङ्कृतः॥४॥

भगद्देहमासाद्य नित्यपूजामुपक्रमन्। - श्रीप्रश्ने - ३१

<u>आचार्यस्य वपनकालः</u>

ध्वजाधिवासपूर्वेद्युः देशिको मन्त्रवित्तमः॥१५॥

स्नायाद्वपनपूर्वं तु भगवद्यागसिद्धये। - ईश्वरे - १०

<u>महोत्सवे आचार्य बहुत्वम्</u>

चत्वारोऽष्टौ द्वादश वा प्रारभेयुर्महोत्सवम्।

सुसितैर्नववस्त्रैस्तु भूषिताः भूषणैरपि॥५५॥

समाहितास्तु शुचयः कृतदन्तानुधावनाः।

हविष्यान्नभुजो हृष्टाः आचार्याः बहवः स्मृताः॥५६॥ - नारदीये - १९

<u>उत्सवे आचार्य - परिचारक सङ्ख्या</u>

अग्रे चतुर्णां वरणमाचार्याणामथर्विजाम्॥२४॥

षोडशानां तथान्येषां स्वीकारः परिचारिणाम्।

ते च भूष्या यथावित्तं भूषणैः कटकादिभिः॥२५॥

वासोभिश्च नवैश्चित्रैरधिकारानुसारतः।

उष्णीषैरुत्तरीयैश्च गन्धद्रव्यानुलेपनैः॥२६॥

शोभनीयाः प्रयत्नेन यजमानेन सर्वथा। - पाद्मे - ११

<u>उत्सवानुज्ञा समये भगवदाराधनम्</u>

पादप्रक्षालनं कृत्वा ह्युपस्पृश्ययथाविधि।

स्वर्णादिपात्रे गन्धं च कदल्यादिफलैर्युतम्॥ २६॥

ताम्बूलमक्षतान् पुष्पं निधाय प्रेष्यमूर्धनि।

ऋगादिवेदघोषैश्च वादित्रैश्छत्रचामरैः॥ २७॥

धाम प्रदक्षिणीकृत्य गच्छेद्भगवतोऽन्तिकम्।

मूर्तिपैः स नमस्कृत्य पात्रं पीठे निधाय च॥ २८॥

अर्घ्यपाद्याचमनीयैः क्रमात्सम्पूज्य वै गुरुः।

समर्प्य गन्धमाल्यं च फलादीनि निवेद्य च॥ २९॥ - श्रीप्रश्ने – ३० (ग्र३१)

## उत्सवानुज्ञा विषयाणि

उत्सवार्थं विष्वक्सेन प्रार्थना – भगवत्प्रसाद-पादुका दापनञ्च

यज्ञसंरक्षणार्थाय हरिणा ज्ञापितो भवान्।

मृत्सङ्ग्रहणमारभ्य ह्युत्सवावभृथावधि॥ २१॥

सेनापते मया सार्धं सर्वकार्याणि साधय।

आगच्छ मृदमानेतुमुत्सवाङ्कुरकर्मणे॥ २२॥

इति सम्प्रार्थ्य विघ्नेशं मालां भगवतो गुरुः।

विष्वक्सेनस्य शिरसि पादुकामपि धारयेत्॥ २३॥ - श्रीप्रश्ने - ३१

उत्सवे ब्राह्मणानुज्ञा – विष्वक्सेनाराधनम्

नित्यार्चनावसाने तु वैष्णवान् द्विजसत्तमान्।

षट्कर्मनिरतांश्चैव पञ्चकालपरायणान्॥ १९॥

समभ्यर्च्य ततस्तेभ्यो ह्यनुज्ञां प्रतिगृह्य च।

विष्वक्सेनं समभ्यर्च्य यागविघ्नप्रशान्तये॥ २०॥ - ईश्वरे - १०

<u>उत्सवार्थं सभानुज्ञा</u>

ततो गुरुवरः सर्वान्वैष्णवान्पाञ्चरात्रिकान्।

यतीन्वेदविदो विप्रान् ज्ञानिनो ब्रह्मवादिनः॥१२॥

महान्तो देवदेवस्य समारब्धो महोत्सवः।

निर्विघ्नेन समाप्त्यर्थं यावत्तीर्थावसानकम्॥१३॥

कर्मकाले मया यूयं स्थित्वा यागमतन्द्रिताः।

समाप्य यज्ञकार्याणि प्राप्यानुज्ञां ततो हरेः॥१४॥

गन्तुमर्हसि सर्वज्ञा गृह्णीत प्रार्थनां मम।

इत्यभ्यर्थ्य ततस्तेभ्यः अनुज्ञां प्रतिगृह्य च॥१५॥ - श्रीप्रश्ने - ३१

<u>उत्सवारम्भदिने सायाह्ने भूतशुद्ध्यादि</u>

देवस्य सन्निधिं गत्वा ह्युपविष्टस्तथासने॥५८॥

सायामां भूतसंशुद्धिं धारणाभ्यां समाचरेत्।

देहविन्यस्तमन्त्रोऽथ मानसं यागमाचरेत्॥५९॥ - ईश्वरे – १०

## <u>मृत्सङ्ग्रहण विषयाणि</u>

<u>मृत्सङ्ग्रहण कालः</u>

अपराह्णे तु सम्प्राप्ते मृदायुत्सवमारभेत्।

शङ्खदुन्दुभिनिर्घोषैः नृत्तगीतसमन्वितैः॥४॥ - नारदीये - १९

<u>मृत्सङ्ग्रहण देशाः</u>

दिशं प्राचीमुदीचीं वा अथवा प्रागुदग्दिशम्॥१२९॥

अदूरं समनुप्राप्य तत्रोद्याने मनोहरे।

केवले वा शुचौ देशे मृदं शुद्धां समाहरेत्॥१३०॥ - ईश्वरे - १०

<u>मृत्सङ्ग्रहणार्थं विष्वक्सेन प्रार्थना</u>

स्वर्णादिपात्रे ताम्बूलनालिकेराक्षतादिकान्॥६॥

आदाय विष्वक्सेनस्य सन्निधिं प्राप्य देशिकः।

सम्पूज्य विष्वक्सेनं तं प्रार्थयेन्मृद्ग्रहाय च॥७॥ - श्रीप्रश्ने – ३१

<u>मृत्सङ्ग्रहणार्थं विष्वक्सेनादि देवताः</u>

विष्वक्सेनन्तु वा तार्क्ष्यं हनुमत्प्रमुखन्तु वा॥१२४॥

हेतीशं वापि वस्त्राद्यैरलङ्कृत्य विशेषतः।

यानादिकं समारोप्य प्रक्षाल्याद्भिः खनित्रकम्॥१२५॥

नवेन वाससाऽऽच्छाद्य भूषयित्वा तु माल्यकैः।

देशिको वाहयेद्विप्रैः शूद्रैर्वा दीक्षितैर्द्विजाः॥१२६॥ - ईश्वरे – १०

<u>मेदिनीशब्दार्थः</u>

लीलयकरयुग्मेनगृहीत्वाकण्ठतो मया॥७१॥

ऊरूभ्यांमर्दितौचैवययुर्निष्कण्टकासुराः।

तदुद्भूतेनमेदेनपरिपूर्णा वसुन्धरा॥७२॥

ततःप्रभृतिकालाश्चमेदिनीतिनिरुच्यते। - जयाख्ये - २

<u>मृत्सङ्ग्रहण भूमिदेवि लक्षणम् - खनित्र स्थापनञ्च</u>

पुण्याहवारिणा प्रोक्ष्य स्थापयेत्सैन्यनायकम्॥२५॥

पुरतस्तस्य वै भूमावीशाने न्यस्तमौलिकाम्।

नैर्ऋते न्यस्तपादान्तामूर्ध्ववक्त्रां कृताञ्जलिम्॥२६॥

एवं विलिख्य वसुधां धान्यपीठं ततो गुरुः।

शिरः प्रदेशे तस्यास्तु दक्षिणे वा प्रकल्पयेत्॥२७॥

शुद्धं खनित्रं तस्मिंस्तु दर्भाद्यैः समलङ्कृतम्।

स्थापयित्वा परिस्तीर्य धान्यपीठं भुवं तथा॥२८॥

वस्त्रादिभिरलङ्कृत्य भूषणैश्चापि भूषयेत्। - श्रीप्रश्ने - ३१

<u>मृत्सङ्ग्रहणे कूर्च विषयम्</u>

सप्तदर्भकृतं कूर्चं तालमानसमन्वितम्॥२९॥

धराया हृदि विन्यस्य खनित्रेऽपि च कूर्चकम्। - श्रीप्रश्ने - ३१

<u>भूमौ आवाहन देवता ( वाराही )</u>

अस्त्रमन्त्रेण धरणीं सम्प्रोक्ष्य प्रथमं गुरुः।

महीसूक्तेन संस्पृश्य ध्यायन्नेकाग्रचेतसा॥१३१॥

मूर्तिं देवस्य वाराहीमभ्यर्च्य कुसुमैर्भुवम्। - ईश्वरे - १०

<u>भू - खनित्र पूजा</u>

गत्वा संप्रोक्ष्य धरणीम् आपो हिष्ठेति प्रोच्चरन्।

भूमिसूक्तेन संप्रार्थ्य धरणीं पूजयेत् ततः॥४॥

वराहं सर्पराजं च वास्तुदेवं च पूजयेत्।

खनित्रं क्षालयित्वाऽथ मन्त्रेणास्त्रेण देशिकः॥५॥

पुष्पैः संपूज्य रक्षार्थं सूत्रं संवेष्ट्य साधने। - वैहायसी – १२

<u>शुभलग्ने मृत्सङ्ग्रहणम्</u>

मृत्तिकाग्रहणं कुर्याच्छुभे लग्नेऽथ देशिकः॥२०३॥ - विश्वामित्रे – १७

<u>मृत्सङ्ग्रहण मन्त्रः</u>

खनित्रेण खनेद्भूमिं प्राङ्मुखः क्रोडमन्त्रतः।

लोहजे भाजने मृत्स्नां वेत्रजे वा यथारुचि॥ १३३॥

गृहीत्वा मूलमन्त्रेण वेष्टयित्वा च वाससा। - ईश्वरे - १०

## <u>अङ्कुरार्पण विषयाणि</u>

<u>अङ्कुरार्पण विहित कार्याणि</u>

अथातः संप्रवक्ष्यामि अङ्कुरार्पणमुत्तमम्।

उत्सवे स्नपने चैव प्रोक्षणे स्थापने तथा॥ १॥

अन्ये च मङ्गले कार्य द्विविधं तत्समुच्यते। - मार्कण्डेये - १३

<u>अङ्कुरार्पण विहित कार्याणि - 2</u>

कर्मारम्भे तु नवमं दशमं क्रममेव च (?)॥ ९॥

प्रतिष्ठासूत्सवे चैव प्रोक्षणे स्नपनेऽपि वा।

विषुवे चैव सङ्क्रान्त्यामयने ग्रहणेऽपि वा॥ १०॥

शुभनक्षत्रयोगे च जन्म ऋक्षोत्सवेऽपि च।

अमावास्योत्सवे चैव प्रायश्चित्तेषु सर्वशः॥ ११॥

आकस्मिकोत्सवे चैव अन्यस्मिन्नपि चोत्सवे।

अङ्कुरार्पणपूर्वं तु सर्वकर्म तु कारयेत्॥ १२॥ - मार्कण्डेये - १३

<u>अङ्कुरार्पण विहित कार्याणि - 3</u>

कर्षणे स्थापने चैव प्रोक्षणेचोत्सवे तथा।

पवित्रे च पुष्पयागे प्रायश्चित्ते तथैव च॥ ३॥

अयने विषुवे चैव ग्रहणेषु विशेषतः।

भूसङ्ग्रहादि कार्येषु मङ्गलाङ्कुर कर्मणि॥४॥ - विष्णुतन्त्रे - ११

<u>अङ्कुरार्पणस्य अवश्यकत्वम्</u>

अनङ्कुरार्पणं कार्यमनर्थमशुभावहम्।

तस्मात्सर्वप्रयत्नेन ह्याचरेदङ्कुरार्पणम्॥१५॥ - पद्मोद्भवे - ३१

<u>अङ्कुराणभावे सर्वं निष्फलम्</u>

अमङ्गलाङ्कुरो यागो निष्फलः स्यान्न संशयः।

तस्माद्यत्नेन वै कुर्यान्मङ्गलाङ्कुररोपणम्॥३३॥ - सनत्कुमारे -शिवरात्रे - ९

<u>पुष्पाङ्कुर कालः</u>

जितन्त इति मन्त्रेण पुष्पैश्चैवाङ्कुरार्पणम्।

एवं पुष्पाङ्कुरं प्रोक्तं सद्यः काले विधीयते॥१४॥ - पद्मोद्भवे - ३१

<u>उत्सवारम्भात् अङ्कुरार्पण दिननिर्णयः</u>

उत्सवारम्भदिवसात् सप्तमे पञ्चमेऽहनि।

अङ्कुरस्यार्पणं कुर्यात्पूर्ववच्चोक्तवर्त्मना॥६॥ - अनिरुद्धे - २०

<u>उत्सवार्थम् अङ्कुरार्पण कालः</u>

उत्सवारंभदिवसात् सप्तमे पंचमेऽहनि।

तृतीयेऽन्यपि सद्यो वा कारयेदङ्कुरार्पणम्॥७९॥ - विष्णुतिलके - ८

<u>उत्सवाङ्कुर कालः - सुलग्ने अङ्कुरः</u>

उत्सवारम्भदिवसादर्वागहनि सप्तमे।

अङ्कुरानर्पयेल्लग्ने शोभने देशिकोत्तमः॥१॥ - पाद्मे – ११

<u>अङ्कुरार्पणे कालयोगः नास्तिः</u>

पालिकायां प्रयोक्तव्यं मङ्गलाङ्कुररोपणम्।

कालयोगो न चाप्येषामङ्कुराणां कथञ्चन॥ ३६ ॥ - सनत्कुमारे-शिवरात्रे - ६

<u>रात्र्यामेव अङ्कुरार्पणम्</u>

अङ्कुरानर्पयेद्रात्रौ य इच्छेद्राष्ट्रवर्धनम्।

बीजानामधिपः सोम ओषधीशोऽमृतात्मकः॥ १०९॥

न प्रीणाति सदा तत्र अङ्कुरार्पणमह्नि चेत्।

तस्मात्सर्वप्रयत्नेन रात्र्यामेवाङ्कुरार्पणम्॥ ११०॥

कुर्यात्सम्यग्विधानेन भगवद्भक्तिसंयुतः।

तस्मिन् जगत्प्रिये प्रीते शीतांशौ प्राणिजीवने॥ १११॥

तद्देशे सर्वसस्यानां संपत्तिर्महती भवेत्।

गवां च लोकमातृणां नृणामपि च सर्वशः॥ ११२॥ - ईश्वरे - १०

<u>अङ्कुरार्पणम् अह्नि कृते दोषः - सद्यःकाले दिवा वा कुर्यात्</u>

अज्ञानादह्नि कुर्याच्चेदङ्कुराणामथार्पणम्।

अशोभनं भवेद्राष्ट्रमसमृद्धजनान्वितम्॥ ११३॥

सद्यः कालीनके विप्राः कर्मणि स्याद्दिवापि वा।

यद्यत्तत्रोपयोग्यं स्यात्तत्सर्वं च समार्जयेत्॥ ११४॥ - ईश्वरे - १०

<u>अङ्कुर मण्डपद्वारं क्षीरवृक्षैः कल्पनम्</u>

मङ्गलाङ्कुरवापार्थं स्तम्भैः षोडशभिर्युतम्।

चतुर्द्वारं प्रतिद्वारं दुग्धवृक्षसमुद्भवैः॥ १९७॥

भूषितं तोरणवरैर्दर्भमालासमावृतम्। - विश्वामित्रे - १७

<u>उत्सवे त्रिविधपात्राणि</u>

पात्रन्तु त्रिविधं प्रोक्तं मङ्गलाङ्कुरकर्मणि।

पालिका घटिकाचैव शरावञ्चेतिभेदतः॥७॥ - वासिष्ठे - १२

<u>त्रिविध पात्राणि - पात्रद्रव्य भेदाः</u>

सायमङ्कुरवापार्थं पात्राणि क्षालयेत् सुधीः।

पालिकाः घटिकाश्चैव शरावाः वैभवो यथा॥१०॥

स्वर्णजाः जातरौप्या वा ताम्रजाः लोहजा नु वा।

मृत्तिकारचिता ग्राह्याः प्रामाणं श्रृणुत द्विजाः॥११॥ - वैहायसी - १२

<u>पालिका लक्षणम्</u>

पालिकानामथोच्छ्रायः पञ्चविंशाङ्गुलो भवेत्॥८०॥

तदाननस्य विस्तारो भवेद्वै षोडशाङ्गुलः।

अष्टाङ्गुलस्तदुच्छ्रायो ह्यङ्गुलं वलयं ततः॥८१॥

भवेत्कण्ठबिलं विप्रास्ततोऽष्टाङ्गुलविस्तृतम्।

आरभ्य वक्रवलयाद्यावत्कण्ठबिलं द्विजाः॥८२॥

ह्रासयेदनुपातेन तन्नालं द्वादशाङ्गुलम्।

उच्छ्रायादथ विस्तारान्मध्यतस्तु षडङ्गुलम्॥८३॥

अधस्तादङ्गुलानान्तु चतुष्कं विस्तृतं भवेत्।

ततः कण्ठबिलाच्चैव ह्रासयेदनुपाततः॥८४॥

पादपीठमधोत्सेधाद्विज्ञेयं चतुरङ्गुलम्।

दशाङ्गुळस्तद्विस्तारस्तत्सन्धिश्चाङ्गुलो भवेत्॥८५॥

तत्सन्धेश्च भवेन्नालं सार्धमेकाङ्गुलं द्विजाः।

उन्मत्तकुसुमाकारं वक्त्रं पद्माकृतिर्भवेत्॥८६॥ - ईश्वरे - १०

<u>घटिका लक्षणम्</u>

पालिकोत्सेधतुल्यास्तु घटिकाः समुदाहृताः।

अङ्गुलत्रयहीना वा तदूर्ध्वं कलशाकृतिः॥८७॥

घटिकाः पञ्चवक्त्राः स्युरेतासां मध्यमं मुखम्।

षडङ्गुलं च विस्तीर्णं चतुर्दिक्षु चतुष्टयम्॥८८॥

चतुरङ्गुलविस्तारं कलशोदरविस्तृतिः।

षोडशाङ्गुलमानोत्था शेषं प्राग्वत्समाचरेत्॥८९॥

यदाङ्गुलत्रयन्यूनास्तदा सप्ताङ्गुलोच्छ्रितम्।

तदाननं तु तन्नालमर्धोत्तरदशाङ्गुलम्॥९०॥

सार्धत्रयाङ्गुलं पीठं प्राग्वत्सर्वत्र विस्तरः। - ईश्वरे - १०

<u>शराव लक्षणम्</u>

शरावाः पालिकोत्सेधतुल्याः पञ्चभिरङ्गुलैः॥९१॥

हीना वा वक्त्रविस्तारात्समारभ्य मुनीश्वराः।

पादपीठस्य विस्तारं यावत्तावत्क्रमेण तु॥९२॥

पूर्वोक्तात्पादहीना तु भवेत्सर्वत्र विस्तृतिः।

भवेत् त्रिपादहीना तु पादपीठस्य विस्तृतिः॥९३॥

यदा शरावा हीनाः स्युरङ्गुलैः पञ्चभिस्तदा।

मुखं षड्गुलोच्छ्रायं तन्नालं तु दशाङ्गुलम्॥९४॥

त्र्यङ्गुलं पादपीठं स्यात्प्राग्वत्सर्वत्र विस्तृतिः। - ईश्वरे - १०

<u>पालिकादीनां प्रत्येकं लोहभेदाः</u>

अतः परं प्रवक्ष्यामि मङ्गलाङ्कुरविस्तरम्॥४॥

सौवर्णां पालिकां कुर्यात् राजतीं घटिकाकृतिम्।

ताम्रैरेव शरावं तु सर्वेषां ताम्रमेव वा॥५॥

मृद्भिर्वाप्यथ सर्वेषां(सर्वाणि?)कारयित्वा विचक्षणः।

यथावित्तानुसारेण कुर्याद्वा पालिकादिकान्॥६॥ - विष्वक्सेने - २५

<u>शराव - घटिका वर्णाः</u>

शरावी याष्टके ज्ञेयाः चाषपक्षसमा इमे॥४२॥

द्वितीये चाष्टके देवाः शङ्खोदरसमप्रभाः।

तृतीये त्राणकर्तारः शान्ताङ्गारसमास्तथा॥४३॥

घटिकास्था इमे देवाः प्रथमे त्वष्टके द्विजाः।

रक्ताः हिङ्गुलिकातुल्याः द्वितीये पद्मसन्निभाः॥४४॥

तृतीये श्यामपीताश्च विज्ञेयाः मुनिसत्तमाः। - वैहायसी - १२

<u>पालिकावर्णाः</u>

पालिकायां तु विज्ञेयाः पीताः आद्यष्टके शुभाः॥४५॥

द्वितीये श्वेतपीताश्च तृतीये श्यामतां गताः।

अथवा शोभितास्सर्वे यथा स्युर्मण्डपे द्विजाः॥४६॥

तथा वर्णैः चिन्तनीयाः मनः प्रमोदकृद्यथा। - वैहायसी - १२

<u>वर्जनीय पात्राणि</u>

नाहं स्यात् पालिकानां च विस्तारार्धेन वर्धितम्।

कालं भिन्नं च सुषिरं भेदच्छेदं च लीनकम्॥२०॥

वर्जयेत्तु प्रयत्नेन साधयेल्लक्षणान्वितम्। - मार्कण्डेये - १३

<u>सर्वकार्येषु त्रिविध पात्राणि</u>

महोत्सवे प्रतिष्ठायां पवित्रारोपणे तथा।

जीर्णोद्धारविधौ चापि सहस्रकलशे तथा॥१०१॥

त्रिवर्गपालिका यद्वा भवेदुत्तमसङ्ख्यया।

भवेन्मध्यमया वापि नान्यथा द्विजसत्तमाः॥१०२॥

कर्मस्वन्येषु सर्वेषु यथावित्तं यथारुचि। - ईश्वरे - १०

<u>पालिकादीनाम् अभावे पात्रविधिः</u>

पालिका घटिका राजन् शरावा त्रिविधा भवेत्।

पालिकानामभावे तु घटिकाः संप्रकीर्तिताः॥७॥

घटिकानामभावे तु पालिका संप्रकीर्तिताः।

तयोरभावेत्वन्येषां यथा वित्तानुसारतः॥८॥ - मार्कण्डेये – २९

<u>त्रिपात्राणाम् अभावे पालिकाः</u>

पालिकादि त्रिवर्गाणामलाभे कमलोद्भव।

केवलापालिकाचाष्टौगृह्य बीजानि वापयेत्॥६२॥ - विष्णुतन्त्रे - ११

<u>महोत्सवे पालिकादीनि चतुर्विंशति सङ्ख्या</u>

शरावाः प्रथमं न्यस्याश्चतुर्विंशतिसङ्ख्यकाः॥१९॥

घटिकामध्यतश्चान्ते पालिकाविगतस्पृहाः। - वैहायसी - १२

<u>उत्सवे पालिकादीनां सङ्ख्या</u>

अष्टोत्तरशतेष्वेव पालिकासु यथाविधि।

षड्विंशत्स्वथवा पश्चादलङ्कारैस्समाचरेत्॥ २॥ - पाद्मे - ११

<u>उत्सवे पालिकादीनां सङ्ख्या</u>

इत्थमष्टोत्तरशतमुत्तमा क्लृप्तिरुच्यते।

मध्यमायां कल्पनायां प्रत्येकं षोडशं(१)भवेत्॥ १९४॥

तदर्धमधमं प्रोक्तं यथासंभवमेव वा।

देवकर्मणि युग्माः स्युरयुग्मा मानुषे विधौ॥ १९५॥

पालिका एव वा ग्राह्या मङ्गलाङ्कुररोपणे। - विश्वामित्रे - १७

<u>पालिकादि पात्राणां स्थापन मन्त्राः</u>

ब्रह्मादीशानपर्यन्तं प्रथमं घटिकागणम्।

स्थापयेत् परमेष्ठ्याख्यमन्त्रेण प्रथमं द्विज॥ २२७॥

विन्यसेद्विश्वमन्त्रेण शरावांस्तदनन्तरम्।

सर्वेषां स्थापनं कुर्यात्प्राङ्मुखो वाप्युदङ्मुखः॥ २२८॥

वासोभिर्वेष्टयेत् पश्चात् प्रत्येकं मूलविद्यया।

अशक्तश्चेत् प्रतिगृहं छादयेद्वाससोपरि॥ २२९॥ - विश्वामित्रे - १७

<u>सोमकुम्भस्य परितः पालिकादि त्रिपात्र स्थापनविधिः</u>

प्राङ्मुखः पञ्चसूत्राणि उदक्सूत्रं तथैव च।

मध्यमेव चतुष्पादं स्थण्डिलं कारयेत्सुधीः॥ ३६॥

मध्यमे सोमकुम्भं तु पूजयेत् पूर्ववद् बुधः।

हृदयेन तु मन्त्रेण पालिकादीनि विन्यसेत्॥ ३७॥

शरावं पालिकां चैव घटिकां च यथाक्रमम्।

ईशानादि समारभ्य प्रत्येकं युगसङ्ख्यया॥ ३८॥

पूर्वोक्तविधिना सर्वं कारयेद्देशिकोत्तमः। - मार्कण्डेये - १३

<u>पालिकादीनां मृत्पूरण विधिः</u>

बिलानि प्रथमं मृद्भिर्वालुकाभिरनन्तरम्॥ १६४॥

करीषचूर्णैरुपरि समृद्धं पूरयेद्बिलम्।

यद्वा मृदादिकं विप्राः सर्वं संमिश्र्य पूरयेत्॥ १६५॥ - ईश्वरे - १०

<u>अङ्कुरार्पणारम्भ समये भगवत् पूजनम् - देवस्य धान्य प्रदर्शनम्</u>

भगवन्तं जगद्योनिं पूजयित्वा विधानतः।

ततस्त्वभिनवे पात्रे सौवर्णे राजतेऽथ वा॥ ११६॥

तिल-सर्षप-नीवार-शालि-माष-प्रियङ्गवः।

कुळुत्थ-मुद्ग-निष्पाव-यव-गोधूम-वैणवाः॥ ११७॥

बीजानि द्वादशैतानि पृथक् पात्रेषु वा द्विजाः।

सम्भृत्य तु मुनिश्रेष्ठाः स्थापयित्वा तु मूर्धनि॥ ११८॥

दीक्षितस्य तु विप्रस्य पुष्पाक्षतकराञ्जलिः।

आचार्यः प्रविशेत्सार्धं साधकैर्भगवन्मयैः॥ ११९॥

प्रासादाभ्यन्तरं विप्रास्तत्राधारोपरि न्यसेत्।

बीजपात्रं ततोऽर्घ्येण गन्धैः पुष्पैश्च धूपकैः॥ १२०॥

सम्पूज्य मूलबिम्बस्थं तथा चोत्सवबिम्बगम्।

बीजपात्रं ततोऽभ्यर्च्य देवाय विनिवेदयेत्॥ १२१॥ - ईश्वरे - १०

<u>पालिकादि पात्राणाम् अधिदेवताः</u>

पालिका वैष्णवी ज्ञेया ब्राह्मी तु घटिकास्स्मृता।

शरावं शैवमित्युक्तं त्रयमेतत्तु दैविकम्॥ ९॥ - कपिञ्जलः - २१

<u>पालिकादि पात्राणाम् अधिदेवताः</u>

यजेदर्घ्यादिभिः पश्चात्पालिकाद्यधिदेवताः।

अञ्जनाभं परं चैव पद्मनाभं ध्रुवं तथा॥ १७४॥

पात्रस्कन्धत्रिके विप्राः क्रमेण परिपूजयेत्। - ईश्वरे - १०

<u>पालिकादीनां प्रत्येकं अष्ट - चत्वारि ग्रहणे अधिदेवताः</u>

अष्टके केशवाद्यांश्च तदीयाः शक्तयो यजेत्॥ १८२॥

चतुष्के केशवाद्यांस्तु केवलान् द्वादशार्चयेत्। - ईश्वरे - १०

<u>सर्वार्थे पालिका पक्षः - सङ्ख्याभेदेन देवताभेदाः</u>

सर्वार्थं पालिकानां तु क्रमाच्छोडशके यजेत्॥ १८३॥

वासुदेवादि चतुरः केशवादींश्च द्वादश।

अष्टके वासुदेवादीन् प्रभवाप्यययोगतः॥ १८४॥

चतुष्के वासुदेवादीन् प्रभवानुक्रमेण तु। - ईश्वरे - १०

<u>त्रयोदशबीजानि - तदभावे विधिः</u>

मुद्ग-सर्षप-नीवार -सिम्ब-माष-यवास्तथा।

प्रियङ्गु-श्याम-निष्पावा कुलुत्थाश्च तथा तिलाः॥ २०॥

व्रीहिवेणू च धान्यानि पयोभिः क्षालयेत्सुधीः।

बीजानामप्यालाभे तु मुद्गमेकं प्रशस्यते॥२१॥ - कपिञ्जले – २१

<u>अङ्कुरोत्तमाः</u>

इन्द्रवल्ली सदाभद्रा सर्षपाश्च शमी तथा।

चणकश्चेति चात्राष्टौ कथितास्त्वङ्कुरोत्तमा॥३३॥- सनत्कुमारे-शिवरात्रे- ६

<u>सद्यः कालादि भेदेन अङ्कुर त्रैविध्यम्</u>

अङ्कुरं त्रिविधं प्रोक्तं बीज-प्रारोह-तण्डुलम्।

बहुवारे तु बीजं स्यादल्पवारे प्ररोहकम्॥२३॥

सद्यः काले विशेषेण तण्डुलं संप्रचक्षते। - अनिरुद्धे - २०

<u>अङ्कुरार्पणे - कुश - दर्भाङ्कुरस्य विधिः</u>

अङ्कुराणामथो वक्ष्ये क्रमयोगं विधानतः।

कुशदर्भाङ्कुराः श्रेष्ठास्तथा(दूर्वा)दर्भाङ्कुरावपि॥३२॥-सनत्कुमारे-शिवरात्रे-६

<u>बीजादि क्षालन मन्त्रः</u>

पयोभिः क्षालयेत् पूर्वं बीजेन परमेष्ठिना॥४२॥

पुनश्च क्षालयेत् पश्चात् बीजेन पुरुषात्मना। - विष्वक्सेने – २५

<u>बीजपूजामन्त्रः - क्षालनमन्त्रश्च</u>

पयसा दश बीजानि क्षालयेद्वादशात्मना॥२२॥

दशभिर्नामधेयैस्तु चतुर्थ्यन्तैः पृथक् पृथक्।

पूजयित्वा तु गन्धाद्यैः वाससा परिवेष्ट्य च॥२३॥ - नारदीये - १९

<u>बीज पूजा</u>

बीजानां नामधेयैस्तु चतुर्थ्यन्तैः पृथक् पृथक्।

अर्घ्याद्यैः पूजयित्वा तु वाससा परिवेष्ट्य च॥१८८॥ - ईश्वरे - १०

<u>धान्येषुच आवाहन देवताः</u>

नीवारादिषु धान्येषु केशवादीन् समर्चयेत्॥६२॥ - श्रीप्रश्ने – ३१

<u>सोमकुम्भस्य परितः अष्टकुम्भ स्थापनम्</u>

पालिका घटिकाश्चैव शरावाः स्थापयेद्गुरुः।

प्रतीच्यां सोमकुम्भं च करकं चापि वै रमे॥५६॥

सोमकुम्भस्य परितः उपकुम्भाष्टकं न्यसेत्। - श्रीप्रश्ने – ३१

<u>सोमकुम्भ पूजा - करक उपकुम्भ पूजा च</u>

कुम्भे सोमात्मकं देवं करके च सुदर्शनम्।

अष्टदिक्षु च विन्यस्तकुम्भेष्विन्द्रादिकान्यजेत्॥१८६॥ - ईश्वरे - १०

<u>सोमहोमे भगवदावाहन प्रार्थणा - भगवदाराधन होमानन्तरम् सोमहोमः</u>

भगवन् पुण्डरीकाक्ष यात्रोत्सवनिमित्ततः।

ध्वजार्थाङ्कुरसिद्ध्यर्थमग्निमुत्पादयामि भोः॥६६॥

इति विज्ञाप्य तत्राग्निमुत्पाद्य जुहुयात्ततः।

भगवन्तं ततः सोमं हुत्वा देशिकसत्तमः॥६७॥ - श्रीप्रश्ने - ३१

<u>सोमहवनम्</u>

घृताहुति शतं हुत्वा चतस्रः समिधस्तथा॥२४२॥

व्यूहमन्त्रैश्च जुहुयात् सूक्तेन च तथा चरुम्।

हुत्वा पूर्णां विधायाथ घृताहुतिं शतं हुनेत्॥२४३॥

संस्पृश्य स्पर्शमन्त्रेण संपाताज्येन पालिकाम्।

बीजपात्रे च संपात घृतशेषं विनिक्षिपेत्॥२४४॥ - विश्वामित्रे - १७

बीजावापमन्त्रः - जलसेचन मन्त्रश्च

जितन्त इति मन्त्रेण सर्वबीजानि वापयेत्।

द्वादशाक्षरमन्त्रेण सिञ्चेद्धारिद्रवारिणा॥२५॥ - नारदीये - १९

अङ्कुरार्पण मन्त्रः

आचार्यादीननुज्ञाप्य देशिकेन्द्र उदङ्मुखः।

प्राङ्मुखो वा मुहूर्ते तु शोभने पालिकादिषु॥१९७॥

अष्टाक्षरेण मन्त्रेण सर्वबीजानि वापयेत्।

यद्वा जितन्तामन्त्रेण ह्युभयेनाथ वा द्विजाः॥१९८॥ - ईश्वरे - १०

सुलग्ने बीजावापः - तन्मन्त्रः - आचार्यानुज्ञया अन्यविप्रेभ्यः बीजावापम्

लग्ने सुशोभने प्राप्ते ब्राह्मणानामनुज्ञया॥२४५॥

पालिकादिषु बीजानि वापयेन्मूलविद्यया।

ब्रह्मादीशानपर्यन्तं वापयेत् सकलं गुरुः॥२४६॥

अन्येऽप्याचार्यसम्मत्या विदध्युर्बीजवापनम्। - विश्वामित्रे - १७

पालिका स्थापनमन्त्रेण बीजावापः

यथायेन च मन्त्रेण स्थापिताः पालिकादयः॥३५॥

तथा तेनैव मन्त्रेण पालिकादिषु वापयेत्। - विष्णुतन्त्रे - ११

<u>सोमकुम्भजलेन पालिकादीनां सेचनम्</u>

आचार्यो वापयेद् बीजान् प्राङ्मुखो वाप्युदङ्मुखः।

सोमकुम्भस्थतोयेन पालिकादीनि सेचयेत्॥ ३४॥ - मार्कण्डेये - १३

<u>नित्यं सोमकुम्भ जलेन सेचनम्</u>

अर्पयित्वाङ्कुरान् प्राज्ञः सेचयेन्निशि आदरात्।

हरिद्रावारिणा नित्यं शीघ्रं वृद्धिर्भवेद्यथा॥ ४८॥

सोमकुम्भ-जलेनापि नित्यं सिञ्चेत वैष्णवः। - वैहायसी – १२

<u>बीजानि प्रत्येकं वापनम् अथवा मिश्रितानि - बीजानाम् अलाभे विधिः</u>

बीजानि द्वादशोक्तानि वपेद्वादशसु क्रमात्।

यद्वा सर्वाणि संमिश्र्य वपेदिच्छानुसारतः॥ २००॥

बीजानामप्यलाभे तु मुद्गमेकं तु वा वपेत्। - ईश्वरे - १०

<u>अङ्कुरार्पणमारभ्य उत्सवान्तम् एकेनैव आचार्येन कार्यः</u>

कर्मार्थमङ्कुराण्यादौ यः समारोपयेद्गुरुः।

स एव कर्म कार्त्स्न्येन कुर्यात्प्राज्ञोपि नेतरः॥ २२३॥

अनुज्ञया वा तत्पुत्रः शिष्यो वा तत्समाचरेत्।

एवं सर्वेषु यागेषु चाङ्कुरारोपणं भवेत्॥ २२४॥ - ईश्वरे – १०

<u>आचार्यस्य अशक्तत्वे - मरणे सति सुत शिष्येन वा अङ्कुरपूजा</u>

यत्कर्मोद्दिश्य येनैवमङ्कुरारोपणं कृतम्॥ २५२॥

आ समाप्तेः स एवास्य कर्मणः कारको भवेत्।

तस्याशक्तिर्यदि भवेन्मरणं वाथ तत्सुतः॥ २५३॥

तच्छिष्यो वा विदध्यात्तत् ऋत्विग्वा तदनुज्ञया। - विश्वामित्रे - १७

<u>यागशालायां बीजावापस्थानम्</u>

ब्राह्म्यादीशानपर्यन्तं बीजावापनमुच्यते॥ २५॥

मण्डपेशानकोणे तु सुगुप्तं स्थापयेद्बुधः। - कपिञ्जले २१

<u>अङ्कुरार्पणमण्डप रक्षणम्</u>

यदा चोप्तानि बीजानि तदा प्रभृति नित्यशः।

न कश्चित् प्रविशेत् तत्र न स्पृशेद्वा कथञ्चन॥ ३०॥

आचार्य एव प्रविशेत् सिञ्चेत् कुसुमवारिणा।

उच्छिष्टादीनि सर्वाणि दूरतः परिवर्जयेत्॥ ३१॥ - सनत्कुमारे-शिवरात्रे -९

<u>अङ्कुराणां वर्णभेदेन फल भेदाः</u>

अङ्कुरान् श्यामलान् रक्तान् कृष्णांस्तिर्यग्गतांस्तथा॥ २१९॥

अप्ररूढान् मुनिश्रेष्ठाः वर्जयेत्तु प्रयत्नतः।

श्यामेषु द्रव्यनाशः स्याद्रक्तेषु कलहो भवेत्॥ २२०॥

कृष्णेषु मानसी पीडा रोगी तिर्यग्गतेषु च।

अप्ररूढेषु मरणं भवेत्तत्र न संशयः॥ २२१॥

शुभं पीतेषु शुक्लेषु ऋजुषूर्ध्वगतेष्वपि।

सर्वसम्पत्समृद्धिश्च कर्तुः कारयितुर्भवेत्॥ २२२॥ - ईश्वरे - १०

<u>अङ्कुरवर्णेन शुभाशुभ फलम् - अशुभे शान्ति होमः</u>

पीतेषु श्वेतवर्णेषु चाङ्कुरेषु शुभं विदुः॥ ४९॥

वक्रेषु अशुभं ज्ञात्वा शान्तिहोमं समाचरेत्। - वैहायसी - १२

<u>तीर्थयात्रादिनमनुसृत्य अङ्कुरार्पण कालः - अङ्कुरवर्द्धनेन यागसिद्धिः</u>

पञ्चसप्तनवाहे वा कुर्यादेवं महोत्सवे॥ ३०॥

एकद्वित्रिदशाहे तु [चतुर्थे] पञ्चमेऽपि वा।

तीर्थयात्रादिनादर्वाक् कारयेदङ्कुरार्पणम्॥ ३१॥

विधिवद्यागसिद्धिः स्यात् मङ्गलाङ्कुरवर्धनात्। - नारदीये – १९

## वास्तुशान्ति विषयाणि

<u>उत्सवे वास्तुशान्तिः</u>

वास्तुशान्तिं ततः कुर्यात् ग्रामादीनां विशुद्धये॥ २१॥ - श्रीप्रश्ने - ३२

<u>सर्वेऽपि वास्तुपूजा</u>

उत्सवे च प्रतिष्ठायां प्रायश्चित्तेषु सर्वशः।

वास्तुहोमं प्रकुर्वीत क्रमाद्देवं यथा भवेत्॥ ३४॥

अनर्चिते वास्तुदेवे कृतं कर्मासुरम् भवेत्। - विष्णुतन्त्रे - ५

<u>वास्तु कूर्च दर्भसङ्ख्या</u>

सप्तदर्भ कृतं कूर्चं कृत्त्वातत्र विनिक्षिपेत्॥ ३९॥

तत्रार्चयेद्वास्तुदेवं गन्धपुष्पादिभिः क्रमात्। - विष्णुतन्त्रे - ५

<u>वास्तुस्वरूप लक्षणम्</u>

शुक्लवस्त्रं कृष्णदेहं गन्धस्रग्गनुलेपनम्॥ ४०॥

रक्तकेशं महाघ्राणं तीक्ष्णदंष्ट्रं महाद्भुतम्।

दक्षिणेतर हस्तेन रत्नपात्र धरं परम्॥ ४१॥

वामेतरे जहिं क्रान्तं विग्रहं वास्तुपूरुषम्। - विष्णुतन्त्रे - ५

<u>वास्तु अङ्गपूजा क्रमः</u>

वास्तुदेवस्य शिरसि पूजयेदंशुमालिनम्॥४२॥

झषध्वजं बाहुमूले कुमारं कूर्परे तथा।

हस्ते विनायकं पाद युगलेचाश्वदेवते॥४३॥

मध्येचन्द्रं तथापाणौ दुर्गां मातृञ्च कूर्परे।

बाहुमूले तथास्थाणुं हृदये मामधस्थितम्॥४४॥

ब्रह्मानं नाभिदेशे च दिक्पालान् स्वासु दिक्षु च।

क्षेत्रेशमुत्तरे पार्श्वे वास्तुदेवं प्रपूजयेत्॥४५॥ - विष्णुतन्त्रे - ५

## <u>ध्वजारोहण विचारः</u>

<u>ध्वजारोहण दिन भेदाः</u>

मासादावुत्सवदिने पञ्चाहावधिके क्रमात्।

ध्वजारोहणकालस्तु ब्रह्मन्नद्य प्रदर्श्यते॥४८॥

एकोनविंशतितमे दिने तीर्थाङ्कुरार्पणात्।

अष्टादशदिने वापि प्रागेव समये शुभे॥४९॥

वैनतेयध्वजारोहाद् द्वादशाहेऽथवा भवेत्।

यद्वा कल्याणदिवसं त्रिगुणीकृत्य तावताम्॥५०॥

आदौ दिनानां कर्तव्यं ध्वजारोहण मब्जज।

अङ्कुरानर्पयित्वाह्नि पुष्ये पूर्वं यथोदिते॥५१॥

ध्वजमारोपयेत्पश्चान्मङ्गलं मङ्गले दिने। - पाद्मे - १०

ध्वजारोहण दिन निर्णयः

तीर्थस्नानदिनात्पूर्वे ध्वजारोहणमाचरेत्॥ १७॥

एकविंशदिने कुर्यान्नवाहोत्सवकर्मणि।

कर्मारम्भदिनात् पूर्वमष्टादशदिनेऽपि वा॥ १८॥

पक्षे मासे तथा कुर्यान्मासे मासद्वये तथा।

अथारम्भदिने वापि तत्प्रकारस्तथोच्यते॥ १९॥ - अनिरुद्धे - २०

रक्षा - ध्वज हीन आलये प्रत्यवायः

पूजाहोमादिकं सर्वं जपाद्यं यत् कृतं बुधैः॥ ३॥

रक्षणेन विना यद्वत् क्षेत्र नश्येत्तु क्षेत्रिणाम्।

ध्वजं विना देवगृहं तथा नश्येत सर्वथा॥ ४॥

विष्णुपारिषदाः क्रूराः कूष्माण्डाद्याश्च ये स्मृताः।

पूजादिकं तु गृह्णन्ति दैवं दृष्ट्वा न रक्षितम्॥ ५॥ - हयशीर्षपाञ्चरात्रे - ४४

ध्वजहीनालये दोषः

उत्सवाङ्ग ध्वजं वक्ष्ये विष्णोरुत्सव पूर्वकम्।

असुरावस्तुमिच्छन्ति ध्वजहीने सुरालये॥ २७॥

राक्षसाश्च पिशाचाश्च जगत्संहारकारिणः।

अध्वजं विष्णुयज्ञन्तु धनधान्य जगत्क्षये॥ २८॥

तस्मात् सर्व प्रयत्नेन ध्वजस्थापनमाचरेत्। - वासिष्ठे - १२

ध्वजहीनोत्सवे कृते नित्यपूजादिषु निष्फलम्

ध्वजयागविनाशेन उत्सवो निष्फलो भवेत्॥ १४०॥

उत्सवस्य विनाशेन नित्यपूजा च निष्फला।

नित्यपूजाविनाशस्तु सर्वसंहारकारणम्॥ १४१॥

तस्मात् सर्वप्रयत्नेन आवाहनबलिं कुरु। - विष्वक्सेने - २६

<u>देवासुरयुद्धे जयार्थं ध्वजस्थापनम्</u>

पूर्वं देवासुरे युद्धे विजयार्थं तदामरैः॥ २०॥

कृत्वा लक्ष्माणि ह्युपरि वाहनान्यायुधानि च।

जितं दैत्यबलं सर्वं तदासौ ध्वजसंस्थितिः॥ २१॥ - हयशीर्षपाञ्चरात्रे - ४४

## ध्वजस्तम्भविषयाणि

<u>स्तम्भे दर्भाग्राणि - दर्भमाला वेष्टन मन्त्रः</u>

कुशैश्च साग्रैः प्रच्छाद्य स्तम्भमूर्ध्वमुखैश्शुभैः।

संवेष्ट्य दर्भमालभिर्विष्णुसूक्तेन देशिक॥ ११२॥ - पाद्मे - १०

<u>ध्वजस्तम्भ देवताः</u>

पुण्याहं वाचयेत्तत्र ध्यायेत् स्तम्भस्थदेवताः॥ ३८॥

स्तम्भमूले महाविष्णुः मध्ये ब्रह्माणमेव च।

अग्रे च स्थापयेद्रुद्रं पूजयेत्सर्वदेवताः॥ ३९॥ - पद्मोद्भवे - २७

<u>ध्वजस्तम्भे आवाहन देवता</u>

अनिरुद्धं ध्वजस्तम्भे हृदयादवतार्य वै॥ ५७॥

आवाह्य पौरुषैः सूक्तैः पूजयेद् ध्वजरूपिणम्।

गुणे मायां समावाह्य नैवेद्यान्तं च पूजयेत्॥ ५८॥ - श्रीप्रश्ने - ३२

## ध्वजपट विषयाणि

ध्वज वस्त्र लक्षणम्

तदन्येद्युः प्रभातायां ध्वजार्थं पटमाहरेत्॥२२७॥

यथावित्तानुसारेण क्रीतं वाभिनवं शुभम्।

दुकूलपट्टं देवाङ्गं चित्रक्षौममथापि वा॥२२८॥

अथ कार्पासकं वापि नीलरोमादिवर्जितम्। - ईश्वरे - १०

ध्वजपट प्रमाणम् - उत्तमादि भेदाः

उत्तमं नवहस्तं तु सप्तहस्तं तु मध्यमम्।

अधमं पञ्चहस्तं तु त्रिविधं पटमुच्यते॥१५॥

तदर्धं चैव विस्तारं तदर्धं शिखरं भवेत्।

तत्समं पुच्छमित्युक्तं कर्णपुच्छं तथैव च॥१६॥

सुलक्षणं दृढं स्निग्धं शिलरोमादिवर्जितम्। - कपिञ्जले -२२

ध्वजपट मानम्

ध्वजार्थं पटमाहृत्य निर्दोषं तु नवं शुभम्।

शिल्पिना कुशलेनैव लेखयेच्चैव मन्त्रवित्॥७॥

अथ द्वारसमं वाऽपि यजमानसमं तथा।

त्रितालं वा द्वितालं वा पटं तत्र प्रचक्षते॥८॥ - पद्मोद्भवे – २७

ध्वजपट द्रव्य - मानादयः

तन्तूत्थं क्षौमवसनं निर्दोषं सूक्ष्ममाहृतम्॥५६॥

कार्पासं वा यथावित्तं ध्वजार्थे कल्पयेद् बुधः।

आयतं दशभिर्हस्तैर्विस्तीर्णं पञ्चभिर्दृढम्॥५७॥

नवभिर्वाष्टभिर्वापि सप्तभिर्वा चतुर्मुख।

मूलबेरसमायामं द्वारायाममथापि वा॥५८॥

आयामार्धेन विस्तीर्णं पादेन कृतशेखरम्।

शेखरेण समं पुच्छं तदर्धं कर्णपुच्छकम्॥५९॥

निर्णेजितं खलीयुक्तं शोषितं लक्षणान्वितम्। - पाद्मे - १०

<u>ध्वजपटे लेखनीयाणि - पञ्च गरुडादयः</u>

पटं विचित्रयेद्विद्वान् शिल्पिना कुशलेन वै॥२३३॥

छत्रं तु शिखरेकुर्यात् पार्श्वयोः श्वेतचामरे।

अधोऽनेकदलं पद्मं तदधः पूर्णकुम्भकम्॥२३४॥

कुम्भस्य पार्श्वे विलिखेत्साङ्कुरं पालिकागणम्।

दीपौ सुशोभनौ कुर्यात्पालिकानां तु पार्श्वयोः॥२३५॥

ध्वजं तु गरुडाकारमेकमूर्तेस्तु सत्तमाः।

सत्यः सुपर्णो गरुडस्ताक्ष्र्यश्च चतुरात्मनः॥२३६॥

पञ्चमूर्तेस्तु चत्वारो विहगेश्वरसंयुताः।

सुपर्णतालमकर ऋश्या वा चतुरात्मनः॥२३७॥

ततऊर्ध्वं तु सर्वेषां व्यूहानां गरुडो ध्वजः। - ईश्वरे - १०

<u>ध्वजपटस्थ गरुड लक्षणम्</u>

गरुडं गमनोद्युक्तं हेमाङ्गं कुटिलेक्षणम्॥९॥

नीलनासाग्रसंयुक्तं सर्वावयवसुन्दरम्।

बद्धाञ्जलिपुटं सौम्यं शङ्खचक्रधरं विभुम्॥ १०॥

ललाटे न्यस्ततिलकं पक्षविक्षेपणान्वितम्।

सर्वाभरणसंयुक्तं श्वेतवर्णं चतुर्भुजम्॥ ११॥

करण्डिकामकुटिनं श्वेतवस्त्रोपशोभितम्।

आकुञ्चितं सव्यपादमपरं पृष्ठतः स्थितम्॥ १२॥

मौलौ मालायितं नागं शङ्खं तु तुहिनप्रभम्।

पद्मं च दक्षिणे कर्णे शोणाभं कुण्डलाकृतिम्॥ १३॥

महापद्मं च पिङ्गलाभं वामकर्णस्य कुण्डलम्।

मेघाभं गुलिकं कण्ठे कण्ठाभरणरूपिणम्॥ १४॥

रक्ताभं वासुकिं भीमं ब्रह्मसूत्रोपशोभितम्।

कार्कोटकं धूम्रनिभं हाररूपिणमब्जजे॥ १५॥

तक्षकं पीतवर्णाभं कटिसूत्रोपशोभितम्।

अनन्तं क्षौमसदृशं कटकं दक्षिणे करे॥ १६॥

वामे करे महाश्वेतं विलिखेत् कटकायितम्।

परितः शङ्खचक्रं च गदाखङ्गौ तथा धनुः॥ १७॥

तार्क्ष्यस्य शिरसि छत्रं पार्श्वयोश्चामरावपि।

दीपस्तम्भौ पादपार्श्वे पालिकाः साङ्कुरास्तथा॥ १८॥

एवं लिखेत् पञ्चवर्णैर्देशिकः शिल्पिनोऽपि वा। - श्रीप्रश्ने - ३२

<u>ध्वजपट गरुडलक्षणम्</u>

आहृत्य मध्ये वस्त्रस्य गरुडं काञ्चनप्रभम्॥ ६०॥

नवतालप्रमाणेन द्विभुजं धृतकञ्चुकम्।
धृतपुष्पाञ्जलिपुटं श्वेताम्बरधरं विभुम्॥ ६१ ॥
दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम्।
नीलनासाग्रसंयुक्तं कुञ्चितासव्यपादकम्॥ ६२ ॥
पृष्ठे निविष्टसव्याङ्घ्रिं पक्षविक्षेपशोभितम्।
गगने गमनारम्भं सुवृत्तं घोरदर्शनम्॥ ६३ ॥
करण्डिकामकुटिनं ललाटे रचितालकम्।
हारकेयूरवलयनूपुराभरणोज्वलम्॥ ६४ ॥
अनन्तो वामकटको यज्ञसूत्रं च वासुकिः।
उरसि न्यस्तकार्कोटं कटिसूत्रिततक्षकम्॥ ६५ ॥
बिभ्राणं दक्षिणे कर्णे पद्माह्वयसरीसृपम्।
महापद्मं तथान्यत्र शङ्खं शिरसि भोगिनम्॥ ६६ ॥
गुलिकं चाङ्गदे सर्पं वर्णस्तेषां च कथ्यते।
स्फटिकाभश्शोणिताभः पीताभो धूम्रवर्णकः॥ ६७॥
रक्ताम्बुजनिभश्चैव पिङ्गलस्तुहिनप्रभः।
भ्रमराभः क्रमाच्छत्रं मुक्ताहेमपरिष्कृतम्॥ ६८॥
उपरिष्टाच्च कर्तव्यं पार्श्वयोश्चामरद्वयम्।
अधस्तादम्बुजं पूर्णकुम्भमद्भिश्च पालिकाः॥ ६९॥
साङ्कुरा लिखितव्याः स्युर्दीपौ द्वौ पार्श्वयोर्द्वयोः।
पञ्चवर्णैर्लिखेदेवमन्तरं श्यामवर्णकम्॥ ७० ॥

अन्तरालं तु कृष्णेन चित्रयेच्चित्रकृत्तमः।

ध्वजार्धसंमितां चैव पताकां चैव चित्रयेत्॥७१॥ - पाद्मे - १०

<u>ब्राह्मणादि वर्णभेदेन ध्वज वर्णभेदाः</u>

श्वेत रक्तं तथा पीतं कृष्णं चैव चतुर्विधम्।

ब्राह्मणादिक्रमेणैव ध्वजानां वर्णमुच्यते॥४९॥ - मार्कण्डेये – २१

## <u>ध्वजप्रतिष्ठा विषयाणि</u>

<u>ध्वज प्रतिष्ठायां चतुस्थानार्चनं - स्वस्तिकमण्डलक्रमः</u>

पूर्वम्मृद्ग्रहणं कुर्यात् मण्डपालङ्कृतिं तथा॥३३॥

चतुस्स्थानार्चनं चैव तथा द्वारादि पूजनम्।

पुण्याहोक्तिं ततः कुर्यात् कलशं पूर्ववच्चरेत्॥३४॥

मण्डलं स्वस्तिकं वापि चक्राब्जमथवा द्विज!। - अनिरुद्धे – २०

<u>ध्वजप्रतिष्ठायां भद्रक मण्डलविधिः</u>

सर्वं खगेशमन्त्रेण विधानं कारयेत्ततः।

द्वारतोरणकुम्भाद्यं मण्डलं चैव भद्रकम्॥४१॥ - वैहायसी - ११

<u>ध्वजप्रतिष्ठार्थम् अङ्कुरावापः</u>

आरम्भदिवसात् पूर्वं वैनतेयध्वजोत्सवः॥४॥

तदर्थमङ्कुरन्यासं कृत्वा शास्त्रविधानतः। - भार्गवतन्त्रे - ११

<u>ध्वजाधिवासविधिः</u>

गेहं प्रदक्षिणं कृत्वा शाययेत् स्थण्डिलोपरि।

शिखरं चैन्द्रदिग्भागे पुच्छं पश्चिमतः क्रमात्॥३२॥ - कपिञ्जले - २२

<u>ध्वजपटाधिवास समये गरुडबिम्बस्यापि अधिवासः</u>

ताक्ष्यस्य कौतुकं चैव छायायामधिवासनम्॥२८॥ - श्रीप्रश्ने - ३२

<u>गरुडपटे तत्वसंहारं तत्वसृष्टि विधिः</u>

ततः पटगतं विम्बं शयनं गरुडस्य तु।

लयमार्गेण संहृत्य पुनरुत्पादयेत् क्रमात्॥७५॥ - मार्कण्डेये - २१

<u>गरुडपटस्य छायाधिवासे तत्वसंहारः</u>

छायाधिवासनं कुर्यात् जले संहृत्य देशिकः॥८०॥

शाययित्वा ततो वेद्यां संहृत्योत्पाद्य तत्त्वतः। - मार्कण्डेये – २१

<u>दर्पणे वा कूर्चे वा छायाधिवासः</u>

पुण्याहं वाचयेत्पश्चात् कौतुकं बन्धयेत्पटे॥५१॥

छायाधिवासनं कुर्यात् कटाहे मणिकेऽपि वा।

दर्पणे सकलं कुर्यात् तदभावे तु कूर्चके॥५२॥ - अनिरुद्धे - २०

<u>गरुडपटस्य धान्याधिवासः - दर्पणे स्नपनञ्च</u>

प्रवेशयेद्यागभूमिं पटं धान्याधिवासयेत्॥२८॥

नयनोन्मीलनादीनि प्रतिष्ठायामिवाचरेत्।

दर्पणे स्नपनं कृत्वा शय्यायां शाययेद्गुरुः॥२९॥ - पुरुषोत्तमे - २३

<u>ध्वजपटगरुडस्य - सर्पानाञ्च नयनोन्मीलनविधिः</u>

अग्रतो वैनतेयस्य वेदिकोपरि संस्थिते॥२८२॥

दर्पणे तु ततः पश्चान्मुहूर्ते शोभने गुरुः।

नयनोन्मीलनं कुर्याद्वक्ष्यमाणविधानतः॥२८३॥

सर्वेषामपि सर्पाणां नेत्रोन्मीलनमाचरेत्। - ईश्वरे - १०

<u>गरुडपट शयनक्रमः</u>

वासांसि मध्ये संस्तीर्य गरुडं तत्र शाययेत्॥५३॥

प्रत्यग्ग्रीवं ततो वस्त्रैः संच्छाद्य पतगेश्वरम्। - विष्वक्सेने - २६

<u>शयनाधिवासान्ते गरुडस्य निवेदनीयाः -भक्ष्यादयः</u>

सक्तुखण्डरसोपेतं मुद्गान्नैश्च गुलौदनैः।

भक्ष्यैश्च विविधैश्चान्यैः पूजयेत्तं खगेश्वरम्॥९५॥

मुखवासं ततो दद्यात् स्तुतिमन्त्रेण तोषयेत्। - विष्वक्सेने - २६

<u>ध्वजप्रतिष्ठायां उपकुम्भे आवाहन देवताः प्रोक्षणञ्च</u>

कुम्भस्थितेन तोयेन प्रोक्षयेत् स्वस्वविद्यया।

पूर्वादिकलशस्थाभिरनन्तादीन् स्वनामभिः॥७७॥

प्रणवादिनमोन्तैश्च कुशैः संप्रोक्षयेत् क्रमात्। - मार्कण्डेये - २१

<u>गरुडप्रतिष्ठा कुम्भेषु आवाहनक्रमः</u>

परितो न्यस्तकलशैर्वर्धन्या च घटं क्षिपेत्॥७८॥

आवाह्य गरूडं कुम्भे करके च सुदर्शनम्।

इन्द्रादीनष्ट पूर्वादिकलशेषु सुपूजयेत्॥७९॥ - पाद्मे - १०

<u>ध्वजप्रतिष्ठायां पञ्च कलशे पञ्च गरुड आवाहन श्लोकाः</u>

वासुदेवात्समुत्पन्न पक्षीन्द्र कनकप्रभ।

उत्सवार्थं भगवतः कुम्भेऽस्मिन् सन्निधिं कुरु॥३३॥

इति सम्प्रार्थ्य हृदयात् कुम्भे तार्क्ष्यं विचिन्तयेत्।

आवाहनादिषण्मुद्रां प्रदर्श्यार्घ्यादिभिर्यजेत्॥ ३४॥

वासुदेवांशसम्भूत सत्यमूर्ते तटित्प्रभ।

अपमृत्युजयाय त्वं कुम्भेऽस्मिन् सन्निधिं कुरु॥ ३५॥

सङ्कर्षणांशज स्वामिन् द्विजानां ज्ञानवृद्धये।

सुपर्णागच्छ कुम्भेऽस्मिन् सन्निधिं स्फटिकप्रभ॥ ३६॥

प्रद्युम्नस्यांशसम्भूत नृपाणां बलवृद्धये।

कुम्भेऽस्मिन् कुरु सान्निध्यं गरुड त्वं तटित्प्रभ॥ ३७॥

अनिरुद्धात् समुत्पन्न वैश्यानामर्थसिद्धये।

तार्क्ष्य तारानिभ स्वामिन् कुम्भेऽस्मिन् सन्निधिं कुरु॥ ३८॥

आग्नेयादिषु कोणेषु कुम्भेष्वावाह्य यत्नतः। - श्रीप्रश्ने - ३२

<u>गरुड महाकुम्भे आकाशात् गरुडस्य आवाहनम्</u>

तस्मिन्नावाहयेत्कुम्भे वैनतेयं महाबलम्॥ ७१॥

आकाशाद्गरुडं खेशं ध्वजरूपाकृतिं न्यसेत्।

ध्यायेद्देव ध्वजं तस्मिन्निमं मन्त्रमुदीरयेत्॥ ७२॥

हे खगेश! महाबाहो! वैनतेय! महाबल!।

सान्निध्यं कुरु पक्षीश प्रसीदात्र नमोस्तुते॥ ७३॥ - वासिष्ठे - १२

<u>गरुडप्रतिष्ठाहोमे विशेषः</u>

एकस्मिन्नेव कुर्वीत प्राक्कुण्डे वा महानसे।

मूर्तिहोमं बृहत्साम्ना गायत्र्या वा यथारुचि॥ १३॥

तत्त्वसंहारजनने तत्त्वहोमादि पूर्ववत्। - भार्गवतन्त्रे – ११

<u>ध्वजप्रतिष्ठायां तत्त्व होमः</u>

कुंभेष्वावाह्य संपूज्य हुत्वा तत्त्वानि विन्यसेत्॥१४॥

समाप्य शान्तितिहोमान्तं पटमुत्थाप्य पद्मज!।

कृत्वा पूर्णाहुतिं वह्निं समारोप्य पटे गुरुः॥१५॥ - विष्णुतिलके - ८

<u>नित्याग्नि कुण्डे वा गरुड प्रतिष्ठा</u>

चतुर्षु पार्श्वकुण्डेषु होमस्थण्डिल भूमिषु।

कुण्डे महानसे वापि समिदाज्यैर्यथापुरम्॥८१॥

शान्ति होमस्पर्शनं च सेचनं च यथापुरम्।

पटं विस्तीर्य गरुडं मन्दिराभिमुखं यथा॥८२॥ - पाद्मे - १०

<u>गरुडप्रतिष्ठाहोमे विशेषः</u>

चरुं पुरुषसूक्तेन जुहुयात् षोडशाहुतीः॥४३॥

विहगाधिपगायत्र्या घृतेनाष्टोत्तरं शतम्।

तत्सङ्ख्यया समिद्भिश्च पलाशाश्वत्थखादिरैः॥४४॥

बिल्वैश्च जुहुयादाज्यैः पुनरष्टोत्तरं शतम्।

सम्पादाज्यं गृहीत्वा तु तार्क्ष्यगायत्रिया ततः॥४५॥

न्यसेत् सर्वेषु कुम्भेषु पटे च गुरुसत्तमः। - श्रीप्रश्ने - ३२

<u>गरुडप्रतिष्ठाहोमे चतुराचार्य विधिः</u>

दीक्षिता एव जुहुयुः सोत्तरीयाः स्वलङ्कृताः॥७२॥

चतस्रो मूर्तयः प्रोक्ताः पक्षिराजस्य देशिकैः।

स्वाहान्तं जुहुयुः सर्वे मूर्तिपाः मूर्तिभाविताः॥७३॥

एवं समाप्य होमं तु स्पृशेयुस्ते खगेश्वरम्।

पादयोर्जठरे चास्ये मूर्ध्नि चैव यथाक्रमम्॥ ७४॥

अथवा मूलमन्त्रेण होममेकं तु वा मुने। - विष्वक्सेने - २६

<u>गरुडपटप्रतिष्ठायां निवेदनीय अन्नानि</u>

ततः संपूजयेत् सर्वैरुपचारैः खगेश्वरम्।

घृताप्लुतं तु मुद्गान्नं नैवेद्यं परिकल्पयेत्॥ ६९॥ - विष्वक्सेने - २६

<u>ध्वजस्य पुच्छे रक्षाबन्धनम्</u>

विनिवेद्य हविः पश्चात् दद्याद्बन्ध्यातुरादिषु।

ध्वजस्य पुच्छे बध्नीयात् कौतुकं तस्य विद्यया॥ ३६॥ - नारदीये – १८

## <u>रक्षाबन्धन विषयाणि</u>

<u>उत्सवारम्भात् पूर्वेद्युः रक्षाबन्धनम्</u>

उत्सवारम्भदिवसात् पूर्वेद्युश्च निशामुखे।

कौतुकं बन्धयेद्धीमान् तत्क्रमस्ते प्रवक्ष्यते॥ ७॥ - अनिरुद्धे - २१

<u>रक्षासूत्र लक्षणम्</u>

तदूर्ध्वे हेमजं सूत्रं क्षौमं कार्पासमेव वा।

पट्टजं पञ्चभिः सूत्रैश्चतुर्भिः सप्तभिस्तु वा॥ ३१४॥

कृतं न्यस्य सताम्बूलं तत्पात्रं विन्यसेत्ततः। - ईश्वरे - १०

<u>रक्षासूत्रे अपराजितमन्त्र जपः - कौतुकबन्धः - अस्त्रमन्त्रजपादि</u>

पात्रं निधाय पुण्याहं वाचयित्वा यथाविधि॥ ३६॥

सभाजयित्वा तत्सूत्रमस्त्रमन्त्रेण देशिकः।

अङ्गुष्ठानामिकाभ्यां तत् गृहीत्वा हस्तयोर्द्वयोः ॥ ३७ ॥

अपराजितया सूत्रं चन्दनक्षोदवारिणा।

आलिप्य दक्षिणे हस्ते बध्द्वा चोत्सवकौतुकम् ॥ ३८ ॥

स्पृष्ट्वा दक्षिणहस्तेन सूत्रं वारांश्च तज्जपेत्।

अस्त्रमन्त्रं तथार्घ्याद्यैरिष्ट्वा देवं निवेदयेत् ॥ ३९ ॥

महापूपं तथापूपान् पृथुकांश्च फलान्यपि। - पाद्मे - ११

<u>रक्षासुत्रेषु श्रियः आवाहनम्</u>

नित्यनिर्दोषनिस्सीम कल्याणगुणशालिनी ॥ ३२ ॥

भगवद्वासुदेवस्य भवत्याश्चोत्सवाय वै।

सूत्रेषु प्रार्थयामि त्वां सन्निधत्स्व जगद्धिते ॥ ३३ ॥

इति संप्रार्थ्य वै लक्ष्मीं ध्रुवबेरोरसि स्थितात्।

श्रीवत्साच्छ्रियमावाह्य रक्षासूत्रेषु पूजयेत् ॥ ३४ ॥ - श्रीप्रश्ने - ३३

<u>देवस्य रक्षाबन्धन प्रकारः - रक्षासूत्र भेदाः - मन्त्र भेदाश्च</u>

प्रथमं देवदेवस्य मूलमूर्तिगतस्य च ॥ ३२४ ॥

बन्धयेत्कौतुकं सूत्रैर्हैमजैः पट्टजैस्तु वा।

हेमजं सूत्रमादाय गन्धेनालिप्य बन्धयेत् ॥ ३२५ ॥

देवस्य दक्षिणे हस्ते यात्रामूर्तिगतस्य च।

जितन्ताख्येनमन्त्रेण शङ्खगीतादिसंयुतम् ॥ ३२६ ॥

स्पृष्ट्वा दक्षिणहस्तेन सूत्रमस्त्रशतं जपेत्।

श्रियो वामकरे कुर्यात्पट्टसूत्रेण कौतुकम् ॥ ३२७ ॥

श्रीसूक्तमुच्चरन्वापि तन्मन्त्रेण द्विजोत्तमाः।

पुष्ट्यास्तु वामहस्ते तु क्षौमसूत्रेण बन्धयेत्॥ ३२८॥

कुर्यात्स्नपनबिम्बस्य पट्टसूत्रेण कौतुकम्।

बलिबिम्बादिकानां च कृत्वैवं कौतुकं ततः॥ ३२९॥

कौतुकं देशिकेन्द्रस्तु कार्पासेन स्वदक्षिणे।

करे तु मूलमन्त्रेण बन्धयेत्तु ततः परम्॥ ३३०॥

तथैव कर्मकर्तॄणां कौतुकं बन्धयेत्क्रमात्।

विभवे सति सर्वेषां सूत्रं हेममयं भवेत्॥ ३३१॥

देवमर्घ्यादिनाभ्यर्च्य अपूपादीन्निवेदयेत्। - ईश्वरे - १०

<u>रक्षाबन्धन क्रमः - निवेदनञ्च</u>

सूत्रमादाय हस्ताभ्यां धारयित्वा विचक्षणः॥ १६॥

बन्धयेद्दक्षिणे हस्ते देवदेवस्य शार्ङ्गिणः।

श्रियोर्वामकरे कुर्यात् आचार्यस्य स्वहस्तके(तु दक्षिणे)॥ १७॥

पूजयित्वा यथापूर्वमपूपादि निवेदयेत्।

मुद्गान्नं तु निवेद्याथ बलिं दद्यात् समन्ततः॥ १८॥ - अनिरुद्धे - २१

<u>उत्सवे सर्वार्चासु रक्षाबन्धनम् - अधिवासश्च</u>

प्रणम्य दण्डवद्भूमौ देवमुत्सवसम्पदम्॥ ६२॥

याचेतां गुरुरन्वक् च बद्ध्वा कल्याणकौतुकम्।

उत्सवस्नानबल्यर्थं प्रतिमासु यथाक्रमम्॥ ६३॥

सुदर्शने च शयने कल्पितेऽन्यत्र पूर्ववत्।

बद्ध्वा प्रतिसरं सर्वमधिवास्य यथाक्रमम्॥६४॥ - पाद्मे - ११

<u>रक्षाबन्धन मन्त्रः</u>

ततश्चोभयहस्ताभ्यां दक्षिणे भगवत्करे।

जितन्त इति मन्त्रेण बध्नीयात् साधकः क्रमात्॥१००॥

एवं सर्वेषु यागेषु कुर्यात् कौतुकबन्धनम्। - नारदीये - १९

<u>रक्षाबन्धनविधिः मन्त्रश्च</u>

यागार्थं कङ्कणं बध्द्वा रक्षामुद्रां प्रदर्शयेत्॥१५॥

मूलबेरादितीर्थान्तं कौतुकं बन्धयेत् क्रमात्।

तेन कुर्यात्तु तीर्थार्थमुत्सवं कारयेत्ततः॥१६॥

बृहत्सामेति मन्त्रेण त्र्यम्बकेनाथवा भवेत्।

अथवा मूलमन्त्रेण रक्षां कुर्यात्तु सर्वतः॥१७॥

देवानां दक्षिणे हस्ते शक्तीनां वामके करे।

आचार्यो ऋत्विजैः सार्धं रक्षाबन्धं तु कारयेत्॥१८॥ - मार्कण्डेये – २२

## <u>ध्वजारोहण विषयाणि</u>

<u>ध्वजस्य वीथि भ्रमणम्</u>

वस्त्राभरनपुष्पाद्यैरलङ्कृत्य ध्वजं तथा॥५०॥

छत्र चामर संयुक्तं शङ्खभेर्यादि निस्वनैः।

ग्रामं परिभ्रमेद्विद्वान् आलयं सम्प्रवेशयेत्॥५१॥

बलिपीठस्य चाग्रे तु ध्वजस्थानं विधीयते। - कपिञ्जले – २२

<u>ध्वजपट भ्रमणम् - ध्वजारोहणात्पूर्वं सर्ववीथिषु बलिदानम्</u>

रथे वा कुञ्जरे याने ध्वजमारोप्य यत्नतः।

प्रभया चित्रकुसुमैः कृतया भूषयेद्ध्वजम् ॥१५२॥ - मार्कण्डेये - २१

<u>ध्वजपटस्य वीथिभ्रमणम्</u>

बलिबिम्बं पुरस्कृत्य मध्ये ध्वजपटं ततः॥३६६॥

यात्रामूर्तिं च तदनु क्रमेण भ्रामयेत्ततः।

प्रथमावृतिमारभ्य रथ्यावरणपश्चिमम्॥३६७॥

बलिदानपुरस्कं तु कृत्वा ग्रामप्रदक्षिणम्। - ईश्वरे – १०

<u>ध्वजस्य बन्धने रज्जु मानम्</u>

रज्जु तन्तुगणेनैव कुर्यादङ्गुष्ठनाहतः।४७॥ - अनिरुद्धे - २०

<u>ध्वजपाश लक्षणं - पाशे ध्वजनियोजन मन्त्रः - ध्वजारोहण मन्त्रश्च</u>

उत्सवप्रतिमां तत्र यानमारोप्य चानयेत्।

अङ्गुष्ठघनमात्रेण पाशेन त्रिवृतेन च॥२८॥

तान्तवेन च बध्नीयान्मन्त्रेण पुरुषात्मना।

सुपर्णोऽसीति मन्त्रेण ध्वजारोहणमुच्यते॥२९॥ - भार्गवतन्त्रे - ११

<u>पाशे ध्वजपट नियोजन मन्त्रः</u>

ध्वजवेण्वग्रविवरे तन्तुभि स्त्रिगुणी कृते।

पाशे ध्वजपटं ब्रह्मन्! बध्वा पुरुषविद्यया॥२९॥ - विष्णुतिलके - ८

<u>ध्वजस्तम्भ समीपे देवस्य निवेशः- निदनियान्नानि</u>

शनैः शनैर्देवदेवं ध्वजस्तम्भसमीपगे॥५५॥

मण्डपे भद्रपीठे तु भगवन्तं निवेशयेत्।

पूजयित्वा यथाशास्त्रं मुद्गान्नं मोदकं तथा॥५६॥

गुडान्नं भक्ष्य सहितं पानकादि निवेदयेत्। - श्रीप्रश्ने - ३३

ध्वजारोहणकाले गरुडस्य राग-तालविशेषः

तार्क्ष्यस्य तालं त्रिपुटं स्वरो मध्यम ईरितः।

गौडाख्यरागो नृत्तं च विष्णुक्रान्तमुदाहृतम्॥७१॥

एवं तालादिभिस्तोष्य सुमुहूर्ते गुरूत्तमः। - श्रीप्रश्ने – ३३

ध्वजारोपण मन्त्रः

अनुज्ञातो द्विजश्रेष्ठै स्स्तुवन् पद्यैः खगाधिपम्।

सुपर्णोसीति मन्त्रेण ध्वजारोपण माचरेत्॥३०॥ - विष्णुतिलके - ८

ध्वजारोहण काले बृहद् रथन्तर साम पठनम्

श्रुत्वैवं श्रावयेत्तस्य बृहत्साम रथन्तरम्॥३९१॥

तत्काले देशिकेन्द्रस्तु ध्यायमानः खगेश्वरम्। - ईश्वरे - १०

मूलालयाभिमुखं ध्वजस्य स्थापनम् - गरुड मालामन्त्र जपश्च

बद्ध्वा पुरुषमन्त्रेण सपताकं सघण्टकम्।

सुपर्णोऽसीति मन्त्रेण ध्वजस्यारोपणं भवेत्॥११७॥

प्रासादाभिमुखं स्थाप्य खगेन्द्रं पटसंस्थितम्।

तूर्यघोषं तथाम्नायघोषं दिक्षु च घोषयेत्॥११८॥

खगेशमालामन्त्रादींस्तत्काले देशिको जपेत्। - पाद्मे – १०

<u>सूत्रेण विनावापि ध्वजारोहः</u>

घण्टापिञ्छसमायुक्तं तन्तुसूत्रेण बन्धयेत्।

कौतुकेन विना वाऽपि ध्वजमुत्थापयेत्क्रमात्॥ ६२॥ - कपिञ्जले – २२

<u>ध्वजारोहण कालः</u>

पूर्वाह्ने वाथ मध्याह्ने ध्वजस्यारोहणं महत्॥ ३९८॥ - ईश्वरे - १०

<u>उक्तकाले ध्वजारोहः अन्यथा दोषः</u>

पूर्वाह्णे वाथ मध्याह्ने ध्वजस्यारोहणं शुभम्॥ ७४॥

अपराह्णे तथा रात्रौ राजराष्ट्रविनाशनम्। - श्रीप्रश्ने - ३३

<u>ब्राह्मणादिवर्ण भेदेन ध्वजारोहण कालभेदाः</u>

ब्राह्मणो यजमानश्चेत् प्रातः काले ध्वजक्रिया॥ १०३॥

बहवोयजमानाश्चेत् कुर्यात्पूर्वाह्णिक ध्वजम्।

मध्याह्ने क्षत्रियानाञ्च सायाह्ने वैश्यशूद्रयोः॥ १०४॥

अन्यथाचेन्महादोषः कर्तॄणां भवति ध्रुवम्। - वासिष्ठे – १२

<u>ध्वजारोहणस्य दिने निशि - भेरीताडन - अङ्कुरार्पण कालभेदाः</u>

देवाद्वा मानुषाद्वापि कुतश्चित्कारणाद्यदि॥ ५२॥

उत्सवारम्भणात्पूर्वं यथोक्तेन कृते ध्वजे।

उत्सवरम्भणदिने दिवारोप्य ध्वजं निशि॥ ५३॥

भेरीताडनमन्वक् च पालिकास्वङ्कुरान् क्षिपेत्।

आघोष्य भेरीं प्रथम ध्वजारोहणमन्वतः॥ ५४॥

ततोऽङ्कुरार्पणं यद्वा यद्वा निश्यङ्कुरार्पणम्।

प्रदोषेऽन्वक् ध्वजारोहो भेरीताडनमन्वतः॥५५॥

तत्कालेऽपि ध्वजारोहे त्रैविध्यं चतुरानन। - पाद्मे – १०

<u>ध्वजारोह - अङ्कुर - भेरीताडन काल भेदाः</u>

एकैकमुत्सवं विद्धि त्रिविधं द्विजपुङ्गव॥७॥

ध्वजारोहणपूर्वस्तु देवताह्वानपूर्वकः ।

अङ्कुरार्पणपूर्वस्तु विहितस्स्यान्महोत्सवः॥८॥ - नारदीये - १८

<u>कालभेदेन फल भेदाः</u>

ध्वजारोहणपूर्वस्तु राजराज्यसुखप्रदः।

देवताह्वानपूर्वस्तु स्वर्गभोगफलप्रदः॥९॥

अङ्कुरार्पणपूर्वस्तु सर्वेषां मोक्षदो भवेत्। - नारदीये - १८

<u>दैवज्ञेन निश्चित सुमुहूर्ते - सुलग्ने ध्वजारोहः – आरोहण मन्त्रश्च</u>

दैवज्ञं पूजयित्वा तु लब्ध्वा लग्नं शुभप्रदम्।

सुमुहूर्ते सुलग्ने च आशीर्वादपुरस्सरम्॥३९५॥

घण्टाशब्दमृदङ्गैश्च सर्ववाद्यरवैः सह।

रज्जूनारोहयेद्धीरं सुपर्णोसीति मन्त्रतः॥३९६॥ - ईश्वरे - १०

<u>सुमुहूर्ते ध्वजारोहणम् - स्तम्भारोहनेन बन्धनश्च</u>

सुमुहूर्ते सुलग्नेऽथ शुभाशिषपुरस्सरम्।

घण्टाशङ्खमृदङ्गैश्च सर्ववाद्यरवैः सह॥४७॥

ध्वजं निवेशयेद् ब्रह्मन्! स्तम्भमारुह्य बन्धयेत्।

सुपर्णोऽसीति मन्त्रेण ध्वजस्यारोहणं भवेत्॥४८॥ - पद्मोद्भवे - २७

<u>ध्वजारोहण लग्न विषयः</u>

इति प्रार्थ्य खगेशानं मुहूर्ते सर्वमङ्गले।

मनः प्रह्लादने लग्ने ध्वजारोहणमाचरेत्॥२७॥ - भार्गवतन्त्रे – ११

<u>ध्वजपटं स्तम्भाग्रे स्थापनम् - स्तम्भे दीक्षितः आरोहणेन स्थापनम्</u>

दीक्षितं शूद्रमाहूय तस्य हस्तेऽर्पयेद्ध्वजम्।

आरुह्य बध्वा स्तम्भाग्रे पाशैः सोऽपि प्रयत्नवान्॥५६॥

अवरुह्य शनैः पश्चात् नमस्कुर्याच्च साधकान्। - नारदीये - १८

<u>यष्ट्यग्रे ध्वजरज्जु नियोजनम्</u>

त्रिवृत्कृतैस्तु कार्पाससूत्रैरतिदृढैः कृताम्॥३७१॥

रज्जुमादाय तदनु सुदृढां देशिकोत्तमः।

यष्ट्यग्रसंस्थिते यन्त्रे योजयित्वा तया ततः॥३७२॥

ध्वजस्य शिखरं विप्राः बन्धयेत्सुदृढं ततः। - ईश्वरे - १०

<u>देवस्याभिमुखं ध्वजपटस्थापनम्</u>

देवस्याभिमुखं स्थाप्य पटस्थं विनतासुतम्॥४३॥

चतुर्दिक्षु चतुर्देवानावाह्य विधिपूर्वकम्। - पुरुषोत्तमे - २३

<u>पटे गरुडं व्याहृत्या आवाहनम्</u>

विस्तार्य च गरुत्मन्तं पटस्थं धामसंमुखम्॥५४॥

आवाह्य तत्प्रतिकृतौ व्याहृतीभिः पतत्प्रभुम्। - विश्वामित्रे - १७

<u>ध्वजपटे महाकुम्भादि प्रोक्षण विधिः</u>

महाकुम्भस्थतोयेन प्रोक्षयेद्विनतासुतम्॥१५६॥

प्रोक्षयेदष्टनागानां शेषकुम्भस्थवारिणा।

आचार्यो मन्त्रन्यासं तु पुष्पाञ्जलिपुरस्सरम्॥ १५७॥

सन्निधिं सन्निरोधं च सम्मुखं च समाचरेत्। - मार्कण्डेये - २१

<u>गरुडमहाकुम्भेन ध्वजस्तम्भ देवता मन्त्रैः स्तम्भ प्रोक्षणम्</u>

ध्वजकुम्भं तु संवेष्टय प्रोक्षयेद्ध्वजदेवताः।

दण्डस्तु मेरुदैवत्यं यष्टेश्चेन्द्रस्तु देवता॥ १५९॥

अनन्तो रज्जुदेवश्च ध्वजस्य विहगाधिपः।

वासुकिर्वलयः प्रोक्तः फेणकानां त्रिदैवतम्॥ १६०॥

घण्टाधिदेवता लक्ष्मीर्दर्भमाला सरस्वती।

ध्वजपीठस्य देवानामर्चयेद्देशिकोत्तमः॥ १६१॥

एवं सङ्कल्प्य मतिमान् ध्वजदण्डं प्रपूजयेत्। - मार्कण्डेये - २१

<u>ध्वजपटे महाकुम्भ-प्रोक्षणमन्त्रः -ध्वजपटे आयुधानां करकजलेन प्रोक्षणम्</u>

तन्मुद्रां दर्शयित्वा तु ततः पुरुषसूक्ततः॥ ३७९॥

महाकुम्भस्थतोयेन सम्प्रोक्ष्य गरुडं ततः।

महाकुम्भस्थगरुडं पटस्थे तु निवेशयेत्॥ ३८०॥

उपकुम्भाष्टकेनैव अष्टनागान् यथाक्रमम्।

आयुधानां तथैवोक्तं करकास्त्रजलेन तु॥ ३८१॥

एवं क्रमेण सम्प्रोक्ष्य ततो देशिकसत्तमः। - ईश्वरे – १०

<u>गरुड कुम्भैः स्तम्भ प्रोक्षणम्</u>

पुण्याहं वाचयित्वाथ प्रोक्षयेत्कुम्भवारिणा।

गारुडेनैव मन्त्रेण कलशैश्चाष्टभिस्तथा॥ १२४॥

इन्द्राद्यैः प्रोक्षयेत्स्तम्भं स्वैस्स्वैर्मन्त्रैर्यथाक्रमम्। - पाद्मे - १०

<u>गरुडस्य निवेदनीय प्रसाद विशेषाः</u>

गरुडं पक्षिराजानं सुपर्णं विनतासुतम्।

गन्धपुष्पादिमुद्रान्तं सम्पूज्यविधिवत्ततः॥ ९३॥

पायसं कृसरं चित्रं शुद्धान्नञ्च गुलोदनम्।

तार्क्ष्येशं भोजयेत्तत्र मुद्गान्नेन घृतोदनैः॥ ९४॥

कदलीपनसैश्चैव सोपदंशैर्मनोहरैः।

पानीयमुखवासाभ्यां पुनराचमनीयकैः॥ ९५॥

पुष्पैर्माल्यैर्धूपैश्च सन्तर्प्य गरुडं प्रभुम्। - वासिष्ठे - १२

<u>गरुडपटे बिम्ब स्थापन विषयः</u>

आवाहनार्थं देवानां गरुडं तु पटे न्यसेत्।

तत्पटे सर्वदेवांश्च आह्वयेत्तु दिने दिने॥ १६२॥

लोहं दारुमयं बिम्बं विना वा स्थाप्यते ध्वजम्।

यदि ध्वजपटे बिम्बं गरुडस्य कृतं भवेत्॥ १६३॥

पताकाध्वजसंयुक्तं कृत्वा चित्रमपि ध्वजम्।

उपरि प्रतिमां कृत्वा स्थापयेद्देशिकोत्तमः॥ १६४॥ - विष्वक्सेने – २६

<u>गरुडप्रतिष्ठामहाकुम्भजलं बलिपीठे निक्षेपणम् - तत्तीर्थ स्पर्शनेन फलम्</u>

अवशिष्टोदकैः पीठं बल्यर्थ्यं मभिषेचयेत्॥ २७॥

तदंबुशीकरं स्पृष्ट्वा योषितो गतविक्लबाः।

ग्रहपीडानिवृत्ताश्च रुग्णो रोगात् विमुच्यते॥ २८॥ - विष्णुतिलके - ८

<u>ध्वजारोहणात्परं स्तंभस्य परितः बलिदानम्</u>

आरोप्य चैवं विहगं पूजयित्वा यथाविधि।

पायसान्नं तथाऽपूपं फलानि विविधानि च॥ ३०॥

निवेद्य वैनतेयाय इन्द्रादीन् परितोऽर्चयेत्।

पूजयित्वा यथान्यायं बलिं दद्याद्विचक्षणः॥ ३१॥ - भार्गवतन्त्रे - ११

<u>ध्वजारोहणकाले गरुडप्रसाद स्वीकार फलम्</u>

ध्वजारोहण कालेतु वैनतेय निवेदितम्॥ ४३॥

मुद्गान्नं भक्षते या स्त्री सासु पुत्रवती भवेत्। - परमपुरुषे - ४

<u>गरुडनिवेदित प्रसाद स्वीकारेण स्त्रीणां फलम्</u>

निवेदितं च यद्द्रव्यमन्नं पुष्पं फलं तथा॥ १५८॥

तत्पिण्डमिति विज्ञेयं स्त्रीणां चैव प्रदापयेत्।

सुमङ्गली च नारी च सती शुद्धा शुभव्रता॥ १५९॥

तत् प्रसादमिति स्मृत्वा स्नात्वोपोष्य शुभानना।

प्राशयेद्गरुडं ध्यात्वा वन्ध्या पुत्रं प्रसूयते॥ १६०॥

रोगार्तो मुच्यते रोगात् बद्धो मुच्येत बन्धनात्।

भयान्मुच्येत आपन्नः सम्यग् ज्ञानमवाप्नुयात्॥ १६१॥ - विष्वक्सेने - २६

<u>ध्वजारोहणकाले गरुड दर्शनफलम्</u>

ध्वजारोहण वेलायां खगेशं यस्तुदृश्यते॥ १३२॥

तस्यसन्मङ्गलं भूयात्सर्वदाच नसंशयः। - परमपुरुषे - ४

<u>स्तम्भमूले पीठ कल्पनम्</u>

स्तम्भमूलं द्रढी कुर्यात् पीठं सम्यक् प्रकल्पयेत्॥ १०७॥

त्रिहस्तं वा द्विहस्तं वा पञ्चहस्तमथापि वा।

हस्तोच्छ्रायं तथा कुर्यात् तदूर्ध्वं मेखलात्रयम्॥ १०८॥

तदूर्ध्वे पद्मकं कुर्यात् द्वादशाष्टदलैर्युतम्।

स्तम्भस्य परितः कुर्यात् मण्डपं सप्रपां तु वा॥ १०९॥ - अनिरुद्धे - २०

<u>ध्वजद्वय निषेधः</u>

तच्छिद्रयेत्तु तद्विद्वान् दृढीकृत्य प्रयत्नतः॥ ५३॥

अच्छिद्रं तद्ध्वजं सम्यक् तत्र तु स्थापयेत्सुधीः।

ध्वजद्वयं **न** कुर्वीत चित्रं चापिविचित्रितम्॥ ५४॥

व्यामोहेन कृतश्चेत्तु तस्मिन्दण्डे ध्वजद्वयम्।

दुर्भिक्षं जायते राष्ट्रे धन धान्य जनक्षयः॥ ५५॥

तस्मात्सर्व प्रयत्नेन न कुर्वीत ध्वजद्वयम्। - वासिष्ठे - १२

<u>दिवारात्रौ च ध्वजारोहणस्य फलम्</u>

एवं ध्वजं समारोप्य दिवैव गुरुरात्मवान्॥ ६६॥

दिवैवारोपयेद्देवं भूमिगानां तु वृद्धये।

अन्तरिक्षचराणां तु रात्रौ कुर्वीत वृद्धये॥ ६७॥ - नारदीये - १८

<u>त्रिकालेऽपि ध्वजस्तम्भ पूजा</u>

आराधयेत् त्रिकालं तु गरुडं च निवेदयेत्।

अनिर्वाणं यथा दीपं रक्षेन्नक्तन्दिवं सदा॥ १३०॥ - पाद्मे - १०

<u>ध्वज दर्शनेन फलम्</u>

दृष्ट्वा ध्वजं तु देवस्य ज्वलज्ज्वलनवर्चसम्।

नश्यन्ति तत्प्रभावार्करश्मिक्षिप्तं तमो यथा॥६॥ - हयशीर्षपाञ्चरात्रे - ४४

<u>ध्वजारोपणेन कोटिगुणं पुण्यम्</u>

प्रासादारम्भ द्रव्याणां यावन्तः परमाणवः।

तावद्वर्षसहस्राणि तत्कर्ता विष्णुलोकभाक्॥७॥

एतत्पुण्यं कोटिगुणं भवेदारोपिते ध्वजे।

कूष्माण्डवेदीविघ्नानो भ्रमणाद् वायुनानघ॥८॥

कण्ठस्य वेष्टने ज्ञेयं फलं कोटिगुणं ध्वजात्। - हयशीर्षपाञ्चरात्रे - ४४

<u>ध्वजारोहाद्यवरोह पर्यन्तम् अन्यग्रामादि गमन निषेधः</u>

ध्वजारोहणमारभ्य अवरोहदिनावधि।

यस्तु गच्छेदन्यदेशम् अन्यग्राममथापिवा॥१२९॥

तस्य भूयाद्यशोनाशश्चायुःक्षीणं धरातले।

तस्मात्सर्व प्रयत्नेन बहिर्यानं विसर्जयेत्॥१३०॥ - परमपुरुषे - ४

## <u>भेरीताडन विषयाणि</u>

<u>भेरीताडन कालः ( ध्वजारोहणदिन रात्रौ )</u>

तद्रात्रौ तु तदग्रे च भेरीताडनमाचरेत्।

रात्रौ भेरीं तु सन्ताड्य सर्वदेवप्रियार्थकम्॥१६६॥ - मार्कण्डेये - २१

<u>ध्वजारोहणकाले भेरीताडनम्</u>

ध्वजस्थापनकाले तु भेरीं तत्रैव कारयेत्॥७८॥ - कपिञ्जले - २२

<u>देवताह्वानार्थं भेरीताडनम्</u>

आह्वानार्थमशेषाणां लोकानां देशिकोत्तमः।

देवानामपि सर्वेषां भेरीताडनमाचरेत्॥३८॥ - भार्गवतन्त्रे - ११

<u>भेरीताडनस्य आवश्यकता</u>

भेरीताडनपूर्वञ्च देवतावाहनं चरेत्।

बलिदानञ्च भूतानां रात्रौ दद्याद् भयापहम्॥४९॥

आह्वानार्थं च देवानां गमनार्थञ्च रक्षसाम्।

भेरीं तु ताडयेद् ब्रह्मन्! उत्सवे देशिकः शुचिः॥५०॥ - पद्मोद्भवे - २७

<u>भेरीं निशिताडनेन फलम्</u>

एवं संघोषयित्वा तु यामलाचार्यसंयुतम्॥११८॥

रात्रान्तकं(आरात्र्यन्तं)विशेषेण सर्वदेवप्रियार्थकम्।

कुर्यात् पञ्चमहाशब्दं सदा शुभविवर्धनम्॥११९॥

ग्रामराज्ञोश्च वृद्धिः स्यात् तथैव नगरादिषु।

तस्मात् सर्वप्रयत्नेन भेरी तां निशि ताडयेत्॥१२०॥- विष्वक्सेने - २६

<u>त्रिमूर्तिप्रीत्यर्थं भेरीताडनम्</u>

विष्णु-ब्रह्म-शिव प्रीत्यै भेरीवाद्यं च घोषयेत्॥८॥ - विष्णुतन्त्रे - ४

<u>भेरीलक्षणम्</u>

खादिरं पनसं चापि आम्रं बिल्वं तथैव च।

जातिवृक्षं शिरीषं च स्तबकार्जुनमेव च॥१६७॥

एवमादींश्च वृक्षांश्च सारान् संहृत्य यत्नतः।

उत्तमं सप्ततालं स्यात् मध्यमं पञ्चतालकम्॥ १६८॥

अधमं तु त्रितालं स्यात् भेर्यायामं त्रिधा स्मृतम्।

एवमायामसंयुक्तं द्विमुखं कारयेद्बुधः॥ १६०॥

दशाङ्गुलसमायामा यष्टिः कौमोदकी स्मृता।

चर्मसूत्रक्रमात्तेषु दक्षिणे बन्धयेत् क्रमात्॥ १७०॥ - मार्कण्डेये - २१

<u>भेरीताडनम् अन्यजातिनः न कर्तव्यम्</u>

भेरीवाद्यं सदा(द्विजाः)श्रेष्ठमन्यजातिं विवर्जयेत्।

आचारं तु विहीनस्य अङ्गहीनो न कारयेत्॥ १०॥ - विष्णुतन्त्रे - ४

<u>पारशव लक्षणम्</u>

ततः पारशवं स्नातं दर्भपाणिमलङ्कृतम्॥ २८॥

उपवीतादिसंयुक्तं पञ्चसंस्कारशालिनम्।

भगवद्भक्तिसंयुक्तमग्रतः स्थाप्य वीक्षयेत्॥ २९॥ - ईश्वरे - ११

<u>भेरीताडने बलिबेरादि स्थानम्</u>

बलिबेरस्य पूर्वे तु कुम्भं संस्थापयेद्बुधः।

कुम्भस्य पूर्वभागे तु भेरीञ्चैव तु विन्यसेत्॥ ६५॥ - अनिरुद्धे - २०

<u>भेरीताडनार्थं बलिबेर स्थापनम्</u>

रात्रौ च पूजयित्वैवं भेरीताडनसिद्धये।

ध्वजपीठस्य पुरतः क्षितिं गोमयवारिणा॥ १३२॥

आलिप्य चतुरश्रं च सुधाचूर्णैश्च शोभयेत्।

चतुरश्रं धान्यपीठं शालीनां द्रोणपञ्चकम्॥ १३३॥

कल्पयित्वा कालचक्रं तस्य मध्ये निवेशयेत्।

वल्यर्चामपि तत्रैव स्थापयेद् ध्वजसम्मुखम्॥ १३४॥ - पाद्मे - १०

<u>भेरी स्थापनार्थं धान्यपीठ कल्पन विधिः - तत्तन्मन्त्रश्च</u>

देवस्य दक्षिणे पार्श्वे उपविश्यासने गुरुः।

भेरीसंस्थापनार्थं तु देवेशस्याग्रतस्ततः॥ ६॥

चरणं पवित्रमुच्चार्य महीं प्रक्षाल्य वारिणा।

विष्णोरराटमन्त्रेण दर्भैस्सम्मार्ज्य देशिकः॥ ७॥

गन्धद्वारेति मन्त्रेण गोमयेनानुलेपयेत्।

आप उन्दन्तु मन्त्रेण सुधाचूर्णैरलङ्कृतिः॥ ८॥

देवस्यत्वेति मन्त्रेण विकिरेदक्षतान् क्षितौ।

ग्रीष्मो हेमन्तमन्त्रेण धान्यपीठं प्रकल्पयेत्॥ ९॥

शन्नोदेवीति मन्त्रेण शतपत्रं चतुर्दिशि।

त्रातारमिति मन्त्रेण मध्ये पद्मं च संलिखेत्॥ १०॥

धन्वनागेति मन्त्रेण ऊर्ध्वं दर्भैः परिस्तरेत्।

मूर्धानमिति मन्त्रेण नमस्कुर्याद्ध्रुवं ततः॥ ११॥

तत्र कोणचतुष्के तु न्यसेद्दीपचतुष्टयम्। - ईश्वरे - ११

<u>भेर्यादि वाद्यानां स्थापनक्रमः - तन्मन्त्रश्च</u>

अर्यमायेति तद्भेरीं विन्यसेद्धान्यविष्टरे।

तत्पूर्वे शङ्खनिकरं वह्नौ काहलसञ्चयम्॥ १४॥

याम्ये तु मद्दलं तन्त्रीं वंशयुक्तां तु यातुदिक्।

वारुण्यां तु मृदङ्गं च डुङ्कुकान् ह्रस्वमद्दलान्॥ १५॥

वायव्ये झल्लरीं न्यस्य कांस्यतालसमन्वितम्।

पटहं ह्रस्वपटहं सोमे डुङ्कुकसंयुतम्॥ १६॥

ऐशान्यां डुङ्कुकां झल्लीं हस्तघण्टासमन्विताम्।

तेषां बाह्ये तु विप्रेन्द्राः दक्षिणे गणिकाजनान्॥ १७॥

न्यसेन्मङ्गलगानार्थं तत्पार्श्वे मन्त्रगायकान्।

नर्तकानग्रतः स्थाप्य उत्तरे वन्दिवृन्दकान्॥ १८॥

स्वस्वस्थानेषु संस्थाप्य अन्यान्वै वाद्यकोविदान्।

एवं क्रमेण संस्थाप्य सम्भवानुगुणं द्विजाः॥ १९॥ - ईश्वरे – ११

<u>भेरीताडने पूजार्थं वाद्यानां स्थापनक्रमः</u>

मड्डुकं ब्रह्मणः स्थाने पार्श्वयोस्तस्य वै रमे॥ २६॥

शङ्खं कोणं च विन्यस्य ततादीन् परितो न्यसेत्।

ऐन्द्रे वीणादि याम्येतु सुषिरादीनि पद्मजे॥ २७॥

वारुण्यां चर्मवाद्यानि सौम्ये काम्स्यं तु विन्यसेत्। - श्रीप्रश्ने – ३४

<u>भेरीताडने भेर्यादि वाद्य - वादकादीनां स्थापनक्रमः</u>

देवस्य पुरतः स्थाप्य भेरीं धान्यस्य विष्टरे।

तत्पूर्वं शङ्खनिकरं वह्नौ काहलसञ्चयम्॥ ५२॥

मृदङ्गं वरुणाशायां वायव्ये झल्लरीं तथा।

वाद्यानि सर्वदिक्ष्वेवं यथाशास्त्रं न्यसेद्बुधाः॥ ५३॥

न्यसेन्मङ्गलगानार्थं मन्त्रगायकब्राह्मणान्।

नर्तकानग्रतः स्थाप्य कौबेर्यां बन्दिसेवकान्॥५४॥

एवंक्रमेण संस्थाप्य भेरीं वस्त्रेण वेष्टयेत्। - वैहायसी - १२

<u>धान्यपीठे भेरीस्थापन मन्त्रः</u>

अर्यमायेति तद्भेरीं विन्यसेद्धान्यविष्टरे॥५५॥

संस्थाप्य भेरीं तन्मध्ये देवानावाहयेत्क्रमात्। - पुरुषोत्तमे - २३

<u>भेरीताडनस्य पूर्वे विष्वक्सेनाराधनं - पुण्याहं - प्रोक्षणमन्त्रश्च</u>

विष्वक्सेनं प्रपूज्याथ पुण्याहंवाचयेत्ततः।

तज्जलैः प्रोक्षयेद्भेरीमापवुन्दन्तु मन्त्रतः॥५४॥

अग्निरायुष्ममन्त्रेण प्रोक्षयेत्सर्ववाद्यकान्। - पुरुषोत्तमे - २३

<u>पुण्याह जलेन भेर्यादीनां प्रोक्षण मन्त्राः</u>

वाचयेत् स्वस्ति पुण्याहं ततो देशिकसत्तमः॥१२॥

तज्जलैः प्रोक्षयेद्भेरीम् आप उन्दन्तुमन्त्रतः।

अग्निरायुष्ममन्त्रेण प्रोक्षयेत्सर्ववाद्यकान्॥१३॥- ईश्वरे – ११

<u>भेरीताडने नवकुम्भ स्थापनम्</u>

भेरीकौतुकयोर्मध्ये कुंभमेकं सलक्षणम्॥६५॥

कुंभाष्टकं च परित स्स्थापयेत् स्थण्डिलोपरि। - विष्णुतिलके - ८

<u>देवताह्वानार्थं कुम्भ आवाहनं – पूजा च</u>

ततस्तु देवताह्वानं स्वस्वमन्त्रेण तन्निशि॥९८॥

कारयेन्मुनिशार्दूल जगत्संरक्षणार्थकम्।

प्रासादस्याग्रभागे तु गरुडाभिमुखं यथा॥९९॥

द्रोणद्वयेन संपूर्णं सतोयं रक्तवर्णकम्।

त्रिसूत्रं तन्तुनावेष्ट्य पञ्चरत्नैः सपल्लवैः॥ १००॥

कूर्च द्वयसमायुक्तं रक्तमाल्यैरलङ्कृतम्।

वस्त्रयुग्मेन संवेष्ट्य गन्धपुष्पैस्तु पूरितम्॥ १०१॥

एवं लक्षणसंयुक्ते कुम्भे चावाहये द्बुधः।

इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा॥ १०२॥

वायुं सोमं तथेशानं चन्द्रादित्यमरुद्गणान्।

वसूनष्ट तथा रुद्रानेकादश विनायकम्॥ १०३॥

कार्तिकेयं वीरभद्रं द्वादशादित्यसंज्ञकान्।

त्र्यक्षं पञ्चमुखं देवं नीलकण्ठमुमापतिम्॥ १०४॥

भूतेशांश्च तथा सर्वान् सगणानाह्वयेत्ततः।

मातृश्चैव तथा दुर्गां ज्येष्ठां चैव सरस्वतीम्॥ १०५॥

कान्तिं शान्तिं शुचिं मुद्रामुमां लक्ष्मीं तथैव च।

सगणैः परिवारैश्च तान् नयेत् कुम्भतोयके॥ १०६॥

ततस्त्वावाहयेद्देवान् कुमुदादींश्च नारद।

तेषां च परिवाराणि प्रयत्नेनानयेद्घटे॥ १०७॥

इन्द्रादीशानपर्यन्तमावहेत् कुम्भतोयके।

कुम्भतोयस्थदेवानामर्चनं गन्धपुष्पकैः॥ १०८॥

धूपदीपैः समाप्येवं घण्टाशब्दसमन्वितम्।

हविर्निवेदयेत् पश्चात् सर्वं देवप्रियार्थकम्॥ १०९॥

अन्यथाकृततुल्यं स्यात् महान् दोषो भविष्यति।

तद्ग्रामनाशकृद्वापि तत्रस्थो नरकं व्रजेत्॥ ११०॥

तस्मात् सर्वप्रयत्नेन तत्कुम्भे पार्षदान् न्यसेत्। - विष्वक्सेने - २६

भेर्यादि विविधवाद्येषु आवाहन देवताः

शब्दविग्रहमाकाशं भेर्यां संस्कृत्य पूजयेत्॥ २१॥

भेरीमध्ये ततो विष्णुं पूजयेद्विष्णुमन्त्रतः।

ब्रह्माणं दक्षिणेऽभ्यर्च्य रुद्रमभ्यर्च्य वामके॥ २२॥

कोणं तद्दक्षिणे स्थाप्य वायुं तत्र सुपूजयेत्।

शङ्खेषु विष्णुमभ्यर्च्य काहलेषु सरस्वतीम्॥ २३॥

मद्दलेष्विन्दुमभ्यर्च्य तन्त्र्यां गन्धर्वमर्चयेत्।

मृदङ्गे रुद्रमभ्यर्च्य षण्मुखं डुड्डुकेषु च॥ २४॥

ह्रस्वमद्दलवाद्येषु मेदिनीं च समर्चयेत्।

झल्लर्यां विष्णुमभ्यर्च्य ब्रह्माणं कांस्यतालके॥ २५॥

पटहेषु श्रियं देवीं घण्टायां तु सरस्वतीम्।

अन्येषु सर्ववाद्येषु विष्णुमेव समर्चयेत्॥ २६॥ - ईश्वरे - ११

वाद्येषु आवाहन देवताः

सङ्कर्षणं मड्डुके च शङ्खे विष्णुं च कोणके॥ २९॥

वायोरधिपमावाह्य फलादीनि निवेदयेत्।

सुषिरेप्यनिरुद्धं च वीणादिषु मधुद्विषम्॥ ३०॥

नरोत्तमं चर्मजेषु कांस्यजेषु ह्यधोक्षजम्।

एवमावाह्य चाभ्यर्च्य नीराजनमथाचरेत्॥ ३१॥ - श्रीप्रश्ने - ३४

आचार्येण भेरीताडन क्रमः

मुहूर्ते शोभने भेरीं शब्दतन्मात्रविद्यया।

कोणेन ताडयेन्मूर्तित्रयं ध्यायेद् गुरुः स्वयम्॥ १३८॥ - पाद्मे - १०

भेरीताडने वेद मन्त्राः

मुहूर्ते शोभने प्राप्ते भेरीमेवं प्रपूजिताम्॥ ३०॥

कोणेन ताडयेन्मूर्तित्रयं ध्यायन् गुरुः स्वयम्।

तद्विष्णोरितिमन्त्रेण प्रथमं ताडनं भवेत्॥ ३१॥

ब्रह्मजज्ञानमन्त्रेण द्वितीयं ताडनं भवेत्।

कद्रुद्रायेतिमन्त्रेण तृतीयं ताडनं भवेत्॥ ३२॥ - ईश्वरे - ११

भेरीताडने वाद्यवादन मन्त्राः

तद्विष्णोरितिमन्त्रेण भेरीताडनमाचरेत्।

श्रीसूक्तं तु समुच्चार्य सर्ववाद्यानि घोषयेत्॥ ६०॥ - पुरुषोत्तमे – २३

भेरीताडनसमये देवता ध्यानम्

मुहूर्ते शोभने प्राप्ते गीतनृत्तपुरस्सरम्।

भेरीं संप्रोक्ष्य संपूज्य ताडयेद्गुरुवैष्णवः॥ ५७॥

कोणेषु प्रथमं ध्यायेत् हयग्रीवं जनार्दनम्।

वाराहं वामनं चैव मत्स्यरूपं जगत्प्रभुम्॥ ५८॥

ततः पारशवेनैव ताडयेत् तां यथेच्छया। - वैहायसी - १२

<u>गुरोरनुज्ञया पारशवेन वादनम् ताडनञ्च</u>

आचार्य इत्थं सन्ताड्य स्नातं पारशवं शुचिम्।

कृतोर्ध्वपुण्ड्रमाहूय करे दत्वा च मङ्कुकम्॥४०॥

देववस्त्रादि पुष्पैश्च सम्मान्य च यथाक्रमम्।

तं ताडयेत् तदितरान् वाद्यान्यपि च वादयेत्॥४१॥

गुरोरनुज्ञया ते च दास्यो वाद्यानि वादकाः।

गायेयुर्नृत्तयेयुश्च देवस्य पुरतो भुवि॥४२॥ - श्रीप्रश्ने - ३४

<u>पारशवेन भेरीमध्ये ध्यानम्</u>

ततः पारशवः कोणमादाय पुरुषोत्तमम्।

भेरीमध्ये चिन्तयित्वा श्रीभूमी पार्श्वयोर्द्वयोः॥१२४॥

ताडयेच्च यथाकामं दर्शयन् हस्तकौशलम्। - विश्वामित्रे - १७

<u>पारशवेन भेरीताडन क्रमः</u>

ततः पाराशव स्तां तु वहन् भेरीमलङ्कृताम्॥३३॥

प्रथमं वामहस्तेन त्रिधा सन्ताडनं चरेत्।

दक्षिणेन ततः सम्यक्तथा सन्ताडयेत्त्रिधा॥३४॥

प्रथमं शङ्खनादं तु द्वितीयं काहलस्वनम्।

तृतीयं ताडनं प्रोक्तं क्रमेणैव हि कारयेत्॥३५॥ - ईश्वरे - ११

<u>प्राकृत - सांस्कृत - द्रमिड भाषाश्लोकपठनेन भेरीताडनम्</u>

देवताह्वानवेलायां सर्ववाद्यानि घोषयेत्।

देवतावाहिनीं गाथां संस्कृतां प्राकृतां तु वा॥३६॥

द्रामिडीं वा यथेच्छातस्तथा संश्रावयेद्विभुम्।

तत्काले देवतानृत्तं तत्तद्गीतादिसंयुतम्॥ ३७॥

दर्शयेद्देवदेवस्य देवतानां सुतृप्तये। - ईश्वरे - ११

<u>आह्वानदेवताः - तत्क्रमः</u>

घोषयेद् गुरुणेन्द्रादौ हूयमाने मरुद्गणे॥ १४०॥

दिव्यायुधानामाह्वानं तथा वैकुण्ठवासिनाम्।

तथा पारिषदास्सर्वे विष्वक्सेनाभिरक्षिताः॥ १४१॥

आहूतव्या मखे तस्मिन् कुमुदाद्यास्सनायकाः।

ऋषिभिश्च मरीच्याद्यैर्ब्रह्मलोकनिवासिभिः॥ १४२॥

समाह्वानं विरिञ्चस्य इन्द्रलोकनिवासिभिः।

सार्धं प्रमथसार्थैश्च रुद्रश्च वृषवाहनः॥ १४३॥

आहूतव्यास्तथान्ये च तत्तल्लोकनिवासिनः।

वाहनैः परिवारैश्च साकं तस्मिन्महोत्सवे॥ १४४॥

विद्याश्च मूर्तिधारिण्यस्त्रयी चाङ्गैर्वपुष्मती।

आहूतव्यास्समाह्वानं सर्वेषां च स्वनामभिः॥ १४५॥ - पाद्मे - १०

<u>देवताह्वान रागाणि</u>

भेरीताडनकञ्चैव तालवादनपूर्वकम्।

गीतं नृत्तं च वाद्यं च सर्वदेशेषु च क्रमात्॥ ८८॥

कान्तारं पूर्वदिग्भागे कौशिकं दक्षिणे तथा।

षश्चिमे कामदं प्रोक्तं तर्करागं तथोत्तरे॥ ८९॥

आग्नेय्यान्तु कौलीस्यान्नैर्ऋते नटभाषणम्।

तक्केशी वायुदिग्भागे चालापाणी तु शाङ्करे॥९०॥

मध्यमे पञ्चमं प्रोक्तं पीठस्थाने तु मालवी। - अनिरुद्धे - २०

<u>दशतालाः</u>

समतालस्तथा मत्ततालो लाङ्गलिकस्तथा।

मल्लतालो मङ्गलश्च जयतालश्च भद्रकः॥१६०॥

ढक्करीसंज्ञकस्तालो ब्रह्मतालस्तथैव च।

अनन्तताल इत्येते दशतालाः प्रकीर्तिताः॥१६१॥ - विश्वामित्रे - १७

<u>दश स्वराः</u>

कुमुदादिगणेशानां दशानां क्रमशो द्विजाः॥७९॥

षड्जर्षभस्तु गान्धारो मध्यमः पञ्चमस्तथा।

धैवतश्चैव निषादो धैवतो मध्यमस्तथा॥८०॥

पञ्चमश्च क्रमेणैव कथिताः स्युर्दश स्वराः। - ईश्वरे - ११

<u>दशनृत्ताः</u>

विलासं सर्वतोभद्रं खेटकं चक्रमण्डलम्।

कान्तारं कुट्टिमं पृष्ठकुट्टिमं कटिबन्धनम्॥१६६॥

वामजानूर्ध्वनृत्तं च आद्यतं च द्वयं पुनः।

एते नृत्तविशेषाश्च कुमुदादेः क्रमात् स्मृताः॥१६७॥

अन्येषां सर्वदेवानां तालो भद्रः प्रशस्यते। - विश्वामित्रे - १७

<u>भेरीताडनसमये आवाहित कुम्भानां तीर्थावसनिकं गुप्तस्थले स्थापनम्</u>

आवाह्य मध्यमे कुंभे तीर्थावधि समर्चयेत्।

लोकपालान् समाहूय प्राक्कुंभादिषु पूर्ववत्॥ ७७॥

निवेद्यचाथ नीराज्य गुप्तदेशे निवेशयेत्। - विष्णुतिलके - ८

## बलिदान विषयाणि

<u>बलिदानाचार्य लक्षणम्</u>

शुद्धवासाः शुचिर्भूत्वा कृतदन्तानुधावनः।

हविष्यभुग्यतात्मा? तु आचार्यो बलिमानयेत्॥ २८॥ -सनत्कुमारे -शिवरात्रे-९

<u>स्वयंव्यक्तादि भेदेन वीथिषु देवताह्वान - बलिदान भेदाः</u>

स्वयंव्यक्तादिबिम्बानामुत्सवे समुपस्थिते॥ ७०॥

आह्वानं देवपुरतो वीथीषु च बलिं क्षिपेत्।

मानुषादिप्रतिष्ठानाम् बिम्बानामुत्सवे रमे॥ ७१॥

आह्वानम् बलिदानम् च वीथ्यामेव तु कल्पयेत्। - श्रीप्रश्ने - ३४

<u>वीथिषु देवताह्वानं बलिः - तदर्थं बलिबिम्ब -चक्र -अन्नमूर्तीणां भ्रमणम्</u>

नित्योत्सवार्चा परितो वीथिकासु सुदर्शनम्।

अन्नमूर्तिविधानं च प्रदीपैर्बहुभिर्वृतम्॥ १४६॥

गमयित्वा प्रतिदिशं भेरीताडनपूर्वकम्।

ग्राममध्यं समासाद्य तत्रावाह्य चतुर्मुखम्॥ १४७॥

अर्चयित्वा मखे तस्मिन् याचित्वा सन्निधिं कुरुः।

इन्द्रादींश्च प्रतिदिशं बल्यर्थं सन्निधिं तथा॥ १४८॥

अर्चयित्वा तूर्यघोषं घोषयित्वा स्वतालवित्।

अन्यत्र गारुडं तस्या अन्तरालेषु घोषयेत्॥ १४९॥ - पाद्मे - १०

<u>वीथिषु भेरीताडन पूर्वकं बलिबेरेणसह बलिदान क्रमः</u>

देशिकः कोणमादाय ताडयेद्विधिपूर्वकम्॥ ११॥

बलिबेरं च सहितं नृत्तवाद्य विशारदैः।

मुष्टिदीपैश्च सहितमिन्द्रस्थाने प्रबोधयेत्(प्रवेशयेत्)॥ १२॥

इन्द्रमावाहनं चैव अर्घ्य-पाद्य पुरःसरम्।

धूपदीपैश्चविधिवत् बलिदानं समापयेत्॥ १३॥

अष्टदिक्षु यथान्यायम् इन्द्रादीन् ताल पूर्वकम्। - विष्णुतन्त्रे - ४

<u>बलिदान विधिः कालश्च</u>

बलिशिष्टं क्षिपेत् पीठे कौतुकं तत्र पूजयेत्॥ १२०॥

नीत्वाऽथ यागसदनं यथास्थानं निवेशयेत्।

आरंभदिवसे रात्रौ समाप्तदिवसेऽहनि॥ १२१॥

एकामेकां बलिं दद्यात् मध्ये दद्यात् बलिद्वयम्। - विष्णुतिलके - ८

<u>नवाह उत्सवे दिनदेवता भेदाः</u>

बलिं च सर्वदा दद्यात् प्रतिरात्रं पृथक् पृथक्॥ १९॥

प्रथमं भूतरात्रं तु द्वितीयं पैतृकं हविः।

तृतीयं यक्षरात्रं तु नागरात्रं चतुर्थकम्॥ २०॥

ब्राह्मं तु पञ्चमं ज्ञेयं षष्ठं शैवमुदाहृतम्।

सप्तमं वैष्णवं ज्ञेयमष्टमं नवमं तथा॥ २१॥ - सनत्कुमारे - शिवरात्रे - ९

<u>महोत्सवे बलिदानविधिः</u>

महोत्सवे प्रवृत्ते तु तत्र नित्योत्सवे कृते॥ ३१६ ॥

सद्मनो यागसंज्ञस्य द्वारे चण्डप्रचण्डयोः।

(दत्वा गर्भगृहं द्वारे तत्र चण्डप्रचण्डयोः)॥ ३१७॥

प्रतिष्ठोक्तप्रकारेण ततः कृत्वा यथाक्रमम्।

सर्वावरणभूदेशं परिक्रम्य ततो गुरुः॥ ३१८॥

ग्राममध्यं समासाद्य तत्र ब्रह्माणमर्चयेत्।

दिक्षु सर्वासु चेन्द्रादीन् अभ्यर्च्य बलिमाचरेत्॥ ३१९॥ - विष्णुतिलके – ५

<u>बलिदान क्रमः</u>

ब्रह्मादीशानपर्यन्तं स्थानेष्वष्टसु पूर्ववत्॥ १७३ ॥

विधाय बलिपीठानि गोमयालिप्तभूमिषु।

तेषु वाद्यं तथा नृत्तं गेयं नित्योत्सवं तथा॥ १७४॥

कृत्वा दद्यात्तोयपूर्वं बलिं तोयोत्तरं तथा।

बलिमुद्रां दर्शयित्वा दर्शयेन्मङ्गलाष्टकम्॥ १७५॥

बलिं प्रदक्षिणीकृत्य गच्छेयुर्बलिदायिनः। - पाद्मे – ११

<u>उपचारपूर्वक बलिदानक्रमः</u>

दशानां कुमुदादीनां गणेशानां द्विजोत्तमाः।

प्रणवाद्यैर्नमोन्तैस्तु स्वैः स्वैर्नामाभिरेव च॥ २०८॥

अर्घ्यं गन्धं तथा माल्यं धूपं गन्धाम्बुपूर्वकम्।

बलिं भूयो जलं चापि ताम्बूलं क्रमशो ददेत्॥ २०९॥

नृत्तगीतादिकं सर्वं पूर्ववत्परिकल्पयेत्।

एवं ग्रामबलिं कृत्वा बलिबिम्बाग्रतो गुरुः॥२१०॥ - ईश्वरे - ११

<u>बलिबेर भ्रमणविधिः</u>

भेरीमृदङ्गसम्युक्तं रथमारोप्य कौतुकम्।

व्यजनैस्तालवृन्तैश्च दिव्यस्त्रीपरिवीजितम्॥३८॥

प्रदीपशतसम्युक्तं रात्रौ ग्रामं परिभ्रमेत्।

भूतक्रूरबलिं चैव पीठिकासु विनिक्षिपेत्॥३९॥ -सनत्कुमारे -शिवरात्रे -९

<u>अन्नमूर्त्यादि बिम्बानां भ्रमण क्रमः</u>

अन्नमूर्तिस्ततो गच्छेत्तस्मादर्वाक् सुदर्शनः।

नित्योत्सवार्चा तदनु क्रमेणानेन देशिकः॥९०॥ - विश्वामित्रे - १८

<u>वीथिषु अन्तराले गरुडतालविधिः</u>

भेरीताडनपूर्वं तु देवतावाहनं चरेत्॥८८॥

घोषयेद्गारुडं तालमन्तराले तु वै दिशाम्। - ईश्वरे - ११

<u>बलिदाने आचार्य दिङ्नियमः</u>

बलिदाने तु पूर्वादि वैवस्वतदिगन्तिमम्॥७५॥

आचार्यः प्राङ्मुखः स्थित्वा कुर्यादावाहनादिकम्।

यात्वादित्रितये कुर्यात् पूर्वोदितमुदङ्मुखः॥७६॥

सोमेशदिग्द्वये ग्राममध्येऽपि प्राङ्मुखो भवेत्।- ईश्वरे - ११

<u>वीथिषु देवताह्वानं बलिप्रदान क्रमश्च</u>

तद्रात्रौ बलिमारभ्य देवानावाहयेत् क्रमात्।

प्रदीपशङ्खभेर्याद्यैः ग्रामं रात्रौ परिभ्रमेत्॥ ७५॥

इन्द्रादीन् कुमुदादींश्च देशिकस्स्वस्वनामभिः।

अष्टदिक्षु यथान्यायमावाहनमथाचरेत्॥ ७६ ॥

पायसेन बलिं दद्याद् ग्राममध्ये च कारयेत्।

ब्रह्मपारिषदं पूज्य ग्राममध्ये विशेषतः॥ ७७॥

गेहादिग्राममध्यान्तं बलिं कुर्याद्विशेषतः। - कपिञ्जले -२२

एकस्थाने इन्द्रस्य कुमुदस्य च आवाहनम्

ग्रामस्येन्द्रादि दिग्भागे तिष्टन्वै देवतामुखम्।

गोमयालेपनं कुर्याद्धस्तमात्रप्रमाणतः॥ ८५॥

दर्भासनं ततः कृत्वा देवमुद्दिश्य साधकः।

आवाहयेत्ततो देवमिन्द्रं कुमुदमेव च॥ ८६॥ - अनिरुद्धे - २०

चण्डादीनां नाममन्त्रेण बलिदानम्

ततश्चण्डादिमन्त्राणां लक्षणं कथ्यतेऽधुना।

प्रणवादिनमोऽन्तं च नाममन्त्रमिति स्मृतम्॥ ५३॥ - विष्वक्सेने - २७

रात्रौ बालिदानान्ते स्नानविधिः

रात्रौ तु बलिदानं स्याद् दत्त्वा स्नानं समाचरेत्।

प्रातः कर्मदिने दद्याद् बलिं बलिविधानवित्॥ २९॥ -सनत्कुमारे-शिवरात्रे -९

बलिदाने स्थानक्रमः - बलिद्रव्य मानञ्च

प्रासादद्वारमारभ्य ग्राममध्यान्तमेव हि॥ ३८॥

बलिं कुर्याद्यथान्यायं दिनं प्रतिदिनं प्रति।

प्रत्येकं चाढकं गृह्य बलिद्रव्यं तु दापयेत्॥ ३९॥

अष्टदिक्षु बलिं दद्याद्देशिकस्स्वस्वनामभिः। - कपिञ्जले -२३

<u>उत्सव दिन भेदेन बलिद्रव्यभेदाः</u>

षण्मासाद्येषु यागेषु शुद्धान्नेन बलिं क्षिपेत्।

एकविंशे तथा मासे सप्तविंशाध्वरेषु च॥ ८१॥

पायसेन बलिं दद्याद्दिनं प्रतिदिनं प्रति।

द्वादशे चार्धमासे तु मुद्गान्नं पयसा युतम्॥ ८२॥

एकाह्नि त्र्यहके विद्वान् पायसं तु बलिं क्षिपेत्।

पञ्चाहे चैव सप्ताहे गुडान्नबलिरुच्यते॥ ८३॥ - कपिञ्जले -२३

<u>उत्सवे बलिद्रव्य भेदाः</u>

अहनि प्रथमादौ स्याद्बलिदानमनुक्रमात्।

पललं रजनीचूर्णं करम्भान् लाजसंयुतान्॥ १६८॥

चरुणा सह संयोज्य बलिं दद्याद्यथाविधि।

द्वितीयेऽहनि संयोज्य चरुणा तिलतण्डुलम्॥ १६९॥

मिश्रिताश्चरुणा लाजान् धान्यान्यापूपिकांस्तथा।

तृतीये च चतुर्थे च नालिकेरजलैस्सह॥ १७०॥

सक्तुं च शालिपिष्टं च संयोज्य चरुणा सह।

पञ्चमे पद्मबीजानि पायसं शालितण्डुलम्॥ १७१॥

षष्ठे अपूपान् संयोज्य चरुणा निक्षिपेद्बलिम्।

सप्तमादिषु सर्वत्र सार्धमन्नैश्चतुर्विधैः॥ १७२॥

अपूपांश्च तथा सक्तून् प्रत्यहं निक्षिपेद्बलिम्। - पाद्मे - ११

<u>बलिदानसमये अनुगच्छन्तिनः फलम्</u>

अष्टदिक्षु बलिं दद्यात् कृत्त्वाग्रामं प्रदक्षिणम्।

सर्वालङ्कारसंयुक्तं वितानैरुन्नत ध्वजम्॥ ११४॥

अधिगच्छेयुर्यैभक्त्या कौतुकं श्रद्धयान्वितम्।

पदे पदे क्रतुफलं लभते नात्रसंशयः॥ ११५॥ - वासिष्ठे - १२

<u>बलिप्रदानानन्तरं बलिबिम्ब - चक्र - अन्नमूर्ति स्थानानि</u>

प्रादक्षिण्येन गत्वान्तः प्रविशेन्मण्डपावनिम्।

तत्रावरोपयेद्देवं बलिबेरं तु मन्दिरे॥ १२९॥

चक्रं च यागसदने बलिपीठे बहिः स्थिते।

अन्नमूर्तिं क्षिपेन्नित्यं समाराधनकल्पितैः॥ १३०॥ - पाद्मे - ११

<u>उत्सवान्ते उपरागस्पर्शे बलिदानक्रमः</u>

अह्नि रात्रौ च सर्वत्र बलिदानं यथाविधि॥ १७७॥

अवसानदिने रात्रौ ग्रहणे विषुवे दिने।

प्राप्ते कुर्यादवभृथं यदि तस्मिन् बलिद्वयम्॥ १७८॥ - पाद्मे - ११

<u>ग्रामहीने – बलिपीठहीने च कर्तव्यविधिः</u>

ग्रामहीने क्षिपेत् ब्रह्मन्! बलिपीठसमीपतः।

पूर्वाद्याशासु चेन्द्रादीन् आहूयावाह्य पूर्ववत्॥ ११५॥

बलिं पीठे स्थण्डिले वा प्रक्षिपेच्च यथाविधि। - विष्णुतिलके - ८

<u>प्रतिलोमादिभिः वासस्थाने बलिदान निषेधः</u>

अशून्यासु च वीथीषु प्रतिलोमैस्थितासु च॥ १३॥

न दद्यात् बलिदानं तु ह्यालयेष्वेव कारयेत्। - श्रीप्रश्ने - ३५

<u>वीथिषु बलिपीठलक्षणम्</u>

अष्टदिक्षु यथायोगं बलिपीठं प्रकल्पयेत्।

तालद्वपप्रमाणेन विस्तारायामतादृशम्॥ ४०॥

मेखला द्वयसंयुक्तं प्रत्येकं चतुरङ्गुलम्।

तन्मध्ये कर्णिकां कुर्यात् वृत्तां वा चतुरश्रकाम्॥ ४१॥

चतुरङ्गुलमायामां कर्णिकां मुनिसत्तम।

एवं पीठविधिः प्रोक्तो हरिपार्षदान् शृणु॥ ४२॥ - विष्वक्सेने - २७

<u>वीथिषु बलिपीठ आभावे</u>

सन्ति चेत्तत्र पीठानि बलिं पीठोपरि क्षिपेत्।

पीठाभावे बलिं दद्यात् देशिक स्थण्डिलोपरि॥ ३२०॥

महामर्याद् वाद्यानि ग्रामबल्यां चतुर्मुख!।

सर्वत्र धूपदीपाद्यैः बलिदानं समाचरेत्॥ ३२१॥ - विष्णुतिलके - ५

<u>वीथिषु बलिपीठ आभावे बलिदान विधिः</u>

पीठिकासु बलिं दद्यान्निर्मितासु पुरैव तु।

भूतले गोमयाद्येन लेपिते वा यथारुचि॥ २०७॥ - ईश्वरे - ११

<u>बलिबेर अभावे</u>

नित्योत्सवा भावे तु चक्रेणैव परिक्रमेत्॥ ३२२॥

तद्भावे केवलया भेर्या वा कमलासन!।

सर्वत्र क्षाळिते पीठे बलिदानं पुरोदितम्॥३२३॥ - विष्णुतिलके - ५

<u>बलिदान अभावे सर्वं निष्फलम्</u>

अदत्त्वा तु बलिं काञ्चिन्न कुर्यात् पालिकाक्रियाम्।

बलीनामप्यदाने तु क्रिया भवति निष्फला॥३२॥ - सनत्कुमारे - शिवरात्रे - ९

<u>भेरीताडन विहीने अन्य वाद्येन ताड्ने उत्सवं निष्फलम्</u>

भेरीपूजा विहीनंचेदुत्सवं निष्फलं भवेत्।

भेरिका चा विहीनं चेद्वाराणेनैवकारयेत्॥७॥

अन्यवाद्येन कुर्याच्चेत्तत्पूजा निष्फलम् भवेत्। - विष्णुतन्त्रे - ४

<u>देवताह्वनमारभ्य उत्सव समाप्तिपर्यन्तम् अन्यग्रामादि गमने महान्दोषः</u>

महोत्सवे प्रवर्तेतु वासुदेवस्य श्रीपतेः।

देवताह्वान समये भेरीं श्रुण्वन्ति यो नराः॥१२७॥

नगच्छेयुस्तेऽन्य देशं नदूरं योजनात्परम्।

गमनेसति मोहाद्वै व्याधि युक्ताभवेद्भुवि॥१२८॥ - परमपुरुषे - ४

<u>भेरीताडन श्रवणफलम्</u>

देवताह्वान कालेतु भेरींयस्तु श्रुणोतियः॥१३३॥

अवाप्यात्रतु सर्वेष्टानन्ते वैकुण्ठमाप्नुयात्। - परमपुरुषे - ४

<u>भेरीताडनात्परं विष्वक्सेन सम्मानम्</u>

अर्घ्यालभनमाल्यैश्च धूपैरङ्गादिसंयुतम्॥१९३॥

तत्सर्वं योग्यमाहर्तुं पूजान्तरनिवेदितम्।

पुष्पपूर्वं समादाय शिरसा चाभिनन्द्य तत्॥ १९४॥

समर्प्य विष्वक्सेनस्य ह्यस्त्रमन्त्राभिमन्त्रितैः। - ईश्वरे - ११

## <u>ध्वजरहितोत्सवाः</u>

<u>ध्वजरहितोत्सवाः</u>

उत्सवार्थं ध्वजं वक्ष्ये देवतावाहनादिकम्।

एकाह्नि-त्र्यह्नि-वा धीमान् ध्वजकर्म न कारयेत्॥ १०॥ - कपिञ्जले – २२

<u>एकदिनोत्सवे ध्वजारोहण निषेधः</u>

एकत्र दिवसे यागे न ध्वजोद्धार इष्यते॥ ४॥ - विष्वक्सेने - २६

<u>एकाहोत्सवे ध्वजारोह निषेधः</u>

विनैकाहोत्सवाच्चापि **<u>त्रिदिनात्</u>** पञ्चवासरात्॥ १६॥

तीर्थयात्रादिनादर्वागेकविंशतिमे दिने।

ध्वजस्यारोहणं कुर्यात् उत्सवार्थं प्रयत्नतः॥ १७॥ - नारदीये - १८

<u>ध्वजारोहणयुक्त उत्सव दिन सङ्ख्या</u>

त्रिपञ्चाहस्तु सप्ताहे चोच्यते वासरे ध्वजम्॥ ३२॥ - वासिष्ठे – १२

## <u>विष्वक्सेनस्य वीथिभ्रमणम् -भगवतः शयनाधिवासश्च</u>

ततो यात्रोपकरणैर्यानमारोप्य सेनपम्।

वादित्रवेदघोषैश्च प्रादक्षिण्येन वै गुरुः॥ ८१॥

वीथीः प्रदर्शयेत्तस्मै प्रासादं चापि सर्वतः।

अर्घ्यादिभिस्ततोऽभ्यर्च्य निनयेत्तस्य तं गृहम्॥ ८२॥ - श्रीप्रश्ने - ३१

<u>उत्सवार्थं शयनाधिवासः</u>

अधिवासं प्रकुर्वीत पूर्वस्मिन् दिवसे निशि।

स्नापयित्वाथ देवीभ्यां शयने शाययेद्धरिम्॥ १०॥

तदर्थं कौतुकं बध्वा पश्चाच्छयनकल्पनम्।

कोणेषु स्थापयेद्दीपान् शय्याया देशिकोत्तमः॥ ११॥ - भार्गवतन्त्रे - १२

<u>उत्सवे अधिवास कालः</u>

उत्सवारंभदिवसात् पूर्वेद्यु र्निशि पद्मज!।

शय्यायां वासुदेवं तं देवीभ्यामधिवासयेत्॥ ४४॥ - विष्णुतिलके – ८

## <u>उत्सवयागशाला कल्पनप्रकारः</u>

<u>उत्सवयागशाला स्थानम्</u>

उत्सवं संप्रवक्ष्यामि यथा पूर्वं मया श्रुतम्।

तत्सर्वं विस्तरेणैव श्रृणुष्व पृथिवीपते॥ १॥

यागशालां ततः कुर्यादैशान्ये पावके तथा।

नैर्ऋते वायवे सोमे याम्यायां त्वथवा भवेत्॥ २॥ - मार्कण्डेये - २२

<u>उत्सव यागशाला स्थानम्</u>

आवृतौ प्रथमायां वा द्वितीयावरणेऽथ वा॥ १०॥

यथावकाशं कुर्वीत महान्तं यागमण्डपम्।

चतुर्द्वार समायुक्तं विस्तारायामतस्समम्॥ ११॥ - विश्वामित्रे - १८

<u>उत्सवयागशाला विशिष्टलक्षणम्</u>

वक्ष्यमाणप्रकारेण सर्वलक्षणसंयुताम्॥ ९४॥

प्रथमावरणे वापि द्वितीयावरणेऽपि वा।

तृतीयावरणादौ वा यथाभिमतदिग्गताम्॥९५॥

तथा प्रागाननां यद्वा यथाभिमतदिङ्मुखाम्।

एकद्वारां चतुरां यद्वा द्वारद्वयान्विताम्॥९६॥

भित्तियुक्तामयुक्तां वा कोणभित्तिसमन्विताम्।

क्षिप्रकर्मप्रसिद्ध्यर्थं केवलं वा प्रपाकृतिम्॥९७॥

धूमनिर्गमनोपेतां मध्ये वेदिसमन्विताम्।

तदूर्ध्वे होमकुण्डं तु सचतुर्मेखलं भवेत्॥९८॥

मेखलात्रययुक्तं वा द्विमेखलमथापि वा।

तथैकमेखलं वापि चतुरश्रं सलक्षणम्॥९९॥

तत्पूर्वे मण्डलोपेतां वह्नौ दीपघटान्विताम्।

पश्चिमे बिम्बसंयुक्तामुत्तरे चाङ्कुरैर्युताम्॥१००॥

ईशान्ये कुम्भसंयुक्तां सर्वोपकरणैर्युताम्।

अलङ्कृतां वितानाद्यैस्तोरणध्वजशोभिताम्॥१०१॥

एवंविधां यागशालां प्रविश्य गुरुसत्तमः। - ईश्वरे - ११

<u>उत्सव यागशालायां कुम्भ कुण्डादि स्थानानि</u>

तन्मध्ये वेदिकां कुर्यात् विष्णुयन्त्रं प्रकल्पयेत्।

मण्टपस्येशदिग्भागे कुम्भं संस्थापयेत्सुधीः॥९॥

पूर्ववदग्निपार्श्वे तु कुण्डं कुर्याद्विचक्षणः।

मण्डलात्पश्चिमे बिम्बं स्थापयेत्तु यथाविधि॥१०॥

द्वारादियजनं कृत्वा चतुस्स्थानार्चनं यजेत्। - अनिरुद्धे - २१

एककुण्ड विधाने यागशाला कल्पन क्रमः

एककुण्डविधाने तु वेद्याः प्राचीनभूतले॥ ७५॥

चतुरश्रं भवेत् कुण्डं पात्रवेदिं तु दक्षिणे।

प्रतीच्यां मखबिम्बस्य कौबेर्यां मण्डलस्य च॥ ७६॥

ऐशान्यां पालिकार्थाय कल्पयेद् वेदिकां गुरुः। - श्रीप्रश्ने - ३१

उत्सवे अष्टकुण्ड स्थानानि

कुम्भमण्डलयोर्बाह्ये परितः कुण्डमाचरेत्॥ २८॥

पूर्वादीशानपर्यन्तं कुण्डक्लृप्तिमथ शृणु।

त्र्यश्रं वृत्तं षडश्रं वा वस्वश्रं विदिशः क्रमात्॥ २९॥

(शङ्खचक्रगदापगं दिक्षुपूर्वादितः क्रमात्।)

अष्टकुण्डविधौ विप्र चतुष्कुण्डविधिं शृणु।

अश्रं चाप मथो वृत्तं पद्मं पूर्वादितः क्रमात्॥ ३०॥

मुख्यकल्पे तु विप्रेन्द्र ! अष्टकुण्डं प्रकल्पयेत्।

ऋत्विजो वरयेत्पूर्वं कुण्डे कुण्डे पृथक् पृथक्॥ ३१॥ - अनिरुद्धे - २१

उत्सवे चतुष्कुण्डमध्ये चक्रकुण्डकल्पनविधिः

कुर्यात् समेखलां तस्याः परितः कुण्डकल्पनम्॥ ७१॥

चतुरश्रं पौरुहूत्यां दक्षिणस्यां धनू रमे।

चक्रकुण्डं तु वारुण्यां चान्द्रमस्यां त्रिकोणकम्॥ ७२॥ - श्रीप्रश्ने - ३१

महोत्सवे पञ्चाग्निमारभ्य एककुण्डपर्यन्त कल्पनविधिः

कुण्डमाहवनीयस्य चतुरश्रं यथोदितम्॥ १४॥

दक्षिणस्यां दक्षिणाग्नेर्दिशि चापसमाकृति।

कुण्डं च गार्हपत्यस्य प्रतीच्यां वृत्तमद्भुतम्॥ १५॥

सभ्यस्य कुण्डं कौबेर्यां त्रिकोणं तदनन्तरम्।

ऐशान्यामग्निकोणे वा कुण्डं च चतुरश्रकम्॥ १६॥

आवसथ्यस्य शिखिनः पञ्चाग्न्युत्सवमुत्तमम्।

यद्वावसथ्यरहितं चतुरग्निं चतुर्दिशम्॥ १७॥

सभ्यावसथ्यरहितं यद्वाग्नित्रयसंयुतम्।

एकमाहवनीयं वा कल्पयेत्कर्तुरिच्छया॥ १८॥ - पाद्मे - ११

यागशालायां बलिबिम्ब स्थापनम्

उत्थाप्य बलिबिम्बं तत् प्रादक्षिण्येन मन्दिरम्॥ २१॥

यागमण्डपमानीय स्थापयेदासने हरिम्। - भार्गवतन्त्रे - १२

यागशालायां बलिबिम्बस्य चक्रस्य च स्थापनम्

उत्थाप्य सद्यश्चाराध्य प्रादक्षिण्येन मन्दिरम्।

नीत्वा प्रवेश्य यागार्थमण्डपं तत्र चासने॥ ६५॥

नित्योत्सवार्चां चक्रं च निवेश्य तदनन्तरम्। - पाद्मे - ११

उत्सव-यागशालायां गरुड -चक्र -सेनेश -बलिबिम्बादि स्थापनप्रमाणम्

मण्डलस्य तु पूर्वे तु ( पार्श्वे तु ) गरुडं सन्निवेशयेत्।

दक्षिणे चक्रराजं तु पश्चिमे बलिबेरकम्॥ ३२॥

सेनेशमुत्तरे पार्श्वे अङ्कृत्य निवेशयेत्। - अनिरुद्धे - २१

<u>मण्डलार्चने फलम्</u>

वस्तुत्वेन गृहीत्वैवं मण्डलं पूर्वनिर्मितम्।

नाम्नाब्जनाभभुवनं सर्वदुःख क्षयङ्करम्॥ १६३॥ - ईश्वरे - ११

<u>उत्सवोक्त मण्डलानि</u>

मण्डलं चक्रपद्मं वा इष्टसिद्धिप्रदं तु वा॥ ३३॥

वासुदेवाख्य यन्त्रं वा कारयेत्तु यथारुचि। - अनिरुद्धे - २१

<u>मण्डलादिषु उपकुम्भ स्थापनक्रमः</u>

कुम्भमण्डलकुण्डन्तु परिकुम्भसमन्वितम्॥ ३४॥

महाकुम्भस्य पार्श्वे तु वर्धनी संनिवेशयेत्। - अनिरुद्धे - २१

<u>षडासनयुक्त मण्डलपूजाविधिः</u>

ततस्तस्मिन् विभोः प्राग्वदासनं परिकल्प्य च।

तन्मध्ये देवदेवेशं समावाह्य यथाविधि॥ १७०॥

सन्निधिं सन्निरोधादि भोगयागावसानकम्।

सर्वं च पूर्ववत्कृत्वा आसनाद्यैः पुरोदितैः॥ १७१॥

पूजयेज्जप-यज्ञान्तं देवेशं मण्डले गुरुः। - ईश्वरे -११

<u>महाकुम्भस्य उत्तरे वर्धिनीकुम्भस्थापनम्</u>

नवकुम्भान् समादाय त्रिसूत्रेण विचित्रितान्।

पूरयेद्गन्धतोयेन स्थण्डिलोपरि विन्यसेत्॥ ९॥

वर्धनीमुत्तरे स्थाप्य परितोऽष्टघटानि वै।

ब्राह्मेविष्णुघटान् न्यस्य विधिना कारयेत्ततः॥ १०॥

विधानं कूर्चवस्त्राणां सौवर्णप्रतिमादिकान्। - मार्कण्डेये - २२

<u>शरावेन वा नालिकेरेन महाकुम्भस्य पिधानम्</u>

वस्त्रयुग्मं महाकुम्भे एकमन्यत्र योजयेत्।

कूर्चपल्लवसंयुक्तं शरावे सूत्रसंयुतम्॥ ३७॥

शरावे तु तथाभावे नालिकेरफलं न्यसेत्। - अनिरुद्धे - २१

<u>वेदिकायां कुम्भवस्त्र परिमाणाः</u>

मध्यमं वस्त्रयुग्मेन शिष्टानेकेन वाससा॥ ६९॥

वेष्टितान् वेदिकाभूमौ स्थापयेद्धान्यराशिषु।

आयतं सप्तभिर्हस्तैः षड्भिर्वा चाथ पञ्चभिः॥ ७०॥

विस्तीर्णं वस्त्रमायाममानार्धेन नियोजयेत्। - पाद्मे – ११

<u>अष्टमङ्गलविधिः</u>

श्रीवत्सं पूर्णकुम्भञ्च भेरीं दर्पण मण्डलम्॥ १०४॥

मत्स्ययुग्मं च शङ्खञ्च चक्रं काश्यपनन्दनम्।

पद्मासनस्थितं सौम्यं द्वादशाङ्गुलमायतम्॥ १०५॥

तत्तद्रूपानुसारेण विस्तीर्णं पार्श्वयोर्द्वयोः।

प्रदीपं चामरं मूर्ध्नि छत्रं च परिकल्पयेत्॥ १०६॥ - पाद्मे - क्रिया – २५

<u>अष्टमङ्गलान् धान्यराशिषु स्थापनक्रमः</u>

मङ्गलान्यष्ट वासोभिर्वेष्टयित्वा पृथक् पृथक्॥ ७०॥

निवेशयेत्ततोऽधस्ताद्धान्यराशिषु च क्रमात्। - विश्वामित्रे – १८

## यागशालापूजा विषयाणि

महाकुम्भादिषु आवाहन देवताः

कुम्भे संपूजयेद्देवं वासुदेवमनामयम्।

उपकुम्भे यजेद्देवान्वासुदेवादिकान् क्रमात्॥ ३९॥ - अनिरुद्धे - २१

महाकुम्भादिषु आवाहन देवताः

मूलबेरं समावाह्य महाकुम्भे च पूजयेत्॥ ११॥

सुदर्शनं समावाह्य करके च सुपूजयेत्॥ १२॥

परितः कलशानष्टौ आसयेदष्टशक्तिमान्।

पूजयेत् स्वस्वनाम्ना च उद्धृत्य भगवन्मया॥ १३॥ - मार्कण्डेये - २२

महाकुम्भ - उपकुम्भ - करक देवताः

मध्यकुम्भे मूलबेरं करके च सुदर्शनम्॥ ७२॥

पूर्वाद्याशागते कुम्भे वासुदेवादिकान् यजेत्।

आग्नेयादिषु कोणेषु यष्टव्याः पुरुषादयः॥ ७३॥

क्रमेण पुरुषस्सत्यस्तथैवाच्युतदेवता।

अनन्तश्चेति हविषा चतुर्णां च निवेदनम्॥ ७४॥ - पाद्मे - ११

कुम्भ मण्डलयोः प्रोक्षणमार्गेन स्नानम्

कुम्भे च मण्डले चैव प्रोक्षणस्नानमाचरेत्॥ ४०॥

अग्नौ चैव विशेषेण उपचारैः पृथग्घुनेत्।

मण्डले पूजयेत्पश्चात् बिम्बं संपूजयेत्परम्॥ ४१॥ - अनिरुद्धे - २१

<u>कुम्भे - मण्डले च प्रोक्षणमार्गेन स्नानोपचारः</u>

मण्डले कुम्भयागे च प्रोक्षणं स्नानमाचरेत्॥ १७२॥ - ईश्वरे - ११

<u>उत्सवे चतुष्कुण्डपक्षे एककुण्डपक्षे च अग्न्युपादनक्रमः</u>

चतुष्कुण्डविधाने तु वृत्तकुण्डात् गुरूत्तमः।

अग्निमुत्पाद्य निनयेदन्यकुण्डेषु पावकम्॥ ४॥

एककुण्डविधाने तु चतुरश्रेऽग्निमर्चयेत्। - श्रीप्रश्ने - ३४

<u>उत्सवे पञ्चकुण्ड देवताः</u>

प्रवृत्ते जुहुयादग्नौ ध्यायन्नाहवनीयके॥ ७६॥

वासुदेवं दक्षिणेऽग्नौ सङ्कर्षणमनन्तरे।

प्रद्युम्नं पश्चिमे चाग्नावुदीचीनेऽनिरुद्धकम्॥ ७७॥

आवसथ्ये मूलमूर्तिमिष्ट्वा तीर्थावसानिकम्। - पाद्मे - ११

<u>वासुदेवादि मन्त्रेण होमविधिः</u>

होमकार्यं ततः कृत्वा वासुदेवादि मन्त्रतः।

प्रभवाप्यययोगेन अष्टकुण्डेषु होमयेत्॥ ४२॥ - अनिरुद्धे - २१

<u>होमद्रव्याणि - मन्त्रं सङ्ख्या च</u>

सर्पिराद्यैर्भवेद्धोमः तत्तन्मन्त्रैर्यथाक्रमम्।

सर्पिभिः कुसुमैर्धूपद्रव्यैश्च समिधा पुनः॥ ३०॥

पयसा चापि दध्ना च तिलव्रीहियवैरपि।

कुण्डाधिदैवतैर्मन्त्रैः पृथगष्टोत्तरं शतम्॥ ३१॥

अष्टाविंशतिरष्टौ वा होमः प्रागादिपूर्ववत्।

एवं हुत्वाथ विधिवत् नृसूक्तेन चरुं पुनः॥३२॥ - भार्गवतन्त्रे - १२

<u>उत्सवहोमः</u>

समिधाज्यचरून् हुत्वा काश्यप द्विजपुङ्गव।

समिधो मू(र्ति)लमन्त्रेण आज्यं वै विष्णुसंज्ञया॥२०॥

प्रत्येकं तु शतं हुत्वा ध्यायेद्देवं सुकोमलम्।

चरुमष्टशतैरेव जुहुयात् षोडशाहुतीः॥२१॥

चरुणा परिवाराणां स्वस्वमन्त्रेण होमयेत्। - कपिञ्जले - २३

<u>होमे चतुर्विधान्नम्</u>

पायसैः कृसरै गौडैर्हरिद्रान्नैश्च मौद्गकैः।

पौरुषेणैव सूक्तेन होतव्यं पृथगग्निषु॥४१॥ - पुरुषोत्तमे – २४

<u>उत्सवे यागशालायां चुल्यां चरुश्रपणं -होमारम्भपूर्वे वा चरुश्रपणं -तेन होमः -निवेदन विधिश्च</u>

चरुं संश्रापयेच्चुल्यां हृदा क्षीराज्यतण्डुलैः।

समुद्धृत्याज्यपूतं तु विनिवेद्य यथाक्रमम्॥१९९॥

कलशस्थलबिम्बानामेकांशं जुहुयात्ततः।

यद्वा यागसमारम्भात्पूर्वं संसाध्य वै चरुम्॥२००॥

कलशस्थलबिम्बानां क्रमात् कृत्वा तु पूजनम्।

सर्वं द्विजप्रदानान्तं वह्नौ सन्तर्पयेत्ततः॥२०१॥

दत्त्वा पूर्णाहुतिं पश्चात्कुर्याद्वारबलिं तथा। - ईश्वरे - ११

<u>भोज्यासनान्तं सर्वं आज्येन होमः</u>

वह्निस्थान् वासुदेवादीन् सपर्यासनमादितः ॥ २१ ॥

भोज्यासनान्तमाज्येन स्वाहान्तैर्जुहुयात्ततः। - श्रीप्रश्ने - ३४

<u>उत्सवे होमकुण्डस्य अष्टदिक्षु इन्द्रादि अष्टकुम्भस्थापनविधिः</u>

इन्द्रादीशानपर्यन्तं कुण्डस्य च समन्ततः।

कुम्भांश्च विन्यसेत्तत्र धान्यराशिषु देशिकः ॥ १८ ॥

इन्द्रादि प्रतिमां कृत्वा सुवर्णेन च निक्षिपेत्।

पूजयित्वा स्वनाम्नैव आवाह्य च यथाक्रमम् ॥ १९ ॥ - कपिञ्जले - २३

<u>बलिद्रव्येण होमः</u>

बलिद्रव्यं समादाय होमयेद्द्विजसत्तम ॥ २२ ॥

अष्टाक्षरेण मन्त्रेण द्वात्रिंशत्परिसङ्ख्यया।

एवं प्रतिदिनं कुर्यात् सायंप्रातर्विशेषतः ॥ २३ ॥ - कपिञ्जले - २३

<u>बलिद्रव्येण होमः</u>

समिदाज्य चरूंश्चैव पञ्चोपनिषदैः क्रमात्।

बलिद्रव्येणहोतव्यं पञ्चविंशतिचाहुतीः ॥ १११ ॥

विष्णुगायत्रियाचैव व्याहृतीभिस्तथैव च। - वासिष्ठे - १२

<u>आवसथ्याग्नि मध्ये परमान्नेन ब्रह्मादि परिवारहोमः</u>

पञ्चमे परमान्नेन ब्रह्माद्युद्दिश्य दैवतम्।

तत्तन्नाम्ना चतुर्थ्यन्तं परिवारपदान्वितम् ॥ ८२ ॥

स्वाहान्तं मन्त्रमुच्चार्य ध्यात्वा ब्रह्मादिदैवतम्। - पाद्मे - ११

<u>चतुरश्रकुण्डे ब्रह्मादिपरिवार होमः</u>

चतुरश्रे तु कुण्डे तु ब्रह्म (रुद्राष्टदिक्पतीः) ब्रह्मरुद्रादि देवताः।

तत्तन्नामचतुर्थ्यन्तं परिवारपदेन च॥४२॥

स्वाहान्तं मन्त्रमुच्चार्य होतव्यं तु यथाक्रमम्। - पुरुषोत्तमे - २४

<u>परिवारहोमः</u>

ब्रह्मा प्रजापती रुद्रो देवा श्छन्दांसि पद्मज!॥१०४॥

ऋषयश्चापि गन्धर्वा स्तथैव च सरीसृपाः।

यक्षाश्चाप्सरसश्चैव मासाद्यैस्सह वत्सराः॥१०५॥

समुद्राः पर्वताश्चैव प्रजा भूतानि पद्मज!।

पशवश्च तथा वृक्षा स्तथैवौषधय स्स्मृताः॥१०६॥

वनस्पति श्चोद्भिदश्च स्वेदजा श्चाण्डजास्तथा।

जरायुजाश्च भूम्यादि सप्तलोका स्तथैव च॥१०७॥

अतलाद्या स्सप्तलोका स्तथा चंडादि देवताः। - विष्णुतिलके - ८

<u>ब्राह्मादि परिवारदेवताः</u>

ब्रह्मा प्रजापती रुद्रस्सर्वे देवा यथाक्रमम्॥८३॥

छन्दांसि वेदा ऋषयो गन्धर्वाश्च सरीसृपाः।

यक्षाश्चाप्सरसश्चैव मासाद्यैः सह वत्सराः॥८४॥

सरितश्च समुद्राश्च पर्वताश्च तथापगाः।

भूतानि पशवो वृक्षास्तथैवौषधयस्स्मृताः॥८५॥

वनस्पतिश्चोद्भिदश्च स्वेदजाश्चाण्डजास्तथा।

जरायुजाश्च भूरादिसप्तलोकास्तथैवच॥८६॥

अतलाद्यास्तथा लोकास्सप्त चण्डादिदेवताः। - पाद्मे - ११

<u>ब्रह्मादि परिवारहोमे वैशिष्ट्यम्</u>

ब्रह्मादीनां च सर्वेषां योऽन्तर्यामी च तिष्ठति॥५॥

तस्मै जगत्स्वरूपाय वासुदेवाय होमयेत्।

ब्रह्मरूपी श्यामवर्णः पद्मनाभश्च सानुगः॥६॥

सङ्कर्षणो रक्तवर्णः सानुगो रुद्ररूपधृत्।

त्रिविक्रमस्त्विन्द्ररूपः सदेवः सपरीच्छदः॥७॥

प्रणवप्रतिपाद्यश्च वासुदेवः सनातनः।

शुद्धस्फटिकसङ्काशो देवः षड्गुणसंयुतः॥८॥

ऋग्वेदाधिपतिः श्यामवर्णो नारायणः परः।

सङ्कर्षणो रक्तवर्णो यजुर्वेदाधिपः प्रभुः॥९॥

सामवेदाधिपो हैमः प्रद्युम्नः परिवार वान्।

अथर्वाधिपतिर्देवो नीलोत्पलदलद्युतिः॥१०॥

शाश्वतस्त्वनिरुद्धश्च परिवारसमन्वितः।

मुनीनामधिपो सिष्णुः पद्मकिञ्जल्कसन्निभः॥११॥

गन्धर्वरूपी भगवान् वामनो हेमसन्निभः।

सर्वान्तर्यामिको देवः प्रद्युम्नः कनकप्रभः॥१२॥

पाण्डराभो यक्षनाथः श्रीधरः श्रीविवर्धनः।

मासानामधिपो देवः केशवः कनकप्रभः॥१३॥

अच्युतः पीतवर्णाभो वत्सराधिपतिर्महान्।

समुद्राणामधिपती रक्तवर्णो जनार्दनः॥ १४॥

शैलानामधिपः पीतो हरिः सपरिचारकः।

शुद्धस्फटिकसङ्काशः प्रजाधीशो नरोत्तमः॥ १५॥

भूताधिपः पद्मनाभो बन्धूकसदृशप्रभः।

पश्चाधीशो नीलवर्णः कृष्णः सपरिवारकः॥ १६॥

वृक्षाधिपस्त्वच्युतः स्याच्छ्यामोऽनुचरसंयुतः।

ओषधीशः पद्मनाभः कालमेघनिभाकृतिः॥ १७॥

वनस्पत्यधिपो देवो माधवः स्फटिकाकृतिः।

जरायुजानामधिपो वासुदेवः सितप्रभः॥ १८॥

सङ्कर्षणस्त्वण्डजानामधिपो रक्तवर्णकः।

प्रद्युम्नो हेमसङ्काशः स्वेदजानामधीश्वरः॥ १९॥

उद्बीजाधिपतिर्देव अनिरुद्धो जगद्गुरुः।

अनिरुद्धः श्यामवर्णो भुवनानामधीश्वरः॥ २०॥

चतुर्थ्यन्तेभ्य एतेभ्यो जुहुयात्सानुगैरपि।

इत्थं प्राचीनकुण्डे तु हुत्वा पूर्णाहुतिं चरेत्॥ २१॥ - श्रीप्रश्ने - ३६

<u>पूर्णाहुतिसंपाताज्येन कुम्भ - मण्डल - बिम्बानां स्पर्शनम्</u>

निवेद्य च ततः पूर्णामाहुतिं जुहुयाद्धविः।

पौरुषेण च मन्त्रेण संपाताज्येन वै रमे॥ २३॥

कुम्भं बिम्बं मण्डलं च न्यसेद्राष्ट्रहिताय वै। - श्रीप्रश्ने - ३४

<u>दिवा देवस्याभिमुखं चतुस्थानार्चनम् - तदनन्तरं वीथिभ्रमणम्</u>

दिवा देवं स्थिते यागसदने देशिकोत्तमः।

मण्डलादिकमभ्यर्च्य निवेद्य च यथावसु॥१२२॥

पूर्ववद्धवनं कृत्वा बलिं दत्त्वा यथाविधि।

ग्रामवीथिषु बल्यर्चां नीत्वान्यत् -सर्वमाचरेत्॥१२३॥

यथापुरं चोत्सवार्चां नयेद् ग्रामादिकं बहिः।- विश्वामित्रे - १८

<u>परिधि -परिस्तरणादीनाम् उद्वासन निषेधः- प्रत्यहम् अग्निधारणञ्च</u>

प्रहरेन्नैव परिधीन् न दर्भांश्चोत्सवावधि॥८४॥

देवान् नोद्वासयेच्चैव प्रत्यहं वह्निधारणम्।

विदधीत प्रतिदिनं जुहुयाच्च यथाविधि॥८५॥ - विश्वामित्रे - १८

<u>चतुस्थानपूजा क्रमः</u>

महाकुम्भस्थदेवेशं पूजयेत् प्रथमं गुरुः॥२४॥

मण्डलस्थं च देवेशं पूजयेत्तदनन्तरम्।

बिम्बस्य तस्य देवेशमर्चयेत्तदनन्तरम्॥२५॥

अग्निमानीय संप्रोक्ष्य कुण्डमध्ये विनिक्षिपेत्। - मार्कण्डेये - २२

<u>नित्यपूजानन्तरं चतुस्थानम्</u>

उत्थाप्य पूर्ववत्सर्वं देवाय विनिवेदयेत्।

नित्यपूजां समाप्याथ चतुःस्थानार्चनं चरेत्॥४॥ - श्रीप्रश्ने – ३६

## <u>उत्सवे निवेदनविषयाणि</u>

<u>उत्सवे देवस्य निवेदनान्नानि</u>

पायसं च गुडापूपं माषापूपं च लड्डुकम्।

अन्यानि भक्ष्यभोज्यानि लेह्यानि विविधानि च॥४१॥

स्वादूनि सात्त्विकान्नानि ह्यर्घ्यदानादिपूर्वकम्।

ततो नीराजनं कृत्वा भक्तेभ्यस्तानि दापयेत्॥४२॥ - श्रीप्रश्ने - ३६

<u>महोत्सवे नवीनान्न निवेदन विषयः</u>

महोत्सवे हविर्दानं कुर्यात् तन्त्रविचक्षणः॥३७॥

नवीनं विविधं त्वन्नं भोजयेद् भावसंयुतः। - वैहायसी - १३

<u>महोत्सवे महान्न निवेदन क्रमः (திருப்பாவாடை)</u>

मध्याह्ने भोजयेद्देवं महाहविर्निवेदयेत्।

विधानं तस्य वक्ष्यामि श्रृणुध्वं भूमिदेवताः॥२१॥

मण्डपं कारयेद्विद्वान् विशालं भूषितं शुभम्।

पाकशालासमीपे वा यथाभिमतमव्ययम्॥२२॥

तोरणद्वारसंयुक्तं मध्ये वेदिं विधापयेत्।

पाचयेद्विविधान् पाकान् सर्वान् संस्थापयेत् पृथक्॥२३॥

भाण्डेषु शुद्धियुक्तेषु मण्डपमानयेत् ततः।

नैरृते वारुणे वापि दिशि संस्थापयेद्धि तान्॥२४॥

वेदिकां प्रोक्ष्य चास्त्रेण अक्षतान् विकिरेत् ततः।

विष्टचूर्णैरलङ्कृत्य पटेनाच्छादयेन्महीम्॥२५॥

मूलबिम्बात् समावाह्य कर्मबिम्बं तु वोत्सवम्।
स्थापयेन्मण्डपे देवं गन्धपुष्पादिनाऽर्चयेत्॥ २६ ॥
पाद्यार्घ्याचमनं दत्त्वा भोज्यं सर्वं निवेदयेत्।
सावकाशे सति गर्भगेहे भोज्यं तु स्थापयेत्॥ २७॥
पायसं कृसरं गौल्यं मुद्गान्नं च यथाक्रमम्।
सूपान्नं चैव शुद्धान्नं दधिकं गुडमिश्रितम्॥ २८॥
शर्करासंयुतं चैव पृथगाज्यं निवेदयेत्।
कदलीपनसं दद्यात् संभवे आम्रमर्पयेत्॥ २९॥
व्यञ्जनानि तु देवाय विविधानि समर्पयेत्।
रसानि मधि(धु)राण्यत्र पक्वोपदंशकं तथा॥ ३०॥
अन्नसूक्तेन संस्पृश्य परिषेकं ततश्चरेत्।
प्राशनमुद्रया दद्यात् हविस्तद्दक्षिणे करे॥ ३१॥
स्वादु सुगन्धि तोयं च दत्त्वाऽऽचमनं चरेत्।
प्रमृजेत् करपद्मौ तु कोमलेन सुवाससा॥ ३२॥
पुनर्निवेदयेदन्नं पृथुकानि ह्यपूपकम्।
फलं तु नारिकेलस्य पानीयाचमनं तथा॥ ३३॥
पुनराचमनं दत्त्वा मुखवासं समर्पयेत्।
एलालवङ्गतक्कोलं कर्पूरेण युतं द्विजाः॥ ३४॥
ताम्बूलवल्लीसंयुक्तं संस्कृतं चक्रपाणये।
पूजयेच्चामराद्यैस्तं नृत्तगीतं विधापयेत्॥ ३५॥

पीठादुत्थाप्य देवेशं प्रासादं तु परिक्रमेत्।

गर्भगेहं समापाद्य मध्याह्नशयनं विभोः॥३६॥

विधापयेद् गुरुः शुभ्रः प्रत्यहं तद्विशेषतः। - वैहायसी – १३

<u>निवेदन मण्डपे सायाह्ने विद्वद्गोष्ठी</u>

सायमुत्थाप्य भूदेवाः फलानि शार्ङ्गपाणये॥३८॥

दद्याद् यज्ञे हुनेन्मूलं विद्वद्गोष्ठीश्च कारयेत्। - वैहायसी - १३

<u>नित्यार्चनानन्तरं नैमित्तिकस्य आचरणम्</u>

प्रभाते विमले शुद्धे कृतकृत्यस्तु पूजकः।

नित्यार्चनं हरेः कृत्वा नैमित्तिकमथाचरेत्॥४९॥ - मार्कण्डेये – २४

## <u>वाहन - वीथिभ्रमण विचारः</u>

<u>वाहनक्रमः</u>

उत्सवे देवदेवस्य वाहनानि श्रुणुष्व मे॥१७॥

विमानो भास्करः शेषः सिंहो गरुड एव च।

गजो रथो हयश्चापि द्रुमःकल्पक संज्ञिकः॥१८॥

हंसश्चन्द्रसुमेरुश्च शिबिका भद्रपीठिका।

एवं विधानि दिव्यानि वाहनानि मनस्विनि॥१९॥ - श्रीप्रश्ने - ३५

<u>वाहनक्रमः</u>

वाहनैर्विविधैर्देवं श्रीभूमिभ्यां युतं नु वा॥१०५॥

अनुचरैर्भक्तबृन्दैः भ्रामयेत् पाञ्चरात्रिकः।

सूर्यात्मनाथ यानेन शेषशय्यात्मनाऽथ वा॥१०६॥

गरुडाकृतिना चैवं हनुमत्सदृशेन च।

गजरूपेण नैकाहे पुष्परथेन माधवम्॥ १०७॥

डोलायां सिंहयानेन अथवा देवं हि भ्रामयेत्। - वैहायसी - १३

<u>वाहनक्रमः</u>

प्रथमेऽहनि देवस्य हंसवाहनमिष्यते।

द्वितीयेऽहनि सिम्हं च त्रितीयेतु खगेश्वरः॥ ७५॥

चतुर्थेऽहनि शेषश्च पञ्चमेचाञ्जनीसुतः।

षष्टे तु सूर्यचन्द्रौ च रथारोहं तु सप्तमे॥ ७६॥

अष्टमे तु तुरङ्गस्यान्नवमे गजमेव च।

एवं क्रमेण देवस्य विवाहोत्सवमीरितम्॥ ७७॥

(याली पुष्पकयानादि वाहनानि यथेच्छया) - पुरुषोत्तमे – २४

<u>वाहनक्रमः</u>

प्रथमे स्यन्दनं प्रोक्तं द्वितीये शिबिका भवेत्।

तृतीये गरुडं प्रोक्तं चतुर्थे रथमेव च॥ ५१॥

पञ्चमे दोलिकायानं षष्ठे वै कुञ्जरं तथा।

सप्तमे पुष्पयानं स्यादष्टमे चाश्ववाहनम्॥ ५२॥

नवमे कुञ्जरप्रभा दशमे कुञ्जरं भवेत्। - अनिरुद्धे - २१

<u>यान भेदाः</u>

यानबेरमलङ्कृत्य यानमारोप्य दीक्षितः।

रथं वा कुञ्जरं वाऽपि शिबिकां वा यथारुचि॥ २५॥

शकटं ब्राह्मणं(?) वापि भ्रामयेद्गरुडध्वजम्। - कपिञ्जले -२३

<u>नित्यं रथे भ्रमणम् -अन्यत्र विधिश्च</u>

समारोप्य रथं युक्तं चतुर्भिर्हस्तिपुङ्गवैः॥१००॥

वाजिभिर्वा बलीवर्दैः शीघ्रगामिभिरुत्तमैः।

कल्पकद्रुमसंयुक्तं हेमपीठमलङ्कृतम्॥१०१॥

रथस्योपरि कृत्वा च नयेदास्थितसारथिम्।

यन्त्रेण वा विप्रवरैरधीयानैर्बलान्वितैः॥१०२॥

गजे वा स्यन्दनालाभे याने वा तदसम्भवे।

भद्रं कर्णेति मन्त्रेण यानमारोपयेद् गुरुः॥१०३॥

स पुष्पहेमप्रभया युक्तं पुष्पैरलङ्कृतम्।

हैमेन च वितानेन युक्तं पुष्पादिशोभिना॥१०४॥

कूटाकारेण वा युक्तं मयूरच्छदशोभिना।

सर्वालङ्कारयुक्तेन सुमनःपरिवेषिणा॥१०५॥ - पाद्मे - ११

<u>देवस्य रथारोहण -रथभ्रमणविधिः -रथलक्षणञ्च</u>

स्वस्तिसूक्तमुखैर्विप्रैः सह निष्क्रम्य धामतः।

रथन्तरं साम पठन् रथमारोपयेद् बुधः॥९५॥

कल्पद्रुमसमायुक्तं हैमशैलमिवापरम्।

गजोत्तमैश्चतुर्भिर्वा वाजिश्रेष्ठैः सुयोजितम्॥९६॥

पुर स्थितं(?)सारथिना नयेद्यन्त्रेण देशिकः।

अथवा वेदपठनं कुर्वद्भिर्द्विजपुङ्गवैः॥९७॥

महापाशैः सुबद्धैश्च नयेदाकृष्य तं रथम्। - विश्वामित्रे - १८

<u>(सर्वोत्सवेषु) रथाभावे विधिः - वाहनारोहण मन्त्रश्च</u>

रथाभावे गजं वाश्वं शिबिकां वाधिरोपयेत्॥९८॥

भद्रं कर्णेतिमन्त्रेण वाहनान्यधिरोपयेत्। - विश्वामित्रे – १८

<u>देवस्य शिबिकारोपण मन्त्रः</u>

इदं विष्णु रितिश्रुत्या शिबिकायां निवेशयेत्।

वहेयुर्ब्राह्मणाः यानं ध्यायन्तो विहगाधिपम्॥१५॥ - भार्गवतन्त्रे - १२

<u>देवस्य यानारोपण मन्त्रः</u>

देवस्य वीथिभ्रमणक्रमं वक्ष्यामि शोभने।

श्री भूमिसहितं देवं देशिको मन्त्रवित्तमः॥२२॥

उत्तिष्ठ ब्रह्ममन्त्रेण देवमुत्थापयेद् रमे।

दीक्षिताभ्यामपि द्वाभ्यां भद्रं कर्णेति मन्त्रतः॥२३॥

यानमारोपयेद् देवं वस्त्रमाल्यविभूषणैः।

अलङ्कृत्य रमानाथं दर्पणं च प्रदर्शयेत्॥२४॥ - श्रीप्रश्ने – ३५

<u>यानारोपणात्परं देवस्य पूजाविधिः</u>

याने तत्र समासीनमभ्यर्च्य न्यासपूर्वकम्।

देवं निवेदयेत्तस्मै भक्ष्यं च पृथुकादिकम्॥१०६॥ - पाद्मे - ११

<u>यात्रा परिमित निर्णयः</u>

एकयोजनपर्यन्तां यात्रां कुर्याद्विचक्षणः॥१०८॥

नाधिकायं नापि तां न्यूनां मर्यादैषा हि तान्त्रिकी। - वैहायसी - १३

<u>ग्राम रहित आलये उत्सव क्रमः</u>

पत्तने नगरे ग्रामे प्रतिलोमानधिष्ठिते॥२६॥

अशून्ये बलिदानादिरथ्यासु बहिराचरेत्।

नो चेदावरणेष्वेव कुर्यादन्तर्महोत्सवम्॥२७॥

ग्रामादिरहिते धाम्नि नोत्सवं बहिराचरेत्।

अन्तरावरणेष्वेव न तु त्याज्यं कथञ्चन॥२८॥ - पाद्मे – १०

<u>उत्सवे प्रतिदिनं वीथिमार्जनम्</u>

यदाभूदङ्कुरारोपस्तदा प्रभृति नित्यशः।

मार्जनं ग्रामवीथीनां कृत्वासिच्य यथाविधि॥३४॥ - सनत्कुमारे -शिवरात्रे - ९

<u>उत्सवार्थबिम्ब विषये</u>

उत्सवार्थं तु विहितं बिम्बं यत्पूर्वलक्षणम्।

अथवा बलिबिम्बं वा कर्मबिम्बं तु वा द्विज॥२॥ - नारदीये – १९

<u>विथिषु बलिदेशेषु तेषामन्तरालेषु उपचाराः</u>

नैकैः परिकरैर्युक्तं बहुदीपसमन्वितम्॥४५॥

अन्तरावरणपूर्वं वीथ्यावरणपश्चिमम्।

बलिस्थाने तु संप्राप्ते ताम्बूलं चन्दनं ददेत्॥४६॥

मध्यदेशे तु संप्राप्ते जलक्रीडां समाचरेत्।

एवं कृत्वा विशेषेण महामण्डपमानयेत्॥४७॥ - अनिरुद्धे - २१

<u>वीथिभ्रमण विधिः (सायं प्रातः भ्रमणम्)</u>

औत्सवं बिम्बमादाय देवीभिः सह यत्नतः।

आरोप्य शिबिके याने भक्तैर्भागवतैस्सह॥ ३३॥

छत्रचामरसंयुक्तमातपत्रैर्मनोहरैः।

विचित्रैस्तालवृन्तैश्च मायूरव्यजनैस्ततः॥ ३४॥

केतुदण्डैर्विचित्रैश्च दुकूलपटशोभितैः।

भेरीमृदङ्गपूर्वाणां घोषैरन्यैश्च मङ्गलैः॥ ३५॥

चतुर्वेदमयैर्घोषैः स्तोत्रघोषसमन्वितैः।

गीतकैर्विविधैर्वाद्यैः शङ्खकाहलनिस्वनैः॥ ३६॥

सुवेषगणिकासङ्घैस्तथा भक्तजनैस्सह।

भ्रामयित्वा क्रमेणैव सर्वाण्यावरणानि च॥ ३७॥

एवं प्रतिदिनं कुर्यादहोरात्रं विशेषतः। - मार्कण्डेये - २२

<u>बलिदान पुरस्सरं वीथि भ्रमणक्रमः -पुनः पुनः प्रदक्षिणम्</u>

वाहयेद्ब्राह्मणैर्देवं शिबिकास्थं प्रसन्नधीः॥ ६४॥

देवस्य पुरतो दूराद्गच्छेयुः बलिदायिनः।

प्रदक्षिणं परिभ्रम्य प्रासादं तु पुनः पुनः॥ ६५॥

प्रदीपशतसंयुक्तं रात्रौ कार्यं महोत्सवम्।

नगरं पत्तनं ग्राममन्यद्वा समलङ्कृतम्॥ ६६॥

प्रदक्षिणं परिभ्रम्य बलिदानपुरस्सरम्। - नारदीये - १९

<u>भ्रमण क्रमः</u>

ग्रामे वा नगरे वापि पट्टणे वा मुनीश्वराः।

प्रदक्षिणक्रमेणैव परिभ्रमणमाचरेत्॥ २२३॥ - ईश्वरे - ११

<u>सावधानेन भ्रमणम्</u>

गजोत्तमसमारूढैः छत्रच्छायासु संस्थितैः।

निषेव्यमाणं देवेशं नातिशीघ्रं न लम्बितम्॥१०८॥

प्रदक्षिणं नयेद्धामसर्वावरणभूमिषु। - विश्वामित्रे - १८

<u>वीथिभ्रमणे देवस्य पुरतः गरुडध्वजः पृष्ठे विष्वक्सेनस्य अनुयात्रा</u>

यानारूढेन पुरतो रचिताञ्जलिकर्मणा।

उच्चैर्ध्वजाधिरूढेन तथा तार्क्ष्येण पद्मज॥१११॥

पृष्ठतश्च प्रणमता शिबिकां कनकोज्ज्वलाम्।

आरूढेन विरिञ्चादीन् समुत्सारयता बहिः॥११२॥

विष्वक्सेनेन देवेन वेत्रहस्तेन सेवितः।

उपानहौ पादुके च पात्रे कनकनिर्मिते॥११३॥

समारोप्य पुरो विप्रैर्धारयिद्भिरलङ्कृतैः। - पाद्मे - ११

<u>देवस्य पुरतः परिचारकैः पादुकावहनम्</u>

पादुके रत्नखचिते पात्रे हेमादिनिर्मिते।

विन्यस्य देवपुरतो वहद्भिः परिचारकैः॥२३०॥ - ईश्वरे - ११

<u>देवस्य वीथिभ्रमणे स्वर्णातपत्र -विविधतोरण -ध्वज -वाद्यादि वर्णनम्</u>

हेमानिचातपत्राणि रत्नवन्ति महान्ति च।

श्वेतातपत्रं देवार्हं हेमदण्ड विभूषितम्॥३३॥

मायूराण्यातपत्राणि रत्नदण्डानि वै रमे।

मुक्ताफलैर्निर्मितानि राजतानि शुभानि च॥३४॥

चित्राणि हेमदण्डानि रत्नदण्डानि चापरे।

तोरणानि विचित्राणि पुत्रिकाश्चसहस्रशः ॥ ३५॥

ध्वजान् रक्तान् सितांस्ताम्रांश्चक्रादिलिखितानपि।

शङ्खभेरीमृदङ्गाद्यैर्झल्लरी काहली तथा॥ ३६ ॥

बृहद्भेरी नागवाद्यं मल्लवाद्यं महास्वनम्।

तूर्याणि विविधानि स्युर्वीणावेणुसकांस्यकम्॥ ३७॥

एतान् पारशवा देवि वादयेयुः पुरो हरेः। - श्रीप्रश्ने – ३५

<u>ग्राम भ्रमणसमये भगवत्परितो यातव्यानां वेदविदां शास्त्रज्ञानाञ्च निर्णयः</u>

प्रदक्षिणं नयेद् ग्रामं सर्वावरणभूमिषु॥ ४३ ॥

अधीयानैश्च चतुरो वेदान् साङ्गांश्च सर्वशः।

इतिहासपुराणानि पठद्भिः स्तोत्रपद्धतिम्॥ ४४॥

गायद्भिश्च हसद्भिश्च नृत्यद्भिश्च समन्ततः।

वावदूकैर्बहुविधैः भाषमाणैश्च प्राकृताः ॥ ४५॥

सांख्ययोगविभागज्ञैः शाब्दिकैस्तत्त्वचिन्तकैः।

सांवत्सरगणैश्चैव परस्परजयोद्यतैः ॥ ४६ ॥

पञ्चरात्रार्थतत्त्वज्ञैः सेवितैः सात्वतैर्जनैः।

काषायवसनैश्चैवं यतिभिर्ब्रह्मचारिभिः ॥ ४७॥

एकदण्डधरैश्चैवं बहुदण्डधरैस्तथा।

ग्रामवीथिसमन्ताच्च परिभ्राम्य प्रदक्षिणम्॥ ४८॥ - पद्मोद्भवे - २८

<u>उत्सव समये बिम्बरक्षकादीनां गमनम् इत्यादि</u>

विष्णोर्यानस्य परितो भगवद्बिम्बरक्षकाः॥२८॥

शरचापधराः केचिच्छाक्तिका याष्टिकाःपरे।

नैस्त्रिंशिकाश्च काण्डीरास्तथा फलकपाणयः॥२९॥

कौन्तिका द्रुघणाः केचित् कञ्चुकोष्णीषधारिणः।

पुरतो देवदेवस्य चतुरङ्गं बलं व्रजेत्॥३०॥

केचिद्रथे समासीना धनुर्बाणसमन्विताः।

औपवाह्यगजारूढा गरुडध्वजधारिणः॥३१॥

केचिन्नृत्यत्तुरङ्गस्थाः केतुदण्डधराः परे।

तालवृन्तधराः केचिद् धूपपात्रवहास्तथा॥३२॥ - श्रीप्रश्ने - ३५

<u>एककालं वा द्विकालं वा वीथिभ्रमणविधिः</u>

यात्राचोत्सवबिम्बस्य द्विकाले चोत्तमा भवेत्॥५६॥

एककालमथोवापि कर्तुरिच्छानुरूपतः।

अपूर्वाभरणैर्माल्यैरपूर्वैश्चाम्बरैस्तथा॥५७॥

अपूर्वोद्यानयानाद्यैर्यथाकौतूहलं भवेत्। - अनिरुद्धे - २१

<u>देवीभ्यां सह वा भ्रमणम् -वाहनार्चनम् -वाहनारोपणात्पूर्वं पुण्याहविधिः</u>

यात्राबिम्बगतं देवं देवीभ्यां सह वा विना॥२१६॥

अलङ्कृत्य विशेषेण विचित्रवसनैस्तथा।

विविधैर्भूषणैश्चापि माल्यैर्नानाविधैस्तथा॥२१७॥

अलङ्कृतं विशेषेण यानं हेमादिनिर्मितम्।

समानीय तु संप्रोक्ष्य ध्यात्वा गरुडरूपिणम्॥२१८॥

तन्मन्त्रेण समभ्यर्च्य यानमर्घ्यादिभिस्ततः।

कृत्त्वा पुण्याहघोषञ्च श्रुतिघोषसमन्वितम्॥२१९॥ - ईश्वरे - ११

देवीभ्यां सह वा विना वा भ्रमणम्

उत्सवार्चां समादाय देवीभ्यां सह वा विना।

आस्थानमण्डपे देवं यानमारोप्य देशिकः॥१२४॥ - विष्णुतिलके - ८

यात्रायाम् अस्पृपृश्यदोषाभावः

यात्रायां वर्तमानायामस्पृश्यस्पर्शने सति॥१३७॥

अशुचिर्न भवेन्मन्त्री सर्वे पूता यतस्तदा। - नारदीये - १९

वाहकानां लक्षणम्

कैङ्कर्य निरताः सर्वे वैष्णवा धवलाम्बराः॥२६॥

कञ्चुकोष्णीषवहनाः पुष्पभूषणभूषिताः।

वहेयुर्वैष्णवा यानं ध्यायन्तो विहगेश्वरम्॥२७॥

अथवा वैष्णवाः शूद्राः वहेयुर्भक्तिसंयुताः। - श्रीप्रश्ने - ३५

वाहकानां वैनतेयाभ्यर्चनम्

यानं वहत्सु विप्रेषु वैनतेयं समर्चयेत्।१२६॥ - विष्णुतिलके - ८

सुदर्शनान्नमूर्तिभ्यां सह विनापि वा वीथिभ्रमणम्

सुदर्शनान्नमूर्तिभ्यां सहिताभ्यां विनापि वा।

सह बल्यर्चया कुर्याद्विना वा तं महोत्सवम्॥१८७॥

केवलोत्सवबिम्बेन दिनेष्ववभृथावधि। - पाद्मे – ११

<u>वीथिभ्रमणकाले वेदादि पारायणम्</u>

घोषयेयु र्द्विजश्रेष्ठा वेदान् देवस्य पृष्ठतः।

पठेयुः पद्यगद्यानि स्तुतिं वा देवपृष्ठतः॥१२९॥

ग्रामं सर्वं परिक्रम्य अवरोप्य च मण्डपे। - विष्णुतिलके - ८

<u>वीथिभ्रमणकाले द्रामिडवेद पारायणम्</u>

गायद्भिरग्रे देवस्य द्रामिडीं श्रुतिमुत्तमाम्।

तथा भाषाप्रबन्धांश्च गद्यपद्यात्मकानि च॥२३६॥ - ईश्वरे - ११

<u>भगवद्दर्शनासक्तेभ्यः उद्दिश्य वीथिभ्रमणम्</u>

तथा च वैष्णवीभक्त्या ब्रुवाणैर्वैष्णवोत्तमैः।

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च भगवत्परैः॥२३७॥

भगवद्दर्शनासक्तचित्तैः प्रणतिशालिभिः।

सेनया सर्वतो दिक्षु चतुरङ्गबलाढ्यया॥२३८॥

राजोचितैः परिकरैरन्यैश्च विविधैः सह।

देवं ग्रामादिवीथीषु भ्रामयेत्तु प्रदक्षिणम्॥२३९॥ - ईश्वरे - ११

<u>वीथिभ्रमणे भक्तानुग्रहार्थं पादुका दापनम् (भट्टारकः देवभावश्च)</u>

भट्टाचार्यः पीठभागे साधको वामपार्श्वगः॥५२॥

आगतेभ्यश्च भक्तेभ्यो दद्याच्छिरसि पादुकाम्।

तन्मयत्वाद्देशिकेन्द्रो देवोऽहमिति भावयन्॥५३॥

कुर्यादनुग्रहं सर्वं देवस्यालोक्य चाननम्।

अभिप्रायं यथा राज्ञो ज्ञात्वा तेन प्रदर्शितम्॥५४॥

ब्रुवन्ति तत्समीपस्था राज्ञां तत्तदनुग्रहम्।

एवं भक्ताननुग्राह्याननुगृह्णन् गुरूत्तमः॥५५॥ - श्रीप्रश्ने - ३५

<u>वीथिभ्रमणे देवस्य निवेदनम्</u>

यात्रायां वर्तमानायां देवदेवाय भक्तितः।

मुखवासं सताम्बूलं बहुशो विनिवेदयेत्॥२४०॥

चन्दनं श्रमशान्त्यर्थं कर्पूराद्यैः सुभावितम्।

प्रदद्याद्देवदेवाय माल्यानि विविधान्यपि॥२४१॥

शीतळं तर्पणजलं नाळिकेरजलान्वितम्।

श्रमशान्तिनिमित्तानि अन्यान्यपि निवेदयेत्॥२४२॥ - ईश्वरे - ११

<u>वीथिभ्रमणे फल निवेदनं - वस्त्र माल्य समर्पनं - पक्वानि न निवेदनम्</u>

देवं चतुर्षु वीथीषु भ्रामयेच्च प्रदक्षिणम्।

वीथीषु याति देवेशे भक्ष्याणि न निवेदयेत्॥३३॥

भक्त्या दत्तानि वस्त्राणि माल्यानि विविधानि च।

अभिमन्त्रयास्त्रमन्त्रेण सप्तवारं गुरूत्तमः॥३४॥

देवाङ्गे योजयेत् तानि फलादीनि निवेदयेत्। - श्रीप्रश्ने - ३६

<u>वीथिषु देवस्य निवेदन क्रमः - वस्त्रादि समर्पणम्</u>

दिवसानुगुणानन्यान् ध्वजादीन्विष्वगुच्छ्रितान्।

ताम्बूलवीटिकां दत्त्वा स्थाने स्थाने समाहृताम्॥१३८॥

पृथुकादींस्तथा भक्ष्यान्नालिकेरफलानि च।

पानीयाचमनादीनि चोदितानि यथाविधि॥१३९॥

दत्त्वा निवेद्यमखिलमद्भिः प्रोक्ष्यास्त्रविद्यया।

निवेदयेदपूपादीन् पक्वं तूष्णीं प्रदर्शयेत्॥ १४०॥

पानीयं च तथा स्वादु पयःप्रभृति चाहृतम्।

पुष्पमालादि यच्चान्यच्चन्दनक्षोदभाजनम्॥ १४१॥

भूषणं चाङ्गुलीयादि भक्त्या यत्प्रतिदीयते।

प्रोक्ष्य सर्वमथास्त्रेण देवाङ्गे योजयेद् गुरुः॥ १४२॥

ग्रामं प्रदक्षिणं नीत्वा तथैवावरणानि च। - पाद्मे - ११

<u>भक्तप्रार्थणया देवं तत्कृत मण्डप निवेशनम्</u>

भक्तप्रार्थनया देवं तत्कृतं मण्डपं नयेत्।

तत्र स्नानासने देवं स्नापयेद् गन्धवारिभिः॥ ३८॥

ततः सौवर्णपीठे तु स्थापयेज्जगतां पतिम्।

वस्त्राभरणमाल्याद्यैरलङ्कृत्य यथाविधि॥ ३९॥ - श्रीप्रश्ने - ३६

<u>वीथिभ्रमणानन्तरं पुनरपि आलयभ्रमणं - मण्डपप्रवेशनम्</u>

ग्रामवीथीः समन्ताच्च परिभ्राम्य प्रदक्षिणम्॥ ११४॥

प्रवेशसमये चापि धाम्नः सर्वावृतीरपि।

प्रदक्षिणं परिक्रम्य प्रविशेन्मण्डपोत्तमम्॥ ११५॥ - विश्वामित्रे – १८

<u>महापीठस्य पुरतः पारायण समापनम्</u>

महापीठस्य पुरतो देवमर्घ्यादिभिर्यजेत्।

अपूपानुपहारांश्च ताम्बूलादीन्निवेदयेत्॥ २५१॥

देवाग्रे चतुरो वेदान् पाठयेत्तदनन्तरम्।

पाठयेद्रामिडीं चापि स्तुतिं वैष्णवसत्तमैः॥२५२॥

शङ्खमद्दलनादैश्च नृत्तगीतादिभिः सह।

भ्रामयेद्देवदेवेशं प्रादक्षिण्येन मन्दिरम्॥२५३॥ - ईश्वरे - ११

<u>वीथिभ्रमणानन्तरं घटदीप दर्शनम् - दासी लक्षणम्</u>

महापीठस्य पुरतो मूलार्चाभिमुखं हरिम्॥५६॥

स्थापयित्वा दृष्टिदोषान् परिहर्तुं गुरूत्तमः।

दासीन्नियोजयेत् कुम्भदीपमानेतु मञ्जसा॥५७॥

सुस्नाता धौतवसना स्वच्छमृत्स्नोर्ध्वपुण्ड्रकाः।

तरुणी नम्रवदना सर्वाभरणभूषिताः॥५८॥

सम्प्राप्तपञ्चसंस्कारा वैष्णवी भाविता स्वयम्। - श्रीप्रश्ने - ३५

<u>घटदीप लक्षणम् - अलङ्कारश्च</u>

नीराजनार्थं देवस्य तालोत्सेधं सलक्षणम्॥५९॥

हेमादिनिर्मितं कुम्भं शोधयेत् गानपूर्वकम्।

सिद्धार्थवारिणापूर्य स्वर्णाब्जेन पिधाय च॥६०॥

अश्वत्थपल्लवैः स्रग्भिश्चन्दनैरक्षतैरपि।

घटं तु समलङ्कृत्य पद्मगर्ते सुनिर्मलम्॥६१॥

आज्यावसिक्तवर्तिञ्च स्थापयेच्चतुरङ्गुलाम्।

पाकशालाग्निनादीप्य वाद्यघोषपुरः सरम्॥६२॥ - श्रीप्रश्ने - ३५

<u>घटदीपपूजनं -समर्पनमन्त्राः तत्क्रमश्च</u>

देवस्य पुरतोपीठे स्थापयेद् घटदीपिकाम्।

दीपिकामस्त्रमन्त्रेण सम्प्रोक्ष्य गुरुसत्तमः ॥ ६३ ॥

जले तु वरुणं देवं ज्वालायां जातवेदसम्।

आवाह्य गन्धपुष्पाद्यैरर्घ्याद्यैरभिपूजयेत् ॥ ६४ ॥

अर्घ्यादिना देवदेवमभ्यर्च्य तदनन्तरम्।

दीपमुद्रां प्रदर्श्याथ दीपमादाय देशिकः ॥ ६५ ॥

देवस्य दक्षिणं पादमारभ्येतर पश्चिमम्।

भ्रामयेत् सर्वतोऽङ्गानि द्विवारं वा त्रिवारकम् ॥ ६६ ॥

नेत्रमन्त्रं जपन्नेव ततः पीठे निवेशयेत्। - श्रीप्रश्ने - ३५

<u>वीथिभ्रमणानन्तरं वाद्यवादकैः त्रिः भ्रमणम् - मुद्गदल निवेदनम्</u>

एवं सर्वविधैर्वाद्यैस्त्रिर्देवं वाहने स्थितम्।

कृत्वा प्रदक्षिणं सर्वा बलिपीठपुरो भुवि ॥ ६९ ॥

क्षिपेयुर्दीपिकाः सर्वा यद्वा नीराजनं चरेत्।

सशर्करं मुद्गदलं पृथुकं च निवेद्य च ॥ ७० ॥

ततो नीराजनं कृत्वा मण्डपे स्थापयेद्धरिम्। - श्रीप्रश्ने – ३५

<u>वीथिभ्रमणानन्तरम् स्नपनम् (श्रमशान्त्यर्थं)</u>

नीराज्य यानाद्देवेशं अवरोप्य ततःपरम्।

यथास्थानं समावेश्य स्नापयेत् कलशैस्ततः ॥ १३२ ॥

वीथीपर्यटने प्राप्ते स्नानं देवस्य कीर्त्यते। - विष्णुतिलके - ८

<u>प्रत्यहं स्नपनम्</u>

प्रत्यहं स्नपनं कुर्याद्यथाशक्ति यथावसु ॥ १३३ ॥

महाहविर्निवेद्याथ बिम्बे कल्याणकल्पिते। - पाद्मे - ११

<u>उत्सवे नित्यं स्नपनम् - एकबेरे मूलबिम्बे स्नपनम्</u>

तद्बिम्बे स्नपनार्थे वा स्नपनं विदधीत च॥ ११९॥

एकबिम्बविधौ कुर्यान्मूलबिम्बेऽभिषेचनम्।

स्नापयेच्च प्रतिदिनं यथाविभवविस्तरम्॥ १२०॥ - विश्वामित्रे - १८

<u>ग्रामयात्रोद्यत देवार्चनेन -देवेनानुगच्छन्तिनः -नृत्तकादिनां फलानि</u>

ग्रामयात्रोद्यतं देवं योऽर्चयेद्भक्तिपूर्वकम्॥ ६९॥

भक्ष्यैर्भोज्यैश्च लेह्यैश्च चोष्यैः पेयैः सुसंस्कृतैः।

तस्य पुण्यफलावाप्तिं कश्शक्नोत्यभिवर्णितुम्॥ ७॥

अनुगच्छन्ति ये भक्ता कौतुकं कौतुकान्विताः।

विमुक्तकल्मषास्ते स्युः क्रमात् पारिषदेश्वराः॥ ७१॥

नृत्यन्त्यत्र च ये हर्षात् लुठन्ति च रमन्ति च।

आस्फोटयन्ति ये हर्षात् अपवर्गं सवाप्नुयुः॥ ७२॥ - नारदीये - १९

<u>देवेन सह वीथिभ्रमणे फलम्</u>

स्त्रियो द्विजाश्च हृष्टाश्च भक्ताश्च जयपाठकाः॥ ४८॥

देवस्य परितो गत्वा मुच्यन्तेऽखिलपातकैः। - विष्णु संहिता - २०

<u>देवस्य भ्रमणकाले - छत्र चामर धारणे फलम्</u>

गेह सम्मार्जने विष्णोर्जन्म साफल्यमुच्यते।

धारणे चामरादीनां स्वर्गलोकस्थितिर्लभेत्॥ ९७॥

वहने- छत्र-वेत्राच अभीष्टार्थान् लभेन्नरः।

देवस्य वहनेसाक्षात् विष्णुसायुज्यमीरितम्॥९८॥

पुष्पमाल्यादि दानंस्यादसमंफल दायकम्।

आलयेनृत्य गीताद्यै रिष्टार्थान् लभते नरः॥९९॥

वाद्यघोषादिकरणे हरेः प्रीतिर्भवेद्ध्रुवम्।

स्तोत्रादि पठने विष्णोः सायुज्यं समवाप्नुयात्॥१००॥ - परमपुरुषे - ४

<u>गरुडारूढ देवस्य दर्शननेन फलाधिक्यम्</u>

गरुडारूढ विष्णोस्तुसेवामोक्षफलप्रदा॥६५॥

महोत्सवे प्रवर्तेतुभगवद्दर्शनं भुवि।

असमानफलप्राप्तिहेतु भूतमितीरितम्॥६६॥ - परमपुरुषे - ४

<u>यानस्थित देव दर्शने फलम्</u>

देवं पश्यति यानेऽस्मिन् दूरतो वा समीपगः॥१०९॥

तेन किञ्चिद्धि कर्तव्यं लोकेऽस्मिन्नावशिष्यते।

दानं तपश्च यज्ञाश्च सुकृतं कृतमेव हि॥११०॥ - वैहायसी - १३

<u>महोत्सवे नित्याराधन प्रकारः</u>

पूर्वस्माद्विगुणैर्भोगैः नित्याराधनमुच्यते॥७९॥

ब्राह्मणान् भोजयेन्नित्यं दीक्षितांश्च विशेषतः।

एवं कृत्वोत्सवं सम्यक् प्रथमेऽहनि साधकः॥८॥ - नारदीये - १९

## <u>चूर्णाभिषेक विषयाणि</u>

<u>चूर्णाभिषेक वैशिष्ट्यम्</u>

चूर्णस्नानं ततः कुर्यात् श्रीसूक्तेनैव मन्त्रतः।

पूर्णाहुतिर्यथाहोमे चूर्णस्नानं तथा भवेत्॥ ३३॥ - पद्मोद्भवे - २८

<u>(नवमेहनि)चूर्णाभिषेके उलूखल -मुसल अभिमन्त्रण मन्त्रः</u>

देवस्य तु पुरोभागे धान्यराश्यामुलूखलम्॥ १८३॥

स्थापयित्वा ततो लक्ष्मीं ध्यायेच्छ्रीसूक्त वर्त्मना।

क्षालितं मूलमन्त्रेण मन्त्रितं मुसलं गुरुः॥ १८४॥

मूर्तिपैश्च समादाय निशाचूर्णं तु घट्टयेत्। - पुरुषोत्तमे - २४

<u>चूर्णोत्सवे उलूखल - मुसल पूजा</u>

सप्तमेहनि सायाह्ने-------।

उलूखलं मण्डयित्वा विन्यसेत् वस्त्रवेष्टितम्।

श्रीसूक्तेन श्रियं ध्यायन् अर्चयित्वाऽभिमन्त्र्य च॥ १३९॥

मूलमन्त्रेण मुसले देवं ध्यायन् समर्चयेत्। - विष्णुतिलके - ८

<u>चूर्णाभिषेक विधिः</u>

रजनीचूर्णमादायोलूखले तु विनिक्षिपेत्।

उलूखलं मुसलं चैव प्रक्षाल्याभ्यर्च्य देशिकः॥ ६२॥

आचार्योवकटीं पूर्वं गणिकाभिरनन्तरम्।

चूर्णेन घट्टनं वापि पञ्चकं त्रितयन्तु वा॥ ६३॥

स्थण्डिले संप्रतिष्ठाप्य कूर्चञ्चैव विनिक्षेपेत्।

अभ्यर्च्य पुंसिमन्त्रेण? पुण्याहं चैव कारयेत्॥ ६४॥

पुनरभ्यर्च्य देवेशं चूर्णस्नानं समाचरेत्। - अनिरुद्धे – २१

<u>(नवमेहनि)वैष्णवीभिः चूर्ण घट्टनम्</u>

चतुर्भिर्वैष्णवैश्चापि वैष्णवीभिस्तु वा यथा॥ १८५॥

घट्टयेश्च निशाचूर्णं तथा सूक्ष्मतरं भवेत्। - पुरुषोत्तमे – २४

<u>चूर्णकुम्भे सुवर्णप्रतिमा -कुम्भरत्नादीनां निक्षेपनम्</u>

सौवर्णादिमयं कुंभं सूत्रवस्त्रादिवेष्टितम्।

धान्यराशौ समावेश्य निशाचूर्णेन पूरयेत्॥ ६९॥

सौवर्णलक्ष्मीप्रतिमां रत्नानि च निवेशयेत्।

कूर्चं च पल्लवं चापि शरावेण पिधापयेत्॥ ७०॥

तत्र श्रियं समावाह्य साङ्गं पूजां समाचरेत्। - भार्गवतन्त्रे - १२

<u>(सप्तमोत्सवे) चूर्णकुम्भ सङ्ख्या</u>

सप्त वा पञ्चा वा कुम्भानेकं वा शुद्धयेत् ततः॥ ७६॥

चूर्णैः सम्पूरितं कुम्भं देवस्य पुरतो रमे।

धान्यपीठे विनिक्षिप्य शोषयेच्छोषणादिभिः॥ ७७॥ - श्रीप्रश्ने - ३६

<u>षष्ठेऽहनि चूर्णाभिषेकः - तत्क्रमश्च</u>

षष्ठे दिने तु सम्प्राप्ते तन्निशायां दिवापि वा॥ २६२॥

बल्यन्तमर्चनं कृत्वा देवमास्थानमण्डपे।

भद्रासने समारोप्य पुरतस्तस्य शोधिते॥ २६३॥

भूतले धान्यपीठे तु चूर्णकुम्भं च विन्यसेत्।

प्रोक्ष्य पुण्याहतोयेन श्रियं तत्र समर्चयेत्॥ २६४॥

सदर्भवस्त्रेणाच्छाद्य चक्रं तत्र नियोजयेत्।

रक्षार्थं च ततो देवमर्घ्याद्यैर्हविरन्तिमैः॥ २६५॥

समभ्यर्च्य च हारिद्रं चूर्णमादाय देशिकः।

श्रीसूक्तमुच्चरन् -देवं चूर्णैः समभिषेचयेत्॥ २६६॥ - ईश्वरे - ११

<u>चूर्णाभिषेक मन्त्रः</u>

मूलमन्त्रेण विधिवत्तैश्चूर्णैरभिषेचयेत्॥ ७१॥

श्रीसूक्तविद्ययाभ्यर्च्य यथाविधि यथापुरम्। - भार्गवतन्त्रे - १२

<u>(सप्तमोत्सवे) मूलबेरस्य चूर्णाभिषेकानन्तरम् उत्सवबेरस्य अभिषेकः</u>

नीराजनं ततः कृत्वा श्रियं चूर्णे समर्चयेत्।

चूर्णकुम्भं समादाय वाद्यघोषपुरः सरम्॥ ७९॥

प्रादक्षिण्येन धामान्तः प्रविश्य गुरुसत्तमः।

चूर्णैः श्रीसूक्तमुच्चार्य मूलार्चामभिषेचयेत्॥ ८०॥

ततः श्रीपुष्टिसहितं कर्मार्चां स्नापयेद्रमे। - श्रीप्रश्ने - ३६

<u>चूर्ण धारणे फलम्</u>

आराध्य गन्धपुष्पाद्यैः रजनीचूर्णमुत्तमम्।

सौवर्णेन समायुक्तं दत्त्वा देवस्य मूर्धनि॥ १२२॥

प्रतिमा प्रतिमृज्याथ भक्तानां मूर्ध्नि निक्षिपेत्।

गङ्गास्नानफलं चूर्णं सर्वपापप्रणाशनम्॥ १२३॥

क्रीडया वापि तच्चूर्णं मूर्ध्नि कुर्यात्तु मानवः।

तस्य देहगतं पापं तदह्नाय विनश्यति॥ १२४॥

तस्मात्तच्चूर्णकं मूर्ध्नि धारयेत्सततं बुधः।

यजमानस्य तद्राज्ञो मूर्ध्निस्थं तु जयप्रदम्॥१२५॥ - नारदीये – १९

## जलद्रोण्युत्सव विषयाणि

जलद्रोण्युत्सवः

कस्मिंश्चित् दिवसे पश्चात् कारिते मङ्गलोत्सवे।

स्नापयेत्सह देवीभ्यां जलद्रोण्यां जगत्प्रभुम्॥७४॥

अपराह्णे तु सम्प्राप्ते शिबिकायां जगत्प्रभुम्।

श्रीभूमिभ्यां समारोप्य नदीतीरं नयेद्गुरुः॥७५॥ - भार्गवतन्त्रे - १२

जलद्रोण्युत्सव कालः

उत्सवं देवदेवस्य प्रातरारभ्य मङ्गलम्।

अपराह्णे जलद्रोण्यामवगाहनमिष्यते॥१८९॥ - पाद्मे - ११

(षष्ठोत्सवे) जलद्रोण्युत्सवः - जलद्रोणी लक्षणम्

मण्डपस्यैकदेशे तु शालितण्डुलनिर्मिते।

विष्टरे तु जलद्रोणीं सौवर्णीं वाथ राजतीम्॥२६७॥

ताम्रजां वा यथालाभं चतुस्त्रिर्द्विकरायताम्।

तदर्धविस्तृतामूर्ध्वे मूले तत्पादविस्तृताम्॥२६८॥

वृत्तायतामधोभागे प्रणालेन समन्विताम्।

उन्मत्तकुसुमाकारसदृशी -मथवा द्विजाः॥२६९॥

बिम्बमानानुरूपां तां सर्वलक्षणसंयुताम्।

निवेश्य तां समापूर्य गालितेन जलेन तु॥२७०॥ - ईश्वरे - ११

<u>जलद्रोण्युत्सवे - द्रोण्यां लक्षणम्</u>

षष्ठेऽहनि गजारोहात् पूर्वं देशिकसत्तमः।

उद्याने मण्डपे वापि देवस्य पुरतो भुवि॥४९॥

धान्यपीठे जलद्रोणीं सौवर्णीं वाथ राजतीम्।

ताम्रजां वा दारुमयीं त्रिहस्तायामनिर्मिताम्॥५०॥

एकार्धहस्तविस्तीर्णां बिम्बनाभिसमुन्नताम्।

स्थापयित्वा परिस्तीर्य पूरयेद् गन्धवारिभिः॥५१॥ - श्रीप्रश्ने - ३६

<u>द्रोण्यां जल पूरणम्</u>

तत्र मध्ये धान्यपीठं परिकल्प्य मनोहरम्।

सौवर्णीं वा राजतीं वा जलद्रोणीं निवेशयेत्॥८१॥

कुङ्कुमक्षोदकर्पूरकस्तूरीरेणुमिश्रितैः।

चन्दनक्षोदभरितैरम्बुभिः परिपूरयेत्॥८२॥ - भार्गवतन्त्रे - १२

<u>जलद्रोणी पूजा</u>

सोपानदेशे सरसि जलद्रोणीं निवेशयेत्।

कटाहं वापि सौवर्णं पूरयेद्गन्धवारिभिः॥१९०॥

मुक्ताकाराण्यक्षतानि परितो विकिरेत् स्थले।

जलेष्वावाह्य गङ्गाद्यास्सरितस्तास्सभाजयेत्॥१९१॥ - पाद्मे - ११

<u>अवगाहनम् - तन्मन्त्रश्च</u>

जलेऽभिमन्त्रिते मन्त्रैरब्लिङ्गैर्देवमर्चितम्।

उपचारैर्यथापूर्वं स्नानान्तैरवगाहयेत्॥१९२॥

काले तस्मिन्नधीयीरन् सूक्तं वारुणमुच्चकैः(मुच्चरेत्)। - पाद्मे - ११

<u>जलद्रोण्यां देवस्य अवगाहनम्</u>

ततो देवं समानीय प्रवृत्ते वेदपाठके।

वाद्यघोष प्रवृत्ते तु स्वस्तिसूक्तं जपेद्गुरुः॥ १५०॥

निमज्जयेत्ततो देवं देवीभ्यां सह देशिकः।- पुरुषोत्तमे - २४

<u>देवस्य अवगाहन तीर्थ स्वीकारेण - प्रोक्षणेन - स्नानेन च फलम्</u>

अनुष्ठितमिदं तीर्थं ब्रह्माद्यैरपि दैवतैः।

एतैश्च तीर्थसलिलैः पीतैश्शिरसि धारितैः॥ १९५॥

स्नानैर्निर्धूतपाप्मानो यान्ति ब्रह्म सनातनम्। - पाद्मे - ११

<u>जलद्रोण्युत्सवे देवं आर्दवस्त्रेण वीथिभ्रमणं –तेन फलम्</u>

<u>(षष्ठोत्सवे) गजारोहणञ्च</u>

याने देवं समारोप्य सह स्नानार्द्रवाससा।

कुङ्कुमेनसमालिप्य आपादान्मस्तकावधि॥ २७४॥

भ्रामयेत्प्राङ्कणं वीथीं प्रीतये वरुणस्य च।

जनानामपि सर्वेषां पवित्रीकरणाय च॥ २७५॥

तत्काले देवदेवेशं भक्त्या पश्यन्ति ये द्विजाः।

ते सर्वे धूतपाप्मानो भवन्ति निरुपद्रवाः॥ २७६ ॥

ततस्तु मण्डपे देवं विष्टरे विनिवेश्य च।

स्नानवस्त्रादिसकलमाचार्यः स्वयमाहरेत्॥ २७७॥

ततो देवमलङ्कृत्य कुर्यात्संयग्गजोत्सवम्। - ईश्वरे - ११

## महोत्सवे मृगयात्रोत्सव विषयाणि

मृगायात्रादि कालाः

पूर्वेद्युस्तीर्थदिवसाद्देवस्य मृगया भवेत्।

मृगयादिवसात्पूर्वं जलद्रोण्यवगाहनम्॥ १८०॥

अवगाहदिनात्पूर्वदिवसे देवमर्चयेत्। - पाद्मे - ११

मृगयात्रार्थं रक्षाबन्धनम् - मृगयात्राक्रमञ्च

रक्षाबन्धं ततः कृत्वा ग्रामयात्रार्थमेव च।

अन्नं चतुर्विधं चैव देवाय च निवेदयेत्॥ ५९॥

अश्वमारोपयेद्देवं गच्छेयुः काननं प्रति।

रक्षसां मृगवेषाणां हत्वा तु नृपसत्तम॥ ६०॥

पुनरागम्य ग्रामादीन् आल्यं संप्रवेशयेत्। - मार्कण्डेये - २२

अष्टमेऽहनि डोलारोपणम् - अश्वारोपणम् - मृगयात्रा - प्रणयकलहोत्सवः

अष्टमेऽह्नि तु तद्रात्रौ डोलारोहणपूर्वकम्।

अश्वारोहं ततः कुर्यात् मृगयां चापि कारयेत्॥ ३१२॥

भक्तसन्त्राणलीलां च ब्राह्मे नगरशोधनम्।

प्रणयः कलहश्च स्याद्देव्योर्देवेन वै मिथः॥ ३१३॥

सन्धानमुभयोः कुर्यात् क्षम्यतामिति चोच्चरेत्। - ईश्वरे - ११

वने देवस्य पुरतः क्रूरमृगदर्शनम् - बाण विसर्जनम्

सेनां विन्यस्य परितः मध्ये क्रूरमृगस्थितिम्।

तथा कृत्वा भटांस्तत्र मृगान्बध्वा हरेः पुरः॥ १७८॥

दर्शयेयुर्मृगांस्तान्स्तान् मोचयेयुः क्रमाद्बहिः।

हतानां क्रूरजन्तूनां भवेत्पुण्यमनन्तकम्॥ १७९॥

देवस्य तु पुरोभागे धनुर्बाणौ प्रपूजयेत्।

चतुर्दिक्षु चतुर्बाणानूर्ध्वेचैकं विसर्जयेत्॥ १८०॥ - पुरुषोत्तमे – २४

## <u>रथोत्सव विषयाणि</u>

<u>सप्तमोत्सवे रथारोहः तदङ्गं रक्षाबन्धनम्</u>

रक्षाबन्धं ततः कृत्वा रथस्यारोहणं प्रति॥ १८॥

सप्तमे दिवसे प्राप्ते रथारोहणमाचरेत्। - मार्कण्डेये - २२

<u>रथोत्सव निमित्तानि</u>

रक्षसां विजिगीषार्थं दुर्निमित्त निवारणम्॥ ४९॥

उल्कापातविनाशार्थं भूकम्पस्य निवारणम्।

उत्पातपरिहारार्थं रथारोहणमाचरेत्॥ ५०॥ - मार्कण्डेये - २२

<u>सप्तमेऽहनि रथस्य अलङ्करणम्</u>

सप्तमे दिवसे प्राप्ते कृत्त्वा बल्यन्तमर्चणम्॥ २७८॥

प्रतिष्ठितं रथं पूर्वं सर्वलक्षणसंयुतम्।

मुक्ताप्रभा(पा)वितानैश्च सौवर्णैर्मञ्जरीगणैः॥ २७९॥

मुक्तादामसमोपेतैर्विचित्रैः पुष्पदामभिः।

हैमेन च वितानेन प्रभया च विशेषतः॥ २८०॥

मध्यतो भद्रपीठेन सौवर्णेन तथैव च।

ध्वजैश्च विविधैः रम्यैः पताकाभिश्च सर्वतः॥ २८१॥

भूषयेद्रथयानं तु तथा गरुडकेतुना।

सौवर्णकुम्भशिखरैः रथमेवमलङ्कृतम्॥ २८२॥ - ईश्वरे - ११

नवमेदिने रथोत्सवः - रथे आवाहन देवताः

नवमे दिवसे ब्रह्मन्! रथं पुण्याहवारिभिः।

संप्रोक्ष्य वक्ष्यमाणेन वर्त्मनाऽवाहनं चरेत्॥ १५६॥

ब्रह्माणं तस्य शिखरे धनेशं समहेश्वरम्।

तले द्वितीय आवाह्य चोपकण्ठे चतुर्मुख!॥ १५७॥

वासुदेवं समभ्यर्च्य तक्षकं प्रथमे तले।

महापीठे तु गरुडं मध्यपीठे श्रुणुष्व हि॥ १५८॥

इन्द्रादीन् प्रथमे पीठे कुमुदादीन् समर्चयेत्।

चक्रे वायुं रथे ब्रह्मन्! वैनतेयं समर्चयेत्॥ १५९॥ - विष्णुतिलके - ८

रथ पूजा - रथपूजानन्तरं रथस्य परितः बलिदानम्

सम्प्रोक्ष्य पञ्चगव्येन तथा पुण्याहवारिभिः।

रथस्य पादादूर्ध्वान्तं स्थितान् देवान् समर्चयेत्॥ २८३॥

प्रथमं पादचक्रेषु वह्न्यादीशानपश्चिमम्।

सत्यं सुपर्णं गरुडं तार्क्ष्यं चैव यथाक्रमम्॥ २८४॥

तत्तन्मन्त्रैः समभ्यर्च्य अन्यत्र विहगेश्वरम्।

चक्रदण्डद्वये मायां चक्रे च शशिभास्करौ॥ २८५॥

अनन्तं च तदाधारे भाराख्ये दण्डकद्वये।

विश्वरूपधरो विष्णुः शक्तीशश्चाप्युभाविमौ॥ २८६॥

परितः पतिकाजाले केशवादीननुक्रमात्।

गात्रेषु गात्रपादेषु धर्माद्यं त्वष्टकं यजेत्॥ २८७॥

गात्राद्गात्रान्तरे न्यस्येच्चक्राद्यायुधसञ्चयम्।

रथप्रासादमूर्धान्ते स्थूपिकायां सदाहरिम्॥ २८८॥

कूटशालासु पूर्वोक्तवासुदेवादिकान्यजेत्।

एकशृङ्गादिकान् न्यस्य परितो वेदिकातले॥ २८९॥

कूर्मादीन्द्वादश तथा ग्रीवायां परितो यजेत्।

शिखरे तु यजेत्पश्चादनन्तादीननुक्रमात्॥ २९०॥

सर्वेषामूर्ध्वतो विप्राः पद्मनाभं ध्रुवं यजेत्।

अर्घ्यस्स्रग्गन्धधूपैश्च क्रमेणैतान् प्रपूज्य च॥ २९१॥

चण्डाद्यं च सुभद्रान्तं द्वौ द्वौ दिक्षु समर्चयेत्।

कुमुदादिगणेशानान् लोकपालान्यथाक्रमम्॥ २९२॥

तत्तत्स्थानेषु सम्पूज्य रथं गरुडरूपिणम्।

ध्यात्वाभ्यर्च्य ततोऽर्घ्याद्यैर्हविरन्तं ततो गुरुः॥ २९३॥

चण्डादीनां बलिं दत्वा रथस्य परितस्ततः। - ईश्वरे - ११

<u>दैवज्ञेन परिशोधित सुलग्ने रथारोहणम्</u>

सुमुहूर्ते सुलग्ने च दैवज्ञपरिशोधिते(परिचोदिते)।

रथस्यारोहणार्थं तु देवमभ्यर्च्य यत्नतः॥ २९८॥ - ईश्वरे - ११

<u>आवरणप्रदक्षिणेन - रथप्रदक्षिणेन च देवं रथे स्थापनम्</u>

प्रथमावृत्तिमारभ्य रथ्यावरणपश्चिमम्॥ ३०१॥

प्रदक्षिणक्रमेणैव परिभ्राम्य च पूर्ववत्।

रथं प्रदक्षिणीकृत्य सुमुहूर्ते सुलग्नके॥३०२॥

रथमारोपयेद्देवं ब्राह्मणैः सुप्रयत्नतः।

रथस्योर्ध्वतले देवं विष्टरे विनिवेश्य च॥३०३॥ - ईश्वरे - ११

रथे देवनिवेशन मन्त्रः - रथस्थ भगवन्निवेदितान्नं स्त्रीणां दापनम्

रथं प्रदक्षिणीकृत्य शाकुनं सूक्तमुच्चरन्॥१६७॥

ध्रुवन्त इति मन्त्रेण देवमारोपयेत्ततः।

तत्र देवं समभ्यर्च्य नैवेद्यान्तं यथाविधि॥१६८॥

नैवेद्यान्नं ततो दद्यात् स्त्रीणां सन्तानसिद्धये। - पुरुषोत्तमे - २४

रथे स्थापनीय कैङ्कर्यपराः

आचार्यः साधकश्चापि रथस्योर्ध्वतले स्थिताः॥३०७॥

तस्याधस्तात् स्थले स्थाप्याः पश्चिमे छत्रधारकाः।

तत्र तत्पार्श्वतः स्थाप्यौ मायूरच्छत्रधारिणौ॥३०८॥

दक्षिणोत्तरपार्श्वस्थावग्रे चामरधारिणौ।

सारथिस्तत्स्थले स्थाप्यस्त्वग्रतो मध्यदेशतः॥३०९॥

ततस्तद्रथयानं तु भ्रामयेत्सर्ववीथिषु। - ईश्वरे - ११

रथयात्राकाले यात्रादानम्

यात्रानिर्विघ्नसिद्ध्यर्थं बीजानि विविधानि च॥२९६॥

फलानि च हिरण्यानि तथा दध्योदनं द्विजाः।

देवस्य सन्निधौ दत्त्वा विप्रेभ्यो देशिकोत्तमः॥२९७॥ - ईश्वरे – ११

<u>रथभ्रमण विधिः रथभ्रमणानन्तरम् स्नपनम् डोलारोपणञ्च</u>

अलङ्कृत्य रथं सम्यक् नानावस्त्रैश्च भूषयेत्।

षोडशस्तम्भसंयुक्तं रथमारोपयेत्ततः॥५१॥

(पट्टिका च रथः प्रोक्तः षड्चक्रश्च समन्वितः।

चतुश्चक्रश्च वा कुर्याद्यथा विभवविस्तरम्॥

नानालङ्कारसंयुक्तं शिल्पशास्त्रविधानतः।

एवं लक्षणसंयुक्तं रथमारोपयेत्ततः॥)

धामादिग्राममध्यान्तमथवा ग्राममेव वा।

प्रदक्षिणं यथान्यायमवरोप्याथ यत्नतः॥५२॥

गेहं प्रदक्षिणीकृत्य आलयं संप्रवेशयेत्।

स्नपनं कारयेत् पश्चात् कलशैः पञ्चविंशकैः॥५३॥

उक्तद्रव्यैयथापूर्वैः कारयेद्देशिकोत्तमः।

डोलामारोपयेत् पश्चात् देवीभिः सह यत्नतः॥५४॥

नृतगीतादिसकलं मण्टपं तु विशेषतः।

महाहविर्निवेद्याथ ताम्बूलं च प्रदापयेत्॥५५॥ - मार्कण्डेये - २२

<u>रथस्थ भगवद्दर्शने – पूजने च फलम्</u>

रथस्थं देवदेवेशं दृष्ट्वा पापैः प्रमुच्यते।

लोकोयं निश्चयंचैतत् जातव्यं कमलासन॥१७०॥

यस्तु गत्वा रथस्थं मां तृप्यते तद्भक्ति भावतः।

धनाश्च नगरग्राम गन्धपुष्पफलादिकैः॥१७१॥

उपहारैरनेकैश्च बहुमानपुरस्सरम्।

स तु भुक्त्वाऽखिलान्भोगानन्ते मत्साम्यमाप्नुयात्॥ १७२॥ -पुरुषोत्तमे -२४

## <u>अवभृथोत्सव विषयाणि</u>

<u>सर्व कर्मेषु तीर्थोत्सवः</u>

नित्यपूजां समाप्याथ तीर्थकर्माणि कारयेत्।

नित्ये नैमित्तिके काम्ये तीर्थं सामान्यमुच्यते॥ ६६॥ - मार्कण्डेये - २२

<u>तीर्थबिम्बाधिवासः</u>

तस्यामपररात्रौ तु तीर्थबिम्बाधिवासनम्।

बिम्बस्य दक्षिणकरे कौतुकं बन्धयेद्गुरुः॥ १८२॥

धान्यराशौ तु विन्यस्य यथाविधि समर्चयेत्। - पुरुषोत्तमे - २४

<u>तिर्थबिम्बाधिवास समये छत्र चामराद्युपचार समर्पणम्</u>

दर्शयेद्देवदेवस्य मङ्गलानि यथाक्रमम्॥ ७५॥

छत्रं चामरमादर्शं सुमुहूर्ते निवेदयेत्।

शाययेच्छयने दिव्ये देवं मूलेन विद्यया॥ ७६॥ - विष्वक्सेने - २७

<u>तीर्थयात्रार्थं शकुन परीक्षा</u>

शकुनानि परीक्ष्याथ स्नानयात्रां प्रयोजयेत्॥ ६॥ - विष्णु संहिता - २१

<u>देवं रथादवरोपणानन्तरम् नद्यादि समीपस्थ मण्डपे स्थापनम्</u>

अवरोप्य रथाद्देवं निनयेत् मण्डपान्तरम्।

यत्समीपेऽस्ति नद्यादि तत्र देशिकसत्तमः॥ १६१॥ - विष्णुतिलके - ८

<u>(अवभृथात्पूर्वे) महाकुम्भ उपकुम्भादीनां तीर्थबिम्बस्य अभिषेकः</u>

आदाय स्थापितान् कुम्भान्यागमण्डपभूमिषु।

नीत्वा प्रदक्षिणम् धाम तीर्थबिम्बस्य सन्निधौ॥ २०५॥

स्थापयित्वा धान्यराशौ तीर्थबिम्बं यथाविधि।

वस्त्रान्तमर्चयित्वान्ते मुहूर्ते शोभने गुरुः॥ २०६॥

एकबेरे मूलबेरमन्यथा तीर्थकौतुकम्।

कुम्भैरभ्युद्धृतैर्देवं मूलमन्त्रेण मन्त्रवित्॥ २०७॥

पूर्वादिमध्यकुम्भान्तमभिषिञ्चेद्यथाविधि।

स्नानादिदीपपर्यन्तं प्रतिकुम्भं समर्चयेत्॥ २०८॥ - पाद्मे – ११

<u>अवभृथ देशाः</u>

परिक्रम्योत्सवार्चां च धाम ग्रामं प्रदक्षिणम्॥ १३९॥

नीत्वाथ <u>सरित</u>स्तीरं <u>सरस</u>स्तटमेव वा।

<u>जलधे</u>रथवा तीरे मण्डपे पूर्वकारिते॥ १४०॥ - विश्वामित्रे - १८

<u>अवभृथ देशाः</u>

ततस्तीर्थजले स्नायात् तटाके वा ह्रदेपिवा॥ १३१॥

नद्यां हि देवदेवेशं सर्वपापप्रशान्तये। - वासिष्ठे – १२

<u>सरस्तीरे दिङ् नियमः</u>

पूर्वे वा चोत्तरे वाथ सरित्तीरं समाश्रयेत्॥ ७४॥

प्राङ्मुखोदङ्मुखो वाथ आसनं परिकल्प्य च। - मार्कण्डेये - २२

<u>तीर्थबिम्बाभावे विधिः</u>

पश्चिमे रात्रिभागे तु तिर्थबिम्बाधिवासनम्।

बद्धा प्रतिसरं तिर्थबिम्बाभावे चतुर्मुख॥२०२॥

नित्योत्सवप्रतिकृतेरभावे त्वधिवासनम्।

स्नानार्चायां भवेद्यद्वा बिम्बस्योत्सवकारिणः॥२०३॥ - पाद्मे - ११

<u>तीर्थबिम्ब अलाभे कर्तव्यविधिः</u>

तीर्थबिम्बमलाभे तु चक्रं वा त्रिर्निमज्जयेत्।

चक्रेण तीर्थे कर्तव्ये सति नद्यादि वारिभिः॥१०५॥

कूर्चाग्रपतितैर्धीमान् प्रोक्ष्य कल्याणकौतुकम्।

सरित्सु चक्रमादाय चक्रमन्त्रेण मज्जयेत्॥१०६॥

अलाभे चापि चक्रस्य कूर्चेनैव समाचरेत्। - भार्गवतन्त्रे - १२

<u>तीर्थबिम्ब अभावे अन्यबिम्बम्</u>

अभावे तीर्थबिम्बस्य स्नानबिम्बेन तत्क्रियाम्।

बल्यर्चया तद्विहीने पादुकां वा चरेत् गुरुः॥१३९॥ - श्रीप्रश्ने - ३६

<u>कर्मभेदेन तीर्थबिम्ब भेदाः</u>

पाणिना बिम्बमादाय सज्जयेज्जलमध्यके॥७८॥

नित्यतीर्थे नृपश्रेष्ठ केवलं तीर्थकौतुकम्।

नैमित्तिके वा नित्ये वा प्रतिष्ठा प्रोक्षणादिके॥७९॥

यात्रादितीर्थबिम्बान्तं जलमध्ये निमज्जये। - मार्कण्डेये - २२

<u>साक्षात् गजे तीर्थबिम्बस्यारोपणम्</u>

आरोप्य देवं हस्त्यादौ तीर्थबिम्बमलङ्कृतम्।

पश्चादुत्सवबिम्बेन नीयमानेन पूर्ववत्॥ २२०॥

सहितं सरितस्तीर्थं नीत्वा यद्वा सरित्तटम्। - पाद्मे - ११

<u>तीर्थतीरे उत्सव-तीर्थबिम्बञ्च स्नपनविधिः</u>

अभिषिञ्चेच्च कलशैर्देवं शास्त्रोक्त वर्त्मना।

शिष्टैः सुदर्शनं देवमभिषिञ्चेच्च वारिभिः॥ १४३॥ - विश्वामित्रे - १८

<u>तीर्थबिम्बस्य स्नपनविधिः</u>

पुण्याहं वाचयेत् पूर्वं अर्चयेद्द्रव्यदेवताः॥ ७६॥

स्नापयेत् कलशेनैव तीर्थबिम्बं तु देशिकः। - मार्कण्डेये - २२

<u>(अवभृथदिने) चूर्णकुम्भ सज्ञा</u>

तण्डुलैः पीठिकां कृत्वा तत्र कुम्भं निवेश्य च।

ससूत्रं तत्र निक्षिप्यं चूर्णं वस्त्रेण वेष्ट्य च॥ ३२८॥

अथ वा पञ्च नव वा कलशान् चूर्णपूरितान्।

अर्चयित्वा तु मूलेन ततः संस्नापयेद्विभुम्॥ ३२९॥ - ईश्वरे - ११

<u>(अवभृथदिने) चूर्ण धारणेन फलम्</u>

भुक्तावशिष्टं यच्चूर्णं भक्तानां मूर्ध्नि दापयेत्॥ ३४०॥

गङ्गास्नानफलं चूर्णं सर्वपापप्रणाशनम्।

क्रीडया वापि तच्चूर्णं शिरसा धारयेत्तु यः॥ ३४१॥

तस्य देहगतं पापं तत्क्षणादेव नश्यति। - ईश्वरे - ११

<u>सरसि अष्टनद्यावाहनम्</u>

आदाय भगवद्भक्तैः सरित्तीरं समाश्रयेत्॥ ७७॥

नदीश्चाष्ट समावाह्य पूजयेत् स्वस्वविद्यया। - मार्कण्डेये - २२

<u>अवभृथे नद्यादि पूजा - उत्सवबिम्बस्य कूर्चेन प्रोक्षणम्</u>

कुर्यान्नद्यादि तीर्थानां दाहन प्लावनं ततः॥ १६६॥

पुण्याहवारिभिः प्रोक्ष्य गङ्गादिसरितो गुरुः।

आवाह्याभ्यर्च्य विधिवत् कूर्चेनैव तदंबुभिः॥ १६७॥

कल्याणकौतुकं प्रोक्ष्य तत उत्सवसन्निधौ। - विष्णुतिलके - ८

<u>तीर्थे आवाहनविधिः - त्रिवारं निमज्जनम् - जले अभिमन्त्रण मन्त्रः</u>

तीर्थेषु तेषु गङ्गाद्याश्चावाह्य विधिवत्ततः।

चक्रबिम्बं समादाय देशिकेन्द्रस्समाहितः॥ १९२॥

तीर्थे निमज्जयेत्तत्र त्रिवारं तु यथाविधि।

अब्लिङ्गपवमानादि सूक्तोच्चारणपूर्वकम्॥ १९३॥ - पुरुषोत्तमे - २४

<u>अवभृथे देवस्य आधान क्रमः - आशिर्वादेन मूलमन्त्रेण जले निमज्जनम्</u>

मुहूर्ते शोभने प्राप्ते रवौ मध्यन्दिनं गते॥ ३४४॥

तीर्थबिम्बं समादाय घण्टा-शङ्खरवैः सह।

वामहस्ततले कुर्यात् क्ष्मामण्डलगतः स्वयम्॥ ३४५॥

विधृयान्मध्यभागे तु पाणिना दक्षिणेन तु।

तीर्थतीरं समासाद्य देशिकेन्द्रः समाहितः॥ ३४६॥

आशीर्वादं पुरा कृत्वा राजराष्ट्रादिकस्य च।

जलमध्यं समासाद्य नाभिदघ्ने जले स्थितः॥३४७॥

जपन् वै मूलमन्त्रं तु बिम्बेन सह देशिकः।

निमज्जेद्भक्तिसंयुक्तो ध्यायमानोऽच्युतं हृदि॥३४८॥ - ईश्वरे - ११

<u>तीर्थबिम्बधारणक्रमः -अवभृथमन्त्रः -त्रिवारं निमज्जनञ्च</u>

तीर्थबेरं समादाय शिरसा धारयन् विधे!॥१६८॥

नद्यादितीर्थमासाद्य चक्रमन्त्र मनुस्मरन्।

निमज्जन्नेव तद्बिम्बं त्रिवारं मज्जयेत्सुधीः॥१६९॥ - विष्णुतिलके - ८

<u>चतुर्वार निमज्जनम्</u>

कारयित्वा तीर्थबिम्बं चक्रं भक्तांश्च देशिकः॥१४४॥

निमज्जयेच्चतुष्कृत्वा तटमुत्तार्य चासने।

निवेश्य चाप्यलङ्कृत्य धाम चैव प्रवेशयेत्॥१४५॥ - विश्वामित्रे - १८

<u>अवभृथे निमज्जन मन्त्रः</u>

परमेष्ठ्यात्मना मज्जेत् ध्यायन् देवं सदा हृदि।

सम्प्रोक्ष्य पञ्चभिर्मन्त्रैः कुशपाणिसमाहितः॥१४२॥

महाजनैः सहस्तायां? ब्राह्मणानाञ्च वाञ्छया। - नारदीये - १९

<u>चक्रस्य अवभृथः - कुर्चेन देवस्य प्रोक्षणम् - कूर्चं निमज्जनक्रमश्च</u>

निमज्जयेत्तत्र बिम्बं चक्रमन्त्रैर्यथाविधि।

तीर्थार्थमौत्सवे बिम्बे समानीते तु वारिभिः॥२२५॥

प्रोक्ष्य कूर्चाग्रपतितैर्बिम्बं चक्रं निमज्जयेत्।

चक्राभावे तु तत्कूर्चं केवलं देवसन्निधौ॥२२६॥ - पाद्मे – ११

<u>देवेनसह निमज्जने फलम्</u>

कौतुकेन सह स्नात्वा सर्वपापैः प्रमुच्यते।

ब्रह्मलोकमवाप्नोति इति शास्त्रस्य निश्चयः॥७३॥ - कपिञ्जले - २३

<u>देवन सह निमज्जनफलम्</u>

तीर्थोत्सवेतु योभक्त्या चक्रेणसह मज्जते।

सहस्र ग्रहणस्नानसमं सत्फलमाप्नुयात्॥५६॥ - परमपुरुषे - ४

<u>देवेन सह निमज्जने फलम्</u>

देवेन सह तत्काले निमज्जन्ति च ये जनाः।

विमुक्तकल्मषाः सर्वे प्राप्नुयुः परमां गतिम्॥१३३॥ - श्रीप्रश्ने - ३६

<u>तीर्थोत्सव काले निवेदनान्नसमर्पनेन फलम्</u>

परमान्नं ततो दद्यात् तस्मिन् काले समाहितः।

एतज्जयप्रदं विद्धि राज्ञः सर्वसमृद्धिदम्॥१२६॥ - नारदीये - १९

<u>अवभृथ जले रक्षासूत्र विसर्जनम्</u>

तदानीमेव बिंबानां स्वस्य कौतुकबन्धनम्॥१७०॥

विमुच्य तज्जले क्षिप्त्वा निनयेन्मण्डपान्तरम्। - विष्णुतिलके - ८

<u>रात्रौ तीर्थयात्रानिषेधः</u>

न रात्रौ तीर्थयात्रा स्यादहन्येव विधीयते॥१४४॥ - नारदीये - १९

<u>स्वयंव्यक्तादिषु अवभृथ काल भेदाः</u>

स्वयं व्यक्तादिके स्थाने मध्याह्ने वापराह्नके॥३५०॥

रजन्यां पूर्वभागे वा कुर्यादवभृथं विभोः।

मुहूर्तातिक्रमप्राप्तदोषस्तत्र न विद्यते॥ ३५१ ॥ - ईश्वरे – ११

<u>अवभृत तीर्थ स्वीकार फलम्</u>

तीर्थोत्सव प्रवर्तेतु चक्रस्नानोदकं पिबेत्।

सर्वाघ शमनंनृणां सर्वसंपत्प्रदायकम्॥ ५१ ॥ - परमपुरुषे - ४

<u>तीर्थबिम्ब धारितवस्त्रम् आचार्येण शिरसि धारणम्</u>

ततस्तीरे समारोप्य तीर्थबिम्बं तु विष्टरे।

शाटकद्वितयं दत्त्वा स्नानवस्त्रे विसृज्य च॥ ३५२ ॥

देशिकः स्वयमादाय ते वस्त्रे मूर्ध्नि धारयेत्। - ईश्वरे - ११

<u>तीर्थयात्रानन्तरं देवं गर्भगृहे नियोजनम् – अन्यथा-कर्तृणां दोषः</u>

यात्राह्नैवं गृहं प्राप्य बिम्बे सङ्क्रामयेत् ततः।

दोषोऽन्यथा महानत्र कर्तृणां भवति ध्रुवम्॥ ३० ॥ - विष्णु संहिता - २१

<u>आस्थानोत्सवः - महदाशीर्वादः</u>

नवाहोत्सव मध्येऽपि देशिकस्तु यथोचितम्।

महदाशीर्वचाख्यं च आस्थानोत्सव नामकः ॥ १९९ ॥

पुष्पधामविलासं च यथाविभवविस्तरम्। - पुरुषोत्तमे - २४

## <u>द्वादशाराधन - पुष्पयाग विषयाणि</u>

<u>पुष्पयागस्य अवश्यकत्वम्</u>

पुष्पयागविधिं वक्ष्ये समासादेव नारद!।

ध्वजारोहणतीर्थान्तं यत्किञ्चित् स्खलनं कृतम्॥ १ ॥

अस्पृष्टस्पर्शनं जातं दृष्टिभेदोऽथवा मुने!।

नैवेद्ये यज्ञकार्ये च स्नपने चाङ्कुरार्पणे॥२॥

सम्भूतानां तु दोषाणां जानता वाऽप्यजानता।

तत्तद्दोषप्रशान्त्यर्थं तस्य निष्कृतिसिद्धये॥३॥

प्रायश्चित्तं तु कर्तव्यं पुष्पयागेन कर्मणा। - पद्मोद्भवे - २९

<u>पुष्पयागनाम कारणम्</u>

पुष्पयागविधिं वक्ष्ये समासान्मुनिपुङ्गव॥१६७॥

देवेशयजनं यत्तु मण्डले पुष्पपूरिते।

पुष्पयाग इति प्रोक्त उत्सवान्ते तु कारयेत्॥१६८॥ - विष्वक्सेने - २६

<u>दशमोत्सवे पुष्पयागः</u>

दशमेऽहनि संप्राप्ते पुष्पयागं समाचरेत्।

देवस्य चाग्रतः कुर्यात् पुष्पमण्डलमारभेत्॥१०२॥ - मार्कण्डेये - २२

<u>पुष्पयागफलम् - कालश्च</u>

श्रुणु वत्स प्रवक्ष्यामि पुष्पयागाख्यमुत्सवम्।

कर्तव्यं मम संप्रीत्यै सर्वदोषान् दहेत्पुनः॥४॥

तस्मात्समाहितो भूत्वा समाप्तदिवसेनिशि।

तत्परेद्युर्निशीवाथ पुष्पयागं समाचरेत्॥५॥ - पुरुषोत्तमे - २५

<u>पुष्पयाग स्थानम्</u>

पुष्पयागं ततः कुर्यात् तस्मिन् रात्रौ समाहितः॥१४६॥

प्रथमावरणे वापि द्वितीयावरणेऽपि वा।

तृतीयावरणे वापि मण्डपे लक्षणान्विते॥१४७॥

अग्रतः पार्श्वयोर्वापि यथाभिमतदिग्गते।

चक्राब्जमण्डलं लिख्य पूर्ववल्लक्षणान्वितम्॥ १४८॥ - नारदीये - १९

<u>पुष्पयागे मण्डलभेदाः</u>

चतुस्तम्भस्य मध्ये तु मण्डलं च समालिखेत्।

भद्रकं स्वस्तिकं वाथ चक्राब्जमितरन्तु वा॥ १०३॥ - मार्कण्डेये - २२

<u>पुष्पयागे पुष्पग्राहण नियमाः</u>

अथात सम्प्रवक्ष्यामि पुष्पाध्यायं यथाविधि ।

स्वारामोत्पादितं ग्राह्यमारामात् क्रीतमेव वा॥ १॥

ग्राह्यं प्रतिग्रहाल्लब्धं तथा चैवाप्ययाचितम्।

सर्वं तु जलजं ग्राह्यं यत्तु स्यान्निष्परिग्रहम्॥ २॥ - सनत्कुमारे - शिवरात्रे - ६

<u>पुष्पयागे उपयुक्त पुष्पाणि</u>

पूर्ववत् सूत्रयित्वात्र कारयेत् पुष्पमण्डलम्॥ ६६॥

पञ्चवर्णैः शुभैः पुष्पैरम्लानैश्च सुगन्धिभिः।

मन्दारपीतकोरण्डैः पद्मबिल्वदलैरपि॥ ६७॥

जपादिवर्जितैः शुद्धैर्यथावर्णविभागतः।

मध्ये सकर्णिकं पद्ममष्टपत्रं सुशोभनम्॥ ६८॥ - विष्णु संहिता - २०

<u>पुष्पयागे ग्राह्य - अग्राह्यपुष्पाणि</u>

पञ्चवर्णानि पुष्पाणि पुष्पयागे विदांवराः॥ ९८॥

विहितान्यत्र ग्राह्याणि चाग्राह्याणि वदाम्यहम्।

पादस्पृष्टानि पुष्पाणि आघ्रातानि च नास्तिकैः॥ ९९॥

दुष्टैः रजस्वलाभिश्च स्पृष्टानि वा तपोधनाः।

चतुष्पथशिवावासश्मशानावनिमध्यतः॥ १००॥

सुगन्धिन्यपि पुष्पाणि नाददीतार्चने हरेः।

पुष्पेषु वर्जनीयं वै कुटजं च कुरण्डकम्॥ १०१॥

जपां च काललीं चापि किङ्किणीबीजपूरकम्।

पटलं वज्रवृक्षं च कदम्बं घनमेव च॥ १०२॥

अग्राह्यं पुष्पयागेऽस्मिन् ग्राह्यं वक्ष्यामि सत्तमाः।

कमलं करवीरं च तुलसीं कुमुदं तथा॥ १०३

उत्पलं मिश्रकं चैव सौगन्धिकमथापि वा।

रक्तोत्पलं च कल्हारं शावजं श्वेतलोहितम्॥ १०४॥

केतकी नागदन्ती च मल्लिका वनमल्लिका।

मालती राजमाला च दमनकं च कन्दली॥ १०५॥

वकुलं करवीरं च कुरुविन्दं हसन्तिका।

चणकं शिबिकं चैव सहदेवी च नीलिका॥ १०६॥

काशं कुशं करञ्जी च देवदारु बृहन्नला।

योग्यान्येतानि यागेऽस्मिन् यथासम्भवमेव च॥ १०७॥

श्वेतं रक्तं च पीतं च कृष्णं हरितमेव वा।

शुद्धवर्णानि मिश्राणि ग्राह्याणि कुसुमानि वै॥ १०८॥ - वैहायसी - १४

<u>पञ्चवर्ण पुष्पाणि</u>

श्वेतैः पीतैस्तथा रक्तैः पाटलैश्च सितासितैः॥ ३८९॥

पञ्चवर्णैस्तु पुष्पाद्यैः श्यामलैस्तुलसीदलैः।

मण्डले पूरयित्वा तु यथालोचनसुप्रियम्॥३९०॥ - ईश्वरे – ११

<u>पञ्चवर्णैःकालकुसुमैः मण्डल कल्पनम्</u>

श्वेतैः रक्तैश्च पीतैश्च श्यामैः कृष्णैश्च पञ्चभिः॥२५॥

वर्णैर्वा कालकुसुमैः रञ्जयेच्चक्रमण्डलम्। - भार्गवतन्त्रे - १३

<u>पुष्पमण्डले तत्तत्स्थानोक्त वर्ण पुष्पाणि</u>

पुष्पेषु वर्गवर्गेषु भेदयित्वा(पूरयित्वा) द्विजोत्तम।

पीतेन कर्णिकां पूर्य रक्तं वै केसरस्य तु॥९॥

कर्णिकावलयं रक्तं हरीतं वा द्विजोत्तम।

केसरान्तेन वलयं श्वेतपुष्पाणि पूरयेत्॥१०॥

दलेषु मूलभागेषु श्वेतरक्तविमिश्रितैः।

दलाग्रे रक्तपुष्पाणि पूरयेद्देशिकोत्तम॥११॥

दलानां सन्धिदेशेषु श्यामपुष्पाणि पूरयेत्।

अन्तर्रेखां तु मन्त्रज्ञः कुसुमैर्हरितैस्तथा॥१२॥

पूरयेन्नाभिरेखायां श्वेतपुष्पैर्मनोरमैः।

(अराभ्यन्तररेखा वै रक्तैर्वा हरितैस्तु वा)

नेम्यादिरेखां कृष्णेण नेम्यन्तं सितपुष्पकैः॥१३॥

नेमिं रक्तेन सम्पूर्य पीतपुष्पैस्तु वा द्विजः।

पुष्पमण्डलमुद्दिष्टं पुष्पयागे विशेषतः॥१४॥ - कपिञ्जले - २४

<u>पालिका - घटिका - शरावेषु पुष्पाङ्कुरम्</u>

द्वारे द्वारे तु घटिके द्वे द्वे चैव तु विन्यसेत्।

शरावान् विन्यसेच्चैवं पूर्वादिषु यथाक्रमम्॥७॥

इन्द्रादीशानपर्यन्तं पालिकान् विन्यसेत्तथा।

तत्पार्श्वे मङ्गलान्यस्य शङ्खादीनां निवेशनम्॥८॥

कृत्वा सम्पूरयेत् पुष्पैः मण्डलं दोषनाशकम्। - पद्मोद्भवे - २९

<u>पुष्पयागे पुष्पाङ्कुरविधिः</u>

पूर्वोक्तवर्त्मना देवान् पालिकास्वर्चयेत् क्रमात्॥१६॥

श्रियं प्रसूनेष्वावाह्य तेषु पुष्पाणि वापयेत्। - श्रीप्रश्ने - ३७

<u>पुष्पाङ्कुरे विशेषाः</u>

तत्र तत्र मुनिश्रेष्ठाः श्रुणुध्वं मुनिपुङ्गवाः।

वायव्याग्नेयमाहेन्द्रवारुणाख्यं तथैव च॥३७॥

श्यामानि सर्वपुष्पाणि वायव्यानि न संशयः।

आग्नेयान्येव रक्तानि वर्जयित्वा तु पङ्कजम्॥३८॥

माहेन्द्राणि च पीतानि वर्जयित्वा तु शल्मलीम्।

वारुणानि च शुक्लानि सर्वाण्येव न संशयः॥३९॥

मिश्रकाणि च सर्वाणि वैष्णवानि न संशयः।

अङ्कुराणि च सर्वाणि तथैव जलजानि च॥४०॥

आग्नेयी शल्मली प्रोक्ता वारुणं पङ्कजं भवेत्।

फलं शतगुणं ज्ञेयं वायव्यादुत्तरोत्तरम्॥४१॥ - सनत्कुमारे - शिवरात्रे - ६

<u>पुष्पमण्डल पूजा</u>

पुष्पयागं ततः कुर्यात् तत् प्रकारमिह श्रुणु।

कर्णिकाबिन्दुषु ब्रह्मन्! विन्यसेत् द्वादशाक्षरान्॥ १९३॥

विष्ण्वाद्या देवता स्तत्र गोविन्दान्ता यथाक्रमम्।

कर्णिकायां वासुदेवं द्वादशाक्षर विद्यया॥ १९४॥

तत श्शोभान्त मावाह्य पूर्वोक्तेनैव वर्त्मना। - विष्णुतिलके - ८

<u>पुष्पमण्डल पूजा</u>

देवान् सम्पूजयेत् विद्वान् मण्डलावरणस्थितान्॥ १९॥

चक्राब्जकर्णिकामध्ये प्रणवाधिपमव्ययम्।

शङ्खचक्रगदाशार्ङ्गनन्दकाद्यैरलङ्कृतम्॥ २०॥

वासुदेवं चतुर्बाहुं ध्यात्वा दीपान्तमर्चयेत्।

प्रागादिदलमूलेषु द्वादशार्णानि पूजयेत्॥ २१॥

दलमध्येषु कूर्चेषु केशवादीन् विचिन्तयेत्।

दलाग्रेष्वर्चयेन्मन्त्री प्रणवं स्फटिकप्रभम्॥ २२॥ - श्रीप्रश्ने - ३७

<u>पुष्पयागे मण्डलपूजानन्तरं मण्डलमध्ये भगवन्निवेशनम्</u>

मण्डलान्तस्थ देवानां तत्तद्वर्णानुरूपतः।

सुगन्धकुसुमैश्चैव पूजयेच्छास्त्रवर्त्मना॥ ३२॥

तन्मण्डलेचोत्सवार्चां स्थाप्याभ्यर्च्य यथाविधि। - पुरुषोत्तमे - २५

<u>पुष्पमण्डल मध्ये देवनिवेशनम्</u>

औत्सवं बिम्बमादाय मृद्वास्तरण शोभिते।

पुष्पमण्डलमध्ये तु प्राङ्मुखं विनिवेश्य च॥३९८॥

तस्य पार्श्वद्वये विप्राः श्रियं पुष्टिं च विन्यसेत्। - ईश्वरे - ११

<u>पुष्पयागे बिम्बादीनां स्थानम्</u>

मण्डलस्य तु पाश्चात्ये बिम्बं सिंहासने न्यसेत्॥८५॥

मण्डलस्योत्तरे पार्श्वे कुम्भं संस्थापयेद्बुधः।

देवस्येशानभागे तु विष्वक्सेनं निवेशयेत्॥८६॥

दक्षिणे हेतिराजानं ब्राह्मणान्परितो न्यसेत्। - अनिरुद्धे - २१

<u>पुष्पयागाङ्ग होमः</u>

अन्नं निवेद्य जुहुयद्दिश्यग्नेर्मण्डपस्य च॥२४५॥

समिद्भिराज्यैश्चरुभिश्चतुर्भिश्च पृथक् पृथक्।

अष्टोत्तरशतं वारान् मूलमन्त्रेण मन्त्रवित्॥२४६॥ - पाद्मे – ११

<u>पुष्पयागाङ्ग होमः</u>

देवमभ्यर्च्य तदनु ध्यायेद् वह्नौ तु मण्डलम्।

मण्डलस्थान् यजेद् देवान् सर्वानाज्येन पूर्ववत्॥२३॥

नृसूक्तेन चरुं हुत्वा समिद्भिः षोडशाहुतीः।

केशवादीन् समुद्दिश्य यजेदाज्येन देशिकः॥२४॥ - श्रीप्रश्ने - ३७

<u>पुष्पेषु सम्पाताज्य स्पर्शनम्</u>

होमं समर्प्य देवाय देशिको मन्त्रवित्तमः॥४०९॥

सम्पाताज्येन पुष्पाणि संसिच्य तदनन्तरम्। - ईश्वरे - ११

<u>पुष्पयागे आराधन सङ्ख्या उपचाराश्च</u>

द्वारार्चनं ततः कुर्यात् कुम्भमण्डलपूजनम्॥८७॥

बिम्बे संपूजयेत्पश्चात् अष्टौ द्वादशधापि वा।

षट्कं चतुष्टयं कालं प्रत्येकन्तु विशेषतः॥८८॥

अर्घ्यं पाद्यं तथाचामं गन्धं पुष्पं च दीपकम्।

धूपंचैव नैवेद्यं ताम्बूलं तिलदानकम्॥८९॥

वेदं श्लोकं तथा गीतं नृत्तं वाद्यं पुनः पुनः।

गीतन्तु मङ्गलं प्रोक्तं नृत्तं वै मार्गनृत्तकम्॥९०॥ - अनिरुद्धे - २१

<u>द्वादशाराधन उपचाराः</u>

बिम्बेऽथ पूजनं कुर्यात्प्राग्वन्नीराजनान्तिमम्॥४०१॥

उपहारान्निवेद्याथ पुनः पूजां समाचरेत्।

अर्घ्यं पाद्यं तथाचामं गन्धं माल्यं च दीपकम्॥४०२॥

धूपं ततोऽर्हणजलमपूपान् पृथुकानपि।

तर्पणं नालिकेरोत्थरसमाचमनं तथा॥४०३॥

मुखवाससमोपेतं ताम्बूलं च समर्पयेत्।

एवं द्वादशवारं तु कृत्वापूजां जगत्प्रभोः॥४०४॥

महाहविर्निवेद्याथ कुर्यात्पुष्पाधिवासनम्। - ईश्वरे - ११

<u>द्वादशाक्षरेण द्वादशाराधनम् - नवोपचारम्</u>

निवेश्याराधयेदर्घ्यपाद्यादिभिरनुक्रमात्॥२३४॥

द्वादशाक्षरमन्त्रस्थान्यक्षराणि यथायथम्।

उद्दिश्य भूषापर्यन्तैरर्घ्याद्यैर्नवभिः क्रमात्॥ २३५॥

प्रत्यक्षरं समस्तानि पुष्पैरुपचरेद्धरिम्। - पाद्मे - ११

<u>पुष्पयाग समये मूल -यात्रा बिम्बयोः पुष्पकिरीटादि पुष्पालङ्करणविधिः</u>

पुष्पैर्नानाविधैर्बिम्बं स्रङ्मुकुटादिभिर्मुदा।

केयूरैः कङ्कणैश्चैवमलङ्कुर्यात् मनोहरम्॥ ३०॥

मूलबिम्बं तथा पुष्पैः शोभयेद्भक्ततुष्टये। - पद्मोद्भवे - २९

<u>पुष्पयाग समये सर्वेषां निवेदनीय अन्नानि</u>

मूर्तीनामपि देवानां गुडान्नं तु निवेदयेत्॥ ३९॥

शङ्खादेः कृसरं दद्यात्, पायसं च प्रदीयते।

सर्वेषां परिवाराणां हरिद्रान्नं निवेदयेत्॥ ४०॥

मिश्रयित्वान्नसूपादि(अपूप मिश्रितं कृत्वा)ग्रहेभ्यो विनिवेदयेत्। -कपिञ्जले- २४

<u>पुष्प समर्पण मन्त्राः</u>

हृदयादीनि चाङ्गानि समुद्दिश्याञ्जलिस्थितैः॥ २३६॥

फलं भवतु मे पुष्पैर्नम इत्यवसानकम्।

तं तं मन्त्रं समुच्चार्य मन्त्रवित् देशिकोत्तमः॥ २३७॥

भूषणानि तथोद्दिश्य श्रीवत्सादीन्यनुक्रमात्।

आयुधानि च दिव्यानि चक्रादीनि यथाक्रमम्॥ २३८॥

तथैवावरणस्थानां देवतानां समर्चनम्।

मत्स्यादिमूर्तिदशकं केशवादींस्तथापरान्॥ २३९॥

चतुर्विंशति संख्यातानुद्दिश्य कुसुमार्चनम्।

पौरुषेण तु सूक्तेन प्रत्यृचं कमलासन॥ २४०॥

नारायणानुवाकेन विष्णुसूक्तेन देशिकः।

पुष्पाणि दद्याद्देवस्य चरणाम्भोजयोर्द्वयोः॥ २४१॥

तथोपनिषदैर्मन्त्रैः पञ्चभिस्सर्वपावनैः। - पाद्मे - ११

<u>पुष्पयाग दर्शनफलम्</u>

पुष्पयाग प्रवर्तेतु चक्राब्जस्तं जगत्पतिम्॥ १५०॥

दर्शतेयस्तु सद्भक्त्या प्राप्नोति परमांगतिम्। - परमपुरुषे – ४

## महोत्सवे प्रणकलहोत्सव विषयाणि

<u>(पुष्पयागदिने प्रातः) लक्ष्मीसंवादोत्सवः</u>

भद्रपीठे निवेश्याथ देव्योरभिमुखं यथा॥ ४१॥

लक्ष्मीसंवादनामानमुत्सवं संयगाचरेत्।

कवाटबन्धसहितमुत्सवं प(न?)टनं चरेत्॥ ४२॥

लक्ष्मीकटाक्षमत्यन्तमनुगृह्णन्तमच्युतम्।

ततः प्रवेशयेद्देवं देव्योर्मध्ये जगत्प्रभुम्॥ ४३॥

संस्थाप्य दर्पणेचैककाले देवं रमासखम्।

देवीभ्यां सह पश्यन्ति जनास्त्वत्यन्त हर्षिताः॥ ४४॥

तेषां पापानि नश्यन्ति सिध्यते सर्वसम्पदः।

पायसान्नं निवेद्याथ क्षीरं शर्करयायुतम्॥ ४५॥

कपूरेण लवङ्गेनयुक्तं ताम्बूलमुत्तमम्।

नीराजनं समर्प्याथ पुष्पाञ्जलि समर्पणम्॥ ४६॥

प्रणम्य दण्डवद्भूमौ भक्तियुक्तेन चेतसा।

शय्योपचारविहितानुपचारान् समाचरेत्॥४७॥ - पुरुषोत्तमे - २५

<u>पुष्पयागदिने प्रणयकलहोत्सव दर्शनफलम्</u>

पुष्पयागोत्सव दिने देवस्य मधुविद्विषः।

अन्ते तु प्रणयकलहं महोत्सववरेद्विजाः॥६८

श्रीभूमिनीळा सहितं हरेर्दर्शनमुत्तमम्।

योगीनां दुर्लभं ज्ञेयं निश्चयं मुनिपुंगवाः॥६९॥ - परमपुरुषे – ४

## <u>ध्वजावरोहण विषयाणि</u>

<u>ध्वजावरोहणम्</u>

प्रणम्य दण्डवद्भूमौ ध्वजं चैवावतारयेत्॥५६॥

ध्वजपार्श्वं समासाद्य पूजयित्वा चतुर्दिशि।

पायसादीन् चतुर्दिक्षु तन्मन्त्रेण निवेदयेत्॥५७॥ - कपिञ्जले - २४

<u>उत्सव सन्निधौ ध्वजावरोहणम्</u>

देवमारोप्य यानादौ ध्वजस्तंभं समानयेत्॥११३॥

वैनतेयं समभ्यर्च्य निवेद्य च महाहविः।

संहारक्रममाश्रित्य पटात्तार्क्ष्यं तमुद्वसेत्॥११४॥

सन्निधाने तु बिम्बस्य ध्वजं तमवरोहयेत्। - भार्गवतन्त्रे - १२

<u>उत्सवबिम्ब सन्निधौ ध्वज अवरोहणम् - गरुडशक्तिं मूलबेरे नियोजनम्</u>

यानमारोप्य देवेशं ध्वजस्तंभं समाश्रयन्॥१७७॥

तत्र पक्षीन्द्रमभ्यर्च्य महान्नं विनिवेदयेत्।

प्रदक्षिणं परिक्रम्य संहारक्रममाश्रयन्॥ १७८॥

कुंभे ध्वजस्थमावाह्य मूलबेरे नियोजयेत्।

सन्निधावुत्सवार्धस्य ध्वजं तमवरोपयेत्॥ १७९॥ - विष्णुतिलके - ८

<u>ध्वजावरोहणातीते दोषः</u>

ध्वजाद्विसर्जयेद्देवं वैनतेयं स्वमन्त्रतः॥ १३५॥

एकरात्रिद्विरात्रे वा त्रिरात्रे तु महामुने।

ध्वजावरोहणं कुर्यात् अधिकं तु न कारयेत्॥ १३६॥

अधिकं यदि चेत्तत्र स्नपनं कारयेत् क्रमात्। - विष्वक्सेने - २७

<u>ध्वजावरोहणे पटात् गरुडशक्ति विसर्जन क्रमः</u>

ध्वजाग्रे स्थण्डिलं कृत्वा कुम्भं संस्थाप्य नारद!॥ ३७॥

सूत्रवस्त्रादि संवेष्ट्य हेमं रत्नं विनिक्षिपेत्।

वैनतेयस्य मन्त्रेण ध्वजादावाह्य पक्षिणम्॥ ३८॥

कुम्भमध्ये निवेश्याथ पूजयेद् गरुडध्वजम्।

शक्तिमुद्वास्य कुम्भे च ध्वजयष्टिगतां तथा॥ ३९॥

धामप्रदक्षिणं कृत्वा खगेशगेहमानयेत्।

सुपर्णमभिषिच्याथ कुम्भोद्धतेन वारिणा॥ ४०॥ - पद्मोद्भवे - २९

<u>ध्वजस्थ गरुड विसर्जनक्रमः</u>

ध्वजस्थानं समासाद्य पतत्रीशं समर्चयेत्॥ ४१६॥

महाहविर्निवेद्याथ ध्वजस्थं विहगेश्वरम्।

विसर्जयित्वा स्वहृदि ध्वजं समवरोपयेत्॥ ४१७॥ - ईश्वरे - ११

<u>ध्वजात् गरुडं संहारक्रमेण उद्वासनम्</u>

ध्वजस्तम्भं समासाद्य पूजयित्वा खगाधिपम्॥ २५५॥

हविर्निवेद्य गरुडं परिक्रम्य प्रदक्षिणम्।

तमुद्वसेत्पटात्तार्क्ष्यं संहारक्रममाश्रितः॥ २५६॥

अवरोप्य ध्वजस्तम्भमुत्पाट्य च महानिशि। - पाद्मे - ११

<u>मूलबेरस्य पादयोः ध्वजपटस्य समर्पणम्</u>

अवरोप्य ध्वजं पश्चाच्छिरसा धारयन् गुरुः।

गर्भगेहं समासाद्य मूलार्चापादपङ्कजे॥ ७५॥

ध्वजवस्त्रं समर्प्याथ चतुःस्थानस्य पूजनम्। - श्रीप्रश्ने - ३७

<u>ध्वज यष्ट्यादीनाम् आचार्याय दापनम्</u>

कुम्भे गरुडमावाह्य अवरोहणमाचरेत्।

तद्यष्टिं तत्पटञ्चैव तद्दण्डं तत्प्रभां तथा॥ १०६॥

आचार्यस्स्वयमाहृत्य अन्यथा दोषकृद्भवेत्। - अनिरुद्धे - २१

<u>ध्वजस्तम्भं ध्वजपटस्य च आचार्येन स्वीकरणम्</u>

स्तम्भं ध्वजं च गृह्णीयाद्देशिकेन्द्रः स्वयं ततः॥ २५७॥

ग्रहणं देशिकेन्द्रेण तार्क्ष्यतृप्तिकरं भवेत्। - पाद्मे - ११

## <u>पालिका उद्वासन विषयाणि</u>

<u>पालिकादिदेवान् चक्राब्जे विसर्जनम्</u>

पालिकासु स्थितान् देवांश्चक्राब्जे तु नियोजयेत्।

साङ्कुरं पात्रमानीय प्रार्थयेद्धरिमव्ययम्॥ ६२॥ - श्रीप्रश्ने - ३७

<u>पालिकाङ्कुर समर्पण क्रमः</u>

भगवन् पुण्डरीकाक्ष शरणागतवत्सल।

अङ्कुरार्पणमारभ्य उत्सवावभृथान्तिमम्॥ ६३॥

यन्मयानुष्ठितं कर्म तव सम्प्रीतये विभो।

तथान्यैर्मदनुज्ञातैर्ऋत्विग्भिश्चापि यत्कृतम्॥ ६४॥

साधकैश्च तथान्यैश्च विविधैः परिचारकैः।

तत्तत्सम्पूरणार्थाय न्यूनाधिक्योपशान्तये॥ ६५॥

मङ्गलाङ्कुरपूजां त्वं गृहाण कमलापते।

इति विज्ञाप्य तदनु श्रीसूक्तेनार्चयेद् विभुम्॥ ६६॥ - श्रीप्रश्ने - ३७

<u>देवस्य पादयोः पालिकाङ्कुर विसर्जनम्</u>

पालिकापात्रसंस्थाने चाङ्कुराणि समाचरेत्।

समर्प्य देवदेवस्य पादयोः प्रीतिपूर्वकम्॥ ४८॥ - पुरुषोत्तमे - २५

<u>पालिकाङ्कुर धारणफलम्</u>

भगवदर्पितान्दिव्यान् पालिकाद्यङ्कुरान् शुभान्।

धृत्वा तु शिरसालोके धूतपापोनरो भवेत्॥ ७७॥ - परमपुरुषे - ४

## <u>महाकुम्भप्रोक्षण विषयाणि</u>

<u>अग्नि - मण्डल - द्वार विसर्जन क्रमः</u>

कृत्वा मण्डलवह्निस्थं देवं बिम्बे नियोजयेत्॥ ७६॥

द्वारतोरणकुम्भस्थान् महापीठे नियोजयेत्। - श्रीप्रश्ने - ३७

<u>यागशालायाम् उत्सवबिम्बस्य हृदि मण्डल -वह्निस्थ देवता विसर्जन क्रमः</u>

ततस्तु देवदेवेशं यागशालां प्रवेशयेत्।

तत्र पश्चिमवेद्यां तु देवमारोप्य पूर्ववत्॥ ३६४॥

कुम्भपूर्वं क्रमेणैव चतुःस्थानस्थितं विभुम्।

यथाविधि समभ्यर्च्य प्रभूतान्नसमन्वितम्॥ ३६५॥

ततो द्वाराधिदेवानां प्रदाप्य विधिना बलिम्।

कुण्डस्थं मण्डलस्थं च देवं हृदि विसृज्य च॥ ३६६॥ - ईश्वरे - ११

<u>(ध्वज अवरोहणात्परं) महाकुम्भप्रोक्षणम्</u>

औत्सवं बिम्बमादाय गर्भगेहं प्रवेशयेत्।

महाकुम्भगतां शक्तिं मूलबेरे समर्पयेत्॥ ४१॥

हविर्निवेदयेत् पश्चात् स्तोत्रैः स्तुत्वा जगत्पतिम्।

सेवाजनान् परितोष्य विसर्जयेद्यथाक्रमम्॥ ४२॥ - पद्मोद्भवे - २९

<u>महाकुम्भप्रोक्षण विधिः</u>

शालायां स्थापितान् कुम्भान् उद्धृत्य भगवन्मया॥ ९६॥

धाम प्रदक्षिणं कृत्वा गर्भगेहं प्रवेशयेत्।

उत्सवं बिम्बमादाय देव्यौ बिम्बादिकान् क्रमात्॥ ९७॥

मूलबेरसमीपे तु देवस्याभिमुखं यथा।

तद्बिम्बबेरयोर्मध्ये कुम्भस्थानं विधीयते॥ ९८॥

कुम्भोदरगतान् देवान् मूलबेरे नियोजयेत्। - मार्कण्डेये - २२

<u>नवमदिने रात्रौ महाकुम्भ अभिषेकः -तत्कुम्भजलेन सर्वेभ्यः प्रोक्षणम्</u>

अभ्यर्च्य रात्र्यां पूर्वस्यां देव मास्थानमण्डपे॥ १७१ ॥

सन्निवेश्य चतुर्वक्र! प्रविशेत् यागमण्डपम्।

अभ्यर्च्य स्थापितान् कुंभानादाय गुरुसत्तमः॥ १७२॥

देवस्य पुरतो भूमौ धान्यपीठे निवेशयेत्।

उत्सवान्तोचितं कुर्यात् स्नपनं तद्यथाविधि॥ १७३॥

अन्ते कुंभांबुभि स्सर्वैः कूर्चै स्सेचनमाचरेत्। - विष्णुतिलके - ८

<u>महाकुम्भप्रोक्षणानन्तरं नित्याग्नौ होमः</u>

कुम्भोदरगतान् देवान् मूलबेरे नियोजयेत्।

स्वहृत्पद्मगतान् देवान् पादपद्मे नियोजयेत्॥ ९९॥

महता विभवेनैव पूजयेत् सुमनोहरम्।

समिधाज्यचरूश्चैव जुहुयान्नित्यपावकैः॥ १००॥ - मार्कण्डेये - २२

## <u>आह्वानदेवता उद्वासन - मूकबलिदान विषयाणि</u>

<u>ध्वजावरोहणानन्तरं बलिदानविधिः</u>

अवरोहो ध्वजस्याथ कुर्याद्देशिक आदरात्॥ ९१॥

बलिं क्षिपेद्धि देवेभ्यो दिक्स्थेभ्यः प्रयतः शुचिः। - वैहायसी - १४

<u>उद्वासनबलिदानात्परं देवं गर्भालय प्रवेशनानन्तरं पूर्णाहुतिः</u>

गर्भगेहं प्रविश्याथ स्थापयेद्देवसन्निधौ।

अर्घ्यादिहविरन्तं तु पूजयेत् कमलेश्वरम्॥ ९५॥

होमं तु विधिवत् कृत्वा पूर्णाहुतिमथाचरेत्। - मार्कण्डेये - २२

<u>सर्वेषां स्वदेश गमनार्थम् अनुज्ञा</u>

प्रवेशयेदावरणं प्रथमं तत्र च स्थितः।

सेवानुभूतिविवशान् भक्तान् भागवतांश्च सः॥२४८॥

ब्रह्मादीनपि कल्याणमनुसन्धातुमागतान्।

प्रणतानालयं स्वं स्वं गन्तुं सर्वेश्वरो हरिः॥२४९॥

नियुज्यावरणस्थं च परिक्रम्य प्रदक्षिणम्। - पाद्मे - ११

<u>बलिबिम्बेन साकं देवतोद्वासनम्</u>

देवानुद्वासयेत्सर्वान् ब्रह्मादीन् कमलोद्भवे॥६९॥

बलिबिम्बं तु शिबिकां यानमारोप्य साधकः।

चण्डादिसुप्रतिष्ठान्तं बलिं दत्वा यथाविधि॥७०॥

कुमुदादीन् समुद्वास्य महापीठे नियोजयेत्।

ब्रह्मादीशानपर्यन्तं प्रक्षिपेत् सोदकं बलिम्॥७१॥ - श्रीप्रश्ने - ३७

<u>सप्तावरण दिने सप्तप्रदक्षिण क्रमः</u>

देवागारं परिक्रम्य सप्तधा (प)त्वरितेन च॥४०॥

यानाद्देवं मण्टपस्य मध्यभागे मनोहरे।

भद्रपीठे निवेश्याथ देव्योरभिमुखं यथा॥४१॥ - पुरुषोत्तमे - २५

<u>सप्तावरण भ्रमणम् - आहूत देवतोद्वासनम्</u>

यात्रां च कारयेद्धीमान् प्रादक्षिण्येन मन्दिरम्।

एकधा वा द्विधा वापि स्थित्वा द्वारप्रदेशतः॥९५॥

स्तोत्रेण तोषयेद्देवं जनानाहूय देशिकः।

सेवार्थमागतान् सर्वान् देवानृषिगणानपि॥९६॥

विलोक्य देवदेवेशं स्वस्थाने तु विसर्जयेत्।

देवं गर्भगृहे नीत्वा स्वस्थाने सन्निवेशयेत्॥९७॥ - अनिरुद्धे - २१

<u>उद्वासन मूकबलिः</u>

स्थाने चावाहितान् देवांस्तत्र तत्र स्थितानपि॥२५८॥

बलिं दत्त्वा तूर्यघोषैस्स्थाने स्थाने सकृत्सकृत्।

घोषयित्वा चतुर्वक्र समुद्वास्य स्वनामभिः॥२५९॥

मूकैः परिजनैस्सार्धं गुरुरष्टाक्षरं जपेत्। - पाद्मे - ११

<u>अष्टाक्षरस्मरणेन - मौनेन बलिदानम्</u>

बलिभ्रमणकाले तु शङ्खभेर्यादिभिस्सह॥६३॥

घोषयेद् बलिदेशेषु अन्यत्र न च घोषयेत्।

अष्टाक्षरमनुस्मृत्य निश्शब्देनालयं विशेत्॥६४॥ - कपिञ्जले - २४

<u>उद्वासनबलिः -तदन्ते सर्वेषां स्नानविधिः -स्नानात्परम् आलये दीपोद्दीपनम्</u>

उद्वासनबलिं दद्यात् शून्यागारेषु नारद!।

कूपे देवालये चैव ग्राममध्ये बलिं क्षिपेत्॥४३॥

महातटाके नद्यादौ सर्वैः परिजनैः सह।

सचेलं देशिको विप्रः स्नानं पूर्णं समाचरेत्॥४४॥

ऋत्विग्भिः परिचारैश्च पाचकैर्वाद्यकोविदैः।

सर्वैः स्नानं तु कर्तव्यमन्यथा दोषकृद्भवेत्॥४५॥

स्नानादिकं क्रमात्कृत्वा घण्टावाद्यरवैः सह।

देवगेहं समासाद्य दीपान् प्रज्वालयेत्क्रमात्॥४६॥ - पद्मोद्भवे - २९

<u>देश देशान्तरादागतानां स्वदेशयात्रार्थम् आज्ञा</u>

ततस्तु देवदेवेशं प्रथमावरणेऽपि वा।

द्वितीयावरणे वापि मण्टपे भद्रविष्टरे॥४१९॥

निवेश्य प्राङ्मुखं वापि ह्युत्तराभिमुखं तु वा।

देवस्योत्सवसेवार्थं ये देवाः पूर्वमागताः॥४२०॥

वैकुण्ठवासिनश्चैव कुमुदादिगणेश्वराः।

ब्रह्मरुद्रादयश्चैव तथा देवर्षिसत्तमाः॥४२१॥

तथा वै भगवद्भक्ताः देशान्तरनिवासिनः।

देवदेवस्य कल्याणमनुसन्धातुमागताः॥४२२॥

तेषां स्वदेशयानार्थं देवानुज्ञापुरस्सरम्।

कृत्वा विसर्जनं पश्चाद्देवमन्तः प्रवेशयेत्॥४२३॥ - ईश्वरे - ११

<u>उत्सवान्ते विष्वक्सेन सम्मानम्</u>

कर्मार्चायां ततो देवं योजयेन्मूलविद्यया।

विष्वक्सेनाय निर्माल्यं दापयेद्विधिपूर्वकम्॥१५८॥ - वासिष्ठे - १२

## आचार्यसम्मानादि विषयाणि

<u>देवस्य वस्त्रगन्धमाल्यानि आचार्याय दापनम्(திருப்பரியட்ட மரியாதை)</u>

तत्काले तु विशेषेण गुरोः सम्मानमाचरेत्॥३७२॥

वसनैश्च दुकूलाद्यैर्देवस्य प्राङ्निवेदितैः।

विविधैः स्रग्वरैश्चापि सुगन्धैश्चन्दनादिकैः॥३७३॥

आचार्योऽपि समादाय दुकूलाद्यमनुत्तमम्।

बध्वा स्वोष्णीषवत्स्वस्मिन् शिरसि द्विजसत्तमाः ॥ ३७४॥

माल्यादींश्च यथायोगं धारयन् प्रणिपत्य च। - ईश्वरे - ११

<u>आचार्य सम्मानानन्तरं स्वगृहप्रवेशः</u>

देशिकं यानमारोप्य वाद्यघोषसमन्वितम्।

दक्षिणावस्त्रधान्यादिसहितं तन्त्रपारगम्॥ ४९॥

स्वगृहं प्रविशेद्विप्र! नारायणपरायणम्।

ब्रह्मचर्यव्रतसंस्थं गुरुं तदाश्रमं नयेत्॥ ५०॥

शुभाशिषं ततो लब्ध्वा सुखं सर्वं समाप्नुयात्। - पद्मोद्भवे - २९

<u>आचार्य गृह प्रवेशक्रमः</u>

स्वधाम प्रविशेत् पश्चात् गुरुः पूर्णमनोरथः॥ २०५॥

यजमानश्च वित्ताद्यै स्तोषयित्वा यथातथम्।

छत्रचामरवाद्याद्यैः आरोप्य शिबिकादिकम्॥ २०६॥

परिवारैस्सह गृहं गुरुं नीत्वा ततो व्रजेत्। - विष्णुतिलके - ८

<u>आचार्यादीनां सम्मानम् - यजमानेनकन्यकादानम्</u>

दक्षिणां दापयेद्विद्वान् वस्त्रहेमादिरत्नकैः॥ १०७॥

पञ्चाङ्गभूषणं चैव कन्यागोभूमिसद्धनैः।

ऋत्विजां तु तदर्धं स्यात् गायकानां यथाबलम्॥ १०८॥

देशान्तरागतानां तु मानाद्यैस्तुष्टिमावहेत्। - अनिरुद्धे - २१

<u>आचार्य सम्मानम्</u>

यजमानो गुरुं वस्त्रैर्भूषणैः कटकादिभिः।

सौवर्णैर्गन्धपुष्पाद्यैरलङ्कृत्याभिपूज्य च॥ २६२॥

दक्षिणामुत्तमां स्वर्णशतेनैकान्ततोऽधिकाम्।

यथाविभूति दत्त्वान्या दक्षिणाः प्रतिवासरम्॥ २६३॥

दशनिष्कं तदर्धं वा तदर्धं वा यथावसु।

निष्करूपां यथाश्रद्धमाचार्याय तदर्धकाम्॥ २६४॥

तदर्धमृत्विजां दत्त्वा तदर्धं परिचारिणाम्।

हेम वस्त्रैस्तथान्नाद्यैस्तोषयेदुपचर्यया॥ २६५॥

गायकाद्यान् जनान् सर्वानधिकारानुसारतः।

कर्माङ्गभूतानन्यांश्च कल्याणं द्रष्टुमागतान्॥ २६६॥

भक्तान् भागवतांश्चैव सामान्यांश्चेप्सितैर्धनैः।

अत्यल्पिकां वापि दद्यादक्षिणां यागकर्मणि॥ २६७॥

कर्मिभ्यो दक्षिणाहीनो निष्फलः कर्तुरब्जज।

यज्ञः प्रत्युत कर्तॄणां प्रत्यवायाय कल्पते॥ २६८॥

तस्मादर्थानुगुण्येन दातव्या दक्षिणा भवेत्। - पाद्मे - ११

<u>दक्षिणादानावसर निरूपणम्</u>

क्रियाशरीरमित्युक्तं दक्षिणाजीवमुच्यते।

क्रियादक्षिणयाहीना सजीवति निष्पलम्॥ ६०॥

तस्मात्स्वल्पापि दातव्या दक्षिणायागकर्मणि। - पुरुषोत्तमे - २५

<u>दक्षिणाहीने कर्तॄणां दोषः</u>

यागश्च दक्षिणाहीनो कर्तृदोषाय कल्प्यते॥ ६१॥

(दक्षिणाहीनयागेन कर्ता श्रेयो न विन्दति।)

तस्माद्वित्तानुसारेण देयात्स्वल्पापि दक्षिणा। - पुरुषोत्तमे - २५

<u>सर्वद्रव्यशेषम् आचार्याय दापनक्रमः</u>

बलिशेषं होमशेषं पात्रशेषं तथैव च।

अस्मिन्निवेदितं सर्वमाचार्याय प्रदापयेत्॥ १७३॥

अन्यथा निष्फलं याति यजमानस्य रोगकृत्।

तस्मात् सर्वप्रयत्नेन कारयेच्छास्त्रचोदितम्॥ १७४॥ - विष्वक्सेने - २७

<u>दैवज्ञ सम्मानम्</u>

पूर्वस्थाने निवेश्याथ पूजयेत् पुरुषोत्तमम्॥ ८१॥

दैवज्ञान् संप्रसाद्याथ ताम्बूलमुखवासकैः।

दापयेत्तत् प्रसादंस्तु अनुज्ञां याचयेत्ततः॥ ८२॥ - मार्कण्डेये - २२

<u>महोत्सवे ब्राह्मण भोजनम्</u>

सहस्रं वा शतं वापि लक्षं वापि यथावसु॥ १०९॥

भोजनं ब्राह्मणानां तु प्रत्यहं च महोत्सवे। - भार्गवतन्त्रे - १२

<u>सर्वेभ्यः अन्नदानम्</u>

आचार्यं पूजयेत् पश्चात् प्रभूतेन धनेन तु।

वैष्णवेभ्यश्च विप्रेभ्यो दक्षिणामर्पयेत् तथा॥ १२१॥

सर्वेभ्योऽन्नदानेन पूजयित्वा महाध्वरे। - वैहायसी - १४

<u>उत्सवमध्ये भक्तेभ्यः पानीयादि दापने फलम्</u>

महोत्सवे वर्तमाने यदर्थिभ्यः प्रदीयते।

पानीयमन्नं वस्त्रं वा तत्सहस्रगुणं भवेत्॥ २७७॥ - पाद्मे - ११

## <u>उत्सवस्य फलम्</u>

<u>उत्सव करणे आचार्यस्य फलम्</u>

उत्सवं देवदेवस्य यः कुर्यात्सकलं स्वयम्।

उत्तारयन् स्वयं विष्णोस्सायुज्यं गच्छति ध्रुवम्॥ २७०॥

हयमेधसहस्राणि यजते च समाहितः।

यश्चोत्सवेन यजते तयोस्तुल्यफलान्वयः॥ २७१॥

यागानामपि सर्वेषां फलमुत्सव कर्मणा।

देवस्याश्नुवते सर्वं यष्टारो नात्र संशयः॥ २७२॥ - पाद्मे - ११

<u>उत्सव करणे यजमानस्य फलम्</u>

उपकुर्वन्ति ये मर्त्या देवस्योत्सवकर्मणि।

कर्मणा मनसा वाचा तेऽपि यान्ति यथेप्सितम्॥ २७३॥

ग्रामे वा नगरे वापि पत्तने वा महोत्सवः।

विष्णोः प्रवर्तते यत्र देशे राष्ट्रेऽपि वा भवेत्॥ २७४॥

भयं न मृत्योर्न व्याधेर्न दुर्भिक्षादिसम्भवः।

नश्यन्ति तस्करास्तत्र नाधर्मस्सम्प्रवर्तते॥ २७५॥

धर्मयुक्तो भवेद्राजा जना धर्मपरायणाः।

भवन्ति सुखिनस्सर्वे सर्वदुःखविवर्जिताः॥ २७६॥ - पाद्मे - ११

<u>महोत्सवस्य फलम्</u>

एवं महोत्सवं कुर्वन् इह सर्वत्र मोदते।

परत्र च विशेषेण किं वा भूयादितः परम्॥५१॥

अश्वमेधसहस्राणि वाजपेयायुतानि च।

अप्तोर्यामार्बुदं कृत्वा यत् फलं जायते नृणाम्॥५२॥

अनेन सर्वं देवस्य मखेन भवति ध्रुवम्।

केवलं देवदेवं तं सेवतां च महोत्सवे॥५३॥

फलमिष्टं करतले भवत्येव न संशयः।

किं पुनस्तत्र युक्तानां कैङ्कर्यनिरतात्मनाम्॥५४॥ - भार्गवतन्त्रे - १३

<u>भगवदुत्सवमध्ये देवतान्तर -परतन्त्रबिम्ब -मानुषोत्सव विचारः</u>

<u>स्वतन्त्र परतन्त्र उत्सव सङ्गमे विधिः</u>

स्वतन्त्रे परतन्त्रे चाप्युत्सवादौ कृते सति।

पूर्वं स्वतन्त्रे कर्तव्यं वास्त्वङ्गे द्विगुणार्चनम्॥३४॥ - पाद्मे - १०

<u>विष्ण्वालय मध्ये देवतान्तरालय उत्सव निषेधः</u>

देवतान्तरकल्याणे वर्तमानेऽपि वैष्णवम्॥४०॥

कुर्याद्देवोत्सवं नैव वैष्णवेऽन्यं कदाचन।

वासुदेवो हि देवानां देवताम्नायते यतः॥४१॥ - पाद्मे - १०

<u>महोत्सव मध्ये इतर देवता उत्सव निषेधः</u>

वास्त्वङ्गदेवतानां च कल्याणं दोषवद्भवेत्॥१६॥

वर्तमानेऽन्यदेवानामुत्सवे वैष्णवं मतम्।

कुर्याद्वैष्णवकल्याणे नान्यत्कार्यं कदाचन॥ १७॥

सर्वासां देवतानां हि वासुदेवोऽधिदैवतम्।

ध्वजारोहणपूर्वे तु वर्तमाने महोत्सवे॥ १८॥

केशवस्यादिदेवस्य न कुर्यान्मानुषं महम्। - विश्वामित्रे - १७

<u>ग्राम - इतर आलयाश्रय विष्णूनाम् उत्सव निषिद्धः -करणे दोषाः</u>

स्वयंव्यक्तस्य दिव्यस्य ह्युत्सवे समुपस्थिते॥ १८॥

ग्रामालयाश्रयाणां च विष्ण्वादीनां च वै प्रिये।

न कर्तव्योत्सवस्तावद्यावत्तीर्थावसानकम्॥ १९॥

यदि स्यादुत्सवस्तेषां ध्वजारोहणवर्जनम्।

वीथिषु भ्रमणं तेषां स्वयंव्यक्तेन कारयेत्॥ २०॥

बलिप्रदानतीर्थादि न कुर्यात् कमलोद्भवे।

अन्यथा यदि कुर्वीत नश्येद्राष्ट्रं सराजकम्॥ २१॥ - श्रीप्रश्ने - ३०

<u>(उत्सवमध्ये) आलयाश्रय बिम्बानाम् उत्सवकरणे महान् दोषः</u>

प्राङ्गणेषु च सर्वेषु प्रासादादिषु मूर्तिषु।

प्रीत्याभिषेकमात्रं च स्नपनाद्युत्सवं विना॥ ३७॥

कारयेद्यदि संमोहात् प्रजानां पीडनं तथा।

तस्मात् सर्वप्रयत्नेन विपरीतं तु नाचरेत्॥ ३८॥

अन्यथा कारयेन्मोहाद्राजा राष्ट्रं च नश्यति। - पाद्मे - १०

<u>अन्यदेवता उत्सवार्थ कल्पित तोरण-ध्वजे विष्णु उत्सव निषेधः</u>

तोरणादीनि चान्येषां देवानामुत्सवे सताम्।

उद्घाट्य रथ्यासु हरेरुत्सवो नान्यथा भवेत्॥४४॥

क्लृप्तानामुत्सवे विष्णो रथ्यादिष्वितरोत्सवः।

स्थिराणां तोरणादीनां कार्यं नोत्पाटनं भवेत्॥४५॥ - पाद्मे - १०

<u>देवोत्सवमध्ये मानुषोत्सव निषेधः</u>

उत्सवे देवदेवस्य ध्वजारोहणपूर्वके।

प्रवर्तिते देवयागे चौलादिर्नैव संस्क्रिया॥४२॥ - पाद्मे – १०

<u>देवोत्सवमध्ये मनुष्योत्सव निषेधः</u>

नैमित्तिकोत्सवे विष्णोर्वर्तते ग्राममध्यके।

कुर्यादन्योत्सवं नैव चौलादीन् नैव संस्क्रिया॥४२॥

अज्ञानाद्यदि वा कुर्यान्महादोषस्तु संभवेत्।

तस्मात् सर्वप्रयत्नेन वर्जयेत् वैष्णवोत्तमैः॥४३॥ - मार्कण्डेये - २१

<u>भगवदुत्सव मध्ये मानुषोत्सवादि करणे दोषः</u>

महोत्सवेप्रवर्तेतु देवदेवस्य शार्ङ्गिणः।

यावत्तीर्थोत्सवदिनं तद्ग्रामेचाऽन्यदुत्सवम्॥१२३॥

विवाहादिक सर्वेऽपि वर्जनीयद्विजोत्तमाः।

यस्तुकुर्यात्तु तान् विप्रास्तस्य दोषो भवेद्ध्रुवि॥१२४॥ - परमपुरुषे - ४

<u>देवस्य उत्सवानन्तरं श्रमशान्त्युत्सवः</u>

उत्सवानन्तरं देवि देवस्य श्रमशान्तये॥१०१॥

नित्यपूजां समाप्याथ प्रथमावरणादिषु।

मण्डपे देवमानाय्य पूजयेच्छैत्यवस्तुभिः॥१०२॥ - श्रीप्रश्ने - ३७

## पवित्रोत्सव प्रमाणानि

पवित्रोत्सवस्य वैशिष्ट्यम्

विशेषवचनं वक्ष्ये शृणु गुह्यं महामुने!।

यथाश्वमेधं विप्राणां राजसूयञ्च भूभुजाम्॥ १५६॥

यथास्वधा पितृणां च सुराणाममृतं यथा।

नराणां जाह्नवीतोयं देवानामच्युतो यथा॥ १५७॥

तथा हि देवदेवस्य पवित्राराधनं परम्। - अनिरुद्धे - २४

पवित्रोत्सवेन पापनिवृत्तिः

पवित्रयजनं नाम समाराधनमुत्तमम्।

समाप्य पूता: ते सर्वे गलिताः कर्मणो नराः॥ ३॥ - भार्गवतन्त्रे - २१

पापार्जित द्रव्यैः पवित्रोत्सवं नाचरेत्

संवत्सरीकृता पूजा भक्त्या परमया सह॥ ११७॥

पूजापापार्जितद्रव्यैः पवित्रकर्मणि नाचरेत्। - मार्कण्डेये - २३

पवित्र शब्द निर्वचनम्

पतनात्त्रायते तस्मात्पवित्रं परिकीर्तितम्॥ ७॥ - अनिरुद्धे - २४

पवित्र निर्वचनम्

मन्त्रलोपादिना कर्म पतितं विहितं पुनः।

प्रायश्चित्तेन तत्कर्म कर्तारं त्रायते पुनः॥ ३८॥

तत्पवित्रं फलैर्भूयो रोहत्येव समाहितम्।

इति निर्वचनात्तज्ज्ञैः पवित्रारोहणं मतम्॥ ३९॥ - पाद्मे - १४

<u>पवित्रनिर्वचनम्</u>

पातियस्मात्सदोषं हि पतनात्परिरक्षति।

विशेषेण द्विजांस्त्राति पूर्णं कर्मकरोति च॥ १११॥

साधके च क्रियाहीने तस्मादुक्तो मया महान्।

याग एषपवित्राख्य उक्तलक्षणलक्षितः॥ ११२॥ - जयाख्ये - २१

<u>पवित्रोत्सवाचरण कारण कथनम्</u>

स्खलनं गच्छतो लोके भवत्येव न संशयः।

ज्ञात्वोपायं तु तच्छान्त्यै बुद्धिमान् प्रयतेन्नरः॥ ४॥

सर्वपापस्य शान्त्यर्थं जानता वाऽप्यजानता।

कृतस्य शमनार्थं तु प्रायश्चित्तं विशोधनम्॥ ५॥

पश्चात्तापेन कर्तव्यं क्षमायाचनया तथा।

अपराधालयो जीवः परमात्मा समुदारधीः॥ ६॥

क्षमते बालवज्जीवं शरणागतवत्सलः।

गदिता प्रार्थना शास्त्रेऽपरोक्षानुभवात्मभिः॥ ७॥

तदर्थमुत्सवः कार्यः पवित्रारोहणात्मकः।

ज्ञाने वा स्वापराधानामज्ञाने वा तपोनिधे!॥ ८॥ - सङ्कर्षणे प्रायश्चित्तरात्रे – २

<u>पवित्रारोपण कारणम्</u>

क्रियाजपार्चनादीनां लूप्तानां साधकस्य च॥ ३॥

पवित्रारोपणाद्विप्र ऋतेनान्याभवेद्गतिः। - जयाख्ये - २१

<u>पवित्रोत्सव कारणम्</u>

नित्यं नैमित्तिकं काम्यं कर्म यच्छ्रुतिचोदितम्॥ ३३॥

तत्कुर्वतामाश्रमेषु स्थितानामानुपूर्वशः।

वर्णानां मन्त्रलोपादिशान्त्यर्थं प्रत्यहं नरैः॥ ३४॥

आराधनं भगवतः पूर्णाहुत्या समं मतम्।

तस्य न्यूनातिरेकाभ्यां दुष्कृतं सकलं भवेत्॥ ३५॥

कर्मजातं ततः पूर्णमाराधनमभीप्सितम्। - पाद्मे – १४

<u>आत्मार्थे - परार्थे - लेप भित्ति बेरेऽपि पवित्रारोपण विधिः</u>

आत्मार्थे वा परार्थे वा पवित्रारोपणं भवेत्।

एकबेरे तु वा विप्र! बहुबेरे तु वा भवेत्॥ ८॥

लेपभित्तिपटस्थे तु कर्मार्चायां समाचरेत्।-  अनिरुद्धे – २४

<u>पवित्रारोहणविधिः - त्रिविध चातुर्मास्यम्</u>

पवित्रारोपणं वक्ष्ये विस्तरेण तवानघ!।

चातुर्मासस्य मध्ये वा आदावन्ते च वा भवेत्॥ १॥

चातुर्मास्यं त्रिधा प्रोक्तं सौरश्चान्द्रमसं तथा।

वैष्णवं च विशेषेण त्रिविधं संप्रकीर्तितम्॥ २॥

संक्रान्त्यादिकं सौरं स्यात् चान्द्रश्च प्रथमादिकम्।

द्वादश्यादि त्रिकंचैव (तिथिश्चैव) वैष्णवं परिकीर्तितम्॥ ३॥

वैष्णवं चोत्तमं प्रोक्तं मध्यमं सौरमुच्यते।

चान्द्रमप्यधर्मं प्रोक्तं उत्तमे तु समाचरेत्॥ ४॥

तस्मात्सर्वप्रयत्नेन द्वादश्यान्तु समाचरेत्। - अनिरुद्धे - २४

## पवित्रोत्सव कालविचारः

पवित्रोत्सव कालाः

वर्षे वर्षे तु कर्तव्यं पवित्रारोपणं परम्।

श्रावणस्य सिते पक्षे अथवा कृष्णपक्षके॥ ३॥

मासि भाद्रपदे चैव अधि चाश्वयुजेऽपि वा।

कार्तिक्यां शुक्लपक्षे तु कर्कटस्थे दिवाकरे॥ ४॥

द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम्।

सिंहस्थे तु रवौ कार्यं कन्यायां तु रवौ स्थिते॥ ५॥

तस्यामेव तिथौ सौम्ये तुलायां तु कथञ्चन।

द्वादश्यां शुक्लपक्षे तु पञ्चम्यामथवापि वा॥ ६॥

सप्तम्यां वा नवम्यां वा प्रागेव स्याच्छुभेऽहनि। - मार्कण्डेये - २३

पवित्रोत्सव कालाः

तच्च मासचतुष्कस्य मध्ये कुर्याच्छुभे दिने।

आषाढपञ्चदश्यास्तु यावद् वै कार्तिकस्य च॥ १०॥

सम्पूर्णचन्द्रदिवसं तं कालं चान्द्रमन्तिमम्।

आ कर्कटकसंक्रान्तेस्तुलाभागक्षयावधि॥ ११॥

कालं तं चाष्टपक्षं तु सौरं मध्यमसंज्ञितम्।

एकादश्यादि चान्तो यश्चातुर्मास्योपलक्षितः॥ १२॥

कालं तं वैष्णवं विद्धि तूत्तमं सर्वसिद्धिदम्। - सात्वते - १४

<u>पवित्रोत्सव कालाः</u>

तस्माद्यत्नेन विप्रेन्द्र पवित्रं कारयेद् द्विज।

यजमानर्क्षके वाऽपि श्रवणे द्वादशेऽपि वा॥१०॥

पञ्चदश्यां यथा वाऽपि देवदेवस्य शार्ङ्गिणः। - कपिञ्जले -३२

<u>पवित्रोत्सव तिथि - नक्षत्रादि</u>

पूर्वोदितेषु मासेषु द्वादश्यां प्रतिपद्यपि।

दशम्यां पौर्णमास्यां वा पञ्चम्यामथवा तिथौ॥४०॥

एकादश्यां त्रयोदश्यां द्वितीयायामथापि वा।

सिते पक्षे शुभे वारे लग्ने शुभतरेऽथवा॥४१॥

श्रवणे पुष्यरोहिण्यां रेवत्यां भरणीषु च।

स्वातौ हस्तपुनर्वस्वोरश्विन्यां मित्रदैवते॥४२॥

ऋक्षेष्वन्यतमे कार्यं पवित्रारोपणं हरेः। - पाद्मे - १४

<u>उक्तकालाभावे विधिः</u>

अप्राप्तेरस्य कालस्य त्वन्तरायेण केनचित्॥१३॥

निर्वाहणीयोऽप्यपरः कालश्चान्द्रायणादिना।

सम्पाद्यं चैव तन्मध्ये विधिवद् यागपूरकम्॥१४॥

दिनत्रये तु पूर्वोक्ते पूर्णिमाद्युपलक्षिते।

सोपवासैः क्रियापूर्वं कर्म प्रतिसरीयकम्॥१५॥ - सात्वते - १४

<u>उक्तकालाभावे विधिः</u>

चातुर्मास्ये त्वन्यतमे मासे वै शुक्लपक्षके।

द्वादश्यां देवदेवस्य पवित्रारोपमाचरेत्॥१६६॥ - ईश्वरे - १४

<u>शयनोत्सव मध्ये पवित्रोत्सवः</u>

शयनस्थे जगन्नाथे चातुर्मास्यस्य मध्यतः।

पवित्रारोपणं कार्यमित्युक्तं भवता पुरा॥१॥ - ईश्वरे - १४

<u>पवित्रोत्सवदिनसङ्ख्या - कालश्च</u>

एकरात्रं त्रिरात्रं वा सप्तरात्रं तु वा द्विज।

पवित्रकं स्थापनीयं मण्डलेऽर्चागतं तथा॥१०१॥

अथवार्चागतं विप्र तद्वत्संस्थाप्य भूषणम्।

यावदेकादशीशुक्ला सम्प्राप्ता कार्तिकस्य तु॥१०२॥ - जयाख्ये - २१

<u>पवित्रोत्सवारम्भे आचार्यवपनादि</u>

उत्सवारम्भपूर्वेद्युराचार्यो मूर्तिपैः सह॥५०॥

भगवद्यागकर्माङ्गं स्नायाद्वपनपूर्वकम्।

शुद्धवस्त्राणि पुण्ड्राणि यज्ञसूत्राणि धारयेत्॥५१॥ - श्रीप्रश्ने - ४२

## <u>पवित्रोत्सवे अङ्कुर -रक्षाबन्धन विधिः</u>

<u>आदौ विष्वक्सेनाराधनम्</u>

इति विज्ञाप्य देवेशं विष्वक्सेनं तु पूजयेत्।३८॥ - पुरुषोत्तमे - २६

<u>पवित्रोत्सवे अङ्कुरार्पणकालः</u>

नवाहं सप्तरात्रं वा पञ्चरात्रमथापि वा॥१७॥

स्थापयित्वा सुगुप्ते तु पश्चात् कर्म समाचरेत। - मार्कण्डेये - २३

<u>पवित्रारोपणे अङ्कुरार्पण कालः</u>

पवित्रारोपण दिनात् सप्तमे पञ्चमेऽहनि॥२२३॥

तृतीयेऽहनि सद्यो वा कारयेदङ्कुरार्पणम्। - विष्णुतिलके - ८

<u>पवित्रोत्सवे बीजावाप मन्त्रः</u>

बीजानि निर्वपेत्तेषु संम्पृश्य विधिवत्ततः॥१३॥

**या** जाता इति मन्त्रेण तेषु बीजानि विन्यसेत्। - मार्कण्डेये - २३

<u>पवित्रोत्सवे पालिकादि सङ्ख्या</u>

पालिका घटिकाश्चैव शरावं तु त्रिभेदतः॥५॥

प्रत्येकं द्वादशं ग्राह्यं मङ्गलाङ्कुरकर्मणि। - पुरुषोत्तमे - २६

<u>पवित्रोत्सवे अङ्कुरार्पणार्थम् अष्टबीजानि</u>

कुलूत्थ-निम्ब-निष्पाव-शालि-माष-प्रियङ्गुकान्॥१२॥

मुद्ग-सर्षप-बीजानि क्षालयेच्छुद्धवारिणा। - मार्कण्डेये - २३

<u>पवित्रोत्सवे अधिवासरात्रौ रक्षाबन्धनविधिः</u>

पुण्याहवाचनं कृत्वा पवित्राणि च प्रोक्षयेत्॥३९॥

रात्रौ प्रतिसरं बध्वा दर्भाणां संस्तरे स्वपेत्। - पुरुषोत्तमे - २६

<u>रक्षासूत्र विधिः</u>

रात्रौ प्रतिसरारम्भात् पूर्वेद्युः कारयेत्ततः।

ऊर्णामयेन सूत्रेण क्षौमसूत्रयुतेन च॥८१॥ - मार्कण्डेये – २३

<u>रक्षाबन्धन मन्त्रः</u>

ततश्चोभयहस्ताभ्यां हस्ताभ्यां दक्षिणे भवेत्॥८२॥

जितन्त इति मन्त्रेण बध्नीयात् साधकः क्रमात्। - मार्कण्डेये – २३

**<u>पवित्रोत्सवे यागशाला प्रकाराः</u>**

<u>पवित्रोत्सवे यागशाला स्थानम्</u>

प्रथमावरणे वापि द्वितीयावरणेऽपि वा॥६॥

तृतीयावरणे वापि प्रासादाग्रे तु मण्डपे।

अग्रालाभे तथान्यत्र यथावाञ्छितदिग्गते॥७॥ - नारदीये - २३

<u>पवित्रोत्सवे यागशाला लक्षणम्</u>

मण्डपं कारयेद्धीमान् अग्रत: परितोऽपि वा॥९॥

बहुस्तम्भसमायुक्तं शिलयेष्टकयापि वा।

केवलं दारुमात्रं वा प्रपामात्रमथापि वा॥१०॥

भित्तियुक्तमयुक्तं वा कोणभित्तियुतं तु वा।

अधिष्ठानान्वितं वापि उपपीठान्वितं तु वा॥११॥

पादबन्धयुतं वापि प्रस्तरादियुतं तु वा।

ज्वालातोरणसंयुक्तं पताकाभिरलङ्कृतम्॥१२॥

कूटाकारयुतं वापि गरुडेनापिशोभितम्।

सिंहयुक्तमयुक्तं वा बहुद्वारयुतं तु वा॥१३॥

भित्तित्रययुतं वापि पञ्च सप्त नवात्मकम्।

एवं कृत्वा विधानेन सुधया परिलेपयेत्॥१४॥

चित्रं कुर्याद्विशेषेण अवतारैरनेकशः।

तोरणानि चतुर्दिक्षु कारयेद्विजसत्तमः॥१५॥

अश्वत्थं वा वटं वापि प्लक्षं वा बिल्वमेव वा।

तालं वेणुं तथैवापि कारयेद्विधिचोदितम्॥ १६॥

द्वारायामसमं वापि स्तम्भायामसमन्तु वा।

आयामार्धेन विस्तीर्णं हस्तमान मथापि वा॥ १७॥

क्षुद्रप्रासादकं विप्र! हस्तमानेन कारयेत्।

शूलत्रयसमायुक्तं गरुडेन समन्वितम्॥ १८॥

तोरणे तोरणे कुर्यात् गरुडञ्चोर्ध्वसंस्थितम्।

गोमयालेपनं कुर्यात् मण्डपाभ्यन्तरस्थलम्॥ १९॥ - अनिरुद्धे – २४

<u>यागशालायां वेद्यां च लेखनीय चित्रविशेषाणि</u>

निवेश्य मध्यवेद्यां तु प्रभवाप्यययोगतः॥५०॥

मत्स्यादीनवतारांश्च प्रादुर्भावाननेकशः।

चित्रोदितेन विधिना चतुर्दिक्षु समालिखेत्॥५१॥

मुनिसिद्धामरव्रातैरनेकाद्भुतदर्शिभिः।

द्वीपाचलवनोद्यानैर्बहुभिर्मृगयूथपैः॥५२॥

सरस्सारसकल्हार-जलक्रीडापरान्वितैः।

खेचरैरङ्गनायुक्तैर्नृपैर्विद्याधराधिपैः॥५३॥

प्रशान्तमानसैर्विप्रैरात्मध्यानपरायणैः।

एवमाद्यैरनन्तैश्च व्यापारैश्चित्रसम्भवैः॥५४॥

तद्यागवेश्म सकलं रञ्जनीयं प्रयत्नतः।

कुर्यात्सुधाविलिप्तं वा भूषयेत्तदनन्तरम्॥५५॥ - ईश्वरे - १४

<u>यागशालायां वितान लक्षणम् (மேல்கட்டி)</u>

पवित्रेण वितानेन सुसितेनोज्ज्वलेनवा।

चक्राम्बुरुहचिह्नेन भूषयेच्च तदूर्ध्वतः॥६१॥ - ईश्वरे - १४

<u>यागशालायां वेदिकादीनां स्थानम्</u>

तन्मध्ये वेदिकां कुर्यात् विधिरेवं प्रकीर्तितः।

मण्डलं मध्यभागे तु दक्षिणे कुम्भसंस्थितम्॥२०॥

उत्तरे चाग्निकुण्डं स्यात्सौम्येशानान्तरेपि वा। - अनिरुद्धे – २४

<u>वेदिकायाम् उत्तरे होमकुण्डस्थापनम्</u>

अस्मिन् वै मण्डपे कुर्याद्वेदिकायास्तथोत्तरे॥९॥

अग्नेरायतनं शुभ्रमेकहस्तायतं शुभम्। - नारदीये - २३

<u>होमकुण्ड लक्षणम् -सङ्ख्या च</u>

कुम्भवेदीं समं कृत्वा कुण्डं वा पङ्कजाकृतिम्॥२३॥

चतुरश्रमथोवापि चक्राकारमथापि वा।

मेखलात्रयसंयुक्तं योनिनाभिसमन्वितम्॥२४॥

तद्बहिश्चाष्टदेशे तु कुण्डं कुर्याद्विचक्षणः।

अश्रं योनिं तथा चापं त्र्यश्रं वृत्तं षडश्रकम्॥२५॥

पद्मं वस्वश्रकञ्चैव पूर्वादीनां दिशां क्रमात्।

यद्वा चक्रादिकं वापि अष्टकुण्डं प्रकल्पयेत्॥२६॥

चतुष्कुण्डमथो वापि एतन्न्यूनन्नकारयेत्।

अश्रं चापं तथा वृत्तं पद्मं पूर्वादितः क्रमात्॥२७॥ - अनिरुद्धे – २४

<u>पवित्रोत्सवे कुण्ड सङ्ख्या</u>

कल्पयेद्यज्ञसदनं द्वारतोरणसंयुतम्॥४५॥

चतुष्कुण्डसमायुक्तं कुण्डेनैकेन वा युतम्। - श्रीप्रश्ने - ४२

## <u>पवित्रे तन्तु -ग्रन्थि विचारः</u>

<u>पवित्रनिर्माणे सूत्रभेदाः</u>

प्रथमं दर्भसूत्रं तु पट्टसूत्रमतः परम्॥११॥

क्षौमसूत्रं तृतीयं तु पद्मसूत्रं चतुर्थकम्।

कार्पासं सूत्रमथवा कन्याभिः कृतसूत्रकम्॥१२॥

मलिनं नीलसूत्रं च प्रयत्नेन विवर्जयेत्। - पुरुषोत्तमे – २६

<u>पवित्रसूत्रनिर्माणकाः - विसर्जनीयसूत्रञ्च</u>

कन्यया कृतसूत्रं तु नारी या तु पतिव्रता।

विधवा साधुशीला वा न दुश्शीला कदाचन॥२६॥

उपयुक्तं क्रियायुक्तमन्यं रत्नादिदूषितम्।

मलिनं नीलसूत्रं च प्रयत्नेन विवर्जयेत्॥२७॥ - मार्कण्डेये – २३

<u>पवित्रनिर्माणे सूत्रलक्षणम् - निर्माणकाश्च</u>

तन्तुसङ्ग्रहणं कुर्यादधिवासदिने ततः॥२४॥

सूक्ष्मं- दृढं- सितं- श्लक्ष्णं सूत्रं प्रसूतया मुने!।

विनिर्मितं कुमार्या वा वृद्धया वा विनीतया॥२५॥

विशुद्धविधवानार्या सम्पादितमथापि वा।

क्षौमं कार्पाससम्भूतं दौकूलं वैभवो यथा॥२६॥

केशादिभिर्विहीनं यत् क्षालयेच्छुद्धवारिणा। - सङ्कर्षणे प्रायश्चित्तरात्रे – २

<u>पवित्र निर्माणम् - सूत्र भेदाश्च</u>

सौवर्णं रजतं ताम्रं मृन्मयं वा तथापि वा॥ १९॥

कार्पासिकं तथा मौञ्जी दर्भकं वाथ कारयेत्।

क्षौमं दुकूलकं वापि क्षालनं शोधनं कुरु॥ २०॥

ब्राह्मण्या निर्मितं सूत्रं केशकीटादिवर्जितम्।

शूद्रया साधुवृत्या वा निर्मितं सूत्रमेव वा॥ २१॥

अवणे वा गृहित्वा तु पवित्राणि च कारयेत्। - कपिञ्जले -३२

<u>पवित्रकरणे तन्तु लक्षणम् - सूत्र संस्कारः</u>

निर्मितान् विप्रकन्याभिस्तन्तून् कार्पासजानपि॥ ६॥

कौशेयानथवा क्रीतान् समान् दोषविवर्जितान्।

मुद्गमाषादिभिश्चूर्णैः संमिश्रं क्षालयेज्जलैः॥ ७॥

शुचिभिश्च प्रसन्नैश्च शुद्धेषु फलकादिषु।

निधाय शोषयेद्विद्वानातपे शोधि(षि?)तांस्ततः॥ ८॥

परीक्ष्य तृणरोमाणि निरस्य च समाहितः।

त्रिगुणीकृत्य च पुनस्त्रिगुणानपि कारयेत्॥ ९॥ - विश्वामित्रे - २४

<u>पञ्चवर्ण -पञ्चयष्ट्यादि पवित्रेषु उत्तमादिभेदाः</u>

पञ्चवर्णसमायुक्तं पञ्चयष्टिसमन्वितम्।

पवित्रं चोत्तमं ज्ञेयं यष्टित्रयसमन्वितम्॥ ३६॥

पवित्रं मध्यमं प्रोक्तमधमं त्वेकयष्टिकम्।

वित्तानुसारात् त्रिष्वेकं कुर्याद् देशिकसत्तमः ॥ ३७॥ - श्रीप्रश्ने - ४२

<u>दशविध पवित्राणि -तेषां लक्षणम् - स्वतन्त्रालय प्रकारश्च</u>

पवित्रसङ्ख्या बेराणां दश तानि वदामि ते ॥ ५८ ॥

प्रामाण्यं ग्रन्थिसंज्ञं तदलङ्काराह्वयं तथा।

उत्तमाधममध्याख्यं किरीटाह्वमनन्तरम् ॥ ५९ ॥

श्रीवत्सकौस्तुभाह्वानं वनमालाह्वयं तथा।

मानान्येषां च सूत्राणि ग्रन्थयश्च यथाक्रमम् ॥ ६० ॥

कथ्यन्ते नाभिमर्यादा सूत्राण्यष्टोत्तरं शतम्।

द्वात्रिंशद्ग्रन्थयस्तस्य हृदयान्तमनन्तरम् ॥ ६१ ॥

सूत्राण्यशीतिस्तस्योक्ता ग्रन्थयः पञ्चविंशतिः।

जङ्घामध्यस्थमायामं निर्मितं शततन्तुभिःझ् ॥ ६२ ॥

अष्टोत्तरैर्ग्रन्थिभिश्च द्वात्रिंशद्गुणितैर्युतम्।

उत्तमाख्यस्य सूत्राणां भवेत्सङ्ख्या चतुश्शतम् ॥ ६३ ॥

शतमष्टोत्तरं सङ्ख्या ग्रन्थीनां जानुसीम तत्।

शतानि त्रीणि तन्तूनां ग्रन्थयोऽशीतिरिष्यते ॥ ६४ ॥

आयतं चोरुमध्यान्तं द्वे शते तन्तवः पुनः।

नाभ्यन्तं ग्रन्थयष्षष्टिस्तन्तवश्च चतुश्शतम् ॥ ६५ ॥

किरीटमानं द्वात्रिंशद्ग्रन्थयस्तदनन्तरम्।

शतानि त्रीणि तन्तूनां हाराकारप्रकल्पितम् ॥ ६६ ॥

ग्रन्थिभिस्सप्तविंशत्या द्वे शते ग्रन्थयः पुनः।

द्वात्रिंशत् स्तनमर्यादं सहस्त्रं चाष्टभिर्युतम्॥ ६७॥

तन्तवश्चरणायाममनेकग्रन्थिभिर्युतम्।

विष्टरस्य सहोर्ध्वस्य पवित्रं तत्समं ततम्॥ ६८॥

तन्तवोऽष्टोत्तरशतं ग्रन्थयः पञ्चविंशतिः।

प्रभा पवित्रं तत्तुल्यं ग्रन्थयो बहवस्स्मृताः॥ ६९॥

सर्वेषां च स्वतन्त्राणां बिम्बानामिदमीरितम्। - पाद्मे - १४

<u>लेपभित्ति पटस्थानां पवित्रारोपणक्रमः</u>

लेपभित्तिपटस्थे तु मूलबिम्बे यदा द्विजाः।

कुर्यादुत्सवबिम्बस्य भूषणानां तु पञ्चकम्॥ १०८॥

तदापि मूलबिम्बस्य भूषणान्यपि पूर्ववत्।

कल्पयेदाद्यपूर्वाणि बिम्बप्रतिसरेषु तु॥ १०९॥ - ईश्वरे - १४

<u>सर्वेषां मनुष्याणां बन्धूनां भागवतानाम् आचार्यादीनां पवित्र मानम्</u>

घण्टाक्षसूत्रपूर्वाणां क्रियाङ्गानां महात्मनाम्॥ १२१॥

बलिपीठाधिदेवानां देशान्तरनिवासिनाम्।

गुर्वादीनां चतुर्णां तु हरिलिप्साप्रलापिनाम्॥ १२२॥

द्विजोत्तमादिवर्णानां नित्यमच्युतभाविनाम्।

गृहस्थब्रह्मचारीणां यतीनां वनवासिनाम्॥ १२३॥

वृद्धानां जनकादीनां भगवत्तत्ववेदिनाम्।

बन्धूनां भ्रातृपुत्राणां नारायणरतात्मनाम्॥ १२४॥

जायाया भक्तिनम्राया रताया अर्चने हरेः।

सम्बन्धिनां च मित्राणां भगवद्धामवासिनाम्॥ १२५॥

तदुत्तरसहायानां चातुरात्म्याभिलाषिणाम्।

भृत्यानां स्वानुकूलानां पुरुषोत्तमयाजिनाम्॥ १२६॥

वृद्धये योग्यतायैव पवित्रीकरणाय च।

यथाभिमतमानैस्तु तन्तुभिर्ग्रन्थिभिस्तथा॥ १२७॥

कुर्यात्पवित्रनिचयमथवा मुनिसत्तमाः।

गुर्वादीनां चतुर्णां तु यतीनां च कुटुम्बिनाम्॥ १२८॥

क्रमाच्चतुर्विंशतिभिः सूत्रैः षोडशभिस्तथा।

ततो द्वादशभिश्चैव अष्टाभिः षड्भिस्तथा॥ १२९॥

पवित्रकाणि कार्याणि ग्रन्थयः सूत्रसङ्ख्यया।

आराधकस्य च गुरोः कुर्याद्वै भूषणद्वयम्॥ १३०॥ - ईश्वरे – १४

<u>आचार्य -यति -ऋत्विज -ब्राह्मणानादीनां पवित्र -मान -तन्तु -ग्रन्थि सङ्ख्या</u>

आचार्याणां यतीनां च पवित्रं तन्तुभिः कृतम्॥ ८०॥

अष्टोत्तरशतैस्सूत्रैर्ग्रन्थिभिः पर्वभिर्युतम्।

ऋत्विजां पूजकानाञ्च ब्राह्मणानां तथैव च॥ ८१॥

एकाशीत्या कृतं सूत्रैर्नाभ्यन्तपरिलम्बितम्। - पाद्मे - १४

<u>आचार्यादीनां पवित्रे मानम् - मानुषपवित्र नामः</u>

आचार्याणां यतीनां च द्विजातीनां सलक्षणम्।

पवित्रं नाभिपर्यन्तमन्येषां स्तनमात्रकम्॥ ४३॥

मानुषाणां पवित्रं तु चक्रमित्यभिधीयते।

पवित्रमित्थमाचार्यः कुर्याद्वा शिल्पिनापि वा॥४४॥ - श्रीप्रश्ने - ४२

<u>पवित्र ग्रन्थि अन्तराल मानः</u>

त्र्यङ्गुलान्तरिता देयाः सर्वेषां ग्रन्थयः शुभाः।

रञ्जयेच्चन्दनाद्येन कुङ्कुमेन सुगन्धिभिः॥३३॥ - सङ्कर्षणे प्रायश्चित्तरात्रे - २

<u>शङ्खाकारेण ग्रन्थिनिर्माणक्रमः</u>

रञ्जयेच्चन्दनाद्येन यथाशोभानुरूपतः।

ग्रन्थियुक्तेनतुल्येन मृदुनासुसितेन तु॥१६॥

पूरयेद्ग्रन्थयोर्मध्ये शङ्खाकारंयथाभवेत्। - जयाख्ये – २१

<u>पवित्र ग्रन्थि विधिः (मातुलङ्ग फलाकारः)</u>

विभवे देवदेवेश! हारपञ्चकसंयुतम्।

नानाकाराणि तन्तूनि मुक्ताहारसमन्वितम्॥११०॥

त्र्यङ्गुलान्तरिता देयाः सर्वेषां ग्रन्थयः समाः।

सङ्ख्यानेन विना सम्यङ्मातुलूङ्गोपमाः शुभाः॥१११॥ - ईश्वरे - १४

<u>पवित्र ग्रन्थि भेदाः (बृहत्पवित्रः)</u>

बीजपूरसमाकारमाम्रामलकशङ्खवत्।

मुक्तावद्बदरीवच्च ग्रन्थिभेदा वरानने॥३५॥ - श्रीप्रश्ने - ४२

<u>ग्रन्थयोरन्तराले आकार भेदाः</u>

ग्रन्थयश्शङ्खसंस्थानसमानाकृतयोऽथवा।

धात्रीफलसमाकारा यद्वा मुक्तादिसन्निभाः॥८८॥ - पाद्मे - १४

<u>पवित्र ग्रन्थिमध्ये पूरणीय द्रव्यविशेषाः</u>

मणिमुक्ताप्रवालाद्यैर्लोहैः स्वर्णादिभिस्तथा।

तदभावे च तूलैर्वा ग्रन्थिमध्यं प्रपूर्य च॥४५॥

सूत्रैर्ग्रन्थ्यन्तरालानि यथाशोभं तु रञ्जयेत्। - विश्वामित्रे - २४

<u>पवित्राणां गुणानि</u>

उत्तमं परमस्थानम् आनन्दं परमव्ययम्।

मध्यमे च परां वृद्धिं विपुलां च धनावहम्॥४८॥

कनिष्ठे च श्रियं विन्द्यात्समारोग्यधनानि च।

पवित्राणां गुणान्विद्धि काश्यप द्विजसत्तम॥४९॥ - कपिञ्जले -३२

## <u>पवित्रोत्सव पूजाक्रमाणि</u>

<u>पवित्रोत्सवे प्रतिदिनं चतुस्थानविधिः - वाहनारोहणञ्च</u>

सायंप्रातः प्रितदिनं भूषणोत्सर्जनावधि॥२४५॥

चतुःस्थानस्थितं देवं समभ्यर्च्य यथा विधि।

मण्डपे चौत्सवं बिम्बं सविशेषं समर्चयेत्॥२४६॥

उत्सवं देवदेवस्य कुर्यात् कालद्वयेऽपि च।

वाहनारोहणं रात्रौ दिवसे वाचरेद्द्विजाः॥२४७॥ - ईश्वरे - १४

<u>चतुस्थान पूजाक्रमः</u>

कुम्भपूजां ततः कृत्वा चक्राब्जं पूजयेद् गुरुः॥९९॥

पश्चादग्नौ यजेद्देवं बिम्बस्य तदनन्तरम्। - श्रीप्रश्ने – ४२

<u>पवित्रोत्सवे चतुःस्थानेषु पूजासङ्ख्या</u>

चतुःस्थानेषु देवस्य पूजासङ्ख्यामिमां शृणु॥ १००॥

शतोत्तरसहस्रं वा सप्तत्युत्तरषट् शतम्।

अथवा पूजनं कुर्यात् षष्ट्युत्तरशतत्रयम्॥ १०१॥

विसृज्यावभृथदिनं यावदुत्सववासरम्।

तावद्दिनानां पूर्वोक्तपूजनं तु समं गुरुः॥ १०२॥

विभज्य कुर्यात् पूजां वै सान्निध्याधिकसिद्धये।

कुम्भमण्डलयोः प्रातर्मध्याह्ने हरिमर्चयेत्॥ १०३॥

रात्रावग्निषु पूजा स्याद्विभवे सत्ययं विधिः।

बिम्बमात्रस्य वा कुर्यात् षष्ट्युत्तरशतत्रयम्॥ १०४॥

अन्येषां कुम्भचक्राब्जवह्निस्थानां दिने दिने।

रात्रौ मध्यन्दिने चैव कालयोः पूजनं चरेत्॥ १०५॥ - श्रीप्रश्ने - ४२

<u>महाकुम्भ -उपकुम्भ -परिकुम्भादीनां स्थापनविधिः</u>

तस्य दक्षिणपार्श्वे तु कुंभं संस्थापयेद्बुधः।

महाकुम्भं चोपकुम्भं परिकुंभञ्च वर्धनीम्॥ ७८॥

पालिकान् परितः स्थाप्य अष्टमङ्गलकान् न्यसेत्।

सूत्रवस्त्रसमायुक्तं पिधानं कूर्चसंयुतम्॥ ७९॥

कुम्भे कुम्भे विशेषेण नारिकेलफलं न्यसेत्।

क्रमुकस्तम्बकं वापि नालिकेरस्य मञ्जरीम्॥ ८०॥

नानाविधफलैश्चैव वेदिकोर्ध्वन्तु विन्यसेत्। - अनिरुद्धे - २४

<u>पवित्रोत्सवे महाकुम्भादिषु आह्वान देवताक्रमः</u>

महाकुम्भे मूलबेराच्छक्तिमावाह्य पूजयेत्॥ १०७॥

पूर्वाद्याशासु कम्भेषु वासुदेवादिकान् यजेत्।

आग्नेयादिषु कोणेषु यष्टव्याः पुरुषादयः॥ १०८॥

सुदर्शनं च करके मूलबेरस्य हस्ततः। - श्रीप्रश्ने - ४२

<u>कुम्भमण्डलादीनां -उपकुम्भ -परिकुम्भेषु च मन्त्रन्यास प्रकाराः</u>

अष्टाक्षरेण मन्त्रेण महाकुम्भे तु पूजयेत्।

द्वादशाक्षरमन्त्रेण मण्डले तु समर्चयेत्॥ ९१॥

विष्णुमन्त्रेण विप्रेन्द! अग्निस्थं हरिमर्चयेत्।

उत्सवे तु विशेषेण गायत्र्या संप्रपूजयेत्॥ ९२॥

उपकुम्भे वासुदेवादीन् इन्द्रादीन् परिकुम्भके। - अनिरुद्धे - २४

<u>महाकुम्भादि पूजाक्रमः -स्नानोपचारश्च</u>

कुण्डे च मण्डले चैव कुम्भपूजां समाचरेत्॥ ८८॥

अनेकैरुपचारैश्च पूजयेद्देवबिम्बवत्।

उपकुम्भेषु सर्वेषु षोडशैः परिपूजयेत्॥ ८९॥

अस्त्रकुम्भे तथा प्रोक्तं परिकुम्भेत्विदं भवेत्।

कुम्भमण्डलकुण्डेषु प्रोक्षणस्नानमाचरेत्॥ ९०॥ - अनिरुद्धे - २४

(कुम्भेषु वासुदेवादीन् इन्द्रादीन् परिकुम्भके)

<u>पवित्रोत्सवे मण्डल भेदाः</u>

पूर्वोक्तमण्डपे मध्ये चक्राब्जं भद्रकं तु वा॥ ५२॥

शुद्धभूतलमध्ये तु मण्डलं संप्रकल्पयेत्। - मार्कण्डेये - २३

<u>मण्डलाराधनस्य मुख्यत्वम् (मण्डलम् पञ्चभूतमयम्)</u>

मण्डलाराधनं कुर्यात् उपचारैरनेकशः॥९३॥

पञ्चवर्णसमायोगात् पञ्चतत्वमयं स्मृतम्।

पञ्चतत्वमयो विष्णुः पञ्चतत्वमयश्शिवः॥९४॥

पञ्चतत्वमयो ब्रह्मा पञ्चतत्वमयं जगत्।

पञ्चतत्वमयं सर्वं जगद्दृष्टं चराचरम्॥९५॥

तस्मात्सर्वप्रयत्नेन मण्डलाराधनं परम्। - अनिरुद्धे – २४

<u>शोभा - उपशोभानां अधिदेवताः</u>

शोभोपशोभया विद्वान् त्रिरेखा च गुणत्रयम्।

गुणत्रयं प्रकृतिकं चतूरेखां तु विन्यसेत्॥९५॥

पञ्चरेखा महाभूता क्रमशो विन्यसेद्गुरुः। - मार्कण्डेये - २३

<u>अधिवासे पुष्पमण्डलविधिः - पवित्रारोहः - मण्डलमध्ये भगवन्निवेशनम्</u>

वेद्यां तु मण्डलं कृत्वा पुष्पैरेव सितादिभिः।

मूलबिम्बात् समावाह्य तस्मिन् सम्पूजयेद्धरिम्॥४८॥

मूलबिम्बे यदा कुर्यात् पवित्रारोहणं तदा।

तस्मिन् सम्पूजयेद्भक्त्या भोगैः कालानुकूलतः॥४९॥

कुर्याद्यच्चोत्सवार्चायां कर्मार्चायां तु वा द्विज।

तस्यामावाह्य विधिना मूलबिम्बात्तु मन्त्रवित्॥५०॥

पुष्पमण्डलमध्ये तां प्राङ्मुखं स्थाप्य पूजयेत्। - नारदीये – २३

<u>मण्डल मध्ये वा तस्य पश्चिमे वा देवस्य स्थापनम्</u>

तस्यां वेद्यां तु कुर्वीत रजोभिर्मण्डलं शुभम्।

चक्राब्जं द्वादशारं वा भद्रकं वा विचक्षणः॥५८॥

पूर्ववत्पूज्य कुम्भेशं तथास्त्रकवचान्वितम्।

आसन्नमण्डलं ध्यात्वा पूजयित्वाथ देवताः॥५९॥

अर्चाः सम्भाव्य विधिवदलङ्कृत्य यथाधनम्।

मण्डलस्य तु तां मध्ये पद्मे संस्थाप्य पूजयेत्॥६०॥

अथवा पश्चिमे देशे मण्डलस्य समीपतः।

वरासने नवैर्वस्त्रैरास्तीर्णैः सदशैशुभैः॥६१॥

संस्थाप्याराधयेदर्चां यथाविहितमाचरेत्।

अग्नौ सन्तर्पयेत्पश्चात् पूर्ववद्विधिनैव तु॥६२॥ - नारदीये – २३

<u>चक्राब्जे देवस्य स्थापनम्</u>

ततः प्रभाते देवेशं चक्राब्जे स्थाप्य पूजयेत्।

अर्घ्यादि धूपदीपान्तं नैवेद्यं तु चतुर्विधम्॥४८॥

होमं तु पूर्ववत्कृत्वा होमशेषं समापयेत्। - पुरुषोत्तमे – २६

<u>पवित्रोत्सवे मण्डलमध्ये देवनिवेशन पीठ लक्षणम्</u>

एकादश्यामुपोष्याथ रात्रौ पूर्वोक्तमण्डले।

तन्मध्ये कल्पयेत्पीठं धर्मज्ञानादिभिः क्रमात्॥८६॥

पादत्वकमभेदेन सूर्यसोमानिलाकृतिम्।

मण्डलादिक्रमादूर्ध्वे पात्रकेसरकर्णिका॥८७॥

व्यापिनीत्यस्य शक्तिस्तु विन्यसेद्विमलादिकान् ।

एवं ध्यात्वा समभ्यर्च्य हरेरासनमुत्तमम्॥८८॥

तन्मध्ये पूजयेद्देवं प्रतिमासंस्थितं प्रभुम्।

सुसूक्ष्मं ज्योतिरमलं मनसा वापि विन्यसेत्॥८९॥ - मार्कण्डेये - २३

<u>पवित्रोत्सवे होमद्रव्याणि मन्त्रश्च</u>

अग्नौ च जुहुयादन्नं पायसादि चतुर्विधम्॥१२४॥

पौरुषेणैव सूक्तेन यवैश्च व्रीहिवेणुभिः।

तिलैर्लाजैस्तथा पुष्पैस्तथा चागरुभिर्घृतैः॥१२५॥

समिद्भिर्मूलमन्त्रेण पृथगष्टोत्तरं शतम्। - पाद्मे - १४

<u>होममन्त्रः - दिक्कुण्डेषु ऋत्विजानाम् अभावे कर्तव्यक्रमः</u>

मूलबेरे तथा कुर्यात् प्रधानाग्नौ तु होमयेत्।

विष्णुमन्त्रेण मन्त्रज्ञः समिदाज्यचरून् क्रमात्॥९९॥

दिक्कुण्डे तु विशेषेण ऋत्विग्भिर्होममाचरेत्।

ऋत्विजानामभावे तु आचार्यस्स्वयमाचरेत्॥१००॥ - अनिरुद्धे - २४

<u>अष्टकुण्डेषु अष्टविधसमिधः</u>

पालाशं खादिरञ्चैव बिल्वमौदुम्बरन्तथा।

प्लक्षन्यग्रोधापामार्गमश्वत्थंसमिधाष्टकम्॥१०१॥

(अश्वत्थप्लक्षन्यग्रोधशमीन्पूर्वादिकान् क्रमात्)

पूर्वादीशानपर्यन्तं समिधः परिकीर्तिताः। - अनिरुद्धे - २४

<u>होमार्थम् अष्ट अन्नानि</u>

पायसं कृसरञ्चैव हरिद्रान्नञ्च मौद्गकम्॥ १०२॥

माषान्नं तिलशुद्धान्नं दध्यन्नमथचाष्टकम्। - अनिरुद्धे - २४

<u>अष्टहोमद्रव्याः</u>

लाजनीवारको चैव तिलस्सर्षप एव च॥ १०३॥

(तिलसर्षपबीजानि मुद्गनिष्पावमेव च॥)

व्रीहिमाषयवाश्चैव गोधूमश्चाष्टमं भवेत्।

अष्टकुण्डेषु होतव्यं तद्द्रव्यै स्तु पृथक् पृथक्॥ १०४॥ - अनिरुद्धे - २४

<u>पवित्रावरोपणानन्तरं पूर्णाहुतिः</u>

अपनीय तु माल्यादीन् पवित्राणि च नारद!।

दद्यात् सेवकवर्गेभ्यो यजेत् पूर्णाहुतिं ततः॥ ६२॥ - सङ्कर्षणे प्रायश्चित्तरात्रे - २

<u>एकबेर बहुबेर विषये कर्तव्यक्रमः</u>

पवित्रभूषण-स्नान-कौतुकानि ध्रुवे भवेत्॥ ३२॥

एकबेरे तदितरे सर्वं कल्याणकौतुके। - भार्गवतन्त्रे – २१

<u>पवित्रोत्सवे निवेदन विशेषाः</u>

महाहविर्निवेद्याथ उपदंशसमग्रवत्।

अपूपैर्विविधैर्भक्ष्यैर्नैवेद्यं तु जनार्दनम्॥ १२२॥

क्रमुकैः श्वेतपर्णैश्च चूर्णमिश्रं समर्पयेत्।

नृत्तगीतैश्च सकलं रात्रिशेषं समापयेत्॥ १२३॥ - मार्कण्डेये - २३

## पवित्राधिवास विषयाणि

निशायां पवित्राधिवासः

नयेत्तत्रैव तां रात्रिं जपध्यानपरस्सदा।

अपरेद्युर्निशायां स्यादधिवासनकर्म तत्॥१०२॥ - पाद्मे - १४

माहेन्द्रमण्डले पवित्रभाण्ड स्थापनम्

शालीनां दशभिर्भारैः कृत्वा माहेन्द्रमण्डलम्।

पवित्रभाण्डमखिलं तत्र संस्थाप्य देशिकः॥६२॥ - विश्वामित्रे - २४

पवित्राधिवासे मङ्गलद्रव्याणां साधनम्

पद्ममध्ये पवित्राणि बाह्ये द्रव्यानि सादयेत्।

दन्तकाष्ठं तथा पूर्वे पूर्णकुम्भं तु दक्षिणे॥१०७॥

मृत्तिकां पश्चिमे न्यस्य कोष्ठं सौम्ये तु विन्यसेत्।

आग्नेय्यां चन्दनं न्यस्य कुशान्नैर्ऋतगोचरे॥१०८॥

वायव्यां कुङ्कुमं न्यस्य ऐशान्यामञ्जके न्यसेत्।

दूर्वां शलाकां वक्रे च न्यसेदाभरणानि च॥१०९॥

तद्बाह्ये परितो न्यस्य चतुर्दिक्षु यथाक्रमम्।

गन्धादिभिः समभ्यर्च्य सर्वद्रव्याणि देशिकः॥११०॥ - मार्कण्डेये - २३

पवित्राधिवासः (वर्तमान प्रकारः)

स्थण्डिलेऽथ पवित्राणि प्रागुदग्वा निवेशयेत्॥२३२॥

पुण्याहवारिभिः प्रोक्ष्य शोषणादि समाचरेत्।

गन्धद्रव्यै र्धूपयित्वा विकिरेत् कुसुमान्यपि॥२३३॥

नवेन वाससाच्छाद्य चक्रमुद्रां प्रदर्शयेत्।

अस्त्रमन्त्रेण संपूज्य मण्डपं तन्तुभिः क्रमात्॥२३४॥

ऐशानीं दिशमारभ्य चास्त्रेण परिवेष्टयेत।

सुदर्शनं मण्डपोच्चै भूमौ पद्ममतःपरम्॥२३५॥

द्वारेष्वपि गदाशङ्खं ध्यात्वाऽष्टासु दिशास्वपि।

माषोदनेन भूतेभ्यो बलिं दत्वा यथाविधि॥२३६॥ - विष्णुतिलके - ८

<u>पवित्राधिवास विधिः</u>

तानि भूषणपात्राणि वेष्टयेन्नववाससा।

दर्शयेच्चक्रमुद्रां च पूजयेदस्त्रविद्यया॥१०९॥

ऐशानीं दिशमारभ्य सूत्रैस्संवेष्ट्य मण्डपम्।

मण्डपस्योपरि ध्यात्वा चक्रं भूमितले पुनः॥११०॥

पद्मं गदाञ्च द्वारेषु शङ्खमष्टसु दिक्षु च। - पाद्मे - १४

<u>पवित्रे लेपनीय मङ्गलद्रव्याणि</u>

पवित्रपात्रमादाय गन्धादीनां च मङ्गलम्।

गोरोचनं च कर्पूरं सिन्धूरं कुङ्कुमं तथा॥४६॥

हरिद्रा गैरिकं वापि मङ्गलद्रव्यमुच्यते। - कपिञ्जले -३२

<u>पवित्रेषु द्रव्य लेपनम् - पूरणञ्च</u>

कुङ्कुमै रोचनाभिश्च तथा मलयजैरपि।

लोहितैरप्यवश्यायैस्सम्पिष्टैः कर्दमीकृतैः॥८९॥

ग्रन्थीनामन्तरालानि लिम्पेच्छोभा यथा भवेत्।

ग्रन्थीनां पूरणं यद्वा मल्लिकाद्यैस्सुगन्धिभिः ॥९०॥

पुष्पैस्तदन्तरालानि निशाचर्चाभिरेव वा।

रञ्जयेत्तन्तवश्चापि ग्रन्थयश्च यथेच्छया॥९१॥ - पाद्मे - १४

<u>पवित्राधिवास होमः</u>

मण्डलस्योत्तरे देशे जुहुयात्तन्तुसङ्ख्यया॥१०४॥

ग्रन्थीनां सङ्ख्ययाचैव जुहुयात् प्रणवेन च।

समिधो हविराज्यं च होमद्रव्याणि देशिकः॥१०५॥

हुत्वा सम्पातविधिना पवित्राणि च संस्पृशेत् ।

हुत्वा स्पृष्ट्वा पवित्राणि स देवस्याधिवासयेत्॥१०६॥ - मार्कण्डेये - २३

<u>पवित्रेषु संपाताज्य स्पर्शनम्</u>

वर्तयित्वाथ चक्राब्जं देवं तत्र निवेशयेत्।

अभ्यर्च्य च निवेद्याथ स्थण्डिलेऽपि सलक्षणान्॥२३७॥

कुंभान्नव च विन्यस्य महोत्सवविधानतः।

सुदर्शनं च करके समावाह्य समर्चयेत्॥२३८॥

अग्नौ समिच्चरुघृतै र्हुत्वा संपातमाहरेत्।

सेचयित्वा पवित्राणि पवित्रारोहणं चरेत्॥२३९॥ - विष्णुतिलके - ८

<u>अधिवास गन्धपवित्रारोपण मन्त्रः</u>

आचार्यो मूर्तिपैः सार्धं पवित्रं चाधिवासितम्।

आदाय देवपुरतः स्थित्वा देवस्य मूर्धनि॥१००॥

इदं विष्ण्वति मन्त्रेण न्यसेद्गन्धपवित्रकम्।

पुनः संप्रार्थ्य देवेशमर्घ्यपाद्यादिभिः क्रमात्॥१०१॥ - मार्कण्डेये - २३

<u>अधिवास पवित्रारोहण मन्त्रः</u>

अधिवासपवित्राणि गृहीत्वा देशिकस्स्वयम्॥४६॥

कुम्भे च करके कुण्डे मण्डले च यथाक्रमम्।

तद्विष्णोरिति मन्त्रेण न्यसनीयानि पद्मज॥४७॥ - पुरुषोत्तमे - २६

<u>अधिवास चक्राब्ज विसर्जनम्</u>

आदाय मण्डलाद्बिम्बं स्थाप्य पश्चिमतस्ततः।

मण्डलं केवलं चेत्तु तस्मात् कुम्भे विसर्जयेत्॥५७॥ - नारदीये - २३

## <u>पवित्रपूजा विषयाणि</u>

<u>पवित्रग्रन्थि सङ्ख्यानुरोधेन पूजाक्रमः</u>

अधमे ग्रन्थयः पूज्याः द्वादशार्णाक्षरैः क्रमात्॥५३॥

चतुर्विंशतिभिस्तत्त्वैः पूजनीयाश्च मध्यगाः।

द्वादशार्णाक्षरैश्चैव धरान्तैः तत्त्वसञ्चयैः॥५४॥

उत्तमे ग्रन्थयः पूज्याः षड्विंशद्भिर्यथाक्रमम्।

ग्रन्थयो वनमालायां सर्वैरेतैः पुनः पुनः॥५५॥

एवं कृत्वाधिवासं तु नृत्तगेयादिसंयुतम्। - नारदीये - २३

<u>किरीट - श्रीवत्स - कौस्तुभ - वनमाला पवित्रेषु आवाहनविधिः</u>

किरीटाख्य सुरेशस्य भानुतुल्यप्रभान्वित॥२१९॥

परिवारयुतस्तिष्ठ त्वमस्मिन् शीर्षभूषणे।

श्रीवत्सागच्छपूर्णेन्दु समाने भगवत्प्रिय॥२२०॥

वक्षःस्थले जगद्योनेर्भूषणं कल्पितं मया।

कौस्तुभागच्छ रत्नानामीश त्वं भगवत्प्रिय॥ २२१ ॥

वक्षःस्थले जगद्योनेभूषणं कल्पितं मया ।

धातुपुष्पसमाकीर्णे प्रवालमणिभूषिते॥ २२२ ॥

वनमाले समागच्छ देवदेवप्रिये शुभे।

चतुर्भिरेतैर्मन्त्रैस्तु क्रमेणावाहयेद्द्विजाः॥ २२३ ॥ - ईश्वरे - १४

<u>भगवत्पवित्रेषु आवाहनविधिः -पूजा -स्वयंव्यक्तादि भेदेन पूजाभेदाः</u>

तत्र योगासनं ध्यात्वा पूजयित्वा यथाविधि।

मकुटाधिपते विष्णो वासुदेव दयानिधे॥ ७८ ॥

परिवारयुतस्तिष्ठ त्वमस्मिन् शीर्षभूषणे।

इति मूलात्समावाह्य सैद्धादिषु च दिव्यतः॥ ७९ ॥

सालग्राम्णि च दिव्ये च स्वयंव्यक्ते मम प्रिये।

एतेषु नित्यं तिष्ठामि तस्माच्छ्रेष्ठतमा भुवि॥ ८० ॥

सिद्धादिषु प्रतिष्ठायां पवित्रारोपणेऽपि च।

तेभ्य एव समावाह्य पूजयेद्देशिकोत्तमः॥ ८१ ॥

तस्मादावाह्य तन्मुद्रां प्रदर्श्यार्घ्यादिना यजेत्। - श्रीप्रश्ने - ४२

<u>श्रीवत्सादि पवित्राणां आवाहनम् - तदङ्गं पवित्रेषु प्रार्थना</u>

सम्प्रार्थयेत् पवित्रेषु श्रीवत्सादीन् यथाक्रमम्।

श्रीवत्साधिष्ठिते लक्ष्मीः शम्पाकोटिसमप्रभे॥ ८३ ॥

वक्षोभूषापवित्रेऽस्मिन् हरेः सान्निध्यमाचर।

जठरान्तं मधुरिपोः पवित्रं कल्पितं मया॥८४॥

कौस्तुभाधिपते भानो त्वमस्मिन् सन्निधिं कुरु।

मुक्ताफलसमे सोम त्वमस्मिन् हारसंज्ञिके॥८५॥

पवित्रे सन्निधिं प्राप्य भगवत्प्रीतिमावह।

तुलसि त्वं भगवतः प्रिये सर्वाङ्गशोभिनि॥८६॥

पवित्रे वनमालायां सन्निधत्स्व यथासुखम्।

श्रियादीनां पवित्रेषु पद्ममध्यस्थिते रमे॥८७॥

सान्निध्यं कुरु लोकानां मङ्गलाय हरिप्रिये।

विमानपरिवाराणां देवानां भूषणेष्वपि॥८८॥

सुदर्शन सहस्रार सान्निध्यं कुरु सर्वदा।

द्वारतोरणकुम्भानां पवित्रेषु हरेः प्रिय॥८९॥

पाञ्चजन्य त्वमधुनासन्निधत्स्व महास्वन।

मानुषाणां पवित्रेषु वज्री त्वं सन्निधिं भज॥९०॥

एवं तत्तत्पवित्रेषु तत्तद्देवान् समर्चयेत्। - श्रीप्रश्ने - ४२

<u>पवित्राणामभिमन्त्रण मन्त्रः</u>

पवित्रं तत्र विन्यस्य पवित्राण्यभिमन्त्रयेत्।

इदं विष्णिवति मन्त्रेण पवित्राणि पृथक् पृथक्॥५१॥ - कपिञ्जले -३२

## पवित्रारोपण विषयाणि

<u>एकबेर - बहुबेर भेदेन पवित्रारोपणक्रमः</u>

एकबेरे तु कल्याणकौतुकाराधनं विना॥ ११५॥

अन्यत्सर्वमनुष्ठेयं यथापूर्वोदितक्रमात्।

सम्भवे कौतुके तस्मिन् पवित्रं भूषणं पुनः॥ ११६॥ - पाद्मे - १४

<u>पवित्रारोपण मन्त्राणि</u>

अन्येषामप्यनुक्तानां पवित्राणि यथायथम्।

मन्त्रश्च विष्णुगायत्र्या यद्वेदं विष्णुरित्ययम्॥ १३६॥

यद्वा चाष्टाक्षरेणैव मन्त्रेण द्वादशात्मना। - पाद्मे - १४

<u>पवित्रारोपणमन्त्रः होमश्च</u>

ममोपरि प्रसादार्थं पवित्राणि समर्पये।

सौवर्णपट्टकौशेयरुचिराणि नवानि भोः॥५॥

अर्चितानि पवित्राणि गृहाण श्रीरमापते।

इत्येवं हि पवित्रार्चाहोमस्त्रिमधुभिः शतम्॥५२॥ - शाण्डिल्ये – २५

<u>चतुस्थाने पवित्र समर्पणे मन्त्रभेदाः</u>

कुम्भे चाष्टाक्षरेणैव मण्डले द्वादशाक्षरम्।

बिम्बे च विष्णुगायत्र्या कुण्डे चैव षडक्षरम्॥ १२४॥

भूषणे भूषणे चैव अर्घ्याद्यैस्संप्रपूजयेत्। - अनिरुद्धे – २४

<u>उपकुम्भादिषु पवित्रसङ्ख्या -अष्टमङ्गल पालिकादिषु च पवित्रारोपः -मन्त्रश्च</u>

उपकुम्भेषु सर्वेषु वासुदेवादिमन्त्रतः।

वारुणादिनिर्ऋत्यन्तं योजयेन्मन्त्रवित्तमः॥१२८॥

त्रितयं द्वितयं वापि एकैकं वा यथेच्छया।

रक्षां कुम्भेषु सर्वेषु पूर्वादिक्रमयोगतः॥१२९॥

एकमेवाप्यलं कुर्यात् अस्त्रकुम्भे त्रयं द्वयम्।

अष्टमङ्गलकैः पश्चात्पालिकायामनन्तरम्॥१३०॥

पायसान्नं निवेद्याथ सूक्तेनैव बलिं क्षिपेत्। - अनिरुद्धे - २४

<u>मूलबिम्बस्य पवित्र धारणे अर्घ्याद्युपचार सम्पुटीकरणेन पृथक् पृथक्</u>

<u>पवित्र धारणम्</u>

स्मृत्वा कृत्वा च सन्धानं दद्यात्प्रतिसरं ततः।

अर्घ्यपुष्पैस्तथा गन्धैर्माल्यैर्धूपैस्तथा द्विजाः॥२११॥

पूजया सम्पुटीकुर्याद्भूषणानि पृथक् पृथक्।

अन्तरान्तरयोगेन घण्टाशब्दसमन्विता॥२१२॥ - ईश्वरे - १४

<u>मण्डलेपवित्रसङ्ख्या</u>

मूलमन्त्रादिसर्वस्य मन्त्रचक्रस्य नारद।

त्रीणि त्रीण्यथवा द्वे द्वे एकैकं सत्यसम्भवे॥१२॥ - जयाख्ये - २१

<u>अग्निस्थस्य पवित्रारोपणे विशेषः</u>

पूजयित्वा ततोऽग्निस्थं विभुं बिम्बगतं ततः॥६४॥

कलशोक्तप्रयोगेण भूषणैस्तु त्रिभिस्त्रिभिः।

अग्नौ निवेदयेद्विप्र भूषणं न तु होमयेत्॥६५॥

यस्मात्सन्यासमूर्ध्वे तु विहितं भूषणस्य च।

नाहर्त्तुं युज्यते दग्धं दोषमाहरणं विना॥६६॥ - जयाख्ये - २१

<u>आचार्यादीनां - यजमानानां - भक्तानां च पवित्रारोहणे क्रमः</u>

भक्तानां धारणार्थाय कल्पितानि यथातथम्॥५२॥

पवित्रारोपणं कार्यं विमानेगोपुरेषु च।

पवित्राणि समादाय न्यस्य देवस्य पादयोः॥५३॥

यजमानाय दातव्यं धारयन् देशिकः पुरा।

ऋत्विजां ब्राह्मणादीनां भक्तानां चैव दापयेत्॥५४॥ - पुरुषोत्तमे – २६

<u>आचार्यस्य क्षौमपवित्रारोहः</u>

कल्पितानि मनुष्याणां पवित्राणि यथायथम्।

न्यस्य देवेशपादयोः पुष्पवत् सुसमाहितः॥१४०॥

क्षौमादीनि पवित्राणि देवं विज्ञाप्य देशिकः।

स्वयं गृहीत्वा क्षौमादि पवित्रं चात्मनः कृतम्॥१४१॥

दद्यात्पूजकमुख्यानामृत्विजां सहकारिणाम्। - पाद्मे - १४

<u>ब्राह्मणादि वर्ण भेदेन पवित्रधारण भेदाः</u>

ब्राह्मणाः क्षत्रियाश्चैव धारयेयुश्च हारवत्।

यज्ञोपवीतवद्धार्यं वैश्यैर्वैष्णव लक्षणैः॥५५॥- पुरुषोत्तमे – २६

<u>उत्सवान्तं पवित्राणि नावरोपणम्</u>

सङ्कल्पपूजां यावच्च तावद्वस्त्राणि भूषणान्॥११८॥

पवित्राण्यपि देवस्य वल्लभे नावरोपयेत्। - श्रीप्रश्ने – ४२

## पवित्रोत्सव दिन सङ्ख्या

मासं पक्षं त्रिरात्रं वा अहोरात्रमथापि वा।

अर्पितं च पवित्राणां तावत्कालं समाचरेत्॥ ७९॥

अनिर्वारितमन्नाद्यैः सर्ववर्णानि पूजयेत्। - कपिञ्जले -३२

पवित्रोत्सव दिन सङ्ख्या

न्यसनीयानि दिवसांश्चतुर्दश चतुर्मुख॥ १५१॥

यद्वैकविंशतिं सप्त यदि वा दिवसानपि।

त्रिरात्रमेकरात्रं वा पश्चात्तान्यवरोहयेत्॥ १५२॥ - पाद्मे – १४

## पवित्रोत्सवे अवभृथादि विषयः

अवभृथ देशाः - तीर्थबिम्बाभावे विधिः

अपरेऽहनि वै कुर्याच्चतुर्थे सप्तमेऽपि वा॥ २७६॥

स्नपनं पूज्यमन्त्रस्य तीर्थोद्देशेऽथ सङ्गमे।

नद्यां समुद्रगामिन्यां देवखाते ह्रदे तु वा॥ २७७॥

प्रीतये परमेशस्य त्वात्मनो दुःख-हानये।

अह्लादायामराणां च पितॄणां तृप्तये तु वै॥ २७८॥

आप्यायनार्थं भूतानां भुवनानां च भूतये।

देशदोषप्रशान्त्यर्थं गोब्राह्मणहिताय वै॥ २७९॥

यथावत्स्नपनं कुर्यात्तीर्थबिम्बे विशेषतः।

नित्यस्नपनबिम्बे तु कुर्यात्तत्तदसन्निधौ॥ २८०॥

नित्योत्सवपरे बिम्बे ह्याचरेत्तदसन्निधौ।

तदभावे पवित्रे तु दर्भमञ्जरिजे शुभे॥ २८१ ॥ - ईश्वरे – १४

## पवित्रावरोहणादि विषयाणि

### पवित्रविसर्जन क्रमः

क्रमादारोहयेत्पूर्वं पश्चाच्चैवावरोहयेत्।

कनिष्ठादिपवित्रं च प्रत्येकं धूपदीपकैः॥ १३३ ॥

नानाविधफलादीनि निवेद्य च पृथक् पृथक्।

विसर्जयेत्क्रमात्पूर्वमाचार्यः सुसमाहितः॥ १३४॥

परिवारपवित्राणि जङ्गमादीन् विसृज्य च। - मार्कण्डेये – २३

### विसर्जितपवित्रस्य विष्वक्सेनाय समर्पणम्

बिसर्जयेत् पवित्राणि विष्वक्सेनाय दापयेत्॥ १३५॥

विष्वक्सेनप्रदानं च आचार्याय निवेदयेत्।

विसर्जयेद्विधानेन मण्डलस्थमधोक्षजम्॥ १३६ ॥

कुण्डमध्यगतं देवं स्वस्यात्मनि निवेदयेत्। - मार्कण्डेये - २३

### मण्डलस्य - परिवारस्य च विसर्जितपवित्र विषयः

मण्डलस्थं च निर्माल्यं सङ्ग्रहेत् परिचारकः॥ १३७॥

विष्वक्सेने विसृज्यैव निर्माल्यं सकलं च तत्।

परिवारैस्तु कर्तव्यं धारणं श्रद्धयान्वितम्॥ १३८॥

सङ्गृह्य सकलान् भोगान् लोहपात्रेण मूर्धनि।

तटाकं तु समागत्य अप्सु मध्ये विनिक्षिपेत्॥ १३९॥

सचेलनस्नानमाचर्य आगन्छेत्पुनरालयम्। - मार्कण्डेये – २३

<u>पवित्रावरोपण मन्त्रः - आचार्याय दापनञ्च</u>

उच्चरन् पौरुषं सूक्तं साम यद्वा रथन्तरम्।

त्रिसुपर्णं तथा मन्त्रं मूलमन्त्रमथापि वा॥ १५३॥

अवरोप्य पवित्राणि देयानि गुरवे ततः। - पाद्मे – १४

<u>पावित्राणि सर्वाणि आचार्यायैव दद्यात् -अन्यथा दोषः</u>

तत्पवित्राणि संछावानाचार्याय प्रदापयेत्।

तत्प्रदानं हरेः प्रीत्यै भविष्यति न संशयः॥ ६५॥

अन्यथा विनियुक्तश्चेद्राजराष्ट्रं विनश्यति। - पुरुषोत्तमे - २६

<u>पवित्रविसर्जनानन्तरं विनियोगक्रमः</u>

आरोपितपवित्राणि आचार्यस्स्वयमाहरेत्।

द्विजादि सर्ववर्णानां भक्तानां भावितात्मनाम्॥ १४६॥

पवित्रकगणं तद्वत् दापयेच्च पृथक् पृथक्। - अनिरुद्धे - २४

<u>पवित्रमाला धारणे फलम्</u>

पवित्रधारणाद्विप्र सर्वपापहरं भवेत्॥ १४७॥

सर्वयज्ञफलं चैव सर्वतीर्थफलं लभेत् । - अनिरुद्धे - २४

<u>पवित्रमाला धारणे फलम्</u>

पवित्रोत्सव काले तु वासुदेवस्य चक्रिणः॥ ८०॥

पूजालोपादि शान्त्यर्थमर्पितं तु पवित्रकम्।

भक्त्यायो धारयेन्नित्यं तस्य कुत्रापिच द्विजाः॥ ८१॥

कर्मलोपं तु न भवेदिति शास्त्रविनिश्चयः। - परमपुरुषे - ४

<u>आचार्य सम्मान क्रमः - यतीनाञ्च सम्मानम्</u>

ततस्तु पूजयेद्भक्त्या यजमानस्तु देशिकम्।

गन्धानुलेपनैः पुष्पैर्वस्त्रैश्च वरभूषणैः॥ ७१॥

निष्काणां तु शतं वापि शतार्धं शक्तितोऽपि वा।

दक्षिणां गुरवे दत्त्वा प्रसाद्य च पुनः पुनः॥ ७२॥

यतींश्च वैष्णवान् भक्तान् विद्यागुणवयः क्रमात्।

सम्पूजयेद्यथावित्तं यथाश्रद्धं यथारूचि॥ ७३॥

आचण्डालाद्यमन्नाद्यं दद्यात्तत्रैव चाहनि। - नारदीये - २३

<u>पवित्रारोहणहीने प्रत्यवायः</u>

पवित्रकर्महीने तु नित्यपूजा विनश्यति॥ ५॥

नित्यपूजाविनाशे तु राष्ट्रं क्षयमवाप्नुयात्।

तग्रामोनिधनं याति तत्स्थानं नाशनं भवेत्॥ ६॥

तस्मात्सर्वप्रयत्नेन पवित्रारोपणं चरेत्। - अनिरुद्धे - २४

<u>पवित्रारोहणहीने दोषाः</u>

वर्षे वर्षे तु कर्तव्यं प्रायश्चित्तं महामुने!।

पवित्रे त्वकृते वर्षे दोषाणामभिवर्धनात्॥ १३॥

बुद्धेः कालुष्यहेतोश्च प्राणनाशो धनक्षयः।

कुटुम्बे विघ्नभूयस्त्वं राष्ट्रे देशे तथा भवेत्॥ १४॥ - सङ्कर्षणे प्रायश्चित्तरात्रे - २

**<u>पवित्रोत्सवस्य फलम्</u>**

एवं तु विधिवत्कृत्वा पवित्रारोहणं नृप॥ १४८॥

विष्णुसायुज्यमाप्नोति पुनरावृत्तिवर्जितम्।

कामी संप्राप्नुयात्कामान् लभन्ते हि तपस्विनः॥ १४९॥

धर्मकामार्थमोक्षं च पुनर्जन्म न विद्यते। - मार्कण्डेये - २३

<u>पवित्रोत्सवस्य फलम्</u>

इत्येष कथितो ब्रह्मन् पवित्रारोपणे विधिः॥ १५७॥

अनेन विधिना विष्णोः पवित्रारोहणं चरेत्।

कुर्वन् फलान्यनन्तानि प्राप्नुयान्नैव संशयः॥ १५८॥

सुखं जीवति निर्व्याधिर्यावदायुस्समृद्धिमान्।

आयुश्च विन्दति प्राप्तं धर्मार्थी धर्ममाप्नुयात्॥ १५९॥

कामानवाप्नुयात्कामी अर्थार्थी चार्थमाप्नुयात्।

मोक्षार्थी मोक्षमाप्नोति प्रजार्थी लभते प्रजाः॥ १६०॥

बान्धवैर्लभते चापि प्रबासिभिस्समागमम्।

कीर्तिं चाप्नोति परमां कीर्तिकामो न संशयः॥ १६१॥

ज्ञानार्थी ज्ञानमाप्नोति शान्त्यर्थी शान्तिमाप्नुयात्।

शत्रवस्तु प्रणश्यन्ति ग्रहभूताद्युपद्रवाः॥ १६२॥

आरोग्यकामी चारोग्यं श्रीकामः श्रियमाप्नुयात्।

बहुनात्र किमुक्तेन फलं यद्यदभीप्सितम्॥ १६३॥

तत्सर्वं तस्य हस्तस्थं नात्र कार्या विचारणा।

भुक्त्वा भोगांश्च विपुलान् ध्यात्वा चान्ते मधुद्विषम्॥ १६४॥

तल्लोकं समवाप्नोति पुनश्चेह न जायते।

धारयन्ति पवित्राणि ये भक्ताः श्रद्धयान्विताः॥१६५॥

तेऽपि निर्धूय पापानि मोदन्ते दिवि देववत्।

आचार्यौ मूर्तिपास्सर्वे ये चान्ये परिचारकाः॥१६६॥

ये श्रृण्वन्ति च पश्यन्ति कीर्तयन्ति च कर्म तत्।

ते सर्वेऽपि समृद्धार्था लभन्ते सर्वसम्पदः॥१६७॥ - पाद्मे - १४

## गृहे पवित्रोत्सवविधिः

गृहे पवित्रयागे तु विशेषमधुनोच्यते।

विभवानुगुणं तत्र मण्डपाद्यं विधीयते॥७९॥

बिम्बेनाधिष्ठितं मन्त्री मण्डलं न यजेद्गृहे।

दक्षिणां गुरवे दद्यात् सर्वस्वं वार्धमेव वा॥८०॥

आवाहनं तु हृदयात् कुम्भादिष्वपि नित्यवत्। - नारदीये - २३

### गृहे पवित्रोत्सवे पवित्र सङ्ख्या

गृहे पवित्रयागे तु विशेषोऽयमथोच्यते॥२७२॥

बिम्बस्थे मण्डलस्थे वा चतुःस्थानस्थितेऽपि वा।

पवित्राणां त्रयं दद्यादेकैकं वा यथेच्छया॥२७३॥ - ईश्वरे - १४

---

## प्लवोत्सव प्रमाणानि

### प्लवोत्सवे कालनिर्णयः - दिनसङ्ख्या च

शिशिराद्येषु ऋतुषु त्रिष्वेकस्मिन् समाचरेत्।

शुक्लपक्षेऽथ वा कृष्णे देवेशस्य प्ल्वोत्सवम्॥१११॥

यजमानस्य जन्मर्क्षे देवजन्मर्क्षकेऽपि वा।

प्लवाधिरोहणं कुर्याद्राजराष्ट्राभिवृद्धिदम्॥ ११२॥

तन्नक्षत्रानुसारेण सप्ताहं वा नवाहकम्।

पञ्चाहं वा त्र्यहं वापि एकाहं वोत्सवं भवेत्॥ ११३॥ - ईश्वरे - १२

<u>प्लवोत्सव कालः</u>

अथ वक्ष्ये सिन्धुकन्ये क्षीरार्णवमहोत्सवम्।

शैशिरे ग्रीष्मकाले वा शुक्लपक्षे शुभे दिने॥ १॥

मासर्क्षपूर्णिमायां वा कर्तव्यस्तु प्लवोत्सवः। - श्रीप्रश्ने - ३९

<u>प्लवोत्सवे दिन सङ्ख्या</u>

प्लवोत्सवदिनात्पूर्वमष्टषट् चतुरोऽपि वा॥ २॥

द्विदिनं वोत्सवं कृत्वा परस्मिन् दिवसे रमे।

प्लवोत्सवस्तु कर्तव्यः शास्त्रोक्तेन च वर्त्मना॥ ३॥ - श्रीप्रश्ने - ३९

<u>प्लवोत्सवे कार्यक्रमाणि</u>

उत्सवारम्भपूर्वेद्युरङ्कुरार्पणमाचरेत्।

रक्षाबन्धं च विधिवत् कृत्वा देशिकसत्तमः॥ ११४॥

आरम्भदिनमारभ्य प्रत्यहं कालयोर्द्वयोः।

चतुःस्थानार्चनं कुर्याद्बलिदानसमन्वितम्॥ ११५॥

आदावन्ते च देवेशमधमोत्तममार्गतः।

संस्नापयेत्प्रतिदिनं वाहनारोहणं भवेत्॥ ११६॥

अन्तिमे तु दिने कार्यमुडुपस्याधिरोहणम्। - ईश्वरे - १२

<u>प्लवोत्सवे तटाकविषये</u>

सरित्तीरतटाके वा दीर्घिकायां धरासुराः॥१२६॥

वर्षाजलेन संपूर्णे कुर्यात् तोयोत्सवं शुभम्। - वैहायसी - १५

<u>ध्वजारोहण पूर्वक प्लवोत्सवः</u>

ध्वजारोहदिनात् पूर्वरात्र्यामङ्कुरमर्पयेत्।

ध्वजारोहणपूर्वं वा विना वा कारयेत् प्लवम्॥४॥ - श्रीप्रश्ने - ३९

<u>प्रतिदिनं सरस्तीरमण्डप प्रवेशनम्</u>

प्रत्यहं चापि मध्याह्ने देवं देवीसमन्वितम्॥११७॥

यानमारोप्य वस्त्राद्यैरलङ्कृत्य विशेषतः।

ग्रामं प्रदक्षिणीकृत्य सरस्तीरं समानयेत्॥११८॥

तत्र प्रकल्पिते दिव्ये मण्डपे सुमनोहरे।

भद्रासने देवदेवं समारोप्य विशेषतः॥११९॥

अर्घ्याद्यैस्तु समभ्यर्च्य महता हविषा तथा।

ततस्तु देवदेवेशं मन्दिरान्तः प्रवेशयेत्॥१२०॥ - ईश्वरे - १२

<u>सरो लक्षणम्</u>

स्वस्तिके चतुरश्रे वा वृत्ते वापि सरोवरे।

परितः कृतसोपाने चतुर्द्वारोपशोभिते॥१२२॥

चतुर्दिक्षु महोत्तुङ्गगोपुरैश्चोपशोभिते।

समध्यमण्टपे दिव्ये विमलोदकपूरिते॥१२३॥ - ईश्वरे - १२

<u>प्लवलक्षणम् - अलङ्करणञ्च</u>

प्रकल्पितं प्लवं दिव्यं फलकाभिर्दृढीकृतम्।

अनेकस्तम्भसंयुक्तं लोहकीलैर्दृढीकृतम्॥ १२४॥

विमानसदृशाकारं मण्डपाकृतिमेव वा।

द्वितलं त्रितलं वापि चतुःपञ्चतलान्वितम्॥ १२५॥

अलङ्कृतं च विविधैः वितानैः पुष्पमाल्यकैः।

दर्पणैश्चामरैश्चैव ध्वजैश्च विविधैरपि॥ १२६॥

नालिकेरैः पूगफलस्तबकैः कदलीफलैः।

ह्रीबेरैश्चैव घण्टाभिः परितः समलङ्कृतम्॥ १२७॥ - ईश्वरे - १२

<u>प्लवालङ्करणम् - दृढप्लव स्थापनम्</u>

नीराज्य प्लवमध्ये तु योगपीठे न्यसेत् ततः॥ १३७॥

प्लवं कुर्याद् दृढमप्सु न निमज्जेदिधि सत्तमाः।

अलङ्कुर्यात्तु विविधैः वासोभिस्सुमनोहरैः॥ १३८॥

चामरैर्दर्पणैश्चैव बर्हिपिञ्छैर्ध्वजैस्तथा।

नालिकेरैः पूगफलैः स्तबकैः कदलीफलैः॥ १३९॥

घण्टाभिः समलङ्कुर्यात् चालयेन्नाविकैस्ततः। - वैहायसी – १५

<u>प्लवप्रतिष्ठा</u>

प्लवे फणीन्द्रमावाह्य परितः कुमुदादिकान्॥ १२९॥

समभ्यर्च्यार्घ्य-गन्धाद्यैः कुम्भे चावाह्य पूजयेत्।

अग्नावनन्तमन्त्रेण हुत्वा चैव यथाविधि॥ १३०॥

प्लवं तत्कुम्भतोयेन प्रोक्षयेद्देशिकोत्तमः। - ईश्वरे - १२

<u>प्लवप्रतिष्ठा</u>

पुण्याहसलिलैः पूर्वं देशिकः प्रोक्षयेद्द्रमे।

कुम्भे क्षीरार्णवेशं च भूमिं शेषं यथाक्रमम्॥ २८॥

आवाह्य तत्तन्मन्त्रेण पूजयेद्भवनं ततः।

अग्नेः सर्वान् कुम्भतोये समावाह्य गुरुः स्वयम्॥ २९॥

मध्यकुम्भं समादाय घण्टावाद्यसमन्वितः।

तटाकस्य तटं गत्वा कुम्भतोयादपाम्पतिम्॥ ३०॥

प्लवे भूमिं विमाने च शेषमावाहयेद् गुरुः। - श्रीप्रश्ने - ३९

<u>प्लव प्रतिष्ठाङ्ग होमः</u>

कुण्डे वा स्तण्डिलेवाग्निं प्रतिष्ठाप्य यथाविधि।

आज्यभागान्तिमं कृत्वा शेषमन्त्रेण देशिकः॥ १२१॥

अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा।

चरुं पुरुषसूक्तेन जुहुयात्षोडशाहुतीः॥ १२२॥

सम्पादाज्यं समादाय सेचयित्वा प्लवं ततः। - पुरुषोत्तमे - २४

<u>प्लवोत्सवे सरस्तोय पूजा</u>

प्रोक्ष्य पुण्याहतोयेन सरस्तोयं च देशिकः।

दहनाप्यायनाभ्यां च संशोध्य विमलोदके॥ १२८॥

क्षीरार्णवं समावाह्य सम्पूज्यार्घ्यादिभिर्द्विजाः। - ईश्वरे - १२

<u>प्लव - सरस्तोय पूजाविधिः</u>

पुण्याहं वाचयित्वाथ प्लवं संप्रोक्ष्य देशिकः॥ ११८॥

तस्मिन् खगेशमावाह्य पूजयित्वा यथाविधि।

नैवेद्यं भक्तितो दत्वा संप्रार्थ्य विहगेश्वरम्॥ ११९॥

सरस्तोयं तु संस्कृत्य दहनाप्यायनादिभिः।

तस्मिन्दुग्धाब्धिमावाह्य इन्द्रादीन् परितोषयेत्॥ १२०॥ - पुरुषोत्तमे – २४

<u>प्लवे देवस्यारोपणम् - अनुगच्छताः - अन्यजनाः पृथक्प्लवे अनुगच्छनम्</u>

एवं प्लवं तु संस्कृत्य मुहूर्ते तु सुशोभने॥ १३१॥

देवीभ्यां सह देवेशं प्लवमारोपयेद्गुरुः।

आचार्यः साधकश्चैव दीक्षिताः परिचारकाः॥ १३२॥

सेवापरास्तथान्ये च वैष्णवा वेदपाठकाः।

तिष्ठेयुः परितो देवमन्येषां तु पृथक्प्लवः॥ १३३॥ - ईश्वरे - १२

<u>प्लवे भगवन्निवेशनम् इत्यादि</u>

तत्प्लवे देवदेवेशं संयगारोपयेद्गुरुः॥ १२३॥

(भद्रङ्कर्णेतिमन्त्रेण ध्रुवाद्यौरितिमन्त्रतः।)

अर्चका दीक्षिताश्चैव तथैव परिचारकाः।

देवस्य परितस्सर्वे तिष्ठेयुर्भक्तिसंयुताः॥ १२४॥

देवस्याग्रे प्लवेऽन्यस्मिन् नृत्तगीतादिकं चरेत्। - पुरुषोत्तमे - २४

<u>अन्यान् - वाद्यवादकान् - वनितान् पृथक् प्लवारोपविधिः</u>

अन्ये तु न स्पृशेयुस्तं यस्तु शेषात्मकः प्लवः।

वन्दिनो वारिवनिताः ये चान्ये वाद्यवादकाः॥१३४॥

ते ते पृथक्प्लवारूढाः कुर्युर्नृत्तादिकं तथा। - ईश्वरे - १२

<u>प्लवभ्रमण सङ्ख्या - मध्यमण्डपे पूजा क्रमः</u>

शङ्खभेर्यादिनिनदैर्वेदघोषैः समन्ततः॥१३५॥

पुष्पवर्षै-र्विनोदैश्च देवं सन्तोषयेत्तदा।

प्रदक्षिणत्रयं कुर्यात्पञ्चकं सप्तकं तु वा॥१३६॥

ततः सरोमध्यभागमण्डपे देवमानयेत्।

तत्र देवं समभ्यर्च्य अर्घ्याद्यैर्देशिकोत्तमः॥१३७॥

अर्हणं पृथुकापूपनालिकेररसं तथा।

तर्पणं चैव ताम्बूलं मुखवाससमन्वितम्॥१३८॥

निवेद्य देवदेवाय ताम्बूलाद्यैस्ततः परम्। - ईश्वरे - १२

<u>कालद्वये प्लव भ्रमणम् -सङ्ख्याच -पुष्करिण्यां परितः दीपालङ्करणम्</u>

श्रीपुष्टिसहितं देवं प्लवमारोपयेत् ततः।

तूर्यघोषैः शङ्खमिश्रैर्वेदघोषैश्च सम्मितम्॥३६॥

त्रिवारं पञ्चवारं वा प्रादक्षिण्येन वै सरः।

भ्रामयित्वा प्लवं मध्यमण्डपे स्थापयेत् हरिम्॥३७॥

अस्तङ्गते दिनकरे भगवन्तं समर्चयेत्।

पुष्करिण्यास्तु परितः क्लृप्तेष्वायामवत्सु च॥३८॥

आज्यदीपाननुपदं ज्वालायुक्तं प्रकल्पयेत्।

भगवन्तं पुनः कोलमारोप्य च महत्तरैः॥३९॥

दीपैर्वाद्यादिभिश्चैव त्रिवारं भ्रामयेत् प्लवम्।

तमानाय्य देवेशं वीथीभ्रमणमाचरेत्॥४०॥ - श्रीप्रश्ने – ३९

<u>प्लवभ्रमण सङ्ख्या – मुष्टिदीपेन साकं वीथिभ्रमणम् (பந்தக்காட்சி)</u>

प्रदक्षिणत्रयं कुर्यात् पञ्च वा समयं यथा।

पुष्पवर्षैर्विनोदं च कुर्याद् देवस्य तुष्टये॥१४२॥

सिंहासने समारोप्य पश्चान्नैवेद्यमर्पयेत्।

मुष्टिदीपसहस्रैस्तु कृत्वा ग्रामप्रदक्षिणम्॥१४३॥ - वैहायसी - १५

<u>मध्यमण्डपे देवनिवेशनम् - पूजा च</u>

मण्टपं त्रिःपरिक्रंय तस्मिन्नारोपयेत्प्रभुम्॥१२५॥

देवं तत्र समभ्यर्च्य चार्हणं पृथुकादिकम्।

नारिकेलमपूपादीन् निवेद्य तदनन्तरम्॥१२६॥

यानेदेवंसमारोप्य पूर्वोक्तेनैव वर्त्मना।

ग्रामं प्रदक्षिणं नीत्वा मन्दिरं संप्रवेशयेत्॥१२७॥

एवं प्लवोत्सवं कृत्वा नित्यपूजां समाचरेत्। - पुरुषोत्तमे - २४

<u>सायाह्ने प्लवादवरोपणम्</u>( सायाह्ने न प्लव भ्रमणम् )

सेवाजनांश्च सन्तोष्य यावदस्तमयं रवेः॥१३९॥

नानाविनोदैः सन्तोष्य देवं नीत्वा पुनः प्लवम्।

तीरमासाद्य देवेशमवरोप्य प्लवात्ततः॥१४०॥

ग्रामप्रदक्षिणं देवं मन्दिरान्तः प्रवेशयेत्। - ईश्वरे - १२

<u>प्लवोत्सव करणे फलम्</u>

कारयेद्यस्तु सम्पन्नः संसारं तरति ध्रुवम्॥ १४४॥

परिवारयुतो भक्तो नात्र कार्या विचारणा।

तस्मादर्थागमे कुर्यात् प्लवोत्सवं महालये॥ १४५॥ - वैहायसी – १५

---

## जलक्रीडोत्सव प्रमाणानि

<u>जलक्रीडोत्सव कालः</u>

मधुमाधवमासे तु शुक्लपक्षे विशेषतः॥ २४॥

कलयापि चतुर्दश्या ह्यपृष्टे पर्वणि द्विजाः।

जलक्रीडां तु देवस्य कुर्याद्देशिकसत्तमः॥ २५॥ - ईश्वरे – १२

<u>जलक्रीडोत्सव दिन सङ्ख्या</u>

जलक्रीडानुसारेण सप्ताहं वा नवाहकम्।

पञ्चाहं वा त्र्यहं वापि एकाहं वोत्सवं चरेत्॥ २६॥ - ईश्वरे – १२

<u>वसन्तोत्सवाख्य जलक्रीडोत्सवे कार्यक्रमाणि</u>

अङ्कुरार्पणमारभ्य नवमे सप्तमे तथा।

पञ्चमे तृतीये वाऽपि तद्दिने वाऽग्रिमे दिने॥ ६॥

स्नपनं शान्तिहोमञ्च मण्डलं बलिदानकम्।

एवं प्रतिदिनं कार्यं जलक्रीडान्तमेव हि॥ ७॥ - पद्मोद्भवे – २६

<u>जलक्रीडोत्सवे - चतुस्थानार्चनम्</u>

उत्सवारम्भदिवसात्पूर्वेद्युर्निशि देशिकः।

अङ्कुरारोपणं कृत्वा रक्षाबन्धं यथाविधि॥२७॥

उत्सवारम्भदिवसादारभ्य प्रतिवासरम्।

चतुःस्थानार्चनं कुर्यात्सायम्प्रातर्यथाविधि॥२८॥ - ईश्वरे – १२

<u>जलक्रीडोत्सव मण्डप कल्पनप्रकारः</u>

गोपुरद्वारबाह्ये तु जलक्रीडार्थकल्पितम्।

पूर्वं पुरुषमानेन नाभिमानं जलाशयम्॥१९॥

सुधया तद् दृढीकृत्य चतुर्द्वारेण शोभितम्।

सोपानपङ्क्तिभिर्युक्तं जलद्रोण्यात्मकं सरः॥२०॥

तत्र स्तम्भान् चतुः कृत्वा मण्डपं स्थापयेद् गुरुः।

यथाशोभमलङ्कृत्य संपूर्य वारिणा ततः॥२१॥

कस्तूरिकादिगन्धैश्च प्रसूनैर्विकिरेत् ततः।

निशाचूर्णं विनिक्षिप्य पुण्याहोक्तिपुरस्सरम्॥२२॥ - वैहायसी – १५

<u>जलक्रीडा मण्डप पूजा - बलिः</u>

वसन्तं पूजयेत् पश्चात् लोकपालान् प्रपूजयेत्।

अष्टदिक्षु बलिं दद्यात् गेयवाद्यपुरस्सरम्॥२३॥

समाप्य विधिवत् देवमन्दिरं प्रविशेत् ततः। - वैहायसी - १५

<u>जलक्रीडोत्सवे वीथिभ्रमणम् - मध्यन्दिने महामण्डपे चूर्णाभिषेकः</u>

शिबिकायां समारोप्य श्रीपुष्टिभ्यां सह द्विजाः।

नीत्वा महामण्टपं तु तत्र वै भद्रविष्टरे॥३०॥

समारोप्य च देवस्य पुरतो धान्यविष्टरे।

चूर्णाधिवासनं प्राग्वत्कृत्वा देशिकसत्तमः ॥ ३१ ॥

अर्घ्याद्यैर्देवमभ्यर्च्य हविरन्तं यथाविधि।

श्रीसूक्तेन ततो देवं श्रियं पुष्टिं च देशिकः ॥ ३२ ॥

अभिषिच्य च चूर्णेन हारिद्रेण यथाविधि।

देवीभ्यां सह देवेशं भ्रामयेद्ग्रामवीथिषु॥ ३३ ॥

प्रादक्षिण्येन पूर्वोक्तयात्रोपकरणैः सह।

तदा देवस्य देव्योश्च युद्धक्रीडां च कारयेत्॥ ३४॥  - ईश्वरे – १२

<u>देवस्य विविध क्रीडाणि - दिनसङ्ख्या भेदेन युद्धक्रीडा भेदाः</u>

तदा देवस्य देव्योश्च युद्धक्रीडां च कारयेत्॥ ३४॥

प्रथमे गन्धयुद्धं तु द्वितीये पुष्पयुद्धकम्।

तृतीये चूर्णयुद्धं च चतुर्थे तैलयुद्धकम्॥ ३५॥

पञ्चमे क्षीरयुद्धं स्यात् षष्ठे कर्पूरकुङ्कुमैः।

नारिकेलजलैर्युद्धं सप्तमे तु समाचरेत्॥ ३६ ॥

गन्धाम्भसाष्टमे युद्धं नवमे जलयुद्धकम्।

गेहादिग्राममध्यान्तं भक्तैर्भागवतैः सह॥ ३७॥

गणिकादेवदासीभिः कार्यं युद्धं विनोदतः।

युद्धक्रीडां तु कृत्वैवं देवमन्तः प्रवेशयेत्॥ ३८॥

सप्ताहमुत्सवे कुर्यात् चूर्णयुद्धादिसप्तकम्।

पञ्चाहमुत्सवे कुर्यात् क्षीरयुद्धादिपञ्चकम्॥ ३९॥

त्र्यहोत्सवे नालिकेररसयुद्धादिकं भवेत्।

केवलं जलयुद्धं तु कुर्यादेकाह उत्सवे॥४०॥ - ईश्वरे – १२

<u>जलक्रीडा उत्सवे देवं वा -पादुकां वा अवगाहनम्</u>

देवमानीय देवीभ्यामर्घ्याद्यैः परिपूज्य च।

भेरीपटहवादित्रशङ्खघोषसमन्वितम्॥५१॥

स्तुतिमङ्गलघोषैश्च वेदघोषसमन्वितम्।

पौरुषेणैव सूक्तेन कुर्यात्तत्रावगाहनम्॥५२॥

यद्वा(बध्वा) कूर्चे पादुकायां देवमावाह्य मन्त्रवित्।

तत्रावगाहयेद्विप्राः तदानीं देशिकोत्तमः॥५३॥ - ईश्वरे – १२

<u>जलक्रीडा विधिः</u>

प्राङ्मुखोदङ्मुखो वापि देवताभिमुखोऽथ वा॥२५॥

उपविश्य गुरुर्देवमुपचारैः प्रपूजयेत्।

सेचयेद् वारिणा देवं श्रीसूक्तेन द्विजोत्तमैः॥२६॥

यतिभिर्वैष्णवैः सार्धं सिञ्चयेन्मधुसूदनम्।

आचार्यो यजमानश्च मूर्तिपाः भूसुरास्तथा॥२७॥

देवदासीगणाश्चैव सिञ्चेयुर्विष्णुमव्ययम्।

अभिषेकविधैः प्रोक्तं गङ्गास्नानफलं द्विजाः॥२८॥

विष्णुसायुज्यप्राप्त्यर्थमजिह्मो विधिरुच्यते। - वैहायसी – १५

<u>देवस्य जलक्रीडाजलेन सर्वेषां परस्परसिञ्चनम् - फलञ्च</u>

यजमानो मूर्तिपाश्च भूसुरा वैष्णवोत्तमाः।

यतयो ब्रह्मनिष्ठाश्च सिञ्चेयुर्मङ्गळाम्भसा॥५४॥

चातुर्वर्ण्यभवाः सर्वे पुरुषाश्च स्त्रियोऽपि च।

गणिका देवदास्यश्च तथान्ये वाद्यवादकाः॥५५॥

परस्परं च सिञ्चेयुः सर्वे मङ्गळवारिभिः।

गङ्गास्नानफलं प्राप्य विष्णुसायुज्यमाप्नुयात्॥५६॥ - ईश्वरे – १२

<u>जलक्रीडा उत्सवे आर्द्रवस्त्रेण देवस्य वीथिभ्रमणं फलञ्च</u>

याने देवं समारोप्य सह स्नानार्द्रवाससा।

जलक्रीडापुरस्कं तु यात्रोपकरणैःसह॥५७॥

भ्रामयेद्ग्रामवीथीषु प्रीतये वरुणस्य च।

प्रजानामपि सर्वेषां पवित्रीकरणाय च॥५८॥

ततस्तु देवदेवेशं मन्दिरान्तः प्रवेशयेत्। - ईश्वरे – १२

<u>जलक्रीडोत्सव दिन सङ्ख्या - फलञ्च</u>

एकाहादि नवाहान्तं वसन्तोत्सवमाचरेत्।

सर्वपापहरं पुण्यं सर्वक्षोभनिवारकम्॥३७॥ - वैहायसी – १५

---

## <u>वसन्तोत्सव प्रमाणानि</u>

<u>वसन्तोत्सव कालः</u>

शिशिरे वा वसन्ते वा वसन्तोत्सवमाचरेत्॥९९॥ - पाराशर्ये – २४

<u>वसन्तोत्सव कालः</u>

वसन्तसमये वापि ग्रीष्मे वा शुक्लपक्षगे॥२॥

पूर्णिमायामवभृथमविद्धायां वा वरानने।

विद्धा चेत् प्रथमायां वा निश्चित्यावभृथं गुरुः॥३॥ - श्रीप्रश्ने – ३८

<u>वसन्तोत्सव कालः क्रमश्च</u>

चैत्रवैशाख मासे वा वसन्ताख्य महोत्सवः।

यद्वा ग्रीष्मऋतौ कुर्यात् पुष्पोद्यान जलाशये॥२५९॥

मण्डपे देवमानीय शैत्यसौरभ्य वस्तुभिः।

उपचर्य यथापूर्वं मन्दिरान्तर्भुवं नयेत्॥२६०॥ - विष्णुतिलके – ८

<u>वसन्तोत्सव दिनसङ्ख्या - कार्यक्रमाणिच</u>

निश्चित्य सप्तरात्रं तु पूजयेत् पुरुषोत्तमम्।

ध्वजारोहं विना लक्ष्मीरङ्कुरार्पणपूर्वकम्॥४॥

चतुः स्थानार्चनं कुर्याद् रक्षाबन्धपुरः सरम्।

उत्सवारम्भदिवसादारभ्य प्रितिवासरम्॥५॥

कालयोर्बलिदानं स्याद् द्वारतोरणपूजनम्। - श्रीप्रश्ने - ३८

<u>वसन्तोत्सव मण्डपनिर्माणविधिः</u>

दक्षिणाभिमुखं पीठं तन्मध्ये हस्तमुन्नतम्॥८॥

संस्थाप्य परीधायां तु पूरयेद् गन्धवारिभिः।

कदलीस्तम्भपूगादिफलपुष्पैरलङ्कृतम्॥९॥

चन्दनैः सर्वतोगन्धैर्वासितं धूपितं तथा।

मण्डपं शैत्यसंयुक्तं कृत्वा देशिकसत्तमः॥१०॥ - श्रीप्रश्ने – ३८

<u>वसन्तोत्सव कालः - देवं दक्षिणाभिमुखस्स्थापनविधिः</u>

वसन्तकालतृप्त्यर्थं तत्समृद्धिभिराहृतैः॥११॥

पुष्पैर्नानाविधैर्देवमर्चयेद्दक्षिणामुखम्।

आसीनं मण्डपे क्लृप्ते वेदिमध्ये मनोरमे॥ १२॥

उद्याने मन्दिरे वापि कृत्रिमोद्यानशोभिते।

नद्यादौ च यथायोगं फलपुष्पोदकान्विते॥ १३॥ - पाद्मे - १४

<u>वसन्तोत्सव मण्डपे देवस्य उपचाराः - निवेदनानि च</u>

ततो मण्डपमानीय स्थापयेद्रत्नविष्टरे॥ १६॥

व्यजनैर्वीजयेद् देवं वासनावस्तुभावितैः।

सम्पूजय च यथाशास्त्रं भक्ष्याणि विविधानि च॥ १७॥

उर्वारुकाणां खण्डानि पानीयं वासनायुतम्।

शर्कराखण्डमिश्राणि श्याममुद्गदलानि च॥ १८॥

फलैश्च विविधैः साकं दध्यन्नं विनिवेदयेत्।

नीराजनं ततः कृत्वा नाट्यं गानं च कारयेत्॥ १९॥ - श्रीप्रश्ने – ३८

<u>वसन्तोत्सव दिनसङ्ख्या - अवभृथोत्सवञ्च</u>

एवम् षडुत्सवम् कृत्वा वासरस्य परस्य च।

सायाह्ने रथमारोप्य वैनतेयमथापि वा॥ २४॥

श्रीपुष्टिभ्यां सह विभुं भ्रामयेद् वीथिका क्रमात्।

अवरोप्य रथाद्देवं तीर्थबिम्बेन सम्मितम्॥ २५॥

नदीतीरं तटाकं वा नीत्वावभृथमाचरेत्।

ततो मण्डपमानीय पूर्ववत् पूजयेत् क्रमात्॥ २६॥ श्रीप्रश्ने – ३८

<u>वसन्तोत्सव काल व्यत्यासे दोषः</u>

एषोत्सवः शुक्लपक्षे कर्तव्यः शास्त्रवर्त्मना।

क्रियेत कृष्णपक्षे तु राज्ञो राष्ट्रस्य वै रमे॥३१॥

यजमानस्य च वै गुरोः सर्वसम्पद्विनाशकृत्। - श्रीप्रश्ने – ३८

---------------------------------------------------------------------

## <u>वैशाखोत्सव प्रमाणानि</u>

<u>वैशाखोत्सवकालः - फलञ्च</u>

विशाखायां तु कर्तव्यम् उत्सवं वर्णयाम्यथा।

विशाखर्क्षेऽथ वैशाखे पौर्णिमास्यां विशेषतः॥५८॥

फलपूजाविशेषेण गदिता(कथिता) तन्त्रकोविदैः।

फलं धनादिकं धान्यं कीर्तिं च शुभनाविलाम्॥५९॥

प्राप्नोति याजकः संपदचलां श्रियमेव च।

इहलोकेऽखिलान् भोगान् भुक्त्वा याति परं पदम्॥६०॥ - वैहायसी - १५

<u>वैशाखोत्सव कालः</u>

सौरमासे तु वैशाखे विशाखर्क्षे तु पूर्णिमा।

पुष्पपूजाविशेषेण विशाखोत्सवमर्पयेत्॥४०॥ - पाराशर्ये - २४

<u>वैशाखोत्सव कालः</u>

अतः परं प्रवक्ष्यामि विशाखोत्सवमुत्तमम्॥९३॥

वृषभस्थे दिनकरे पौर्णमासी तु या भवेत्।

विशाखा ऋक्षयुक्ता वा ह्ययुक्ता वा द्विजोत्तमाः॥९४॥

चतुर्दश्यां ह्यविद्धायां तस्यामुत्सवमाचरेत्। - ईश्वरे – १२

<u>वैशाखोत्सवोक्त फलानि</u>

सहकारफलादीनि नालिकेरफलान्यपि॥९५॥

द्राक्षाखर्जूरकादीनि मातुलङ्गफलान्यपि।

अन्यानि चैव योग्यानि यथालब्धानि वा द्विजाः॥९६॥ - ईश्वरे – १२

<u>फलवर्ग संस्कारः - मण्डपे फलालङ्करणम्</u>

आहृत्य सर्वाण्येकत्र स्थापयेद् देशिकस्तदा।

यथाऽवस्थितरूपेण शोधनार्हाणि शोधयेत्॥६३॥

क्षालनार्हाणि संक्षाल्य कदलीदलसञ्चयान्।

चूतादीनां फलं चापि पाचयेद् गुडमिश्रितम्॥६४॥

मरीचिजीरकैर्युक्तं नारिकेलफलान्वितम्।

एलाकर्पूरसंयुक्तं शर्करा मधुसंयुतम्॥६५॥

महाहविप्रकारेण महाराशिं प्रकल्पयेत्।

मधुराद्या रसास्सर्वाः शाकाः सफलमूलकाः॥६६॥

पानकानि पवित्राणि रसानि मधुपर्कवत्।

तथाऽर्हणफलादीनि मण्डपे शोभयेत्तदा॥६७॥ - वैहायसी - १५

<u>वैशाखोत्सवे पत्र - पुष्प - फलादि निवेदनम्</u>

मल्लिका मालती कुन्द कुरवैर्दमनैस्तथा।

आम्रैः पद्मैरुत्पलाद्यैरलङ्कृत्य गुरूत्तमः॥४१॥

चतुःस्थानार्चनं कुर्याद् द्वारतोरणपूर्वकम्।

पनसं कदलीं चैव सहकारफलानि च॥४२॥

नालिकेरस्य खण्डांश्च लाक्षाखर्जूरकानि च।

एतेषां परीमाणस्य समं क्षीरं च शर्कराम्॥४३॥

किञ्चिन्मरीचिमेलां च कर्पूरं च पलं पलम्।

संशोध्यैतानि विधिवत् पाकस्थाने तु पाचयेत्॥४४॥

चतुर्विधानि चान्नानि भक्ष्याणि विविधानि च।

देवमाराध्य विधिवत्तस्मै सर्वं निवेदयेत्॥४५॥

पानकं नालिकेराम्बु शीतलं तर्पणं जलम्।

ताम्बूलं च निवेद्याथ भक्तेभ्यो दापयेत् क्रमात्॥४६॥ - श्रीप्रश्ने - ३८

<u>फलानां पाचन क्रमः</u>

फलानि सहकाराणां क्षीरेण गुडमिश्रितम्।

पाचयेन्नालिकेराणां खण्डैश्चैव मरीचिभिः॥१०२॥

एलाकर्पूरचूर्णैश्च मिश्रयेदेवमेव हि।

महाहविः पायसादीनपूपांश्च प्रकल्पयेत्॥१०३॥ - ईश्वरे - १२

<u>फलोत्सवे वीथिभ्रमणम्</u>

अलङ्कृत्य तु देवेशं यानमारोप्य बन्धयेत्॥१०॥

शङ्खतूर्य समायुक्तं छत्रचामरसंयुतम्।

सर्वमङ्गल संयुक्तं ग्रामं नीत्वा प्रदक्षिणम्॥११॥ -विश्वामित्रे -२६(अनुबन्धः २)

<u>वैशाखोत्सवस्य फलम्</u>

वैशाखोत्सवमुत्सृज्य राज्यं प्रजाः सुखी भवेत्॥७४॥ - वैहायसी - १५

<u>वैशाखोत्सवस्य फलम्</u>

इति संक्षेपतः प्रोक्तो विशाखोत्सवनिर्णयः॥१२॥

सर्वकामप्रदो नृणां राजराष्ट्रविवर्धनम्।

वर्षे वर्षे तु कर्तव्यं विशेषयजन मुने॥१३॥ - विश्वामित्रे - २६(अनुबन्धः २)

<u>वसन्तोत्सव मध्ये वैशाखोत्सव सम्भवे विधिः</u>

वसन्तोत्सवमध्ये तु वैशाखोत्सव आपतेत्॥५१॥

वैशाखोत्सवं कुर्यादेकस्मिन् दिवसे द्वयम्। - श्रीप्रश्ने - ३८

---

## <u>कल्हारोत्सव प्रमाणानि</u>

<u>अम्बरीषोपाख्यानद्वारा कल्हारकुसुमारोपण महिमानुवर्णनम्</u>

कल्हारकुसुमैः पूजां लक्ष्मीभर्तुर्वदाम्यहम्।

सावधानेन मनसा तच्छृणु द्विजपुङ्गव॥२॥

पुराम्बरीषो नामाभूद्राजर्षिर्धार्मिकोत्तमः।

चक्रवर्तीश्वरश्चक्रे(१) सद्वीपां सागराम्बराम्॥३॥

विजित्य सकलामुर्वीं स राजा धर्मतः प्रजाः।

रञ्जयामास सकलाः प्रजाः स्वा इव भूपतिः॥४॥

अदर्शनेन कार्याणामन्येषां यज्ञपूरुषम्।

तोषयामास बहुभिर्यज्ञैः संपूर्णदक्षिणैः॥५॥

एकोनमधमेधानां शतं चक्रे महामनाः।

कर्तुं शततमं यज्ञं तुरङ्गं स विसृष्टवान्॥६॥

खैरं चरन्तमश्वं तममात्यैर्बहुभिर्वृतम्।

पश्यतां रक्षिणां शक्रो गूढमूर्ति र्जहार ह॥७॥

रक्षिणोऽन्विष्य सर्वत्र तुरगादर्शनेन तम् (तु)।

विषण्णवदना भूत्वा भूमिपालं व्यजिज्ञपन्॥८॥

पश्यतां सावधानेन(ना?) अ(प्य?)स्माकं ते (तु?) तुरङ्गमः।

अदर्शनं गतो देव करणीयं वद प्रभो॥९॥

इति श्रुत्वा गिरं तेषामम्बरीषो महीपतिः।

ऋत्विक्पुरोहिताचार्यानाहूयेदं वचोऽब्रवीत्॥१०॥

मध्ये तुरङ्गमो नष्टः किं कृत्यं वदत द्विजाः।

इत्युक्तास्ते गिरं चेमामूचुर्द्विजवरा द्विज॥११॥

अन्विष्यतां द्विजसुतः कश्चित् तेन यजामहे।

इत्युक्तो भूमिपालस्तु द्विजसूनुं स्वकैर्धनैः॥१२॥

विक्रीया(?)नीतवान् मार्गे मया नीतः कुमारकः।

मह्यं निवेदयामास यथावृत्तं मयापि सः॥१३॥

पालितः शिष्यतां प्राप्तः शुनःशेपः स वै द्विजः।

राजापि निर्विण्णमना वसिष्ठमिदमुक्तवान्॥१४॥

यज्ञविघ्नार्थ(?)मानीतो मया विप्रकुमारकः।

सोऽपि त्रातो भगवता विश्वामित्रेण धीमता॥१५॥

यज्ञः सफलतां प्राप्तस्तथापि मम चेतसि।

विप्रो विशसनार्थाय मयानीत इति द्विज॥१६॥

वर्तते विचिकित्सा तु प्रायश्चित्तं समादिश।

इति पृष्टः स भगवान् वसिष्ठो मुनिसत्तमः॥ १७॥

अम्बरीषं महाराजमुक्तवान् द्विजसत्तम।

अस्मद्वाक्येन नृपते यत्त्वया द्विजबालकः॥ १८॥

आनीतस्तव दोषोऽत्र न भविष्यति भूमिप।

तथापि विचिकित्सा ते वर्तते यदि चेतसि॥ १९॥

ब्रह्महत्यापहं राजन् श्रूयतां व्रतमुत्तमम्।

धन्यं यशस्यमायुष्यमारोग्यजनकं महत्॥ २०॥

विष्णोः प्रीतिकरं सर्वसंपदामेककारणम्।

विशेषेण श्रियो देव्याः प्रीणनं तद्व्रतोत्तमम्॥ २१॥

सदा धारयते देवी मही कल्हारसूनकम्।

द्विधाभूता स्थिता शक्तिरेकैकं(व?)मधुविद्विषः॥ २२॥

श्रीमहीरूपभेदेन तस्माद्भूम्या करे धृतम्।

कल्हारं भगवत्प्रीतिकारणं तत्सभाजय॥ २३॥

एवमुक्तो भगवता वसिष्ठेन महीपतिः।

कल्हारैर्देवदेवेशमर्चयित्वा श्रियः पतिम्॥ २४॥

ऐहिकान् सकलान् भोगान् भुक्त्वान्ते वैष्णवं पदम्।

गच्छेदत(?) प्रवक्ष्यामि तव तेजोऽभिवृद्धये॥ २५॥

मयाप्याराधितो देवः कल्हारैः पुरुषोत्तमः। - विश्वामित्रे - २५

<u>तत्तत् कालपुष्पादीनाम् अभावे कल्हारकुसुमार्चनम्</u>

कालपुष्पविहीने च दिनपुष्पविहीनके।

मासपुष्पविहीने च मन्त्रपुष्पविहीनके॥५॥

मुकुले चातिपक्के च प्रमादात् स्पर्शने यदि।

स देवः कुप्यते तस्मात् प्रायश्चित्तमथाचरेत्॥६॥

तद्दोषपरिहारार्थं कल्हारोत्सवमाचरेत्। - मार्कण्डेये - २८

<u>कल्हारोत्सव कालः</u>

ऋतुराजे वसन्ते वा तथा शरदि वा रमे।

ज्येष्ठे वा श्रवणे मासे पुष्ये वा फाल्गुनेऽपि वा॥६॥

पूर्वपक्षे च पञ्चम्यां द्वादश्यां पूर्वयोरपि।

रोहिणीश्रवणाश्विन्योरुत्तरत्रितयेऽपि च॥७॥

यजमानानुकूलेषु तिथितारेषु वा बुधः।

प्रार्थितो यजमानेन कुर्याद्देशिक सत्तमः॥८॥

कल्हारैर्भगवद्यागं देशोपद्रव शान्तये। - श्रीप्रश्ने - ४८

<u>कल्हारोत्सव कालः -क्रमश्च</u>

वैशाखे मासि वा चैत्रै सिते पक्षे शुभे दिने।

दमनीदलवत्कुर्यात्कल्हारकुसुमोत्सवम्॥१७॥

स्थानेषु पूजयेद्देवं कुम्भादिषु चतुर्ष्वपि।

महाहविर्निवेद्याथ होमं कृत्वा समापयेत्॥१८॥ - पाद्मे - १४

<u>कल्हारोत्सव दिनसङ्ख्या</u>

पुष्पान्वितां प्रपां कृत्वा मण्डपे पूजयेद्धरिम्।

स्थानेषु पूजयेद्देवं कुम्भादिषु चतुष्वपि॥ ३८॥

एकं त्रीणि तथा पञ्च सप्तैकादश वा मुने।

दिनान्युत्सवमायोज्य पूजयेद् वैभवो यथा॥ ३९॥ - पाराशर्ये - २४

<u>उद्याने कुम्भपूजायाम् आवाहन देवताः</u>

मध्यकुम्भे महीं देवीं करके च सुदर्शनम्॥ २१॥

उपकुम्भेष्वष्टशक्तिं मन्त्रैरावाह्य पूजयेत्।

पायसान्नं निवेद्याथ कुमुदादिबलिं क्षिपेत्॥ २२॥ - श्रीप्रश्ने - ४८

<u>कल्हारकुसुम ग्रहण मन्त्रः</u>

भूमिर्भूम्नेति मन्त्रेण वैष्णवैः सह देशिकः॥ २३॥

वापिकाया नूतनानि कल्हारकुसुमानि च।

गृहीत्वा पात्रनिचये सौवर्णे निक्षिपेद्रमे॥ २४॥ - श्रीप्रश्ने - ४८

<u>कुम्भस्थ भूमिदेवी प्रार्थना</u>

देवि त्वद्धस्तकल्हार कुसुमैरर्चयेद् विभुम्॥ २६॥

राज्यस्य दोषशान्त्यर्थं प्रीतये तव मेदिनि। - श्रीप्रश्ने - ४८

<u>कल्हारमाला निर्माणे अधिकारि निर्देशः</u>

देवागारं प्रविश्यैव ध्रुवबेरपुरोभुवि॥ ५५॥

स्थापयित्वा च देवाय दर्शयेत् कुसुमान्यपि।

निर्गमय्य बहिः पुष्पं मण्डपे सन्निवेश्य च॥ ५६॥

स्नातैः शुक्लाम्बरधरैः सोष्णीषैर्वैष्णवैरपि।

धृतोर्ध्वपुण्ड्रैर्विप्राद्यैर्मालाकर्मणि कोविदैः॥५७॥

कारयेद्विविधा मालास्तत्तद्बेरप्रमाणतः। - विश्वामित्रे - २५

<u>अधिवास कल्हारमाला लक्षणम् - पुष्पसङ्ख्या च</u>

अधिवासस्रजं कुर्यादाद्यामानाभिलम्बिताम्॥५८॥

मूलबेरस्य कुसुमैः कुर्यात् पञ्चशतैर्द्विज।

अष्टोत्तरशतैः कुर्यात् कौतुकस्यौत्सवस्य च॥५९॥

तदर्धेन स्रजं कुर्याद्देव्योः श्रीभूमिसंज्ञयोः।

कर्मार्चाप्रभृतीनां तु पञ्चविंशतिभिः स्रजम्॥६०॥

आनाभिलम्बितां कुर्याद्यथाहारविभूषणम्।

कुम्भमण्डलकुण्डानामधिवासस्रजं द्विज॥६१॥

पञ्चाशद्भिः पृथक् कुर्यात् कुसुमैर्द्विजपुङ्गव।

अधिवासस्रजः कुर्याद्देवं द्विजवरोत्तम॥६२॥ - विश्वामित्रे - २५

<u>ध्रुवबेरार्थ कल्हारमालानाम् उत्तमादिभेदेन पञ्चविधत्वम् - पुष्पसङ्ख्या च</u>

तद्दिनस्रक्प्रमाणानि प्रोच्यन्ते शृणु तान्यपि।

बेराणां तु ध्रुवादीनां प्रत्येकं पञ्चमालिकाः॥६३॥

उत्तमा मध्यमा चैव तथैवाधमसंज्ञिका।

किरीटवनमालाख्ये पञ्चैवस्युर्द्विजोत्तम॥६४॥

उत्तमां मूलबेरस्य कुर्यादष्टसहस्रकैः।

कुसुमैर्जानुपर्यन्तां मध्यमामष्टभिः शतैः॥६५॥

ऊरुमध्यावलम्बां तु शृणु चापि कनीयसीम्।

षड्भिः शतैश्च पुष्पाणां नाभिलम्बां प्रकल्पयेत्॥ ६६ ॥

किरीटमालां कुर्वीत पुष्पैरष्टोत्तरैः शतैः।

चतुःसहस्रैः कुर्वीत वनमालां द्विजोत्तम॥ ६७॥

आपादलम्बिनीं श्लक्ष्णां वृत्ताग्रां द्विजसत्तम।

पीठस्य चापि कुसुमैरष्टोत्तरशतैः स्रजम्॥ ६८॥ - विश्वामित्रे - २५

<u>उत्सवबेरार्थ कल्हारमालापञ्चक कल्पनप्रकारः</u>

कल्याणकौतुके कुर्यादुत्तमां पञ्चभिः शतैः।

चतुःशतैर्मध्यमां च त्रिशतैरधमां स्रजम्॥ ६९॥

पञ्चाशद्भिश्च कुसुमैः किरीटस्रजमादरात्।

विदध्याद्वनमालां च कुसुमैः पञ्चभिः शतैः॥ ७०॥

पीठस्यापि प्रकुर्वीत स्रजमष्टशतैर्द्विज।

उक्ते उत्तममध्याख्ये स्रजावधमसंज्ञिताम्॥ ७१॥

त्रिद्व्येकशतसङ्ख्याकैः कुसुमैः क्रमशो मुने।

प्रमाणं पूर्ववत्प्रोक्तमेतासां कुसुमस्रजाम्॥ ७२॥ - विश्वामित्रे - २५

<u>कर्मार्चाद्यर्थक कल्हारमाला कल्पनप्रकारः</u>

बेराणं कर्मपूर्वाणां पुष्पैरष्टशतैर्द्विज।

तदर्धैरथवा कुर्यात् तदर्धैरपि वा मुने॥ ७३॥

तिस्रो द्वे वा तथैका वा यथासंभवमेव वा। - विश्वामित्रे - २५

<u>कुम्भ - मण्डल - कुण्डानां कल्हारमाला कल्पनप्रकारः</u>

कुम्भमण्डलकुण्डान्तर्वर्तिनः पुरुषस्य च॥ ७४॥

शतद्वयेन पुष्पाणामुत्तमा स्यात्तु मालिका।

अध्यर्धशतपुष्पैस्तु मध्यमा परिकीर्तिता॥ ७५॥

कुम्भवत् करकस्यापि प्रमाणं परिकीर्तितम्।

तत्स्थानपरिवाराणामेकैकं कुसुमं भवेत्॥ ७६॥

पद्मनाभ्यन्तनेमीनां श्रितानां चक्रमण्डलम्।

तत्प्रमाणस्थितं कार्यं शतं द्वित्रिचतुर्गुणैः॥ ७७॥

पुष्पैः कार्याः स्रजो बाह्ये तत्प्रमाणाश्च मालिकाः। - विश्वामित्रे - २५

<u>मूल -उत्सवयोः प्रभायां कल्हारमाला कल्पनप्रकारः</u>

चतुःसहस्रैः पुष्पाणां मालिका द्विजपुङ्गव॥ ७८॥

प्रभायाः कौतुकानां स्युर्मालास्तत्तत्प्रमाणकाः।

उत्सवार्चाप्रभायास्तु सहस्रद्वयसङ्ख्यकैः॥ ७९॥ - विश्वामित्रे - २५

<u>सेनेश - गरुड - चण्डादीनां कल्हारमाला कल्पनप्रकारः</u>

पुष्पैर्माला विधातव्या सेनापक्षीशयोरपि।

चण्डादीनां च सर्वेषामिन्द्रादीनां च कारयेत्॥ ८०॥

प्रत्येकं मालिकाः कार्याः पुष्पैस्त्रिंशतमै(न्मितै?)र्मुने। - विश्वामित्रे - २५

<u>परतन्त्र परिवाराणां कल्हारमाला लक्षणम्</u>

अन्येषां परतन्त्राणां बिम्बानामपि काश्यप॥ ८१॥

अष्टोत्तरशतैरेवमलङ्कुर्याद्विचक्षणः।

आनाभिलम्बिताः कार्या हाराकारा द्विजोत्तम॥८२॥ - विश्वामित्रे - २५

<u>देवता भेदेन कल्हार मालायां कुसुम सङ्ख्या भेदाः</u>

मूलबेरस्य कुसुमैः कुर्यात् पञ्चशतैः स्रजम्॥२८॥

अष्टोत्तरशतैः पुष्पैः कर्मबिम्बस्य वै रमे।

तदर्धेन स्रजं कुर्यात् श्रीभूम्योः स्रजमुत्तमम्॥२९॥

मखार्चाप्रभृतीनां तु पञ्चविंशतिभिः स्रजम्।

कुण्डमण्डलकुम्भानां पञ्चाशद्भिः प्रकल्पयेत्॥३०॥

कारयेद् विविधा मालास्तत्तद्बिम्बानुसारतः। - श्रीप्रश्ने - ४८

<u>पुष्पाणाम् अभावे विधिः</u>

अनेन वर्त्मना कार्याः पुष्पाणां सम्भवे सति।

असम्पत्तौ तु पुष्पाणामर्धैः पादैरथापि वा॥८३॥

यथासंभवमेव स्यात् क्रियामेतां न लोपयेत्। - विश्वामित्रे - २५

<u>कल्हारोत्सवे मण्डल भेदाः</u>

मण्डलं कारयेद्विद्वान् ऋत्विग्भिः सहितो मुने॥१०६॥

चक्राब्जं स्वस्तिकं वाथ भद्रकं वा द्विजोत्तम। - विश्वामित्रे - २५

<u>कल्हारोत्सवे महाकुम्भादि स्थापनक्रमः - मण्डलस्य परितः अष्टकुम्भ स्थापनक्रमः - अग्निकुण्ड स्थानञ्च</u>

मण्डलस्य बहिः कुर्यादैशान्ये धान्यसञ्चये(यम्?)॥१०७॥

स्थापयेच्च महाकुम्भं सूत्रवेष्टितमुत्तमम्।

क्षौमयुग्मेन संवीतं सूक्ष्मेन सदशेन च॥१०८॥

नवरत्नानि तन्मध्ये निक्षिप्य शुचिवारिणा।

पूरयेच्चन्दनादीनां गन्धानां चापि सञ्चयम्॥ १०९॥

तत्तोये विन्यसेद्विद्वान् कुश(शान् ?) कूर्चं च विन्यसेत्।

करकं चापि संवेष्ट्य पूरयित्वा सरत्नकम्॥ ११०॥

कूर्चं च विन्यसेन्मन्त्री कुम्भं दक्षिणतो न्यसेत्।

एवं विधायाष्टकुम्भान् मण्डलस्याष्टदिक्ष्वपि॥ १११॥

स्थापयित्वाग्निकुण्डं च कुर्यादुत्तरतो द्विज। - विश्वामित्रे - २५

<u>चतुस्थानेषु पञ्चवर्णान्न-निवेदनम्</u>

कुम्भमण्डलबिम्बेषु पञ्चवर्णान्नसञ्चयम्॥ १३८॥

निवेद्य लेह्यपेयानि विनिवेद्य महाहविः।

अपूपसहितं पश्चात् ताम्बूलं मुखवासनम्॥ १३९॥ - विश्वामित्रे - २५

<u>कल्हारोत्सवे कल्हारपुष्पहोमप्रकारः</u>

ततः कुण्डसमीपं च गत्वावाह्य च पावके।

देवं समिघृतचरुहोमं च सुविधाय च॥ १४२॥

कल्हारकुसुमैराज्यसंपृक्तैर्जुहुयात्ततः।

अष्टोत्तरसहस्त्रैश्च शान्तिहोमं विधाय च॥ १४३॥

भस्मना तिलकं कृत्वा देवमुद्वास्य चाग्निगम्। - विश्वामित्रे - २५

<u>कल्हरोत्सवे सप्तसमिद्धोमः</u>

अग्नौ च हुत्वा विधिवत् समिधः सप्त देशिकः॥ १५९॥

पूर्णामपि विधायाथ देवाय विनिवेद्य च। - विश्वामित्रे - २५

<u>कल्हार कुसुमपूजा - देवस्य समर्पणार्थं प्रार्थना</u>

पुण्याहवारिणा प्रोक्ष्य मालासु श्रियमर्चयेत्।

पीताम्बर जगत्स्वामिन् वनमालादिभूषण॥ ३७॥

अहं कल्हारमालाभिस्त्वामलङ्कर्तुमर्थये।

भक्तस्य प्रार्थनां देव स्वीकुरु त्वं जगद्गुरो॥ ३८॥ - श्रीप्रश्ने - ४८

<u>कल्हारोत्सवे चतुस्थाने कल्हारपुष्पेण अर्चनम्</u>

मूलबेरमलङ्कुर्यात् कर्मार्चादीन्यपि क्रमात्॥ ४०॥

चतुःस्थानार्चनं कृत्वा कल्हारकुसुमैर्बुधः। - श्रीप्रश्ने – ४८

<u>नित्यं कल्हारपुष्पमालापनयनं - तन्माला वैष्णवेभ्यः दापनम् - फलञ्च</u>

प्रभातायां रजन्यां च पूजाया अवसानके।

अपनीय च माल्यानि वैष्णवेभ्यः प्रदापयेत्॥ १७८॥

ये धारयन्ति शिरसा देवभुक्तोज्झितानि तु।

माल्यानि तानि ते सर्वे दुष्कृतं सप्तजन्मजम्॥ १७९॥

अवधूय प्रपद्यन्ते विष्णुलोकं पुनर्नराः। - विश्वामित्रे – २५

<u>कल्हारोत्सवकरणेन फलम्</u>

यः कारयति विप्रेन्द्र पूजामेतां मधुद्विषः॥ १८०॥

अकिञ्चनोऽपि लभते पृथ्वीराज्यमकण्टकम्।

भुक्त्वा च विविधान् भोगानिहलोके सुदुर्लभान्॥ १८१॥

गजाश्वरथनागा(?) ढ्यान् पुत्रपौत्रसमन्वितान्।

यशसा भुवनं सर्वं धवलीकृत्य मानवः॥ १८२॥

पितॄनपि समुत्तार्य दश पूर्वान् दशावरान्।

देहान्ते परमं धाम प्राप्नोत्यपुनरागतिम्॥ १८३॥ - विश्वामित्रे - २५

---

<u>दमनोत्सव प्रमाणानि</u>

<u>दमनोत्सव कालः</u>

वैशाखे मासि चैत्रे वै सिते पक्षे शुभे दिने।

कारयेदुत्सवं दिव्यं कल्हारकुसुमैर्मुदा॥ ३६॥

द्वादश्यां पौर्णमास्यां वा पुष्पालङ्कारमाचरेत्।

दमनारोपणं ब्रह्मन्! अथवा चोभयं सह॥ ३७॥ - पाराशर्ये - २४

<u>दमनोत्सवकालः क्रमश्च</u>

माघमासे पौर्णमास्यां कल्हार कुसुमैर्यथा।

तथा दमनिकाभिश्च मण्डनं होममेव च॥ २६३॥

कृत्वोत्सवं प्रकुर्वीत राज राष्ट्राभिवृद्धये। - विष्णुतिलके - ८

<u>तुलस्यादिपत्रविहीने तु दमनोत्सवः</u>

तुलस्याद्यानि सर्वाणि विशेषान्यादिपत्रके॥ ७॥

पलाशाश्वत्थपत्रे वा दूर्वाङ्कुरविहीनके।

फलपत्रविहीने वा प्रायश्चित्तमिहोच्यते॥ ८॥

दमनं गन्धपत्रं च दमनोत्सवमाचरेत्। - मार्कण्डेये - २८

<u>पवित्रोत्सववत् दमनोत्सवः</u>

पवित्रारोहवत्कुर्याच्चतुः स्थानार्चनादिकम्॥ ६३॥

भूषणान्युत्तमादीनि कुर्याद्दमनिकै स्तथा।

तत्तु सङ्ख्याविरहितं यथा शोभानुरूपतः॥६४॥ - ईश्वरे - १२

<u>एवमेव २</u>

ततो दमनिकारोपमाचरेत्तु यथाविधि॥९२॥

अत्रानुक्तं तु सकलं पवित्रारोहवद्भवेत्। - ईश्वरे - १२

<u>दमनोद्याने कुम्भ स्थापनविधिः - होमप्रकारश्च</u>

गत्वोद्यानं सहर्त्विग्भिर्यजमानेन संयुतः।

गत्वा दमनवाटीं तु तस्याः पश्चिमतो मुने॥७॥

चतुःस्तम्भां प्रपां कृत्वा वितानेन पिनध्य(ह्य) च।

संवेष्ट्य दर्भमालां च तस्याधो वेदिकां ततः॥८॥

चतुरश्रं कल्पयित्वा गोमयेनोपलिप्य च।

तस्योपरि विनिक्षिप्य व्रीहिमारचतुष्टयम्॥९॥

आस्तीयं तस्योपरि च पटमास्तीय तण्डुलान्।

तदर्धानथ विस्तीर्य तस्योपर्यम्बरोर्ध्वतः॥१०॥

तिलांस्तदर्धान् विन्यस्य तदूर्ध्वं(र्ध्वे?) विन्यसेद्धटम्।

तन्तुवेष्टितसर्वाङ्गं विन्यस्त-नवरत्नकम्॥११॥

क्षौमयुग्मेन संवेष्ट्य कुशकूर्चं तु विन्यसेत्।

तादृग्विधं च करकं तस्य दक्षिणतो न्यसेत्॥१२॥

कुम्माष्टकं च विन्यस्य तस्य दिक्ष्वष्टसु क्रमात्।

कुम्भे प्रद्युम्नमभ्यर्च्य करके च सुदर्शनम्॥१३॥

कुम्भाष्टके च परितः शक्रादीनर्चयेत् क्रमात्।

पायसान्नं निवेद्याथ चोत्तरे हव्यवाहनम्॥ १४॥

आधायाज्येन हुत्वाथ चाष्टोत्तरशताहुतीः।

प्रद्युम्नेनैव मन्त्रेण पश्चात् क्षेत्रेशमर्चयेत्॥ १५॥

पायसान्नेन च बलिं दिक्ष्वष्टसु विनिक्षिपेत्। - विश्वामित्रे - २६

दमनोत्सवे दमनच्छेदनार्थं प्रार्थना

शुचिर्भूत्वा दमनकं प्राङ्मुखः श्वेतमाल्यकैः।

गन्धधुपैश्च नैवेद्यैः कृत्वाङ्गन्यासमर्चयेत्॥ ३७॥

नमो दमनकतरो नमो मदनवल्लभ।

श्रीमन्मुकुन्दप्रीत्यर्थं पूजयेत्वा नमन्नये॥ ३८॥

इत्यभ्यर्च्य नयेत्पत्रं बिभ्रन् शिरसि वाग्यतः। - शाण्डिल्ये - २५

दमनीपत्रलवनमन्त्रः - दमनस्य कुम्भ प्रोक्षणञ्च

आचार्यो मूर्तिपैः सार्धं मनुं प्रद्युम्नमुच्चरन्॥ १६॥

लूत्वा दमनपत्राणि स्वर्णपात्रेषु निक्षिपेत्।

तानि पत्राणि कुम्भस्य पुरः संस्थाप्य भूतले॥ १७॥

तदम्भसा च संप्रोक्ष्य वाहयित्वा द्विजोत्तमैः।

उच्चरञ्छाकुनं सूक्तं बह्वृचैर्द्विजपुङ्गव॥ १८॥ - विश्वामित्रे - २६

दमनमाला कल्पनम्

दमनाङ्कुरमाहृत्य क्षालयेच्छुद्धतोयकैः॥ ५२॥

कदलीत्वविशेषेण दीर्घपत्रे पुरन्ध्रगैः।

वरंकारयेद्धीमान् पूर्वोक्तेनैव वर्त्मना॥५३॥

पृथक् पात्रे निवेश्याथ अधिवासनमाचरेत्। - अनिरुद्धे - २२

<u>दमनमालाधिवासः - अधिवास माला मानम्</u>

अधिवासस्त्रजमादाय? योजयेत्कुम्भमूर्धनि॥५६॥

पूजया संपुटीकुर्यात् गीतवाद्यादिकं चरेत्।

अधिवासस्त्रजं विप्र! नाभिमानं प्रचक्षते॥५७॥

शयने सन्निवेश्याथ रक्षां कुर्यात्समन्ततः। - अनिरुद्धे - २२

<u>अधिवास दमनारोपणविधिः</u>

अधिवासनमालां च कुम्भमण्डलयोरपि।

सशक्तिकस्य देवस्य मूलबेरादिकस्य च॥६६॥

एकैकां सन्निवेश्याथ शयने च जगद्गुरुम्।

शाययित्त्वा च संप्राश्य हुतशेषं चरुं ततः॥६७॥ - विश्वामित्रे - २६

<u>दमनहोमः - सप्तसमिद्धोमः</u>( अधिवास होमः )

वह्निमध्यगतं देवमभ्यर्च्य विधिना ततः॥६३॥

समिद्भिः सप्तभिर्हुत्त्वा दमनं घृतसंप्लुतम्।

अष्टोत्तरसहस्रं च हुत्त्वा पूर्णां विधाय च॥६४॥ - विश्वामित्रे - २६

<u>दमनोत्सवोक्त मण्डलानि</u>

दमनारोपणात्पूर्वमङ्कुरानर्पयेत् सुधीः॥४४॥

मण्डपं समलङ्कृत्य पूर्वेद्युश्च निशामुखे।

कुम्भमण्डलकुण्डञ्च कारयेद्विधिचोदितम्॥४५॥

चक्राब्जमण्डलं कृत्वा भद्रकाख्यमथापि वा।

यन्त्रमण्डलकं वापि यजमानेच्छया गुरुः ॥ ४६ ॥ - अनिरुद्धे - २२

<u>चतुस्थाने मण्डलस्य परितः उपकुम्भ स्थापनम्</u>

वेष्टितं क्षौमयुग्मेन निक्षिप्तनवरत्नकम् ॥ २९ ॥

घटाष्टकं च विन्यस्य दिक्ष्वष्टास्वपि तद्विधम्।

मण्डलस्यापि परितः स्थापयित्वा घटाष्टकम् ॥ ३० ॥

सर्वं कुर्यात् कुम्भसङ्गं महाघटविधानतः। - विश्वामित्रे - २६

<u>दमनोत्सवे होमकुण्ड स्थानम् - कुण्डस्य परितः कुम्भस्थापनञ्च</u>

मण्डलोत्तरदिग्भागे वह्निकुण्डं विधाय च।

समेखलं सयोनिं च कुम्भैरष्टाभिरावृतम् ॥ ४० ॥ - विश्वामित्रे - २६

<u>दमनी मालारोपणप्रकारः</u>

मुहूर्ते शोभने प्राप्ते यजमानसुखावहे ॥ ७४ ॥

कुम्भे च मण्डले चैव कुण्डे चार्चास्वपि द्विज।

मूलादिषु समस्तेषु देव्योरपि पृथक् पृथक् ॥ ७५ ॥

प्रदाय दमनीमालां देवं विज्ञाप्य देशिकः। - विश्वामित्रे - २६

<u>दमनार्पणमन्त्रः</u>

एवं सायं समावाह्य प्रातर्नित्यार्चनात्परम्।

पूर्वोक्तमण्डलेऽभ्यर्च्य महामन्त्रेण चार्पयेत् ॥ ४३ ॥

भो भो श्रीललिते कान्ते मालत्यानन्दमन्दिरे।

ममापराधशान्त्यर्थं कुरुष्व दमनार्पणम् ॥ ४४ ॥

परमामोदमुदितमदनानन्दसुन्दरम्।

पुष्पं दमनकस्यैतज्जगदीश गृहाण मे॥४५॥ - शाण्डिल्ये - २५

<u>दमनोत्सवे वीथिभ्रमणम्</u>

देवमुत्सवसंज्ञं च वाहने विनिवेश्य च॥७९॥

सर्वालङ्कार संयुक्तं परिभ्राम्य प्रदक्षिणम्।

प्रवेशयेदालयान्तः स्वस्थाने विनिवेशयेत्॥८०॥ - विश्वामित्रे - २६

<u>दमनोत्सवस्य फलम्</u>

यः करोति नरो भक्तया स याति ब्रह्मणः पदम्॥६८॥

अश्वमेधाष्टकं पुण्यं वाजपेयत्रयं तथा।

सर्वपापक्षयं चैव सर्वोपद्रवनाशनम्॥६९॥ अनिरुद्धे - २२

<u>दमनारोपणेन फलम्</u>

दमनारोपणविधिं वक्ष्यामि द्विजसत्तम।

यदनुष्ठानतो विप्र ऐहिकामुष्मिकं फलम्॥१॥

अवाप्य चान्ते परमं पदमाप्नोति मानवः। - विश्वामित्रे - २६

<u>दमनोत्सवकरणे फलम्</u>

कारयेत् प्रतिवर्षं यो दमनीपत्रपूजनम्।

देवस्य वासुदेवस्य श्रद्धया परया युतः॥८९॥

तस्य सिध्यन्ति सकलाः सम्पदस्तत्प्रसादतः।

इह प्राप्य परामृद्धिं पितॄनुत्तार्य सर्वतः॥९०॥

पूर्वानप्यपरान् सप्त स्वदेहस्य समन्ततः।

प्राप्णुयाद्वैष्णवं धाम सर्वयोगीन्द्रदुर्लभम्॥९१॥ - विश्वामित्रे - २६

---------------------------------------------------------------

## ज्येष्ठाभिषेक प्रमाणानि

ज्येष्टस्नपनोत्सव कालः - फलञ्च

ज्येष्ठे मासि तु कर्तव्यं पौर्णमास्यां विशेषतः।

स्नपनमुत्तमे श्रेष्ठं चन्दनं देवविग्रहे॥७५॥

शोभयेद्विविधैर्भावैः शीतलं सुखकारकम्।

तद्गेहे सुखशान्तिः स्यात् तस्मात्कार्यं सदा जनैः॥७६॥ - वैहायसी - १५

ज्येष्ठ स्नपनोत्सव कालाः

अथ लक्ष्मीः प्रवक्ष्यामि ज्येष्ठस्नपनमुत्सवम्।

मिथुनज्येष्ठऋक्षे वा पौर्णमास्यामथापि वा॥१॥

कटके शुक्लपक्षस्य ह्येकादश्यामथापि वा।

नक्षत्रेण वियुक्तायां युक्तायामपि वै रमे॥२॥

अवश्यमभिषेकः स्यादेकादश्यां हरेस्तिथौ। - श्रीप्रश्ने - ४०

कवचोद्घाटनम् - एकाशीति कलश स्नपनम् इत्यादि

बहिर्मण्डपमानीय कर्मबिम्बं तु देशिकः।

पुरा कवचमुद्घाट्य हरेस्तस्य पुरो रमे॥६॥

एकाशीतिघटान् स्थाप्य तेषु कुम्भेषु देशिकः।

घृतादिसर्ववस्तूनि तत्तन्मन्त्रैस्तु पूरयेत्॥७॥

अङ्कुरानर्पयेत् पूर्वं कौतुकं चापि बन्धयेत्।

द्वारतोरणकुम्भादि पूजां कृत्वा यथाविधि॥८॥

अभिषेकं मन्त्रयुक्तं कुर्याद् भगवतो हरेः।

श्रीभूमिवीरलक्ष्मीभिः सम्मितस्य गरुत्तमः॥९॥

निवेद्य भक्ष्यभोज्यादि भक्तेभ्यो दापयेत्क्रमात्। - श्रीप्रश्ने - ४०

<u>ज्येष्ठ स्नपनान्ते पुनः कवचधारणम् - कवचस्य नव कलश स्नपनम्</u>

शिल्पिना कवचं शुद्धं कृत्वा सम्प्रोक्ष्य देशिकः॥१०॥

नवभिः कलशैस्तोयैः पञ्चगव्येन पद्मजे।

नियोज्य कवचं बिम्बे पूर्ववत्तदनन्तरम्॥११॥

वस्त्रादिभिरलङ्कृत्य प्रापनान्तं च पूजयेत्। - श्रीप्रश्ने - ४०

<u>ज्येष्ठाभिषेकाद्युत्सव करणे फलम्</u>

ज्येष्ठाभिषेकमारभ्य यावद्वासन्तिकोत्सवम्॥१४६॥

भगवन्मन्दिरेयस्तु कुरुते तस्य सर्वदा।

आयुरारोग्य भाग्यानि लभन्त्यत्र नसंशयः॥१४७॥

राजराष्ट्राभिवृद्धिश्च तस्मिन् देशे भवेद्ध्रुवः। - परमपुरुषे – ४

---

## <u>गङ्गोत्पत्युत्सव प्रमाणानि</u>

<u>गङ्गोत्पत्त्युत्सव कालः (ஆடி 18ம் பெருக்கு)</u>

प्रत्यब्दं कटके मासि ह्यष्टादशदिने रमे।

गङ्गोत्पत्त्युत्सवं कुर्याद्राजराष्ट्राभिवृद्धये॥१॥ - श्रीप्रश्ने - ४२

<u>गङ्गोत्पत्युत्सव प्रवृत्ति निमित्त कथनम्</u>

महाबलेर्यज्ञमध्ये देवानां हितकाम्यया।

वामनं रूपमास्थाय पदत्रयमयाचयम्॥ २॥

मह्यं तुष्टो बलिः प्रादात्ततो वर्धितुमारभे।

पादेनैकेन वसुधां द्वितीयेन विधेः पदम्॥ ३॥

अतीत्याभिनदं भित्तिमण्डस्य महतो बिलात्।

अन्तःप्रविष्टं सलिलं नदीरूपेण चासरत्॥ ४॥

तां गङ्गेति ततो ब्रह्मा मत्पादसलिलं ब्रुवन्।

मत्पादं तां च गन्धाद्यैरपूजयदधोगताम्॥ ५॥

कैलासशिखरं प्राप्तां गङ्गां तां पार्वतीपतिः।

मत्पादादुद्भवां ज्ञात्वा पूजयित्वा यथाविधि॥ ६॥

शिरसाधारयच्चैनां स्वस्य पापापनुत्तये।

व्यसर्जयत्ततो भूमौ सप्तधा प्राविशत्तदा॥ ७॥

गङ्गा गोदावरी चैव यमुना च सरस्वती।

नर्मदासिन्धुकावेरीत्येवं नामानि बिभ्रती॥ ८॥

तदा प्रभृति देवाश्च मुनयो ब्राह्मणास्तथा।

सप्ताकृतिं पूजयन्ति तद्दिने भक्तितः शुभाम्॥ ९॥ - श्रीप्रश्ने - ४२

<u>गङ्गोत्पत्युत्सवे कुम्भेषु आवाहन देवताः - गङ्गा प्रार्थना</u>

मध्यकुम्भे योगपीठं ध्यात्वा गङ्गां समर्चयेत्।

विष्णुपादोद्भवे गङ्गे सर्वपापविनाशिनि॥ १५॥

नदीनां शुद्धये देवि कुम्भेऽस्मिन् सन्निधिं कुरु।

इति देवपदाम्भोजादावाह्याघ्यार्दिना यजेत्॥ १६॥

इन्द्रादीनुपकुम्भेषु करके च सुदर्शनम्।

आवाह्याभ्यर्च्य पुण्याहवारिणा प्रोक्ष्य भार्गवि॥ १७॥ - श्रीप्रश्ने - ४२

कुम्भस्तां गङ्गां नद्यां( तटाके) नियोजनम् प्रार्थना च

शुद्धां कृत्वा नदीं तस्यां कुम्भस्थां विष्णुपादजाम्।

गङ्गां संयोज्य सम्पूज्य वस्त्रपुष्पफलादिभिः॥ १८॥

त्रिविक्रमपदाम्भोजादुत्पन्ने देवसेविते।

अस्यां नद्यां स्थितान् सर्वान् स्नातान् पापाद्विमोचय॥ १९॥

इति सम्प्राथ्यर्य चेन्द्रादीन् कुम्भादुद्वासयेद् गुरुः। - श्रीप्रश्ने - ४२

---------------------------------------------------------------------

## श्रीजयन्त्युत्सव प्रमाणानि

श्रीजयन्त्युत्सव विशेष निरूपणम्

देवालये विशेषंस्याद् गृहे सामान्यमुच्यते।

यस्मात्तुवासुदेवस्यात् स्वयं साक्षाज्जगद्गुरुः॥ ४०॥

चरमार्थप्रदाताच तस्मात्तस्य तु जन्मनि।

सर्वैश्च वैष्णवैर्लोके कार्यमेतन्महोत्सवम्॥ ४१॥ - परमपुरुषे - ९

श्रीकृष्णजन्मोत्सव कालः

श्रावण्यां कृष्णपक्षे तु अष्टम्यां रोहिणीयुते।

जयन्ती नाम सा प्रोक्ता जयत्यशुभमित्यसौ॥ ५॥

बुधवारसमायुक्तं सर्वदोषविवर्जितम्।

तिथिनक्षत्रयोगे वा केवलं ऋक्षकेऽपि वा॥ ६ ॥ - अनिरुद्धे - २५

<u>श्रीकृष्ण जयन्ती कालः - कृष्ण जन्म पत्रिका</u>

द्वापरस्य कलेः सन्धौ शुभकृद्वत्सरे शुभे॥ २ ॥

सिंहमासे कृष्णपक्षे त्वष्टम्यां रोहिणीयुते।

हर्षकौलवसंयुक्ते बुधवारे शुभे दिने॥ ३ ॥

कन्यां गते बुधे शुक्रे लग्नगे च बृहस्पतौ।

मकरे भूमिपुत्रे च तुलायां च शनौ स्थिते॥ ४॥

कटके च स्थिते राहौ केतौ च मकरे स्थिते।

वृषभे तु मृगाङ्के च आदित्ये सिंहगे सति॥ ५॥

निशीथे वृषभे लग्ने सर्वलोकहितो हरिः।

वसुदेवस्य देवक्यां जातः कृष्णो भृगूद्भवे॥ ६ ॥ - श्रीप्रश्ने - ४१

<u>हरेः जन्मोत्सवे लीलया उत्सवः</u>

जन्मनां वासरे चाथ महतां च समागमे ।

संस्कारेषु च सर्वेषु हरेर्जन्मसु लीलया॥ १७॥ - शाण्डिल्ये -प्रथमांशे -१५

<u>कृष्णजयन्त्युत्सव दिनसङ्ख्या - कृष्णलीला नाटकम्</u>

स्नपनं तु यथाशक्ति ग्रामेकुर्यान्महोत्सवम्।

एतद्दिवसमारभ्य मासं पक्षं नवाहकम्॥ १८॥

सप्ताहं वाथ पञ्चाहं त्र्यहमेकाहमेव वा।

श्रीकृष्णलीलानाटकैः ग्रामोत्सवमथाचरेत्॥१९॥

प्रतिनित्यं विशेषार्चामाचरेत्तु यथावसु। - पुरुषोत्तमे - २७

<u>श्रीजयत्युत्सव दिन सङ्ख्या</u>

सकृत् त्र्यहं वा पञ्चाहं सप्ताहं वा नवाहकम्॥८४॥

पक्षं मासं तु वा चैवमुत्सवैस्तोषयेद्विभुम्।

स्वतन्त्रं परतन्त्रं वा कृष्णमेवं समर्चयेत्॥८५॥ - ईश्वरे - १३

<u>श्रीकृष्णजन्मोत्सवाकरणे प्रत्यवायः</u>

यो न कुर्यादिदं कृष्णजन्मोत्सवमादरात्॥४३॥

गुरुद्रोही दैवद्रोही स्वामिद्रोहीच सो भवेत्।

तत्कृतेनान्यकार्येण येनकेनापिभूतले॥४४॥

तद्वत्सरावधिस्तस्य श्रेयस्तु न कदाभवेत्। - परमपुरुषे – ९

<u>कृष्णबिम्बस्य अभावे विधिः</u>

कृष्णबिम्बस्याभावे तु लब्धबिम्बे समाचरेत्।

तदभावे तु मूले स्याच्चतुस्स्थान समन्वितम्॥१३॥ - अनिरुद्धे - २५

<u>कृष्णबिम्बस्य आभावे विधिः</u>

स्वतन्त्रं पतन्त्रं वा कृष्णमेवं समर्चयेत्॥८५॥

अभावे कृष्णबिम्बस्य तत्तत्प्रासादसंस्थितम्।

देवमेवार्चयेद्भक्त्या जयन्त्यां तु विशेषतः॥८६॥ - ईश्वरे - १३

<u>श्रीजयन्त्यां पूजनीय कृष्णबिम्ब भेदाः</u>

मध्यरात्रे तु पूर्वे तु कृष्णबिम्बमनुत्तमम्॥३॥

नवनीतनटं वापि सर्पनृत्तमथापि वा।

चतुर्भुजं वापि तथा पूजयेत्तद्दिने मुने॥४॥ - विष्वक्सेने – ३०

<u>चन्द्रोदये श्रीकृष्ण पूजा</u>

यावच्चन्द्रोदयं तावज्जपेदष्टोत्तरं शतम्।

जाते चन्द्रोदये ब्रह्मन्! देवक्युत्सङ्गसंस्थितम्॥८३॥

नीराजनं दर्शयित्वा बालभोगं समर्पयेत्। - पद्मोद्भवे - २६

<u>अर्धरात्रे श्रीकृष्णजन्मोत्सवस्य आचरणम्</u>

कृष्णजन्मोत्सवञ्चैव प्रत्यब्दञ्च समाचरेत्।

अर्धरात्रौतु सर्वैऽपि कुर्यादेतन्महोत्सवम्॥३९॥ - परमपुरुषे - ९

<u>कृष्णस्य पुरतः चन्द्रमण्डल लेखनम् - अर्चनमित्यादि</u>

अर्घ्यदानं विशेषेण कुर्यात्सर्वफलप्रदम्।

तद्विधानं प्रवक्ष्यामि देवस्य पुरतो भुवि॥४१॥

गोमयेनोपलिप्याथ वृत्ताकारं सुशोभनम्।

सुधाचूर्णैरलङ्कृत्य गन्धपुष्पाक्षतैः फलैः॥४२॥

तन्मण्डले तु रोहिण्या सह चन्द्रं समर्चयेत्। - ईश्वरे - १३

<u>अर्घ्यदानार्थं पिष्टेन पद्मलेखनम् - आवाहनञ्च</u>

अर्घ्यदानं विशेषेण कुर्यात् सर्वफलप्रदम्।

कृष्णस्य पुरतो भूमौ पिष्टेनालिप्य पद्मवत्॥२६॥

अष्टभिश्च दलैर्युक्तं मध्ये विपुलकर्णिकम्।

तस्मिन् कृष्णं समावाह्य दलेष्वष्टसु वै क्रमात्॥२७॥

वसुदेवं देवकीं च नन्दगोपं ततः परम्।

यशोदां रोहिणीं चैव बलभद्रं निशाकरम्॥ २८॥

सुभद्रं पूजयेद् देवि प्रीवारानिवाब्जजे। - श्रीप्रश्ने - ४१

<u>श्रीजयन्तीदिवसे कर्तव्य होमविशेषाः</u>

वैष्णवाग्नौ तु जुहुयात् समिदाज्यचरूणि च।

मूलमन्त्रेण मन्त्रज्ञः पञ्चविंशतिसङ्ख्यया॥ ३५॥

प्रत्येकं तु मुनिश्रेष्ठ पश्चाच्छान्तिं समाचरेत्।

मधुना पयसा दुध्ना हूयतेन घृतेन च॥ ३६॥

तथैव जुहुयान्मन्त्रैः पूर्णाहुतिमथाचरेत्। - विष्वक्सेने - ३०

<u>श्रीजयन्त्युत्सवे चतुस्थानार्चनम्</u>

जयन्तीदिवसात्पूर्वमङ्कुरारोपणं शुभम्।

पूरोक्तेन विधानेन चतुस्थानार्चनं तथा॥ ७७॥ - पद्मोद्भवे - २६

<u>बालरूप कृष्णं तत्सकुटुम्बस्थानाञ्च स्थापनविधिः</u>

मण्डपस्येशदिग्भागे धान्यपीठे मनोहरे॥ ८०॥

देवक्याङ्के वासुदेवं स्थापयेद्बालरूपकम्।

देवक्याः पश्चिमे सौम्य! यशोदा-नन्दगोपकौ॥ ८१॥

दक्षिणे वासुदेवञ्च रामञ्च तद्दिशि मुदा।

परितेन्द्राद्रिकुम्भांश्च विन्यसेत्क्रमयोगतः॥ ८२॥ - पद्मोद्भवे - २६

<u>अर्धरात्रौ तैलाभ्यङ्गः -अवशिष्टं सर्वेभ्यः दापनम् -तैलधारण फलम्</u>

अर्धरात्रे च संप्राप्ते पूजयित्वा सुरेश्वरम्॥ ८४॥

स्नानवेदिं समानीय गन्धतैलं सुसंस्कृतम्।

उपाकृतं शातकुम्भद्रोणीषु द्विजपुङ्गव॥८५॥

शालितण्डुलभाराणां दशकैः कल्पिते भुवि।

राशौ सुनिहितं (ते?) पात्रे हेमक्लृप्ते निषिच्य च॥८६॥

पुण्याहं वाचयित्वा च वैष्णवैर्द्विजपुङ्गवैः।

सशङ्खभेरीसंनादैर्देवमूर्ध्नि च सेचयेत्॥८७॥

अवशिष्टं च सर्वेषां वैष्णवानां शिरस्स्वपि।

गायकानां नर्तकानां ताण्डवानां च सर्वशः॥८८॥

देशान्तरगतानां च* (रादागतानां?) वेश्यानामपि सर्वशः।

हनूमतादिभक्तैश्च सह मामन्दिरेष्वपि॥८९॥

निक्षिप्य हेमद्रोणीषु निषिञ्चेत् परिचारकैः।

ये धारयन्ति तत्तैलं शिरोभिर्मनुजा भुवि॥९०॥

नीरोगाः सुसमृद्धाश्च सर्वे ते यावदायुषम्।

इह भोगान् परान् भुक्त्वा यान्ति चान्ते परं पदम्॥९१॥ - विश्वामित्रे - १६

<u>होमान्ते विशेष चूर्णेन स्नापनम्</u>

होमान्ते देवदेवेशं स्नापयेद्विधिचोदितम्॥३७॥

कृष्णगन्धेन काष्ठेन उशीरैश्चन्दनेन च।

रजनीद्वयचूर्णेन पुनः कृष्णतिलैस्तथा॥३८॥

सिद्धार्थसर्षपैश्चैव सर्वधान्यानि साधकः।

चूर्णीकृत्य मुनिश्रेष्ठ स्नपनान्तेऽभिषेचयेत्॥३९॥ - विष्वक्सेने - ३०

<u>शयने कृष्णं भलभद्रञ्च निवेशन प्रकारः</u>

शङ्खदुन्दुभिसंयुक्तं स्वस्तिवाचनपूर्वकम्॥ १३॥

पादुकाद्वयसंयुक्तं शयने सन्निवेशयेत्।

पूर्ववच्छयनं कल्प्य तन्मध्ये देवमानयेत्॥ १४॥

दक्षिणे बलभद्रं च पश्चात्तत्राधिवासयेत्।

अष्टाक्षरेण दिग्बन्धं कारयेत् साधकोत्तमः॥ १५॥

तथैव विन्यसेद्देवं विष्णुमन्त्रेण साधकः। - विष्वक्सेने - ३०

<u>शयने कृष्ण-बलभद्र निवेशनमन्त्रः</u>

शयने शाययित्वा तु तं देवं मूलविद्यया॥ २४॥

तथैव बलभद्रं च शाययेत्तस्य मन्त्रतः।

वस्त्रैराच्छादयेद्देवं सितपुष्पैः समर्चयेत्॥ २५॥

ततो नारायणं सूक्तमुच्चरेत् साधकोत्तमः। - विष्वक्सेने - ३०

<u>श्रीजयन्त्यां नैवेद्यविशेषाः</u>

मधुपर्कं निवेद्याथ नवनीतं च शर्कराम्॥ ३२॥

गोक्षीरं घृतसंयुक्तं फलानि विविधानि च।

पृथुकादींश्चोपहारान् गुडखण्डान्वितानपि॥ ३३॥

माषैर्मुद्गैस्तिलयवैर्दधिमध्वाज्यदुग्धकैः।

हरिद्राजीरकैलाजैर्योजितानि विशेषतः॥ ३४॥

विविधानि च भक्ष्याणि गोघृतैः पाचितानि च।

क्रमादष्टविधान्नानि सुशृतं क्षीरमुत्तमम्॥ ३५॥

शीतलं तर्पणजलं पानकं च विशेषतः।

भक्ष्यं भोज्यं तथा लेह्यं पेयं चापि ह्यनेकशः॥३६॥

निवेद्य देवदेवाय मात्रान्तं देशिकोत्तमः। - ईश्वरे - १३

श्रीजयन्त्यां नैवेद्यविशेषाः

यथाशोभमलङ्कृत्य कृष्णं यादवपुङ्गवम्।

बलभद्रेण सहितमथवा केवलं द्विज॥९४॥

कुम्भमण्डलपूर्वादि पूजनं कारयेद् द्विज।

निवेद्य पायसादीनि सर्वाण्यन्नोत्तमानि च॥९५॥

नवनीतं च सुबहु हेमपात्रे निवेद्य च।

शुण्ठीपूर्वं (चूर्ण?) शर्करया मिलितं च निवेदयेत्॥९६॥

क्षीरं घृतं च सुबहु कदल्यादिफलानि च।

जाम्बवानि फलान्यद्य(?) यत्तत्संपाद्यते नरैः॥९७॥

तत्सर्वं देवदेवाय देवकीसूनवे द्विज।

निवेदयेद्भक्तियुक्तः श्रद्धापूतेन चेतसा॥९८॥ - विश्वामित्रे - १६

अर्घ्यशङ्ख पूजा

शङ्खे तोयं समापूर्य गोक्षीरेण विमिश्रितम्॥४५॥

शङ्खाग्रे चन्द्रमभ्यर्च्य तन्मूले कृष्णमर्चयेत्। - ईश्वरे - १३

प्रथमं कृष्णप्रीतिकरं चन्द्रार्घ्य क्रमः - मन्त्रश्च

हस्ताभ्यां शङ्खमादाय सपुष्प-फल-चन्दनम्॥४६॥

जानुभ्यामवनिं स्पृष्ट्वा चन्द्रायार्घ्यं निवेदयेत्।

क्षीरोदार्णवसम्भूत! अत्रिनेत्र समुद्भव!॥४७॥

गृहाणार्घ्यं शशीनाथ(शशाङ्केदं) रोहिण्या सहितो मम।

इति चन्द्रायार्घ्यदानं कृष्णसन्तोषकारणम्॥४८॥

प्रीणनं सर्वदेवानां सर्वसस्यविवृद्धिदम्। - ईश्वरे - १३

<u>कृष्णार्घ्य मन्त्रः - फलञ्च</u>

जातः कंसवधार्थाय भूभारोत्तारणाय च।

पाण्डवानां हितार्थाय धर्मसंस्थापनाय च॥५०॥

कौरवाणां विनाशाय दैत्यानां निधनाय च।

गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे॥५१॥

इति कृष्णायार्घ्यदानं राजराष्ट्राभिवृद्धिदम्।

सर्वसम्पत्करं चैव सर्वलोकहितार्थकृत्॥५२॥ - ईश्वरे - १३

<u>यजमनेनापि अर्घ्यदानं - गो भू हिरण्यादि दानम्</u>

यजमानोऽपि वा दद्यादर्घ्यमेवं जगत्प्रभोः।

इह सर्वाभीष्टसिद्ध्यै परत्र च सुखाप्तये॥५३॥

तत्काले देशिकादिभ्यो गोभूस्वर्णान्यनेकशः।

दद्याद्देवस्य सन्तुष्ट्यै यजमानो विशेषतः॥५४॥ - ईश्वरे - १३

<u>श्रीजयन्त्यां दानानि</u>

गोदानं भूमिदानं च हिरण्यं वस्त्रभूषणम्।

सर्वदानं ततो दद्यात् ब्राह्मणेभ्यो यथाक्रमम्॥४३॥

तदन्ते वैष्णवान् पूज्य भोजनाच्छादनादिभिः।

ताम्बूलं वाथ सर्वेषां यथावित्तानुसारतः॥४४॥ - विष्वक्सेने - ३०

<u>आचार्याणां वैष्णवानां पारणं - अवशिष्टरात्रौ विष्णुकथा श्रवणमित्यादि</u>

अनुयागं ततः कुर्यादाचार्यो वैष्णवैः सह॥६२॥

वैष्णवानामुत्सवान्ते पारणं विहितं द्विजाः।

यद्वा फलेच्छया कार्यं पारणं तु परेऽहनि॥६३॥

ततोऽवशिष्टयामिन्यामाचार्यो देवसन्निधौ।

भक्तैर्भागवतैः सार्धंगापयन् वैष्णवीः कथाः॥६४॥ - ईश्वरे - १३

<u>जन्मोत्सवेषु रात्रावेव पारणम्</u>

उपोष्य दिवसेत्वस्मिन् रात्रौ कुर्यात्तु पारणम्।

जन्मोत्सवानन्तरं हि देव देवस्य शार्ङ्गिणः॥४२॥

पारणेऽस्मिन्नकालादि शङ्कात्याज्या भवेत्सदा। - परमपुरुषे - ९

<u>श्रीजयन्त्यां वाहन भेदाः</u>

प्रभातायां तु शर्वर्यामुत्सवं कारयेत्ततः।

ग्रामे वा नगरे वापि मार्गशुद्धिं च कारयेत्॥५१॥

शिबिकां वा रथं वापि कुञ्जरं वा हयं तु वा।

वस्त्रपुष्पैरलङ्कृत्य माल्यैश्च विविधैरपि॥५२॥

एवं देवमलङ्कृत्य स्थापयेद्यानमध्यमे।

ग्रामप्रदक्षिणं कृत्वा गेयनृत्तादिसंयुतम्॥५३॥ - विष्वक्सेने - ३०

<u>श्रीजयन्त्युत्सवदिने श्राद्धादिक संभवे कर्तव्य विधिः</u>

एतस्मिन् दिवसेयस्य पितृश्राद्धादिकं भवेत्॥४५॥

पूर्वाह्नेवापराह्नेवा कृत्वाचैतन्महोत्सवम्।

भगवन्निवेदिताऽन्नाद्यैस्स्व पितृन् चापि तोषयेत्॥४६॥ - परमपुरुषे - ९

<u>शिक्योत्सवे वीथिषु भाण्ड - मण्डप कल्पनम्</u>

गोपुरस्य पुरोभागे चतुःस्तम्भसमन्वितम्।

चित्रवस्त्रवितानाढ्यं फलपल्लवशोभितम्॥५७॥

मध्यलम्बिक्षीरघटं दधिभाण्डोपरिस्थितम्।

हरीद्राजलसंयुक्तं मण्डपं परिकल्पयेत्॥५८॥

एवं वीथीषु सर्वत्र कल्पयेन्मण्डपान् बहून्। - श्रीप्रश्ने - ४१

<u>शिक्योत्सव विधिः - உறியடி (எண்ணெய் சுண்ணம் எதிரெதிர்தூவிட)</u>

रात्रौ जागरणं कृत्वा प्रातः काले महोत्सवम्।

वीथीश्च समलङ्कुर्यात्तोरणानां बहुन्यसेत्॥२०॥

शिक्ये शिक्ये विशेषेण दधिक्षीरघटान् न्यसेत्।

तोरणे तोरणे बध्वा प्रहरेद्देवसन्निधौ॥२१॥

कृष्णबिम्बं समारोप्य शिबिके पुष्पनिर्मिते।

प्रथमावरणमारभ्य वीथ्यावरणपश्चिमम्॥२२॥

आनयेत्सर्ववाद्यैश्च वेदघोषैश्च देशिकः।

नैकैः परिकरैश्चैव छत्रचामरसङ्कुलैः॥२३॥

क्रीडायन्त्रगणैश्चैव तैलचूर्णप्रदायकैः।

एवं नीत्वा विधानेन मण्डपे सन्निवेशयेत्॥२४॥ - अनिरुद्धे - २५

<u>शिक्योत्सवे वीथिषु तैल -चूर्ण -नवनीतादि परस्परं विकीर्णक्रमः</u>

तैलं च रजनीचूर्णं विकिरद्भिः परस्परम्।

नवनीतं च दधि च क्षीरं च कुसुमादिकम्॥ ७५॥

क्षिपद्भिश्च हसद्भिश्च भक्षयद्भिश्च कैश्चन।

अर्थीन् सन्तोषयद्भिश्च नवनीतघृतादिकैः॥ ७६॥

ताम्बूलं रजनीचूर्णं ददद्भिः पौरयोषिताम्।

विकिरद्भिः पुष्पगन्धैः कुङ्कुमैः कृष्णमव्ययम्॥ ७७॥ - ईश्वरे - १३

<u>श्रीजयन्त्युत्सवेन सहस्रगुण फलम्</u>

स्नानं दानं जपो होमः स्वाध्यायोऽभ्यर्चनं तथा॥ १०॥

तत्सहस्रगुणं प्रोक्तं जयन्त्यां यत्कृतं भवेत्।

आचार्य दक्षिणादत्ता दत्तायुतगुणा भवेत्॥ ११॥

धनधान्यप्रदा पुण्या सर्वपापहरा शुभा। - नारदीये - २४

<u>श्रीजयन्त्यां निवेदित क्षीर प्राशनेन स्त्रीणां फलम्</u>

क्षीरं निवेदितं तस्मै तस्मिन् काले द्विजोत्तम।

तावत्कालमनश्नन्त्यः स्नाताः शुद्धाम्बराः स्त्रियः॥ ९९॥

पिबन्ति भक्तिसंयुक्ता वन्ध्याश्चेत्तनयान् बहून्।

अरोगांश्च सुरूपांश्च विदुषो जनयन्ति ताः॥ १००॥ - विश्वामित्रे - १६

---

# नवरात्र्युत्सव प्रमाणानि

वीरलक्ष्म्योत्सवस्य अवश्यकता

यस्माद्येषा जगन्माता पुरुषाकार रूपिणी।

तस्मात्तस्यास्तु संप्रीत्यै कर्तव्यमिदमुत्सवम्॥५३॥

सर्वेष्वन्येषूत्सवेषु लोके मुख्यतरं भवेत्।

तस्मात्सर्वप्रयत्नेन देवागारे गृहेपिच॥५४॥

निर्मलेनैव भक्त्यातु कार्यमेतन्महोत्सवम्। - परमपुरुषे - ९

वीरलक्ष्म्योत्सव निर्णयः

अथातस्संप्रवक्ष्यामि श्रीदेव्युत्सव निर्णयम्॥५१॥

आश्विनस्य सिते पक्षे नवम्यान्तु महोत्सवम्।

वीरलक्ष्म्यास्तु कर्तव्यं प्रत्यब्दन्तु धरातले॥५२॥ - परमपुरुषे – ९

महानवमी कालः - तिथि लोपे कर्तव्यविधिः

कलयाप्यष्टमी विद्धारहितं नवमी पुरा॥५५॥

विनिश्चित्यतु तस्मिन्वै कुर्यादेतन्महोत्सवम्।

चतुस्थानार्चनैर्युक्तं सविशेषं यथावसु॥५६॥

तद्वासराणुसारेण नवाहोत्सव माचरेत्।

तिथिलोपेऽल्पमायांवै आरभ्योत्सवमुच्यते॥५७॥

वृद्धौद्वितीयमारभ्य कुर्यादेतन्महोत्सवम्। - परमपुरुषे – ९

नवरात्र्युत्सव कालः

सिंहराशिस्थिते सूर्येऽमावास्यां च जलोदये॥७५॥

अनिरुद्धांशस्वरूपं तु क्षीराब्धिशयनात्मकम्।

लक्ष्म्याः सेवितपादाङ्घ्रिं पूजयेत्करूणानिधिम्॥ ७६॥

नवरात्रात्मकं कार्यमीषे सिते महाव्रतम्। - पाराशर्ये – २४

<u>वीरलक्ष्म्युत्सवे दिनसङ्ख्या -दिनसङ्ख्याभेदेन नाम -फल भेदाः</u>

तद्वासरानुसारेण नवाहोत्सवमाचरेत्।

तिथिलोपे ह्यमावास्याम् आरभ्योत्सवमाचरेत्॥ ९३॥

वृद्धौ द्वितीयामारभ्य नवाहोत्सवमाचरेत्।

सप्ताहं वापि पञ्चाहं त्र्यहमेकाहमेव वा॥ ९४॥

आचरेदुत्सवं लक्ष्म्याः फलकामनया द्विजाः।

नवाहं वैष्णवं प्रोक्तं सप्ताहं त्वार्षकं भवेत्॥ ९५॥

पञ्चाहं त्वैन्द्रकं प्रोक्तं त्रयहं शैवमुच्यते।

एकाहमुत्सवं ब्राह्मं पञ्चधैवं प्रकीर्तितम्॥ ९६॥

ब्राह्मं वै ब्रह्मसिध्यर्थं शैवं रोगविनाशनम्।

ऐन्द्रं दुर्भिक्षनाशार्थमार्षं राष्ट्राभिवृद्धिदम्॥ ९७॥

वैष्णवं तूत्सवं प्रोक्तं भक्तिमुक्तिफलप्रदम्। - ईश्वरे - १३

<u>नवरात्र्युत्सवे मृत्सङ्ग्रहण देशः</u>

सायंकाले विशेषेण मृत्सङ्ग्रहणपूर्वकम्॥ १५३॥

धाम प्रदक्षिणं कृत्वा तुलसीमण्डपं विशेत्।

यथोक्तां मृत्तिकां स्थाप्य नित्यपूजां समापयेत्॥ १५४॥ - वैहायसी - १५

<u>नवरात्र्युत्सव कार्यक्रमाणि -तुरग -लक्ष्म्याश्च रक्षाबन्धनम्</u>

सायं मृत्सङ्ग्रहं कृत्वा ह्यङ्कुरानर्पयेन्मुदा।

प्रातः अग्निं प्रपूज्याऽथ लक्ष्मीमन्त्रेण होमयेत्॥ ७९॥

रक्षाया बन्धनं लक्ष्म्या अश्वादीनाञ्च कारयेत्।

गारुडेनैव मन्त्रेण ह्यश्वादीनर्चयेत्क्रमात्॥ ८०॥

लक्ष्मीसन्तोषणार्थाय पुष्पमण्डपमाविशेत्। - पाराशर्ये – २४

<u>वीरलक्ष्म्युत्सव कार्य क्रमाणी</u>

अङ्कुरार्पणकर्मादीन् पूर्ववत्कारयेद् गुरुः॥ ४९॥

प्रत्यहं कालयोः कुर्याच्चतुःस्थानार्चनादिकम्।

सायाह्ने समनुप्राप्ते सौवर्णशिबिकादिके॥ ५०॥

श्रियं देवीं समारोप्य ह्यलङ्कृत्य विशेषतः।

सर्वैर्यात्रोपकरणैर्नयेद्ग्राम प्रदक्षिणम्॥ ५१॥ - श्रीप्रश्ने – ४८

<u>वीरलक्ष्म्युत्सव विधिः ( नवरात्रिः) - महानवम्यां देवेन सह पूजनम्</u>

संस्नाप्य कलशैर्नित्यमलङ्कृत्य तु देशिकः।

चतुस्थानार्चनं कृत्वा हविरन्तं प्रपूजयेत्॥ २३॥

याने देवीं समारोप्य देवं ग्रामप्रदक्षिणम्।

एवं प्रतिदिनं कृत्वा नवम्यां कुम्भतोयतः॥ २४॥

प्रोक्षयेन्नित्यपूजान्ते देवीं देवेन पूजयेत्। - पुरुषोत्तमे - २७

<u>नवरात्र्युत्सवे चतुस्थानार्चनम् - फलञ्च</u>

यथाशास्त्रन्तु नित्यं च चतुस्थानार्चनं चरेत्॥ ५८॥

कुम्भाग्नि -मण्डलस्थान्तु श्रियं वै नवमीदिने।

बिम्बे समर्प्य विधिवत्कुर्याद्देवी महोत्सवम्॥ ५९॥

यस्मिन् देशे भवद्येतदुत्सवं प्रति वत्सरम्।

तस्मिन् देशे तु सौभाग्य समृद्धिस्सर्वतो भवेत्॥ ६०॥ - परमपुरुषे – ९

<u>वीरलक्ष्म्योत्सवे चतुस्थाने आवाहन देवताः</u>

कुम्भे च मण्डले बिम्बे वह्नौ चापि यथाविधि।

तत्र तत्र विशेषो यः कथ्यते सम्प्रति द्विजाः॥ १०१॥

कुम्भार्चने श्रियं देवीं मध्यकुम्भे समर्चयेत्।

सुदर्शनं तु वर्धन्यां प्राग्वदेव समर्चयेत्॥ १०२॥

लक्ष्मीः कीर्तिर्जया माया उपकुम्भाष्टके द्विजाः।

प्रभवाप्यययोगेन पूज्याः प्रागादिषु क्रमात्॥ १०३॥ - ईश्वरे - १३

<u>नवमीदिने श्रियाः उत्सवक्रमः - महाकुम्भप्रोक्षण मन्त्रः</u>

एवं प्रतिदिनं कुर्यान्नवम्यन्तं महोत्सवम्।

सायं प्रातश्चतुस्थानपूजनेन समन्वितम्॥ १२१॥

नवमीदिवसे प्राप्ते प्राग्वत्कृत्वोत्सवादिकम्।

रात्रौ विशेषयागान्ते कुण्डमण्डलमध्यगाम्॥ १२२॥

श्रियं विसृज्य हृदये कुम्भं देव्यास्तु सन्निधिम्।

समानीय समभ्यर्च्य श्रियं श्रीसूक्तमुच्चरन्॥ १२३॥

कुम्भतोयेन सम्प्रोक्ष्य कौतुकं च विसृज्य च।

हविरन्तं समभ्यर्च्य प्रणिपत्य क्षमापयेत्॥ १२४॥ - ईश्वरे - १३

<u>नवरात्र्युत्सवे निवेदनीय भक्ष्यभोज्यादीनि</u>

सिंहासने समावेश्य लक्ष्मीं सन्तोषयेत्तदा॥८२॥

अर्घ्यपूर्वं निवेद्यान्तं भक्ष्यभोज्यान्यनेकशः।

मुद्गान्नं पायसान्नञ्च तिलान्नं च गुलान्नकम्॥८३॥

निवेद्य स्नपनं कुर्यात् देशिकं पूजयेत्तथा। - पाराशर्ये – २४

<u>नवरात्र्युत्सवे चणक निवेदनम्</u>

पाठकैर्गणिकाभिश्च ग्रामं नीत्वा प्रदक्षिणम्॥१५०॥

आलयं संप्रविश्याथ घोटकांस्तु समाविशेत्।

अर्घ्यपाद्यादिनाभ्यर्च्य चणकादीन् निवेदयेत्॥१५१॥ - वैहायसी – १५

<u>नवरात्र्युत्सवे निवेदनीय भक्ष्यभोज्यादीनि</u>

सिंहासने समावेश्य लक्ष्मीं सन्तोषयेत् ततः॥१५७॥

अर्घ्यपूर्वं निवेद्यान्तं भक्ष्यभोज्यान्यनेकशः।

मुद्गान्नं पायसान्नं च तिलान्नं च गुलान्नकम्॥१५८॥

पानकैश्चणकैस्सार्धं पृथुकादीन् निवेदयेत्।

दिने दिने विशेषेण नवाहोत्सवमाचरेत्॥१५९॥ - वैहायसी - १५

<u>महालक्ष्म्युत्सव करणे फलम्</u>

एवं बहुविधा देवि ह्युत्सवाः सन्ति भामिनि।

प्राधान्यतोऽहमवदत्तेष्वन्यतमं तु यः॥६३॥

करोति भक्त्या तस्याहं प्रसन्नः सम्पदायुषम्।

पुत्रपौत्रादिवृद्धिं च ज्ञानं चापि महत्तरम्।

ददामि चान्ते मल्लोकं वैकुण्ठपदमाप्नुयात्॥६४॥ - श्रीप्रश्ने - ४८

<u>वीरलक्ष्मीपूजा - विशेषदिन निरूपणम्</u>

अष्टम्याञ्च चतुर्दश्यां नवम्यां भृगुवासरे।

पूर्णिमायाममायांच वीरलक्ष्म्याः प्रपूजने॥१५५॥

सहस्रनामभिस्तस्या हरिद्राचूर्ण कुङ्कुमैः।

धनधान्याभिवृद्धिश्च वैकुण्ठ प्राप्तिच ध्रुवम्॥१५६॥ - परमपुरुषे – ४

---

## <u>विजयोत्सव प्रमाणानि</u>

<u>विजयदशमी कालः</u>

इषस्य दशमी शुक्लां विजयां तां विदुर्बुधाः।

तस्मिन्नेवतु देवस्य विजयोत्सवमाचरेत्॥६१॥

नवमी कलयाचैव विद्धात्याज्या भवेत्सदा।

परवेद्यायुतायान्तु दशम्यामुत्सवं चरेत्॥६२॥

श्रवणर्क्षयुतां चापि पूर्व विद्धां परित्यजेत्।

अपराजितार्चने भूयात् श्रवणर्क्षाधिख्यता भुवि॥६३॥

तथैव शुभयात्रायास्सायङ्कालस्थिता तिथिः। - परमपुरुषे - ९

<u>विजयोत्सव निर्णयः</u>

किञ्चश्री वासुदेवस्य उत्सवार्थं तु भूतले॥६४॥

राज्ञापट्टाभिषेकार्थं पूर्वविद्धादिदूषिताम्।

दशमीं तु परित्यज्य शुद्धामेव परिग्रहेत्॥६५॥

तिथिलोपे यदाभूयाद्दशमी- नवमी दिने।

परस्मिन्नतु मुहूर्तंवा दशमी यदि नास्ति च॥ ६६ ॥

एकादश्यान्तु श्री- विष्णोः कुर्यादेतन्महोत्सवम्।

नत्वेतत्तु भवेत्पूर्व विद्धायां दशमी दिने॥ ६७॥

कदापिच मुनिश्रेष्ठा राजराष्ट्र प्रवृद्धये।

यदावृद्धौ तिथीनान्तु दशमीद्वय सम्भवम्॥ ६८॥

तदातु प्रथमं त्यक्त्वा द्वितीयेह्युत्सवं चरेत्।

नवंयान्तु महालक्ष्म्याऽश्वार्चनं तु समाप्य च॥ ६९॥

प्रथमे तु दशम्यां वै आयुधाद्यधिवासनम्।

द्वितीये शेष दशमी दिवसेतु महोत्सवम्॥ ७०॥

कुर्यादेवं मुनिवराः लोकक्षेमार्थमेवहि। - परमपुरुषे – ९

<u>विजयदशम्युत्सव कालः</u>

विजयो नाम कालोऽयं सर्वकर्मार्थसिद्धिदः।

तस्मात् सायाह्नसंयुक्तदशमी क्षेमदा नृणाम्॥ ५९॥

तत्काले तु मया प्रोक्तस्तुरगारोहणोत्सवः। - श्रीप्रश्ने – ४८

<u>मृगयात्राख्य विजययात्रोत्सवः</u>

नभस्यस्य तु मासस्य शुक्लपक्षस्य वै गुरुः॥ ३॥

दशम्यां मृगयायात्रां (करिष्यन्नवमीदिने)। - श्रीप्रश्ने - ४३

<u>नवम्याम् आयुधानां हयस्य च सरसि शोधनम्- अलङ्करणञ्च</u>

नवम्यामेव देवस्य तुरगं च विशेषतः।

अलङ्कृतं तथास्त्रौघं देवस्य धनुरादिकम्॥ १२८॥

वाहयस्तु नदीतीरं सरस्तीरमथापि वा।

समानीयाथ संस्नाप्य तुरगं चायुधादिकम्॥ १२९॥

अलङ्कृत्य विशेषेण माल्यैर्वस्त्रादिकैस्तथा।

छत्रध्वजपताकाद्यैर्नृत्तवाद्यरवैः सह॥ १३०॥

ग्रामप्रदक्षिणं नीत्वा आलयं सम्प्रवेशयेत्। - ईश्वरे – १३

<u>तुरग - आयुध पूजाविधिः (नवम्यां)</u>

तत्र देवस्य तुरगं ताक्ष्र्यमन्त्रेण मन्त्रवित्॥ १३१॥

समभ्यर्च्यार्घ्यगन्धाद्यैर्हविरन्तं समर्चयेत्।

आयुधान्यर्चयेत्तद्वत्तत्तन्मन्त्रेण देशिकः॥ १३२॥ - ईश्वरे – १३

<u>नवरात्रि व्रतः - तुरगस्य चणक निवेदनञ्च</u>

प्रथमादि-नवाहान्तं वीरलक्ष्मीव्रतं मुने!॥ ७७॥

सर्वैश्वर्यप्रदं नित्यं सर्वाभीष्टप्रदं तथा।

तुरगान् स्नापयित्वादौ चणकादीन् निवेदयेत्॥ ७८॥ - पाराशर्ये – २४

<u>विजयदशमी उत्सवस्य कारणम् - विजयदशम्यां होममन्त्रः</u>

विजयदशमीयज्ञं घोटकानां सुखाय वै।

कुर्याद्वक्ष्यामि तत्सर्वं मण्डपानि च पूर्ववत्॥ १६४॥

अर्घ्यपूर्वं निवेद्यान्तं ताक्ष्र्यमन्त्रेण होमयेत्। - वैहायसी - १५

<u>तुरगे कुम्भ प्रोक्षणम् - परितः बलि प्रदानम्</u>

तुरगानानयेत् तत्र दृढीकृत्य विशेषतः।

वेदघोषसमायुक्तं पुण्याहं प्रोक्षणं चरेत्॥ १६६ ॥

खगेशकुम्भमारोप्य कुम्भप्रोक्षणमारभेत्।

इन्द्रादीन् परितः प्रोक्ष्य बलिं क्षिपेत्समन्ततः ॥ १६७॥ - वैहायसी - १५

<u>विजयोत्सवे वानप्रस्थैः कन्दमूल -फल - पुष्पादीनां समर्पणम्</u>

महावनं समानीय तत्र तत्र विशेषतः ॥ १३६ ॥

वानप्रस्थैस्तापसाद्यैरर्पितानि च भक्तितः।

कन्दमूलफलादीनि विविधाः कुसुमस्रजः ॥ १३७॥

समर्प्य देवदेवाय वह्निवृक्षसमीपतः। - ईश्वरे – १३

<u>वह्नि वृक्षमूले आयुधानां पूजा - वह्निपल्लवं देवस्य शिरसि निक्षेपनक्रमः</u>

कारयित्वा तु मृगयां वह्निवृक्षसमीपतः ॥ १३ ॥

नीत्वा प्रपादिके रम्ये स्थापयित्वा जगत्पतिम्।

वह्निवृक्षस्य मूले तु प्रोक्ष्य पुण्याहवारिणा ॥ १४ ॥

आयुधानि निधायाथ पूजयेत् स्वस्वमन्त्रतः।

देशिको मूलमन्त्रेण शमीपल्लवमाहरेत्॥ १५॥

निदध्याद् देवशिरसि सर्वभूविजयाय तत्। - श्रीप्रश्ने - ४३

<u>विजयदशम्युत्सवः - शमीपत्राभिकञ्च</u>

नवाह्नं पूजयेद्भक्त्या दशम्या दिवसे मुने! ॥ ८४ ॥

खगेशं पूजयित्वादौ इन्द्रादीनां बलिं क्षिपेत्।

तुरगे देवमारुह्य सायुधैः सुभटैस्तथा ॥ ८५ ॥

वह्निवृक्षं परिक्रम्य तुरगान् भ्रामयेत्तदा।

शमी-मन्त्रेण पत्रेण देवाभिषेकमाचरेत्॥८६॥ - पाराशर्ये – २४

<u>शमीवृक्षमूले आयुधानां पूजा - बाणविसर्जनम् - शमीपल्लव धारण</u>ञ्च

दशम्या मश्वमारोप्य प्रापयेच्च शमीतरुम्॥२७०॥

शरासनाद्यायुधानि तत्र निक्षिप्य देशिकः।

पुण्याहवारिभिः प्रोक्ष्य देवपार्श्वे निवेशयेत्॥२७१॥

अनुज्ञाप्य ततो देवं प्रागादिषु यथाक्रमम्।

विसृज्य बाणानन्ते तु शमीवृक्षे निपातयेत्॥२७२॥

तत श्शमीपल्लवै स्तैः देवमभ्यर्च्य देशिकः।

तत् पल्लवं स्वयं धृत्वा दद्यात् भक्तजनं प्रति॥२७३॥

मण्डपे देव मभ्यर्च्य मन्दिरातन्तर्भुवं नयेत्। - विष्णुतिलके – ८

<u>बाणप्रयोग कारणं - मन्त्रश्च (प्रातःकाले)</u>

धनुर्बाणान् समादाय सर्वदिग्विजयाय च॥१४१॥

सर्वशत्रुविनाशाय राजराष्ट्राभिवृद्धये।

चतुर्दिक्षु चतुर्बाणान् ऊर्ध्वेऽधश्च शरद्वयम्॥१४२॥

प्रयुञ्जेदस्त्रमन्त्रेण धन्वनागेति वा ऋचा। - ईश्वरे – १३

<u>बाण सङ्ख्या</u>

सर्वारिष्टविनाशाय चतुर्बाणं तु योजयेत्॥१७३॥ - वैहायसी - १५

<u>विजयदशम्यां शमीपल्लव धारणफलम्</u>

अश्विनस्य सितेपक्षे दशम्यां विजयोत्सवे।

शमीपल्लवयुक्तानक्षतान् योपरिगृहेत्॥७८॥

तस्य सर्वत्रविजयं सर्वकार्येषु निश्चयम्। - परमपुरुषे – ४

<u>शमीपत्रार्चनम्  - शिरसि धारणे फलञ्च</u>

शमीपत्राणि सङ्गृह्य पूजयेद्देवपादयोः।

देवस्य पदविन्यस्त शमीपत्राणि ये नराः॥२८॥

शिरसा धारयिष्यन्ति ते ध्रुवं मुक्तिकिल्बिषाः। - पुरुषोत्तमे - २७

<u>सरस्वतिपूजा - विजयदशम्योत्सवः</u>

मूलादिषु च भारत्याः स्वागमादौ प्रपूजनम्।

नवाङ्कुरार्पणस्यार्चा दशम्यां विजयोत्सवः॥२६॥

सायंपूजां विधायैव शा(सा)स्त्रपूजाप्रमाणतः।

त्रयोदश्यां चतुर्दश्यां पूर्णायां दानकोत्सवम्॥२७॥ - शाण्डिल्ये – २५

---------------------------------------------------------------

## <u>डोलोत्सव प्रमाणानि</u>

<u>डोलोत्सव कालः</u>

अथातः संप्रवक्ष्यामि डोलारोपविधिक्रमम्।

फल्गुन्यामुत्तराख्यायां कुर्याच्चन्द्रोदये नृप॥१॥

दृष्टे महोत्सवे वापि प्रदोषे वा विशेषतः।

चैत्रे तु शुक्लद्वादश्यां डोलारोपणमाचरेत॥२॥ - मार्कण्डेये - २४

<u>डोलोत्सव कालः</u>

अथातः सम्प्रवक्ष्यामि  डोलारोहणमुत्तमम्।

शुक्लपक्षे मधौ मासे पूर्णिमायाः पुरा मुने!॥३४॥ - पद्मोद्भवे - २६

<u>डोलोत्सव दिन सङ्ख्या - सायाह्ने डोलोत्सवः</u>

सकृत् त्र्यहं वा पञ्चाहं सप्ताहं वा नवाहकम्।

कृत्वैवमुत्सवं नित्यं सायङ्काले यथाविधि॥२०३॥ - ईश्वरे - १२

<u>डोलोत्सव मण्डप लक्षणम्</u>

द्वात्रिंशत्स्तम्भसंयुक्तमथवा तु तदर्धकम्।

मण्डपं शैलजं यद्वा दारुजं वा प्रकल्पयेत्॥५॥ - श्रीप्रश्ने – ४५

<u>डोलोत्सवार्थं मण्डपकल्पन स्थानम्</u>

प्रथमावरणे वापि द्वितीयावरणादिके।

बहिर्वा गोपुरद्वारात्कुत्रचित्सुमनोहरे॥१६५॥

देशे डोलोत्सवार्थं तु मण्डपं परिकल्पयेत्। - ईश्वरे - १२

<u>डोलोत्सवे मण्डपालङ्करणम्</u>

द्वात्रिंशत्स्तम्भसंयुक्तं चतुर्विंशतिभिस्तु वा॥१६६॥

षोडशस्तम्भयुक्तं वा चतुर्द्वारसमन्वितम्।

मण्डपं समलङ्कुर्यान्नानावर्णवितानकैः॥१६७॥

विचित्रक्षौमवस्त्रैश्च मुक्तादामभिरेव च।

नानाकुसुममाल्यैश्च दर्पणैश्चामरादिभिः॥१६८॥

ध्वजैश्च विविधै रम्यैः प्रसूनस्तबकैस्तथा।

घण्टाभिः फलभारैश्च प्रदीपावलिभिस्तथा॥१६९॥

मण्डपाभ्यन्तरभुवं कस्तूरीकुङ्कुमादिभिः।

कर्पूरैश्च समालिप्य सुधाचूर्णादिभिर्भुवम्॥१७०॥

अलङ्कृत्य विशेषेण कुसुमैरक्षतैः शुभैः।

विकीर्य दिव्यधूपैश्च धूपयित्वा समन्ततः॥१७१॥ - ईश्वरे - १२

<u>डोलालक्षणम्</u>

सन्तक्ष्य तक्षकैर्दारु डोलार्थं सङ्ग्रहेत्ततः॥४॥

शिलायां वा प्रकुर्वीत तोरणाकारनिर्मितम्।

वृत्तं वा चतुरश्रं वा पादमेवं प्रशस्यते॥५॥

श्रियं चोर्ध्वे पट्टिकायां पार्श्वयोः सितसंयुतम्।

वक्रस्वरमुखं कुर्यात् पार्श्वयोः सिंहयुग्मकम्॥६॥ - मार्कण्डेये - २४

<u>डोला लक्षणम्</u>

सौवर्णीं राजतीं ताम्रीं दारुजां वा यथारुचि।

यथोक्तलक्षणां डोलां वृत्तां च चतुरश्रकाम्॥१७२॥

विमानसदृशीं वापि यथेष्टतलशोभिताम्।

चतुःस्तम्भसमायुक्तां यद्वा स्तम्भद्वयान्विताम्॥१७३॥

वितानैर्विविधैर्माल्यैर्दर्पणैः केतुभिस्तथा।

अलङ्कृत्य विशेषेण लम्बयेन्मण्डपान्तरे॥१७४॥

रज्जुभिर्लोहक्लृप्ताभिः क्षौमकार्पासतन्तुभिः।

कृताभिर्वा यथायोगं ततो देशिकसत्तमः॥१७५॥ - ईश्वरे - १२

<u>डोलापूजा</u>

पुण्याहं वाचयित्वा तु डोलां सम्प्रोक्ष्य मन्त्रवित्।

डोलायाः फलकामध्ये अनन्तं परिपूजयेत्॥१७६॥

पादेषु चैव धर्माद्यमष्टकं वा चतुष्टयम्।

स्तम्भेषु गरुडव्यूहमभ्यर्च्य क्रमयोगतः॥ १७७॥

तथैव चतुरो वेदान् रज्जुषु क्रमशोऽर्चयेत्।

इतिहासपुराणानि वेदाङ्गानि तथैव च॥ १७८॥

फलकायामष्टदिक्षु पूजयेन्मुनिसत्तमाः।

व्यापकांस्तु चतुर्मन्त्रान् पादेषु परिपूजयेत्॥ १७९॥

इष्ट्वा ध्वजेषु सावित्रीं छत्रेषु व्याहृतीस्तथा।

प्रणवं तु पताकासु तोरणेषु स्वरांस्तथा॥ १८०॥

व्यञ्जनानि च सम्पूज्य डोलां कृत्वा तु वाङ्मयीम्।

डोलायाः परितो दिक्षु इन्द्रादीन् परिपूजयेत्॥ १८१॥ - ईश्वरे – १२

<u>डोलापूजा</u>

सुरम्यं समलङ्कृत्य विष्वक्सेनं तु पूजयेत्॥ १२९॥

पुण्याहंवाचयित्वा तु प्रोक्षयेड्डोलिकां ततः।

डोलिकायामनन्तं च वेदान् रज्जुषु पूजयेत्॥ १३०॥ - पुरुषोत्तमे - २४

<u>डोलोत्सवे चतुस्थानार्चनम्</u>

एवं डोलां तु संस्कृत्य कुर्याड्डोलोत्सवं विभोः॥ १८७॥

चतुःस्थानार्चनयुतं बलिदानसमन्वितम्। - ईश्वरे - १२

<u>डोलोत्सवे चतुस्थानम्</u>

चतुः स्थानेषु सम्पूज्य कुमुदादिबलिं क्षिपेत्।

निवेद्य तर्पणादीनि नीराजनमथाचरेत्॥ ३२॥ - श्रीप्रश्ने - ४५

<u>डोलारोपणक्रमः</u>

बलिदानञ्च कर्तव्यं दिग्देवानां तु तुष्टये।

अर्चयेत् उत्सवं बेरं दोलायां स्थापयेत्तथा॥४३॥

देवीभ्यां सह देवेशमलङ्कृत्य विशेषतः।

सुमुहूर्ते शुभे लग्ने घण्टावाद्यरवैः सह॥४४॥

डोलयेद् देशिको देवं यजमानश्च नारद!

परिवारेण संयुक्तः शनैः शनैः सनातनम्॥४५॥

नानानाटकसंयुक्तो नानानृत्तसमन्वितः।

नानागीतेन सङ्गीतः नानातालसमन्वितः॥४६॥

औत्सवं बिम्बमादाय ततः प्रदक्षिणं चरेत्।

धामप्रदक्षिणं कृत्वा गर्भगेहं प्रवेशयेत्॥४७॥ - पद्मोद्भवे - २६

<u>देवं सुलग्ने डोलारोपणम्</u>

आरम्भे चावसाने च पूर्वोक्तस्नपनान्वितम्॥१८८॥

सायं नित्यार्चनं कृत्वा विशेषयजनं तथा।

देवं याने समारोप्य श्रीपुष्टिभ्यां समन्वितम्॥१८९॥

धाम प्रदक्षिणीकृत्य डोलापार्श्वं समानयेत्।

शङ्खभेरीनिनादैश्च तूर्यमङ्गलनिस्वनैः॥१९०॥

सुमुहूर्ते सुलग्ने च डोलामारोपयेद्विभुम्। - ईश्वरे - १२

<u>डोलारोपणविधिः- निवेदनविशेषाः</u>

इन्द्रादिभ्यो बलिं दत्वा देवं याने निवेश्य च।

शङ्खभेरीनिनादैश्च डोलायां स्थापयेद्गुरुः॥ १३१॥

तत्र देवं समभ्यर्च्य चित्रान्नानि फलोदकम्।

(नृत्तगीता विनोदानि कारयेद्देवसन्निधौ।)

निवेद्य पानकं चैव ताम्बूलं तु समर्पयेत्॥ १३२॥ - पुरुषोत्तमे - २४

<u>डोलाचालन मन्त्रः</u>

चतुर्धा वाष्टधावापि डोलामन्त्रस्य योगतः॥ ६०॥

वैनतेयस्य मूलेन कराभ्यां मानयेत्ततः। - मार्कण्डेये - २४

<u>डोलाचालन मन्त्रः</u>

डोलारज्जून् चतुर्दिक्षु गृहीत्वा द्विजसत्तमाः॥ १९३॥

मन्दं मन्दं चालयेयुस्तदानीं देशिकोत्तमः।

पुंसूक्ताद्यैर्देवदेवं स्तुवन्नुच्चस्वरैस्तदा॥ १९४॥ - ईश्वरे - १२

<u>डोलायां देवाय पानीय -ताम्बूलनिवेदनम् -वाद्यवादनादि तोषणञ्च</u>

पानीयं श्रमशान्त्यर्थमेलाकर्पूरमिश्रितम्॥ ३५॥

मध्ये मध्ये समर्प्याथ शोधयेच्छाटिना मुखम्।

मुखवासनसंयुक्तं ताम्बूलं च समर्पयेत्॥ ३६॥

ततो वाराङ्गनागीतैर्वीणावेणुविमिश्रितैः।

नृत्यैश्च विविधैश्चापि तोषयेयुः सुरोत्तमम्॥ ३७॥ - श्रीप्रश्ने – ४५

<u>डोलोत्सवस्य फलम्</u>

पुष्पाञ्जलिपुरस्कश्च सर्वभोगसमन्वितः।

सर्वपापहरः पुण्यः दोलोत्सवस्तु वर्णितः॥ ४८॥ - पद्मोद्भवे – २६

<u>डोलायां देवदर्शने फलम्</u>

डोलारोपितदेवेशं पश्यन्ति ब्रह्मवादिनः।

प्रयान्ति विष्णुसालोक्यं मुक्त्वा मोक्ष इहैव तु॥६२॥ - मार्कण्डेये - २४

---

## दीपावल्युत्सव प्रमाणानि

<u>नरकचतुर्दश्युत्सव महिमा</u>

भूमिपुत्रः पुरा देवि नरको नाम दानवः।

तेनेमो हिंसिताः पूर्वं मां प्रजाः शरणं ययुः॥२५॥

ततोऽहमहनं देवि नरकं दानवाधिपम्।

स तु दिव्यं वपुः प्राप्य मां च स्तुत्वा वचोऽब्रवीत्॥२६॥

पुण्यश्लोक हरे विष्णो कमलासनपूर्वज।

त्वां प्रार्थये नमस्कृत्य भक्तप्रिय हितङ्कर॥२७॥

त्वया हतोऽहं सन्तुष्टो दानवानां सुदुर्लभम्।

त्वत्प्रसादात् स्वर्गवासं वसिष्यामि न संशयः॥२८॥

परं तु बाधिताः पूर्वं मोदन्तां सकलाः प्रजाः।

मन्नाम्ना ह्युत्सवं कुर्युरालयेषु गृहेषु च॥२९॥

अभ्यञ्जनस्नानदानं नूतनाम्बरधारणम्।

कुर्युर्दैवाय भक्ष्यादिगुडान्नादिचतुर्विधम्॥३०॥

निवेदयेयुरित्येवं सम्प्रार्थ्य स्वर्गमभ्यगात्।

ततो देवान् मानुषांश्च तदाशासं जलोद्भवे॥३१॥ - श्रीप्रश्ने - ४३

<u>नरकचतुर्दशी उत्सवक्रमः</u>

मासिचाश्वयुजे कृष्णचतुर्दश्यां हरिः पुरा।

नरकं संहरत्तस्मात्तन्नाम्ने तच्चतुर्दशी॥ ३१ ॥

एतस्यां देवदेवं तु सतैलाभ्यञ्जनेन तु।

संस्नाप्य नूतनैर्वस्त्रैरलङ्कृत्य विभूषणैः॥ ३२॥

चतुर्विधानिचान्नानि पानीयानि समर्पयेत्। - पुरुषोत्तमे - २७

<u>नरकचतुर्दशीकालः - क्रमः तैलधारणञ्च</u>

आश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूदये।

तैलेन स्नापयेद्देवमवशिष्टेन वै गुरुः॥ ३२॥

शिरसा धारयेत् पूर्वं भक्तेभ्यो धारयेत्ततः।

भगवद्गात्रंसंस्पृष्टं तैलं मन्त्रैश्च मन्त्रितम्॥ ३३॥

शिरसा धारयेयुस्ते शरीरेषु न लिम्पयेत्।

यो मोहाल्लिम्पते गात्रं स तु रौरवमाप्नुयात्॥ ३४॥ - श्रीप्रश्ने - ४३

<u>दीपावल्युत्सवः - अभ्यञ्जन कालः</u>

ब्रह्मन् ! आश्वयुजे मासि कृष्णपक्षे कलेस्तिथौ।

अरुणेन्दूदये कुर्यात्तैलेनाभ्यंजनं हरेः॥ २६६॥ - विष्णुतिलके - ८

<u>नरकचतुर्दश्यां नूतनवस्त्रस्य पूजा -तद्वस्त्रं भगवतः समर्पनञ्च</u>

देवस्य तु पुरोभागे धान्यपीठं प्रकल्पयेत्।

हैमानि वस्त्रयुग्मानि पट्टजान्यपराण्यपि॥ ४०॥

स्वर्णपात्रे नालिकेरफलताम्बूलशोभिते।

निधाय धान्यपीठे तु प्रोक्ष्य पुण्याहवारिणा॥ ४१॥

तेषु वस्त्रेषु वै चन्द्रमावाह्याभ्यर्चयेत्ततः।

गजादौ वा यानवर्ये परिचारकमूर्ध्नि वा॥ ४२॥

निधाय छत्रवाद्यादिसहितो देशिकोत्तमः।

धाम प्रदक्षिणीकृत्य परिदध्याद्यथाक्रमम्॥ ४३॥

गर्भमन्दिरमाविश्य मूलार्चायाश्च दैव्ययोः।

कर्मबिम्बादिबिम्बानां धारयेन्नूतनाम्बरम्॥ ४४॥

निवेद्य भक्ष्यभोज्यादि भक्तेभ्यो दापयेत्ततः। - श्रीप्रश्ने - ४३

<u>दीपावली उत्सवक्रमः - गजवाहनारोहणञ्च</u>

अमावास्यां तु सायाह्ने नित्यपूजां विधाय च॥ ३३॥

देवालयेषु स्तम्भेषु प्राकारे गोपुरेषु च।

दीपानां पङ्क्तयस्थाप्य नानाकारैः पृथक्पृथक्॥ ३४॥

ततो देवं तु देवीभ्यामारोप्य गजवाहने।

छत्रचामरवाद्यैश्च भटसङ्घैश्च सायुधैः॥ ३५॥

प्राकारेवापि ग्रामे वा कारयेदुत्सवं ततः।

देवं प्रवेशयेद्धाम्नि महताविभवेन तु॥ ३६॥ - पुरुषोत्तमे - २७

---

## <u>कैशिकोत्सव प्रमाणानि</u>

<u>कैशिकोत्सवः - तत्कालः</u>

कार्तिके मासि द्वादश्यां गन्धालेपनमाचरेत्।

उषः काले विशेषेण कैशिकीं गीतिमाचरेत्॥४२॥

प्रत्युषः पूजनं कुर्यात् स्नानकर्मविवर्जितम्। - अनिरुद्धे – २३

<u>कैशिक एकादशी कालः</u>

एकादश्यां कार्तिकस्य शुक्लपक्षे जगद्धिते।

उपोष्य भजनं कुर्यात् भक्तैर्भगवतैस्सह॥३७॥ श्रीप्रश्ने - ४०

<u>कैशिक एकादशि उत्सवः - तत्कालोचित रागेण तोषणम्</u>

कार्तिके मासि विप्रेन्द्राः! शुक्लैकादशिका तु या।

तस्यामुपोष्य रात्र्यान्तु जागरेण जगत्पतिम्॥२०८॥

तत्कालोचित रागोत्थैस्तोषयित्वा तु गीतकैः।

ब्राह्मे मुहूर्ते सम्प्राप्ते विशेषेण यजेद्विभुम्॥२०९॥

संश्राव्येद्भक्तिगीतानि(संश्रावयेद्गीतकानि)स्तोत्राणि विविधाः कथाः।-ईश्वरे -१३

<u>कैशिकपुराण पठनम्</u>

पौराणिकं समाहूय देशिकः पाञ्चरात्रवित्।

पौराणिकेन दैत्यारिकैङ्कर्याणां फलानि च॥४९॥

अपचारं कृतवतां दुःखदानि फलान्यपि।

वाचयित्वा धनैस्तं तु तोषयेत् कमलेक्षणे॥५०॥ - श्रीप्रश्ने - ४०

<u>कैशिकोत्सव फलम्</u>

स्नानादिनियमान् ब्राह्मे कृत्त्वा भागवतैस्सह।

तस्मिन् स्तवीति यो देवं हरिं सर्वफलप्रदम्॥३९॥

महापातकयुक्तोऽपि स तु मोक्षं व्रजेद्रमे। - श्रीप्रश्ने - ४०

<u>कैशिक एकादशिकाले गाने -श्रवणे च फलम्</u>

तत्काले ये च गायन्ति तच्च शृण्वन्ति ये जनाः।

तेषां पुण्यफलावाप्तिं कः शक्नोत्यभिवर्णितुम्॥२११॥ - ईश्वरे – १३

---

## कृत्तिकादीपोत्सव प्रमाणानि

<u>महाबलेरुपाख्यानम्</u>

पुरा महाबलिर्नाम मद्भक्तो दानवोत्तमः।

सर्वान् देवान् विजित्यैव त्रैलोक्यस्याधिपोऽभवत्॥१॥

तं विजेतुमशक्ता वै देवा मां शरणं ययुः।

शरणागतरक्षार्थमहत्वाप्यसुराधिपम्॥२॥

उपायेन जयिष्यामि ह्यसुरं देवकण्टकम्।

इति निश्चित्य मनसा वामनं रूपमास्थितः॥३॥

मामुद्दिश्यैव यजतो यज्ञवाटमुपागमम्।

गत्वा त्वयाचे तपसे मत्पादत्रयमानिताम्॥४॥

भुवं ततो ह्यलक्ष्येण सोऽप्यदान्मम वल्लभे।

गृहीत्वैव पदैकेन भुवमन्येन पादतः॥५॥

पुण्यमस्यान्तरिक्षं च भूयोऽप्राक्षमहं बलिम्।

तृतीयं पदमानं तु कुत्र दास्यसि सुव्रत॥६॥

इति मद्वचनं श्रुत्वा बलिर्हृष्टो वचोऽब्रवीत्।

सत्यं मद्वचनं कर्तुं मूर्ध्नि मे चरणं कुरु॥७॥

अनुग्रहार्थं भक्तस्य तथा कृत्वा रसातलम्।

नीत्वा तस्मिन् राज्यभारमसुरं कारयाम्यहम्॥८॥

एवं मां प्रार्थयत्तस्मिन् काले दैत्याधिपो बलिः।

उपक्रान्ता मया तृप्तिर्वह्निरूपस्य ते विभो॥९॥

मया प्रीतिस्तु नाकारि विघ्नोऽभूद्यज्ञसन्ततेः।

तस्मादस्मिन् दिने भूम्यामालयेषु गृहेषु च॥१०॥

अग्निं हृत्वा प्रदीपांस्तु दीपयेयुस्तदग्निना।

तदा प्रभृति कुर्वन्ति मयाज्ञप्ता जना भुवि॥११॥ - श्रीप्रश्ने - ४४

<u>कृत्तिकादीपोत्सव कालनिर्णयः - क्रमश्च</u>

कार्तिक्यां पौर्णमास्यां च सर्वदेवेश्वरं हरिम्॥११३॥

आराध्य जगतां नाथं संचोदित विधानतः।

दीपिका दर्शयेच्चैव प्रदोषे शेषशायिने॥११४॥

गोपुरेषु च सर्वेषु प्राकारवलयेषु च।

द्वारदेशेषु सर्वेषु खात्वा(?)स्तम्भान् विशेषतः॥११५॥

मण्डपेषु च सर्वेषु दीपानारोपयेत् प्रभोः।

कल्पयित्वा च कूटादिमध्ये मध्ये च दीपिकाः॥११६॥

गव्येनाज्येन चारोप्य देवदेवाय दर्शयेत्। - विश्वामित्रे - १६

<u>दीपारोपण कालः</u>

कार्तिके मासि मासर्क्षे दीपारोपण माचरेत्॥१६॥ - अनिरुद्धे - २२

<u>कृत्तिकादीपोत्सव कालः</u>

कार्तिके मासि कार्तिक्ये द्वादश्यां वाथ पर्वणि।

देवदेवं महाभोगैः पूजयित्वा निशामुखे॥४५॥ - नारदीये - २४

<u>कृत्तिकादीपोत्सव कालः</u>

वृश्चिकस्थे दिनकरे पौर्णमासी तु या द्विजाः॥१४७॥

चतुर्दश्या-भरण्याश्च कलयाप्यरुणोदये।

अविद्धा कृत्तिकायुक्ता ह्ययुक्ता वा मुनीश्वराः॥१४८॥

तस्यां वृषभकाले तु दीपारोपणमाचरेत्। - ईश्वरे - १३

<u>दीपोत्सव कालः -कार्यक्रमः -लाजनिवेदनमित्यादि</u>

कृत्तिकायां च कार्तिक्ये सायाह्ने दीपमङ्गळम्॥२७४॥

संस्कृत्य गार्हपत्याग्निं दीपांस्तस्मात् समानयेत्।

सायंकाले वृषेलग्ने दीपाराधन माचरेत्॥२७५॥

दीपांश्चैव महादीपान् दीपयेदग्नितृप्तये।

निवेद्य पृथुकान् लाजान् देवायोत्सवमाचरेत्॥२७६॥ - विष्णुतिलके - ८

<u>कृत्तिकादीपोत्सवकाले आलय प्रक्षालन विधिः</u>

क्षालयेद्भवनं सम्यगापोहिष्ठेति मन्त्रतः।

प्राकारं मण्डपं चैव गोपुरं च महानसम्॥२॥

कूपमज्जनशालाश्च धनधान्यालयानि च ।

मार्जयित्वा प्रयत्नेन वायुमन्त्रेण देशिकः॥३॥

प्रोक्षयित्वाथ बीजेन पञ्चगव्येन साधकः ।

क्षालयेद्बलिपीठं तु विष्णुमन्त्रं समुच्चरन्॥४॥

चन्दनागरुकर्पूरैर्धूपं सर्वालयस्य च।

अक्षतैर्विकिरेत्तेषु वस्त्रैराच्छाद्य सर्वतः॥५॥

यावत्प्राकारविस्तारमलङ्कृत्य यथाविधि। - मार्कण्डेये - २५

<u>महादीपपात्रस्य लोह भेदाः - वर्त्ति विषयः - दीपाधिवास क्रमः</u>

मूलबिम्बस्य पुरतो धान्यपीठं प्रकल्पयेत्।

सौवर्णं राजतं वापि ताम्रं मृण्मयमेव वा॥१६८॥

दीपपात्रं समादाय तस्मिन्नाढकसम्मितम्।

गव्यमाज्यं समापूर्य वर्तिं तन्मध्यतो न्यसेत्॥१६९॥

नूतनैर्वस्त्रखण्डैर्वा कृतां कार्पासतन्तुभिः।

तत्पात्रं धान्यपीठोर्ध्वे विन्यस्य मुनिपुङ्गवाः॥१७०॥

तत्पात्रपरितश्चाष्टौ शरावान् घृतपूरितान्।

सवर्तिकान् न्यसेत्तत्र प्रागादिषु यथाक्रमम्॥१७१॥ - ईश्वरे - १३

<u>दीपपात्र लक्षणम्</u>

मृदमानी तु सर्वत्र दीपपात्रञ्च कारयेत्॥५॥

सौवर्णं राजतंवापि ताम्रं मृण्मयमेव वा।

हस्तमात्रन्तु विस्तारमादाय प्रणवेन तु॥६॥

धान्यराशिषु निक्षिप्य घृतं तत्रविनिक्षिपेत्। - वासिष्ठे - २४

<u>महादीप पात्रे लोहभेदाः लक्षणम्</u>

महादीपं सुवर्णाभं रजताभं तु कारयेत्॥१८२॥

ताम्रं मृन्मयं वापि कुर्याद् वित्तानुसारतः। - वैहायसी - १५

<u>कृत्तिकादीपोत्सवे नानाविध आकार दीपाः</u>

उत्सवं कारयेत्सम्यक् सर्वालङ्कारसंयुतम्।

रथैश्च विविधैरङ्गैरश्वैश्च विविधैर्गजैः॥२८॥

शिखादीपपताकैश्च अन्यैश्च विविधैश्शुभैः।

आरूढवैष्णवैः सर्वैः सर्वालङ्कारसंयुतैः॥२९॥

मालादीपं महादीपं चक्रदीपं तथैव च।

सेव्यमानो यथान्यायमप्सरोगणसेवितैः॥३०॥

प्रदीपशतसंयुक्तैः सर्वभूषणसंयुतैः।

मालादीपं महादीपं चक्रदीपं तथैव च॥३१॥

कूर्माकारप्रदीपं च मत्स्याकारं तथैव च।

कूटाकारप्रदीपं च धन्वाकारं तथैव च॥३२॥

इत्येते दीपसङ्घं च आचरेदुत्सवं महत्। - मार्कण्डेये - २५

<u>नानाविध आकार दीपानां स्थापनस्थलाः</u>

प्राकाराणां तु सर्वेषां मालादीपं प्रशस्यते॥३३॥

मण्टपे च महादीपो चक्रदीपं तु गोपुरे।

कूर्मं महानसे चैव मत्स्यं पुष्पालये तथा॥३४॥

कूटाकारं तु कूपे च धनधान्यालये धनुः।

दीपं मज्जनशालायां दण्डाकारं प्रशस्यते॥३५॥

शङ्खाकारं तु शयने मालादीपं प्रशस्यते। - मार्कण्डेये - २५

<u>कूटदीपलक्षणम् - वर्णाश्रम भेदेन आकारभेदाः तत्तत्फलञ्च</u>

दीपकूटं तु कोणेषु अष्टपत्रसमन्वितम्॥ ३६॥

दशतालप्रमाणेन तालाष्टकमथापि वा।

उत्सेधसमविस्तार चतुरश्रं तु कारयेत्॥ ३७॥

ब्रह्मवृद्धिकरं चाग्रं वृत्तं तद्राजवृद्धिदम्।

वैश्यानां वृद्धिदं प्रोक्तमष्टाश्रं तु तथैव च॥ ३८॥

गदा-शङ्खसमाकारं पद्माकारं तथैव च।

त्रिकोणज्वलपीठं तु शूद्राणामृद्धिदं स्मृतम्॥ ३९॥ - मार्कण्डेये - २५

<u>दीपपात्र - तैल विषये</u>

तदर्थं कौतुकं बद्धा धान्यराशौ यथाविधि॥ ४०॥

देवस्य तु पुरोभागे दीपपात्रं तु विन्यसेत्।

लोहजं मृण्मयं वाथ तत्पात्रे गोघृतं क्षिपेत्॥ ४१॥

अभावे तिलतैलं वा चान्यथा दोषमाप्नुयात्। - पुरुषोत्तमे - २७

<u>दीपतैले उत्तमादि भेदाः</u>

उत्तमं कपिलाज्यं तु मध्यमं गोघृतं भवेत्।

त्याज्यं तु महिषाज्यं तु प्राणिजं वर्जयेन्नृप॥ १४॥ - मार्कण्डेये - २५

<u>वर्जनीय तैलाः</u>

पुन्नागैरण्डतैले च ज्योतिष्मतरिरुन्दयोः॥ २४॥

अन्येषामेव सर्वेषां वर्जयित्वा विचक्षणः।

काष्ठजैः स्थलजैर्दैवैः नित्यं नीराजनेऽपि वा॥ २५॥ - मार्कण्डेये - २५

<u>दीपकुम्भ सङ्ख्या - अन्यदीपेषु तैलविधिः</u>

अर्चयेत् स्थापितान् कुम्भान् गन्धपुष्पादिना ततः।

पञ्चविंशतिकुंभांस्तु विंशत्कुम्भमथापि वा॥२०॥

अथवा दशकुम्भं तु पञ्चकुम्भमथापि वा।

अलाभे एककुम्भं वा पूजयेद्देशिकोत्तमः॥२१॥

अन्येषामपि दीपानां तिलतैलमथापि वा। - मार्कण्डेये - २५

<u>वर्ति निर्माणविधिः</u>

नूतनदीपपात्राणि संक्षाल्य च ततः परम्।

तेषु स्वर्णादिपात्रेषु वर्तीस्तन्तुविनिर्मिताः॥२१॥

नूतनैर्वस्त्रखण्डैश्च निर्मितास्तेषु च न्यसेत्।

आज्येन पूरयेत्तानि तिलतैलेन वा रमे॥२२॥ - श्रीप्रश्ने - ४४

<u>कृत्तिकदीपोत्सवे दीपोज्वल फलम् -दीप -वर्त्तिलक्षणम्</u>

देवालयमलङ्कुर्याद्यो भक्त्या दीपराशिभिः।

तथा नानाविधाकारैः शुद्धकासवर्तिभिः॥४६॥

प्रभूतघृततैलाढ्यैः लोहमृत्पात्रगैः शुभैः।

एकाङ्गुलान्न च न्यूनैर्नाधिकैरष्टतालतः॥४७॥

तथाविधैः प्रदीपैस्तु सयष्टिभिरनेकधा।

स लोकं वैष्णवं प्राप्य सुखमयुतसंप्लवम्॥४८॥

पश्चात् कैवल्यमाप्नोति देवदेवप्रसादतः। - नारदीये - २४

<u>कृत्तिकादीपोत्सवे पुष्पाङ्कुरः - चतुस्थानार्चनम्</u>

यात्राबिम्बं भद्रपीठे निवेश्यास्थानमण्टपे॥ १६४॥

पुष्पाङ्कुरं ततः कृत्वा मूलबिम्बादिषु द्विजाः।

रक्षाबन्धं च विधिवत्कृत्वा देशिकसत्तमः॥ १६५॥

चतुस्थानार्चनं कुर्याद्यथोक्तविधिना ततः। - ईश्वरे - १३

<u>कृत्तिकादीपोत्सवे होमविधिः</u>

देवं पूजयेत् पश्चात् हविर्भिर्विविधैस्तदा॥ १९५॥

भक्ष्यैर्भोज्यैश्च खाद्यैश्च पानीयैरुपपादितम्।

दीपहोमं ततः कृत्वा श्रीमन्त्रेणैव मन्त्रवित्॥ १९६॥

अष्टोत्तरशतं हुत्वा पश्चाद्दीपं समापयेत्। - वैहायसी - १५

<u>कृत्तिकादीपोत्सवे होमः</u>

आवाहनपदे पात्रे देवमावाह्य देशिकः।

नयेद् देवं तथा दीपपात्राणि परिचारकैः॥ ३३॥

नित्याग्निकुण्डमासाद्य वह्निं प्रज्वलयेत्ततः।

पात्रस्थं श्रीशमावाह्य वह्नौ सम्पूजयेद्रमे॥ ३४॥

अपूपान् गुडसम्मिश्रलाजादीन् जुहुयात्पुनः। - श्रीप्रश्ने - ४४

<u>महानसाग्नौ महादीप उद्दीपनम्</u>

पुण्याहं वाचयित्वा तु प्रोक्षयेदस्त्रवारिणा।

प्रदोषे दीपपात्राणि वाहयन् दीक्षितैर्द्विजैः॥ १७२॥

गत्वा कुण्डसमीपं तु तत्र कुण्डस्थवह्निना।

दीपान् प्रज्वाल्य नेत्रेण वाहयन् ब्राह्मणैस्तदा॥ १७३॥ - ईश्वरे – १३

<u>नित्याग्नौ दीपोद्दीपनम् -दीपारोपणमन्त्रः -दीपपूजा च</u>

पुरस्तान्मूलबेरस्य पात्रमारोप्य नूतनम्।

धान्यराशौ ततस्तस्मिन्नाज्यमाढकसंमितम्॥ १४॥

कापिलं तैलमथवा निक्षिप्य परिशोधितम्।

ऋजुवर्तिं तन्तुभिर्वा वाससा नूतनेन वा॥ १५॥

कल्पयित्वा समुद्धृत्य कुण्डाग्निं तेन दीपयेत्।

वर्तिमाग्नेयमन्त्रेण अग्निमुद्रां प्रदर्शयेत्॥ १६॥

अभ्यर्च्य चाग्निमन्त्रैस्तु मुहूर्ते शोभने गुरुः। - पाद्मे - १५

<u>दीपाधिवास कालः</u>

नैमित्तिकं प्रदोषे तु कुर्याद्दीपाधिवासनम्॥ १३॥ - पाद्मे - १५

<u>दीप पूजा</u>

नवानिपात्राण्यादाय गोघृतेनैव पूरयेत्॥ ३५॥

सूत्रवर्तिं विनिक्षिप्य मध्ये संस्थाप्य देशिकः।

तद्बाह्ये परितश्चाष्टौ शरावान् विन्यसेत् क्रमात्॥ ३६॥

इन्द्रादीशानपर्यन्तम् आज्यवर्तिसुसंयुतम्।

दीपपात्रं ज्वलित्वाथ पात्रवर्तिषु योजयेत्॥ ३७॥

अर्घ्यगन्धादिभिश्चैव अर्चयेदग्निमन्त्रतः।

पूर्वाद्यष्टशरावेषु इन्द्रमन्त्रादिकैर्यजेत्॥ ३८॥ - अनिरुद्धे - २५

<u>दीपारोपणमन्त्रः - विष्णुदीपे पूजनीय देवताः</u>

अग्निबीजमनुस्मृत्य दीपं प्रज्वालयेत्ततः।

दीपमध्ये महाविष्णुं दक्षिणे रुद्रमर्चयेत्॥४९॥

वामे चैव विधिं पूज्य तत्तन्मन्त्रेण पूजयेत्। - मार्कण्डेये - २५

<u>दीपपूजा - वृषभलग्ने देवस्य दीपप्रदर्शनम् - तन्मन्त्रश्च</u>

नेत्रेण वाग्निमन्त्रेण दीपमर्घ्यादिभिर्यजेत्।

ततः शुभे मुहूर्ते तु वृषलग्ने गुरूत्तमः॥१७५॥

देवमर्घ्यादिनाभ्यर्च्य दीपपात्रं समुज्ज्वलम्।

आदाय नेत्रमन्त्रेण उद्दीप्यस्वेति वा ऋचा॥१७६॥

प्रदर्श्य देवदेवाय सर्वमङ्गलसंयुतम्। - ईश्वरे - १३

<u>दीपारोपण समयः</u>

देशिक: पात्रमादाय विष्णुहस्ते प्रदर्शयेत्॥३९॥

सायाह्ने समनुप्राप्ते दीपारोपणमाचरेत्। - अनिरुद्धे - २५

<u>त्रिसन्ध्यासु नित्यं दीपारोपणम्</u>

देवदेवसमीपे तु त्रिसन्ध्यासु दिने दिने॥२२॥

देवस्य दर्शनार्थं तु नित्यं दीपं प्रकल्पयेत्।

दीपाकारं चतुर्दिक्षु नातिप्रज्वाल्य बुद्धिमान्॥२३॥

तस्मात्सर्वप्रयत्नेन कल्पयेन्मन्त्रदीपकम्। - मार्कण्डेये - २५

<u>नित्यं सन्ध्यादीपारोपण स्थलानि</u>

सन्ध्यादीपे विशेषेण नित्यं प्रज्वालनेऽपि च।

गर्भागारे तथा द्वारे मण्डपे चाङ्गणेऽपि च॥ २६॥

घृततैलादिदीपैस्तु कर्पूरावर्तिसंयुतैः।

तत्तद्वारेषु सर्वेषु दीपान् प्रज्वालयेन्नृप॥ २७॥ - मार्कण्डेये - २५

<u>दीपारोपण स्थानानि</u>

ते च द्वारेषु सर्वेषु मण्डपावरणेषु च॥ ४२॥

गोपुरेषु च सर्वेषु पुष्करिण्यास्तटेषु च।

श्रियो गृहे तथोद्याने भक्तबिम्बगृहेषु च॥ ४३॥

विन्यस्तवर्तिदीपेषु दीपयेयुर्द्विजोत्तमाः। - श्रीप्रश्ने - ४४

<u>स्तम्भाग्रे दीपारोपणम् - दीपारोपण स्थानानि च</u>

आरोप्य सर्वतो दीपान् स्तम्भेषूच्चैर्मधुद्विषः॥ ९॥

दिक्षु सर्वासु सर्वत्र तथा चावरणेषु च।

कूटाकाराः कल्पनीयास्तेषु स्युर्दीपमालिकाः॥ १०॥

प्राकारभित्तिषु तथा मण्डपे गोपुरेषु च।

बह्वीभिर्दीपमालाभिर्भाव्यं सर्वासु दिक्षु च॥ ११॥ - पाद्मे – १५

<u>गोपुरस्य पुरतः विष्णुदीपकलपनम् - दीपस्तम्भ भेदाः तन्मानञ्च</u>

ततस्तु देवदेवेशं गोपुरद्वारमानयेत्।

तत्र द्विजाः वक्ष्यमाणं विष्णुदीपं प्रकल्पयेत्॥ १८५॥

शैलजं लोहजं वापि दारुजं वा यथारुचि।

प्रासादोच्छ्रायमानं वा शततालमथापि वा॥ १८६॥

तदर्धं वा तदर्धं वा दीपस्तम्भं समाचरेत्। - ईश्वरे - १३

<u>विष्णुदीपस्तम्भ स्थापन स्थानम्</u>

आहृत्यैवं विधं स्तम्भं बहिर्द्वारस्य बाह्यतः।

संस्थापयेदन्तरालं स्तम्भ-गोपुरयोर्भवेत्॥ १९०॥

द्वात्रिंशद्धस्तमानं वा चतुर्विंशत्करं तु वा।

रथयात्राविरोधेन ततोऽप्यधिकमेव वा॥ १९१॥

यद्वा स्तम्भं गोपुरान्तः स्थापयेन्मुनिपुङ्गवाः।

पीठगोपुरयोर्मध्ये यद्वा स्तम्भं प्रकल्पयेत्॥ १९२॥ - ईश्वरे - १३

<u>दीपदण्ड स्थानम्</u>

पीठाग्रे गोपुराग्रे वा बहिर्द्वारस्य सन्निधौ॥ १९०॥

द्वादशं षोडशं वापि षड्विंशद्वाथ हस्तके।

गोपुरद्वारबाह्ये तु स्थापयेद् दीपदण्डकम्॥ १९१॥ - वैहायसी - १५

<u>दीपस्तम्भकल्पने वृक्षभेदाः</u>

गोपुरस्य पुरोभागे शततालोन्नतं तु वा।

तदर्धं वा तदर्धं वा खादिरं चन्दनं तु वा॥ ४६॥

सालं तालं नारिकेलमृजुं स्तम्भं समाहरेत्। - श्रीप्रश्ने - ४४

<u>दीपारोपण वृक्षभेदाः मानञ्च</u>

द्वारे द्वारे प्रतिष्ठाप्य दीपदण्डान् विशेषतः॥ ४०॥

क्रमुकं नालिकेरञ्च तालं वेणुं तथैव च।

चम्पकंदेववृक्षञ्च वक्रकोटरवर्जितम्॥ ४१॥

तक्षयित्वा ऋजु विप्र! स्तूपिमानप्रमाणतः।

तदर्धं द्वारमानं वा शततालायतन्तु वा॥४२॥

अशीति तालमिच्छन्ति केचित्तस्यार्धमेव वा। - अनिरुद्धे - २५

दीपस्तम्भ लक्षणम्

चतुर्धा विभजेत् स्तम्भं एकांशं चतुरश्रकम्॥१८७॥

त्र्यंशं तूर्ध्वे षोडशाश्रमष्टाश्रं वृत्तमेव वा।

एकहस्तं द्विहस्तं वा त्रिहस्तं वा घनं तथा॥१८८॥

स्तम्भाग्रे चतुरश्रं च पीठं कुर्यात्सपद्मकम्। - ईश्वरे - १३

दीपदण्ड लक्षणम्

चतुर्धा विभजेत् स्तम्भमेकांशं चतुरश्रकम्।

त्र्यंशं च षोडशाश्रं स्यात् यथालोचनसुप्रियम्॥१८६॥

एकहस्तं द्विहस्तं वा त्रिहस्तं वा घनं भवेत्।

मध्यमे पुष्पबन्धं वै अश्रभागं घनं पुनः॥१८७॥

तदूर्ध्वे पद्ममेवोक्तं युग्मकं चतुरश्रकम्।

नानालङ्कारसंयुक्तं नानापुष्पोपशोभितम्॥१८८॥

चतुरश्रं पादपीठं पञ्चाङ्गस्य प्रमाणतः।

पूर्वे शङ्खञ्च चक्रञ्च दक्षिणे सिंहमेव च॥१८९॥

गरुडं पश्चिमे भागे हनूमन्तमथोत्तरे। - वैहायसी - १५

प्राकारस्य अष्टदिक्षु दीपदण्ड स्थापनम्

प्राकारस्य बहिर्विप्र! अष्टदिक्षु समन्ततः॥४३॥

दीपदण्डान् प्रतिष्ठाप्य तत्तद्दीपं प्ररोपयेत्।

पात्रस्थं पूर्वदिग्दण्डे योजये द्वाद्यसंयुतम्॥४४॥

पुण्याहं वाचयेत्पूर्वं तांस्तान्दण्डान् प्रपूजयेत्। - अनिरुद्धे - २५

<u>महादीप स्तम्भाग्रे दीप कल्पनम् - तालपत्रैः स्तम्भवेष्टनम्</u>

चतुर्धा विभजेत् स्तम्भमेकांशं खातभूतले॥४७॥

निधाय दृढवत्कृत्वा स्तम्भाग्रे पीठमब्जजे।

वृत्तं वा चतुरश्रं वा कल्पयेद्धस्तविस्तृतम्॥४८॥

आज्यावसिक्तवस्त्रैर्वा तैलवस्त्रैर्नवैः प्रिये।

तालपत्रसमूहैर्वा यद्वा वित्तानुसारतः॥४९॥

स्तम्भमावेष्टयेद्धीमान् प्रोक्ष्य पुण्याहवारिणा। - श्रीप्रश्ने - ४४

<u>स्तम्भपीठे प्रागादिषु च दीपारोपणम् - स्तम्भच्छेदनञ्च</u>

आलयाभिमुखं दीपं पीठमध्ये न्यसेत्पुरा॥५०॥

शरावान् समुपादाय तस्य प्रागादिषु न्यसेत्।

तेभ्यो वर्तीः समादाय तत्तद्दिक्षु च दीपयेत्॥५१॥

अग्नेः प्रशमनादर्वाग्राजराष्ट्रविवृद्धये।

छेदयेत् स्तम्भमूलं तु ततो नीराजयेद् विभुम्॥५२॥ - श्रीप्रश्ने - ४४

<u>कृत्तिकादीपोत्सवे देवस्य गजारोहणविधिः (गजवाहने वा)</u>

देवदेवमलङ्कृत्य वारणस्य च मूर्धनि॥५०॥

विन्यसेच्छुद्धपाशेन बध्नीयाद्देशिकोत्तमः। - मार्कण्डेये - २५

<u>देवस्य वीथि भ्रमणे - सर्वावरणेषु नानाविधाकार दीपालङ्करणम्</u>

देवस्योत्सववेलायां सर्वत्रावरणादिषु।

दीपा नानाविधाकाराः कल्पनीयाः समन्ततः॥१८२॥ - ईश्वरे - १३

कृत्तिकादीपोत्सवे वीरलक्ष्म्यासह देव पूजनम्

गर्भगेहं समासाद्य मूलबेरं समर्चयेत्।

पूजयेद्वीरलक्ष्मीं च उत्सवं बेरमाश्रयेत्॥५४॥ - मार्कण्डेये - २५

अपूपादि निवेदनम्

मण्डपं संप्रविश्याथ समारोप्य च विष्टरे।

नृत्तगीतादिकं सर्वं दर्शयित्वा विशेषतः॥४८॥

पुनः पूजां तथा कृत्वा पृथुकादि निवेदयेत्।

अपूपादि विशेषेण दापयेत्सर्वजन्तुषु॥४९॥ - अनिरुद्धे - २५

देवस्य अपूप - लाज निवेदनम्

ततस्तु देवदेवेशं मन्दिरान्तः प्रवेशयेत्॥२००॥

आस्थानमण्डपे भद्रविष्टरे सन्निवेश्य तु।

अर्घ्यादिभिः समभ्यर्च्य अपूपानुपहारकान्॥२०१॥

पायसादीन् तथा लाजान् ताम्बूलादीन्निवेदयेत्। - ईश्वरे - १३

दीपोत्सवे निवेदनीयानि

आसाद्य मण्डपे तस्मिन्निवेद्य च महाहविः॥२१॥

पृथुकान् संस्कृतान् सक्तून् पललानग्नितृप्तये।

अपूपान् समये तस्मिन्निवेद्य मधुविद्विषे॥२२॥ - पाद्मे - १५

कृत्तिकादीपोत्सव फलम्

वत्सरे यस्तु राजेन्द्र दीपदानेन यत्फलम्॥५७॥

तत्फलं कार्तिके मासि दीपारोपणको नरः।

एककालं द्विकालं वा त्रिकालं वाथ कार्तिके॥५८॥

दीपमारोपयेद्देवं विष्णुसारूप्यतां नयेत्। - मार्कण्डेये - २५

<u>कार्तिकमास दीपप्रज्वलन फलम्</u>

कार्तिकेमासि श्रीवैष्णोर्गेहे दीपंज्वलन्ति ये।

तेषां श्रीहरि सायुज्यं लभत्येव न संशयः॥१८०॥ - परमपुरुषे - ४

<u>कृत्तिकादीप दर्शनफलम्</u>

एनकेनापिच द्विजाःकृत्तिका दीप दर्शनम्।

अष्टैश्वर्यकरं मोक्षसाधनं भवति ध्रुवम्॥७१॥ - परमपुरुषे - ४

<u>कृत्तिकादीपोत्सव कालः - दर्शनफलञ्च</u>

वृश्चिकस्तेदिनकरे कृत्तिकादीप दर्शनम्॥१३६॥

सर्वाभीष्टप्रदं नृणां सर्व पातक नाशनम्। - परमपुरुषे - ४

---

## <u>नीराजनोत्सव प्रमाणानि(सहस्त्रदीपम्)</u>

<u>नीराजनोत्सव (सहस्त्रदीप) कालः</u>

नीराजनविधिं वक्ष्ये देवदेवस्य शार्ङ्गिणः।

कृत्तिकादिवसाद्ब्रह्मन् अपरेद्युर्निशामुखे॥१॥

देवदासीगणान् सर्वान् सर्वालङ्कारशोभितान्।

महानसद्वारमासाद्य दीपान्प्रज्वालयेद्बहून्॥२॥ - अनिरुद्धे - २६

<u>सहस्रदीपः</u>

मण्डपं समलङ्कृत्य आनयेन्मण्डपान्तरे।

औत्सवं बिम्बमादाय विष्टरे सन्निवेशयेत्॥४॥

श्रीभूमिसहितं देवमलंकारैरलङ्कतम्।

महानृत्तं दर्शयित्वा देवं नीराजनं चरेत्॥५॥

सहस्रं वा तदर्धं वा तदर्धं वापि देशिकः।

शतं वापि तदर्धं वा तदर्धं वापि कारयेत्॥६॥

सर्वे पात्रकराश्चैव तिष्ठेयुर्देवसन्निधौ। - अनिरुद्धे - २६

<u>सहस्रदीप मण्डपे आचार्यस्थानम्</u>

आचार्यस्समलङ्कृत्य उत्तरीयोष्णीषभूषणैः॥७॥

देवस्य दक्षिणे पार्श्वे आसने तु समाविशेत्। - अनिरुद्धे - २६

<u>सहस्रदीप समये वेदादीनां श्रवणम्</u>

आत्मार्चनं ततः कृत्वा देवदेवं समर्चयेत्।

दीपार्चनं ततः कृत्वा वेदान् संश्रावयेद्बुधः॥९॥ - अनिरुद्धे - २६

<u>दीपकुम्भपूजा - नीराजन क्रमः</u>

दीपकुम्भं समादाय आधारोपरि विन्यसेत।

दीपकुम्भं समभ्यर्च्य देवमिष्ट्वा विशेषतः॥१०॥

षडङ्गन्यासं कृत्वा तु भ्रामयेद्देवमूर्धनि।

दक्षिणं पादमारभ्य वामपादं तु पश्चिमम्॥११॥

वाद्यमङ्गलसंयुक्तं गीतमङ्गलसंयुतम्।

योषित्करात्समादाय पात्रमादाय देशिकः॥१२॥

भ्रामयेद्देवदेवस्य मुखमध्ये विसर्जयेत्।

पात्रे पात्रे विशेषेण अर्घ्यपुष्पैस्समर्चयेत्॥१३॥ - अनिरुद्धे - २६

<u>नीराजन हीने प्रत्यवायः</u>

नीराजनविहीने तु सर्वकर्मासुरं भवेत्॥१७॥ - अनिरुद्धे – २६

---------------------------------------------------------------

## <u>धनुर्मासपूजा प्रमाणानि</u>

<u>धनुर्मास पूजाविधिः</u>

अतः परं प्रवक्ष्यामि मार्गशीर्षोत्सवं परम्।

कोदण्डस्थे दिनकरे तत्काले सङ्क्रमे द्विजाः॥२१२॥

संस्नाप्य देवदेवशमधमोत्तममार्गतः।

अलङ्कारासनं नीत्वा ह्यर्घ्याद्यैः परिपूज्य च॥२१३॥

वासोभिर्भूषणैर्माल्यैर्गन्धैः कस्तूरिकादिभिः।

अलङ्कृत्य च देवेशं विष्वक्सेनादिकं तथा॥२१४॥

तथैव भक्तबिम्बांश्च संस्नाप्य नवभिर्घटैः।

अलङ्कृत्य विशेषेण यजेदर्घ्यादिभिः क्रमात्॥२१५॥

ततस्तु देवदेवेशं नीत्वा भोज्यासनं शुभम्।

मुद्गान्नं पायसान्नं च शर्कराघृतसंयुतम्॥२१६॥

नानाविधानि भक्ष्याणि विविधानि फलानि च।

ताम्बूलं मुखवासं च विनिवेद्य यथाविधि॥२१७॥

निवेदितान्नभक्ष्यादीन् विष्वक्सेनादिकस्य च।

भक्तानां च निवेद्याथ देवदेवं श्रियः पतिम्॥ २१८॥

प्रदक्षिणीकृत्य तदा प्रणम्य च यथा विधि।

तोषयेद्वैष्णवैर्देवं स्तोत्रैर्नानाविधैस्तथा॥ २१९॥

संस्कृतैर्द्राविडैर्वापि देवपारम्यसूचकैः।

मानसं ध्यानमित्युक्तं कायिकं कर्मचोच्यते॥ २२०॥

वाचिकं स्तोत्रमित्युक्तं त्रिविधैस्तोषयेत्प्रभुम्।

ततस्तु वैष्णवाग्र्याणां वैष्णव-स्तुतिगायिनाम्॥ २२१॥

तीर्थं निवेदितान्नादीन् दद्याद्देवस्य सन्निधौ।

वैष्णवा भगवद्भक्ताः गृहीत्वा विनयान्विताः॥ २२२॥

पीत्वा तीर्थं प्रसादं च भक्षेयुर्देवसन्निधौ।

आरभ्य सङ्क्रमाद्देवं मासान्तं मुनिपुङ्गवाः॥ २२३॥

अरुणस्योदयात्पूर्वं समाराध्य यथाविधि।

मुद्गान्नपायसान्नादीन् भक्ष्याणि विविधानि च॥ २२४॥

निवेदयेच्च देवाय भक्तेभ्यश्च दिने दिने।

भक्तप्रणीतगाथाभिः स्तुवीत पुरुषोत्तमम्॥ २२५॥

तस्मिन् मासे विशेषेण देवदेवस्य सन्निधौ।

सर्पिषा तिलतैलैर्वा दीपारोपणमाचरेत्॥ २२६॥

त्रिंशद्दिने विशेषेण दीपमारोपयेत्तु यः।

इह भुक्त्वाखिलान् भोगान् विष्णुलोकं स गच्छति॥ २२७॥

एवं त्रिंशद्दिनं कुर्यादर्चनं स्वरुणोदये। - ईश्वरे - १३

<u>देवानां काल निर्णयः</u>

मार्गशीर्षं तु देवानामुदयः परिकीर्तितः।

तत्पूर्वः कार्तिको मास उषः कालः प्रकीर्तितः॥३८॥ - श्रीप्रश्ने - ४०

<u>सात्विक काले सात्विकान्न निवेदनम्</u>

मार्गशीर्षो देवतानां प्रातःकाल इति स्मृतः।

प्रातःकालो महद्भिस्तु सात्त्विकः समुदाहृतः॥४६॥

तस्मिन्नभिगमे काले पूजनं सात्त्विकं स्मृतम्।

मुद्गान्नं च गुडान्नं न सात्त्विकं परिचक्षते॥४७॥

तत्काले सात्त्विकान्नेन वासुदेवं तु तर्पयेत्। - श्रीप्रश्ने - ४६

<u>मार्गशीर्षमासे मुद्गान्न निवेदनम् - मुद्गान्न होमश्च</u>

मुद्गान्नं देवदेवाय निवेदयेद्धरासुराः॥२०९॥

चापसङ्क्रममारभ्य मेषसङ्क्रमणावधि।

प्रत्यहं प्रातरारभ्य कुर्यादुत्सवमादरात्॥२१०॥

जुहुयाद् देशिकश्चैवं मुद्गान्नं विष्णवे सुधीः। - वैहायसी - १५

<u>मुद्गान्ननिवेदनं - तेनहोमश्च</u>

चापसङ्क्रमणमारभ्य तैषसङ्क्रमणावधि।

अरुणोदयवेलायां प्रत्यहं मां समर्चयेत्॥२९७॥

मुद्गान्नं जुहुयादग्नौ तथैव च निवेदनम्। - विष्णुतिलके - ८

<u>धनुर्मासे उषःकाले निवेदितान्न स्वीकारे फलम्</u>

अरुणोदय वेळायां धनुर्मासे जगत्पतेः।

निवेदितं तु मुद्गान्नं सहस्र फलदं स्मृतम्॥४५॥ - परमपुरुषे - ४

---

## अध्ययनोत्सव प्रमाणानि

<u>अध्ययनोत्सव कालः क्रमश्च</u>

मार्गशीर्षमासे तु एकादश्यामुपक्रमेत्॥२१॥

दशम्यां कौतुकं कुर्यात् तत्पूर्वे चाङ्कुरार्पणम्।

संकल्पं पूर्वतः कृत्वा पञ्चाहं दशाहं तु वा॥२२॥

मण्डपे देवमारोप्य भक्तबिम्बं निवेशयेत्।

तथा भक्तजनैर्युक्तं वेदान् संश्रावयेत्सुधीः॥२३॥

महाहविर्निवेद्याथ अपूपादि निवेदयेत्।

यात्रापूर्वं ततः कुर्यात् वाहनानि तु पूर्ववत्॥२४॥

समाप्तिदिवसे प्राप्ते विष्वक्सेनं समर्चयेत्। - अनिरुद्धे - २६

<u>अध्ययनोत्सव कालः</u>

अध्ययनोत्सवं वक्ष्ये धनुर्मासे प्रकीर्तितम्।

वैष्णवागमशास्त्रेषु समाहात्म्यं हि वर्णितम्॥२०२॥

एकादश्यां मार्गशीर्षे पूर्वपक्षे विशेषतः।

कुर्यान्महोत्सवो विप्राः अध्ययनाख्यमादरात्॥२०३॥ - वैहायसी - १५

<u>अध्ययनोत्सवकालः -दिनसङ्ख्या च</u>

कार्तिके मार्गशीर्षे वा श्रीमदध्ययनोत्सवम्।

मार्गशीर्षस्य शुक्लस्य प्रथमायामुपक्रमेत्॥७॥

दशम्यन्तं ततो भूयः एकादश्यां तथारभेत्।

पञ्चमी कृष्णपक्षस्य तावद् दशदिनं भवेत्॥८॥ - श्रीप्रश्ने - ४६

<u>अध्ययनोत्सवे त्रिविधपूजा</u>

अध्ययनोत्सवं वक्ष्ये संक्षेपेण मया श्रुतम्।

पूजनं त्रिविधं प्रोक्तं तन्त्रेऽस्मिन् परमेष्ठिना॥१८॥

मानसं कायिकञ्चैव वाचिकं त्रिविधं भवेत्।

मानसं ध्यानमित्युक्तं कायिकं कर्म उच्यते॥१९॥

वाचिकं स्तोत्रमित्युक्तं तन्त्रेऽस्मिन् विष्णुना पुरा।

वेदान्नास्त्यपरं स्तोत्रं तस्माद्वेदांस्तु श्रावयेत्॥२०॥ - अनिरुद्धे - २६

<u>अध्ययनोत्सव क्रमः</u>

स्थितो मौनी तदा तद्वद्रात्रौ कौतुकबन्धनम्॥३२॥

बध्वा देवेशमाराध्य दर्भशायी नयेन्निशाम्।

ब्राह्मे मुहूर्ते चोत्थाय कृत्वा सन्ध्यां यथाविधि॥३३॥

कर्म देवान्तिकं गत्वा कुर्यात्पूजां यथापुरम्।

चतुर्वेदविदो विप्रान् दिक्षु प्राच्यादिषु क्रमात्॥३४॥

दर्भासनेष्वासयित्वा देवस्याभिमुखं यथा।

कोणेषु च दिशां विप्रानेकायनविदस्तथा॥३५॥

अध्यापयेदध्ययनं यथा स्वच्छन्दसां गुरुः।

सामगानितरालाभे केवलांस्तपसि स्थितान्॥ ३६ ॥

एकायनविदो वापि हरेस्तत्प्रीणनं परम्। - पाद्मे - १५

<u>अध्ययनोत्सव दिन सङ्ख्या - चतुस्थानार्चनम्</u>

तस्मिन्नन्त्ये दशदिने विशेषोत्सवमाचरेत्॥ २२८॥

उत्सवारम्भपूर्वेद्युर्निशायामङ्कुरार्पणम्।

रक्षाबन्धञ्च विधिवत्कृत्त्वा देशिकसत्तमः॥ २२९॥

उत्सवारम्भदिवसादारभ्यान्त्यदिनावधि।

चतुस्थानार्चनं कुर्यात्सायम्प्रातर्यथाविधि॥ २३०॥

आरम्भे चावसाने च स्नपनं प्राग्वदाचरेत्। - ईश्वरे - १३

<u>देवस्याभिमुखं विष्वक्सेनादि भक्तबिम्बानां स्थापनम् -देवस्याग्रे स्तोत्राणि</u>

मध्याह्ने देवदेवेशं श्रीपुष्टिभ्यां समन्वितम्॥ २३३॥

शिबिकायां समारोप्य ह्यलङ्कृत्य विशेषतः।

विष्वक्सेनादिभिश्चैव भक्तबिम्बादिभिः सह॥ २३४॥

यात्रोपकरणैस्सार्धं कृत्वा ग्रामप्रदक्षिणम्।

महामण्डपमानीय तत्र वै सिंहविष्टरे॥ २३५॥

देवमारोप्य देवीभ्यां विष्वक्सेनादिकानपि।

देवस्याभिमुखंस्थाप्य ह्यलङ्कारासनोदितैः॥ २३६॥

भोगैर्देवं समभ्यर्च्य भक्तबिम्बांश्च देशिकः।

सदागमादिकान्वेदांस्तथा दिव्याश्च संहिताः॥ २३७॥

इतिहासपुराणानि स्तोत्रं दैवं च मानुषम्।

वेदोपबृह्मणञ्चान्यत्संस्कृतं प्राकृतं तु वा॥२३८॥

भाषान्तरगतं वापि तदा संश्रावयेद्विभुम्। - ईश्वरे - १३

<u>अध्ययनोत्सवे भक्तबिम्बानां स्थापनम् - वेदान् श्रावणम्</u>

मण्डपे देवमारोप्य भक्तबिम्बं निवेशयेत्।

तथा भक्तजनैर्युक्तं वेदान् संश्रावयेद्गुरुः॥२०५॥ - वैहायसी - १५

<u>भक्तबिम्बानां सम्मानम् (அருளப்பாடு)</u>

ततस्तु देवदेवेशं श्रीपुष्टिभ्यां समन्वितम्।

शिबिकायां समारोप्य भक्तबिम्बादिभिः सह॥२४२॥

सविलासं नयेत्तत्र मण्डपे द्विजसत्तमाः।

तत्काले भक्तबिम्बानां सम्मानं च समाचरेत्॥२४३॥ - ईश्वरे - १३

<u>भक्तबिम्बानां सम्मानम् - गाथापठनम्</u>

एकैकशो भक्तबिम्बानानाय्य च हरेः पुरः।

गन्धमाल्यं च तुलसीं दत्वा भक्तस्य मूर्धनि॥७२॥

निक्षिप्य पादुकां चैव भूमौ भक्तान्निवेशयेत्।

तैरुक्ताभिर्गाथिकाभिस्तोषयेद् भक्तवत्सलम्॥७३॥ - श्रीप्रश्ने - ४६

<u>अध्ययनोत्सवे ऋगादि वेदपाठाः</u>

ऋग्वेदं पूर्वदिग्भागे यजुर्वेदं तु दक्षिणे।

पश्चिमे सामवेदं तु अथर्वंचोत्तरे तथा॥४८॥

इतिहासं चाग्निदेशे नैऋत्यां स्तोत्रमुच्यते।

धर्मशास्त्रं तु वायव्ये चैशान्यां मन्त्रपाठकम्॥ ४९॥

भक्तैर्विरचितैस्तोत्रैर्देशभाषानुसारिभिः।

एवमादिभिरन्यैश्च कारयेदुत्सवं महत्॥ ५०॥ - पुरुषोत्तमे - २७

मोक्षोत्सव शब्दार्थः

कृत्वोत्सवं तथाभूतमेकादश्यां विशेषतः।

विशन्ति मोक्षं तस्मात् सो मोक्षोत्सव इतीर्यते॥ ४२॥ - श्रीप्रश्ने - ४६

धनुर्मासे एकादशीउत्सवः -उत्तरद्वारोद्घाटनम्

(चापसङ्क्रम मारभ्य तैषसङ्क्रमणावधि।)

तन्मास शुद्धैकादश्याम् उषस्यभ्यर्च्य मां विधे!॥ २९८॥

उत्तरं द्वारमानीय कवाटोद्घाटनं चरेत्।

सेवन्ते तत्र ये मर्त्या स्तेषां नास्ति पुनर्जनिः॥ २९९॥ - विष्णुतिलके - ८

वैकुण्ठैकादश्याम् उत्तरद्वारगमन फलम्

वैकुण्ठ पदपूर्वायामेकादश्यां द्विजोत्तमाः।

उत्तरद्वार गमने देवस्य मधुविद्विषः॥ ६३॥

दर्शनं सर्वलोकानां दुर्लभं मोक्षदायकम्। - परमपुरुषे - ४

मोक्षोत्सव फलम् - उत्तरद्वार प्रवेशः

कल्पयित्वा त्वदर्चायामेकादश्युत्सवं चरेत्॥ ३८॥

तदा पश्यन्ति ये त्वां तु नमस्यन्ति च ये जनाः।

उत्तरद्वारमार्गेण प्रविशन्ति च ये हरे॥ ३९॥

ते वैकुण्ठमिमं प्राप्य मोदन्तां नित्यसूरिवत्।

तयोस्तद्वचनं श्रुत्वा भक्तवश्यस्तदाब्रुवम्॥४०॥

युवयोस्तृप्तये ह्येष उत्सवः कार्यते मया।

तदारभ्याहमादिक्षं सर्वलोकेषु वै रमे॥४१॥ - श्रीप्रश्ने - ४६

<u>मार्गशीर्ष मासे मोक्षोत्सवः -उत्तरद्वारप्रवेशः फलञ्च</u>

तन्मासशुद्धैकादश्याम् उषस्यभ्यर्च्य माधवम्॥२११॥

उत्तरं द्वारमानीय कवाटोद्घाटनं चरेत्।

सेवन्ते तत्र ये मर्त्याः लभन्ते मोक्षमव्ययम्॥२१२॥

तस्मान्मोक्षोत्सवं चैव वदन्ति पाञ्चरात्रिकाः। - वैहायसी - १५

<u>मोक्षोत्सवे अवभृथस्नानम्</u>

द्वादशीदिनमारभ्य सायाह्ने त्वित्थमाचरेत्॥७७॥

एवं कृत्वा नवदिनं दशमेऽहनि देशिकः।

तीर्थस्थानमथानाय्य विष्णोरवभृथं चरेत्॥७८॥ - श्रीप्रश्ने - ४६

<u>प्रातस्सायं इत्युत्सवः பகல்பத்து ராப்பத்து</u>

पूर्वोक्तयोरुत्सवयोः पूर्वापरविभेदतः॥४८॥

प्रातः सायं च कर्तव्यं तद्विधानं श्रृणु प्रिये। - श्रीप्रश्ने - ४६

---

## <u>मकरे मृगयात्रोत्सव प्रमाणानि</u>

<u>मकरमास द्विदीय दिने मृगयात्रोत्सवः (பரிவேட்டை)</u>

तदन्येधुर्देवदेवं समभ्यर्च्य विशेषतः।

अश्वरत्ने समारोप्य देवमुत्सवबिम्बगम्॥२५४॥

पूर्वोक्तविधिना कुर्यान्मृगयोत्सवमुत्तमम्। - ईश्वरे - १३

<u>तैष सङ्क्रमणे मृगयात्रोत्सवः</u>

सङ्क्रमानन्तरदिने तैषे स्यान्मृगयोत्सवः॥२७८॥ - विष्णुतिलके - ८

<u>मृगाणां मोक्षदापनम्</u>

मृगयां कारयेत्पश्चात्सविनोदं मुनीश्वराः॥२५६॥

वराहवारणव्याघ्रकृष्णसारशशादिकान्।

मध्ये कृत्वा तु परितः सेनां विन्यस्य सायुधाम्॥२५७॥

अतिशूरभटास्तत्र मध्ये संविश्य यत्नतः।

जीवग्राहं मृगान् बध्वा नयेयुर्दैवसन्निधिम्॥२५८॥

ततो विमोचयेत्सर्वान्मृगानेकैकशः क्रमात्।

हतानां वा मृगाणां च भवेत्पुण्यगतिर्ध्रुवम्॥२५९॥ - ईश्वरे - १३

<u>मृगयोत्सवस्य फलम्</u>

एवं हि देवदेवस्य मृगयोत्सव ईरितः।

प्रतिसंवत्सरन्त्वेवं देवस्य सकलोत्सवान्॥२६३॥

यः कारयति विप्रेन्द्राः स तु साम्राज्यसंयुतः।

इह लोके सुखं भुक्त्वा चिरं भोगान् यथेप्सितान्॥२६४॥

देहसन्यासकाले तु प्राप्नोति भगवत्पदम्। - ईश्वरे – १३

-----------------------------------------------------------------

# आग्रयणोत्सव प्रमाणानि

## आग्रयणोत्सव कालः

आग्रयणविधिं वक्ष्ये अवधारय सांप्रतम्।

पुष्यमासे सिते पक्षे पुण्यवारदिने मुने!॥ १ ॥

पुण्य नक्षत्रके वापि पूर्वं चैवाङ्कुरार्पणम्।

तृतीये पञ्चमे वापि दिने लवनमाचरेत्॥ २॥ अनिरुद्धे - २७

## आग्रयणोत्सव कालः

आग्रयणं श्रावणे मासि मासि प्रोष्ठपदेऽपि वा।

मासे चाश्वयुजे ब्रह्मन् कार्तिके मासि वा भवेत्॥ १६८॥

वर्षास्वेवं ततोऽन्यत्र तैषे माघेऽपि वा भवेत्।

फाल्गुने चापि चैत्रे वा वैशाखे वा तथाचरेत्॥ १६९॥

हस्ते च श्रवणे पौष्णे नैर्ऋते च प्रजापतेः।

नक्षत्रे वारुणे पुष्ये वायव्येऽदितिदैवते॥ १७०॥

मघासु मैत्रे चित्रायां श्रविष्ठायामथापि वा।

सौम्ये त्रिषूत्तराख्येषु सम्भवानुगुणं भवेत्॥ १७१॥

अयुग्मास्तिथयस्सर्वा नवमीपरिवर्जिताः।

युग्मास्तु तिथयो नेष्टा द्वितीयां दशमीं विना॥ १७२॥

सोमो बृहस्पतिस्सौम्यो भृगुश्चेति ग्रहाश्शुभाः।

मेषवृश्चिकमीने तु कन्याझषकुलीरके॥ १७३॥

पूर्वपक्षे च कर्तव्यस्तत्रायं कर्मणः क्रमः। - पाद्मे - १४

<u>आग्रयणोत्सवे मुख्य कार्यक्रमाणि</u>

धान्यानां नूतनानां तु लवनं पचनं तथा।

निवेदनं च देवाय मुख्यमस्मिन् निरूपितम्॥ २१६॥ - वैहायसी - १५

<u>शालिक्षेत्र आनय मूर्त्तयः</u>

सर्वैः परिकरैस्सार्धं क्षेत्रदेशं समानयेत्।

मारुतिं वा वैनतेयं(चक्रराजं हनूमन्तं)विष्वक्सेन मथापि वा॥ ३॥ अनिरुद्धे-२७

<u>विष्वक्सेनादिभिः सह धान्य सङ्ग्रहः -शालिक्षेत्रे लवित्रपूजा -बलिदानञ्च</u>

सेनाधिपं तदर्थं तु तार्क्ष्यं वा मारुतिं तु वा॥ १४५॥

आरोप्य शिबिकायानं सर्वैः परिजनैः सह।

आचार्यो यजमानश्च वाद्यघोषपुरस्सरम्॥ १४६॥

क्षेत्रदेशं समासाद्य पुण्याहं वाचयेद्गुरुः।

क्षेत्रमर्घ्यादिनाभ्यर्च्य भूमन्त्रेणैव मन्त्रवित्॥ १४७॥

लवित्रं चापि सम्प्रोक्ष्य मूलमन्त्रेण पूजयेत्।

ततस्तु क्षेत्रपालेभ्यो बलिं दद्यात्समन्ततः॥ १४८॥

दध्योदनं पायसं वा देशिकः क्षेत्रवृद्धये।

सुमुहूर्ते मौनयुक्तो देशिको मूलमन्त्रतः॥ १४९॥

धान्यानां लवनं कुर्यात्ततश्चैवं कृषीवलैः। - ईश्वरे - १२

<u>शालिक्षेत्रे अर्चनम् - बलिदानञ्च</u>

पृथ्वीमन्त्रेण धरणीं गन्धाद्यैः परिपूजयेत्।

शङ्कुलान् प्रोक्षयित्वा तु बलिं दद्यात् समन्ततः॥ २२०॥

पायसं गौडिकं चैव दत्वा लवनमाचरेत्। - वैहायसी - १५

<u>कर्षकाणां रक्षाबन्धनम् - कर्षिणीशिरसा सर्वम् आलयप्रवेशः</u>

खलं पुरातनं? कृत्वा प्रहरेत्तु कृषीवलैः॥६॥

कौतुकं बन्धयेत् धीमान् कर्षकैस्सह देशिकः।

कर्षिणीं शिरसि स्थाप्य गच्छेयुर्दैवतालयम्॥७॥

फलैर्नानाविधैर्युक्तं शङ्खवाद्यादिसंयुतम्।

देवस्य सन्निधौ स्थाप्य पुनः पूजां समाचरेत्॥८॥ अनिरुद्धे - २७

<u>देवस्य करे धान्य प्रदर्शनम् - धान्य शोषणम्</u>

देवगेहं समासाद्य प्रासादान्तः प्रविश्य च।

देवस्य दक्षिणे हस्ते धान्यं किञ्चित्प्रदर्शयेत्॥१५२॥

आतपे शोषयेत्पश्चादवघातं समाचरेत्। - ईश्वरे - १२

<u>वृक्षपादमानेन धान्यानां सर्वेभ्यः दापनम्</u>

देवस्य दक्षिणे हस्ते धान्यं किञ्चित् प्रदर्शयेत्।

वृक्षपादेन विप्रेन्द्र मानयित्वा विचक्षणः॥९॥

दापयेत् सर्ववर्णानां देवदेवस्य सन्निधौ। अनिरुद्धे – २७

<u>धान्यावघात विधिः</u>

शोधयेत्तु विशेषेण धान्यराशिं विनिक्षिपेत्॥१०॥

आतपे शोषयेत् सर्वान वघातं समाचरेत्।

तत्स्थानं लेपनं कृत्वा सुधाचूर्णैश्च मण्डयेत्॥११॥

उलूखं मुसलञ्चैव क्षालयित्वा तु देशिकः।

अभ्यर्च्य गन्धपुष्पाद्यैरुलूखे धान्यकं क्षिपेत्॥ १२॥

अवघातंद्विजवरैस्तथा मङ्गलगायकैः।

देवदासीगणैर्वापि विविधैाह्मणैस्तु वा॥ १३॥ अनिरुद्धे – २७

<u>धान्यभाण्डे धान्य निक्षेपण मन्त्रः</u>

नीत्वा प्रदक्षिणं ग्राममालयं च मधुद्विषः।

गोष्ठागारं प्रविश्यान्तर्धान्यं कणिशगोचरम्॥ १७९॥

श्रीसूक्तेन समभ्यर्च्य भाण्डेष्वभिनवेषु तत्।

निक्षिप्य सङ्ग्रहं तस्य कुर्युस्तत्रालयेषु च॥ १८०॥ - पाद्मे - १४

<u>गुलमिश्र मरीच्यान्नपाकविधिः (श्रीरङ्गे)</u>

तुषानपोह्य शूर्पेण क्षालयेत् शुद्धवारिणा।

शोधयित्वा पुनः सर्वान् गुलखण्डेन मिश्रितान्॥ १४

मरीचिजीरकैर्युक्तान् पूरयेत् देवसन्निधौ। अनिरुद्धे - २७

<u>आग्रयण तण्डुलेन गुडान्न निवेदनं - हवनं - दापनम्</u>

तत स्तण्डुलमानीय देवागारं प्रवेशयेत्॥ २८३॥

कृत्वा गुडान्नं विधिव द्देवाय विनिवेदयेत।

हुत्वा दद्यात् द्विजातिभ्यो गृह्णीयाच्च स्वयं गुरुः॥ २८४॥ -विष्णुतिलके - ८

<u>आग्रयणोत्सव होमः -पाचनं -निवेदनञ्च</u>

शोधयित्वा पुनः सर्वान् गुडपाकेन मिश्रितान्।

मरीचिजीरकैर्युक्तान् नालिकेरफलान्वितान्॥ १५७॥

विधाय मूलबिम्बादीनभ्यर्च्य च विशेषतः।

निवेद्य तानि तदनु वह्नौ सन्तर्पयेद्विभुम्॥१५८॥

होमान्ते सप्तसमिधां तण्डुलैर्जुहुयात्ततः।

पश्चान्निवेदितं सर्वं गुर्वादिभ्यः प्रदापयेत्॥१५९॥ - ईश्वरे - १२

आग्रयणोत्सवे चतुस्थानार्चनम्

मण्डपे देवमारोप्य श्रीभूमिसहितं द्विज!॥१५॥

चतुस्स्थानयुतं वापि केवलं बिम्बमेव वा।

निवेदयित्वा देवेशं मूलबिम्बे तु पूजयेत्॥१६॥ अनिरुद्धे - २७

आग्रयणोत्सवस्य फलम्

आग्रायणविधिः प्रोक्तः यः करोति तु वत्सरे।

धनधान्यसमृद्धः स्यात् दैन्यं दूरीभवेत् सदा॥२३०॥ - वैहायसी - १५

आग्रयणोत्सवस्य फलम्

आग्रयणविशेषेण अश्वमेधफलं लभेत्॥१८॥

तस्मात् सर्वप्रयत्नेन तस्मिन्कर्मणि(एतत्कर्मणि) योजयेत्।

लोपयेद्यदि सम्मोहात् धान्यनाशो भवेद्ध्रुवम्॥१९॥ - अनिरुद्धे - २७

---

## प्रणयकलहोत्सव प्रमाणानि

प्रणयकलहोत्सव कालनिर्णयः

तव प्रियार्थं हे लक्ष्मीस्तथा वक्ष्यामि सुव्रते॥२२॥

आरभ्य मकारान्मासान् मीनमासान्तमब्जजे।

शुक्रवारादिदिवसे प्रणयोत्सवमाचरेत्॥२३॥ - श्रीप्रश्ने - ४७

आलयप्रवेश समये देव्याः त्रिचतुर्वारं प्रवेश प्रतिषेधः

यानमारोप्य गन्धाद्यैरलङ्कृत्य हरिं प्रभुम्।

वाद्यैर्वीणादिगानैश्च नृत्यैर्बहुभिरन्वितम्॥ ३०॥

ताम्बूलचर्वितोष्ठं च गणिकागणसेवितम्।

प्रवेशयेदालयं तु देवी तं प्रतिषेधयेत्॥ ३१॥

एवं त्रिचतुरो वारान् प्रतिषिध्य ततो गुरुः। - श्रीप्रश्ने - ४७

अन्तःप्रवेश प्रार्थना

हे लक्ष्मीर्भगवानद्य भक्तरक्षणकाम्यया॥ ३२॥

बहिर्गतो नान्यथा त्वं मन्तुमर्हसि पद्मजे। - श्रीप्रश्ने – ४७

प्रणय कलहोत्सव दर्शनफलम्

प्रवेशस्त्वालये येषां प्रतिषिद्धो जगत्पते॥ १९॥

शास्त्रेण व्याधिभिश्चापि तेषां दर्शनसिद्धये।

आरुह्य शिबिकां देव ह्यर्चारूपेण केशव॥ २०॥

सर्ववीथिस्थितानां च भक्तानामिष्टसिद्धये।

दर्शयात्मानमानन्दं सर्वपापप्रणाशनम्॥ २१॥

संसारग्राहसन्दष्टान् गजेन्द्रमिव मोचय। - श्रीप्रश्ने - ४७

---

## फाल्गुनोत्सव प्रमाणानि

श्रीमहालक्ष्म्युत्सव कालः (பங்குனி உத்திரம்)

फाल्गुने शुक्लफल्गुण्यां महालक्ष्म्युत्सवं हितम्(चरेत्)॥ ५९॥ -पुरुषोत्तमे-२७

<u>मीनमासे उत्तरफल्गुणोत्सवः</u>

फाल्गुने मासि फल्गुन्यां श्रीकामो हरिमर्चयेत्॥ ७३॥

उपोष्य पूर्वं नियतो ध्यायन्नित्थं समाहितः।

विपुले बिल्वविपिने मध्ये पुष्करशोभिते॥ ७४॥

महातटाके शिञ्जानपक्षिसङ्घसमाकुले।

मण्डले तत्र माहेन्द्रे प्राकारपरिवेषणे॥ ७५॥

चतुर्द्वारे चतुर्दिक्षु कल्पकद्रुममण्डिते।

सौवर्णे बहुकल्याणरत्नस्तम्भसमन्विते॥ ७६॥

सिंहासने वरे रत्नपद्मेऽष्टदलसंयुते।

कर्णिकाकेसरोपेते सुखासीनं श्रिया सह॥ ७७॥ - पाद्मे - १५

<u>उत्तरफल्गुण्यां श्रियोत्सवे होमविधिः</u>

मण्डपे तत्र पूर्वोक्ते परिवारसमन्विते॥ ८५॥

लक्ष्मीप्रसूनकैः पद्मैः होमो बिल्वादिपल्लवैः।

समिदाज्यैश्च मन्त्रेण श्रियश्चाष्टाक्षरेण च॥ ८६॥

श्रीसूक्तानि चतुर्दिक्षु पाठ्यानि पृथिवीसुरैः।

आराध्याभिष्टुयादन्ते स्तोत्रैर्बहुविधैः श्रियम्॥ ८७॥ - पाद्मे - १५

<u>फाल्गुनमासे महालक्ष्म्युत्सवे देवदव्यौ निवेशासन पूजा</u>

तदर्थं मण्डपं कुर्याच्चतुर्द्वारसमन्वितम्।

तत्र सिंहासने स्थाप्य पद्मेऽष्टदलसंयुते॥ ९०॥

नीलमेघनिभं विष्णुं सुखासीनं श्रियासह।

वासुदेवादिकान् दिक्षु पूजयेत् क्रमयोगतः ॥ ६१ ॥

विदिक्षुहस्तिनश्चैव स्वर्णपीठस्य पार्श्वयोः।

पूजनीयौ निधी तत्र इन्द्रादीन्परितो यजेत्॥ ६२ ॥ - पुरुषोत्तमे – २७

<u>देवदेव्याः परितः आवाहन देवताः</u>

पूर्वादिदिक्षु ध्यातव्या वासुदेवादयो दले।

आग्नेयादिषु कोणेषु चत्वारो हस्तिनः क्रमात्॥ ७८ ॥

गुग्गुलूश्च कुरण्डश्च दमकश्शललस्तथा।

शङ्खपद्मनिधी चापि सिंहविष्टरपार्श्वयोः॥ ७९ ॥

अन्योन्याभिमुखौ भूरि वमन्तौ वसु सर्वदा।

भूम्यादयोऽष्टौ पूर्वादिदिक्षु चामरपाणयः॥ ८० ॥

इन्द्रादयश्च पूर्वादिदिक्ष्वष्टावष्टसु स्थिताः। - पाद्मे - १५

<u>मण्डप द्वारे आवाहनदेवताः</u>

स्थिताश्चतुर्षु द्वारेषु वेत्रहस्तास्सकुञ्चिकाः॥ ८१ ॥

कुब्जवेषाः स्त्रियो द्वारि पालयन्त्यो मनोहराः।

बलाकिनी भीषिका च तथैव वनमालिनी॥ ८२ ॥

शाङ्करी च क्रमादेताः पूर्वादिषु चतुर्मुख। - पाद्मे – १५

<u>देवदेवीं वा केवलं श्रियं वा पूजनम्</u>

परिष्कृतानि ध्यात्वैवं देवीं देवं च पूजयेत्॥ ८४ ॥

श्रियं वा केवलां पद्मे कर्णिकायामवस्थिताम्। - पाद्मे - १५

<u>मीनमासे उत्तरफल्गुण्यां श्रियोत्सवस्य फलम्</u>

उत्सवं च श्रिया देव्या सार्धं तद्वन्मधुद्विषः।

यावज्जीवं श्रियं देवीमर्चयन् सम्पदं पराम्॥ ११३॥

इहानुभूय भूयोऽपि परत्र श्रियमश्नुते।

यद्यत्कामयमानेन पुरुषेणार्चनं श्रियः॥ ११४॥

लभते तत्तदेवेह फलभेदैः किमीरितैः।

आरोग्यकामस्साविते मण्डले रक्तपङ्कजे॥ ११५॥

आसीनं विष्टरे पीतकौशेयवसनं हरिम्।

निष्टप्ततपनीयाभं चतुर्भुजमधोक्षजम्॥ ११६॥

प्रसादसुमुखं सेव्यं दिव्याभरणभूषितम्।

देवीसहायं कल्याणं केवलं वा चतुर्मुख॥ ११७॥

पूर्वाद्यष्टदलासीनं शक्त्यष्टसमुपासितम्।

एवं ध्यात्वार्चयेन्नित्यमारोग्यं परमश्नुते॥ ११८॥

अनन्यलभ्यमारोग्यं सर्वं लब्ध्वा ततः परम्। - पाद्मे – १५

---

<u>महालक्ष्म्युत्सव प्रमाणानि</u>

<u>महालक्ष्म्याः फाल्गुणोत्तर कल्यानोत्सव कारण कथनम्</u>

प्रत्यब्दमुत्सवं कुर्याद्विवाहोत्सवपूर्वकम्॥ २३॥

दुर्वाससस्तु शापेन राज्याद् भ्रष्टः पुरन्दरः।

पुनस्तत्प्राप्तये देवि क्षीरसागररोधसि॥ २४॥

सहस्त्रं वत्सरं तेपे तपस्त्रिदशपुङ्गवः।

ततो वर्षसहस्रान्ते दातुं तस्मै तपःफलम्॥ २५॥

प्रादुरासं वरदराट् शङ्खचक्रगदाधरः।

प्रार्थयन्तं स्वर्गलोकं नमस्कृत्य कृताञ्जलिम्॥ २६॥

अब्रुवं देवदैत्यैस्त्वं मित्रभावं पुरा कुरु।

वेधसा शङ्करेणाहं तव साह्यं करोमि भो॥ २७॥

दैत्यैः सहौषधीः सर्वाः क्षिप्त्वा क्षीरार्णवे ततः।

मथितं चेन्मन्दरेण भविष्यत्यमृतं शुभम्॥ २८॥

उत्पत्स्यते तत्र लक्ष्मीस्तां प्रार्थय सुरोत्तम।

आत्मानं बलिनं कृत्वा पीयूषस्य च भक्षणात्॥ २९॥

जित्वा सुरांस्ततो लक्ष्मीं वीरपूर्वामनिन्दिताम्।

प्राप्य स्वराज्यमखिलं पालयिष्यस्यसंशयम्॥ ३०॥

एवं मयोदितं सर्वं श्रुत्वा देवगणैः सह।

क्षीराब्धिमथनं चक्रुस्तदा त्वं जगतां हिते॥ ३१॥

कन्याशुक्लनवम्यां तु शुक्रवारे शुभे दिने।

अनुप्रविश्य दुग्धाब्धावोषधीनां रसस्य च॥ ३२॥

अमृतं च विषं चोभे विभज्य त्वं जगद्धिता।

फाल्गुने मासि नक्षत्रे उत्तरे पूर्णिमातिथौ॥ ३३॥

सागराद्बहिरागत्य पीताम्बरधरं विभुम्।

दृष्ट्वा मायां कन्धरे मां लज्जयावनतानना॥ ३४॥

समारुह्य ततो देवि मच्छ्रीवत्समुपागमः।

त्वयावलोकिते देवे वीरश्रियमुपेयुषि॥ ३५॥

जित्वा दानवसङ्घातान् देवराजः श्रिया ज्वलन्।

स्वराज्यमखिलं प्राप्य ह्युत्सवं तव चाकरोत्॥ ३६॥ - श्रीप्रश्ने – २५

<u>नवरात्रौ नवमीदिने वा फाल्गुनोत्तरेऽपिवा अवभृथ निश्चयः</u>

कुर्यात्तवोत्सवं तद्वदर्चायामपि देशिकः।

भाद्रशुक्लनवम्यां वा फाल्गुन्यां फल्गुनीयुते॥ ३७॥

आविर्भावदिने वापि निश्चित्यावभृथं रमे। - श्रीप्रश्ने - २५

<u>स्वतन्त्र -परतन्त्र भेदेन मृत्सङ्ग्रहणे देवता भेदः</u>

ह्रीमतीं तु पुरस्कृत्य मृत्सङ्ग्रहणमाचरेत्॥ ३८॥

स्वातन्त्र्ये विधिरेषः स्यात् पारतन्त्र्ये तु सेनपम्। - श्रीप्रश्ने – २५

<u>महालक्ष्म्युत्सवे पालिकायाम् आवाहन देवताः</u>

पूर्ववद् द्वारकुम्भादिपूजनं तत्र कारयेत्॥ ३९॥

अष्टलक्ष्मीं पालिकासु धियं कुम्भे समर्च्य च। - श्रीप्रश्ने – २५

<u>महालक्ष्म्युत्सवे चतुस्थाने आवाहन देवताः</u>

मध्यकुम्भे श्रियं देवीं दिक्षु प्रागादिषु क्रमात्॥ ४०॥

लक्ष्मीं कीर्तीं जयां मायामाग्नेयादिषु देशिकः।

हरीं प्रीतीं च वाग्देवीममृतां वारुणीं तथा॥ ४१॥

ध्यात्वावाह्य चाभ्यर्च्य कुण्डेषु करकेषु च।

चक्राब्जमण्डले चापि पूर्ववत्परिपूजयेत्॥ ४२॥ - श्रीप्रश्ने – २५

<u>श्रियाः सर्वोत्सव क्रमः</u>

वीरलक्ष्म्युत्सवे प्राप्ते तद्दिने देशिकोत्तमः ॥ ६० ॥

श्रियोत्सवादिकं कुर्यात् प्रातरेव जगद्धिते।

त्रिदिनं बिम्बमात्रं वा वसन्ताद्युत्सवं चरेत्॥ ६१ ॥

उत्सवान्ते श्रिया देवं पूजयेदेकविष्टरे। - श्रीप्रश्ने – ४८

---------------------------------------------------------------

## <u>श्रीरामजन्मोत्सव प्रमाणानि</u>

<u>रामावतार कथनं -रामनवमी कालः</u>

प्रद्युम्नांशात् समुत्पन्नो रामो दाशरथिस्तथा॥ ६३ ॥

रामो (रघु)यदुकुले जातस्तच्चरित्रं वधारय।

रघुवंशोद्भवो रामः कौसल्यानन्दनः प्रभुः ॥ ६४ ॥

पुरा त्रेतायुगे दुष्टं रावणं विश्रवस्सुतम्।

हन्तुं पराक्रमी जातः सौम्यनेत्रोऽतिधार्मिकः ॥ ६५ ॥

चैत्रशुद्धे शुक्लपक्षे नवम्यां सोमवासरे।

पुनर्वसुभ्यां संयुक्ते कुलीरेऽभिजिते तथा॥ ६६ ॥

पितुराज्ञां शिरोधार्यं कृत्वाऽरण्यं ययौ प्रभुः।

ससीतो भ्रातृणा सार्धं सुरान् तत्र दुःखप्रदान्॥ ६७ ॥

खरादीन् मारीचादींश्च रावणं दानवैर्युतम्।

हत्वा सीतां समादायाऽयोध्यां शसास शाश्वतः ॥ ६८ ॥ - पाराशर्ये - ६

<u>श्रीरामनवमी कालः</u>

चैत्रे मासि पुनर्वस्वोर्जन्म रामस्य मङ्गलम्।

तिथौ नवम्यां लग्ने च कुलीरे कमलासन॥३॥

राघवस्याप्रमेयस्य नक्षत्रे तत्र राघवम्।

देव्या च सीतया सार्धमर्चयित्वा यथाविधि॥४॥ - पाद्मे - १४

<u>श्रीरामनवमी कालः</u>

चैत्रशुद्धे शुक्लपक्षे नवम्यां सोमवासरे।

पुनर्वसुभ्यां संयुक्ते कुलीरेऽभिजिते तथा॥३९॥

प्रद्युम्नो रामरूपेण सूर्यवंशेऽजनिष्ट हि।

तस्मिन्काले लक्ष्मणेन शत्रुघ्नेन च सीतया॥४०॥

भरतेनाञ्जनेयेन राघवं पूजयेद्गुरुः। - श्रीप्रश्ने - ४७

<u>लक्ष्मणादीनां जनन कालः</u>

लक्ष्मणः तद्दिने लग्ने अनन्तोऽभूत्स्वयं प्रभुः॥३॥

ततो भरतशत्रुघ्नौ शङ्खचक्रे च तौ स्वयम्।

अभूतां तद्दिने लग्ने धर्मसंस्थापनाय च॥४॥ - शेष संहिता - ९

<u>सीता जनन कालः</u>

तद्युगे मासि कन्याया मश्विन्या शुक्रवासरे।

स्वयं भूमिश्च सीताऽभूद्यज्ञधर्मार्थसिद्धये॥५॥ - शेष संहिता - ९

<u>भरतस्य नक्षत्रः - पत्न्यासह अर्चनविधिः</u>

पुष्ये च मीनलग्ने च भरतस्समजायत॥५॥

तत्र स्यादर्चनं देव्या माण्डव्या सह पूर्ववत्। - पाद्मे - १४

<u>लक्ष्मण - शत्रुघ्नयोः नक्षत्रादयः - पत्न्यासह अर्चनविधिः</u>

उत्सवाश्च तथा सार्पे नक्षत्रे लक्ष्मणोऽपि च॥६॥

शत्रुघ्नश्च कुलीरे च लग्ने जातस्तदर्चनम्।

उभयोस्तत्र दिवसे देव्या चोर्मिलया सह॥७॥

लक्ष्मणस्येतरस्यापि श्रुतकीर्त्या महोत्सवः। - पाद्मे - १४

<u>ध्वजारोहण पूर्वक श्रीराम नवम्युत्सवः</u>

मण्डपमङ्कुरारोपो ध्वजारोहश्च सर्वथा।

यात्रा च रामचन्द्रस्य वीथीषु कारयेत्तथा॥२६॥ - पाराशर्ये - २४

<u>श्रीरामनवमी दिने कर्तव्यानि</u>

तस्मिन् दिने महापुण्यो राममुद्दिश्य भक्तितः।

यत्किञ्चित्कुरुते कर्म तद्भवक्षयकारकम्॥४॥

उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम्।

तस्मिन्दिने तु कर्तव्यं ब्रह्म प्राप्तिमभीप्सुभिः॥५॥ - अगस्त्ये - २५

<u>श्रीरामनवमी दिने नोपवासे दोषः</u>

राम एव परं ब्रह्म तद्दिनं रामतोषकम्।

उपोषणं जागरणं तस्मात्कुर्याद्विशेषतः॥६॥

यस्तु रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः।

कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः॥७॥ - अगस्त्ये - २५

<u>रामोत्सवे मङ्गल स्नानं - तैलाभ्यङ्गः</u>

प्रभातायां तु शर्वर्या मङ्गळोत्सवमाचरेत्।

देवदेवेशमभ्यङ्गैः घृतैश्शुद्धजलैस्तथा॥ ६ ॥

हरिद्राचूर्णपुष्पाद्यैः देवदेवस्य वेश्मनि। - वासिष्ठे - २३

<u>रामबिम्बस्य - कर्मबिम्बस्य वा याने उत्सवः</u>

देवं याने समारोप्य रामबिम्बं शुभावहम्।

कर्मबेरं तु वा विप्राः ग्रामं परिभ्रमेत् तदा॥ ४६ ॥ - वैहायसी - १५

<u>श्रीरामनवम्योत्सव होमे विशेषाः</u>

होमं चैव विधानेन कारयेत् साधकोत्तमः॥ ५॥

समिधो मूलमन्त्रेण प्रणवेनाज्यमेव च।

प्रत्येकमष्टाविंशश्च चरुहोममथाचरेत्॥ ६ ॥

षोडशार्चं च पुंसूक्तमतो देवाः षडर्चकम्।

पञ्चोपनिषदं चैव विष्णोर्नुकमिति त्र्यृचा॥ ७॥

द्वादशाक्षरमन्त्रेण वौषडन्तेन होमयेत्।

एतान् पूर्णाहुतिं हुत्वा होमशेषं समापयेत्॥ ८॥ - विष्वक्सेने - २९

<u>सकुटुम्ब परिवार रामस्य स्थापनम् -नैवेद्यक्रमश्च</u>

वस्त्रैराभरणैश्चित्रैरलङ्कृत्य जनार्दनम्॥ ४८॥

सीतया लक्ष्मणेनैवमाञ्जनेयेन संयुतम्।

पूजां कृत्वा परां सम्यक् कौशल्यां स्थापयेत् तथा॥ ४९॥

पितरं चैव संस्थाप्य दशरथं महाबलम्।

महाहविः परस्तेषां स्थापयेद् भक्तिभावतः॥५०॥

सोपदंशं तु नैवेद्यं सूपयुक्तं घृताप्लुतम्।

अपूपाद्यं तु देवस्य पञ्चचूर्णं निवेदयेत्॥५१॥

राजोपचारसंयुक्तं राघवस्य महामतेः। - वैहायसी – १५

<u>श्रीरामनवमी दिने पितृतर्पणविशेषः</u>

यस्तु रामनवम्यां तु नियतस्तर्पयेत्पितॄन्।

ते सर्वे तत्क्षणादेव यान्ति विष्णोः परंपदम्॥८॥ - अगस्त्ये – २५

<u>श्रीरामनवमी काले निवेदनीय अन्नानि</u>

राघवं पूजयेत् पश्चात् राममन्त्रेण मन्त्रवित्॥१०॥

हविर्निवेदयेत् पश्चात् पञ्चधा परमेष्ठिना।

ओदनं कृसरं गौल्यं पायसं दधिसक्तुकम्॥११॥

पानीयं च सुगन्धाढ्यं मुखवासं च दापयेत्।

विविधानि च भक्ष्याणि विविधानि फलानि च॥१२॥ - विष्वक्सेने – २९

<u>रामोत्सवस्य फलम्</u>

वर्षे वर्षे तु संप्राप्ते राघवस्य महोत्सवम्॥१७॥

कुर्याद्योमानवः सम्यक्विष्णु सालोक्यमाप्नुयात्।

राज्ञो राष्ट्रस्य सर्वस्य वर्धते श्रीर्दिने दिने॥१८॥

तस्मात्सर्वप्रयत्नेन कर्तव्यं राघवोत्सवम्।

सर्वसिद्धिकरं पुण्यं सर्वपापप्रणाशनम्॥१९॥

राममिक्ष्वाकुनाथं(इन्दीवरश्यामं) तं स्मरेन्नित्यं प्रयत्नतः। - वासिष्ठे – २३

<u>श्रीरामनवमी दिने दानफलम्</u>

यस्तु रामनवम्यां तु दद्याद्वित्तानुसारतः।

यत्किञ्चिदपि तत्सर्वं महादानफलं भवेत्॥९॥ - अगस्त्ये - २५

---------------------------------------------------------------

## कल्याणोत्सव प्रमाणानि

<u>कल्याणोत्सव कालः</u>

फाल्गुने प्रथमे पक्षे कल्याणमाचरेत् शुभम्।

श्रीदेव्याः श्रीपतेः साकं महोत्साहेन सुव्रताः॥२४२॥ - वैहायसी - १५

<u>श्रियाः विवाहोत्सव कालः</u>

फाल्गुने मासि फल्गुन्यां तैषसङ्क्रमणेऽथ वा।

देवीविवाहं कुर्वीत भुक्तिमुक्तिप्रदं नृणाम्॥२७७॥ - विष्णुतिलके - ८

<u>पाणिग्रहणोत्सवस्य अवश्यकत्वम्</u>

कदाचिन्न परित्याज्यं वर्षे वर्षे तु निश्चितं।

नित्योत्सव विहीने तु प्रायश्चित्तं विधीयते॥९६॥

अक्षतारोपणं नाम ह्युत्सवं प्रतिवार्षिकम्।

भक्तिश्रद्धान्वितोदेवं पाणिग्रहणमाचरेत्॥९७॥

पाणिग्रहणमित्युक्तं कर्म सर्वं समाचरेत्। - पुरुषोत्तमे - २४

<u>कल्याणोत्सवे विष्वक्सेनाराधनम्</u>

प्रदक्षिणीकृत्य देवौ नयेत्कल्याणमण्डपम्।

विष्वक्सेनं समाराध्य कर्मविघ्नोपशान्तये॥७॥ - भार्गवतन्त्रे - १४

<u>रक्षाबन्धनस्य कारणम्</u>

उत्सवे तु प्रवृत्ते तु दृष्टिदोषस्य नाशने॥ ८९॥

आशौचपरिहारार्थं योग्यतापादनाय च।

स्वर्णेनकृतसूत्राणि धारयेयुः पृथक्पृथक्॥ ९०॥ - पुरुषोत्तमे – २४

<u>कल्यानोत्सवस्य पूर्वऽहनि होमः -वैष्णवीकरणे विशेषः -कुण्ड आकारः</u>

अग्निप्रतिष्ठां कुर्वीत अश्रवृत्ते यथातथम्।

संस्काराणि ततः कृत्वा चाधारान्तं हुनेत्ततः॥ ९१॥

अग्नेर्वैष्णवसिद्ध्यर्थं पञ्चसूक्तैर्हुनेत्क्रमात्।

मूर्तिमन्त्रेण जुहुयात्षोडशाहुतयस्तथा॥ ९२॥

द्वादशाक्षरमन्त्रेण चाष्टविंशति सङ्ख्या।

समिदाज्यचरून् हुत्वा होमशेषं समापयेत्॥ ९३॥ - पुरुषोत्तमे - २४

<u>विवाहोत्सवे तैलस्नानविधिः (தைலக்காப்பு உத்ஸவம்)</u>

इत्थं सम्प्रार्थ्य तदनु लक्ष्मीं लक्ष्मीशमेव च।

संस्नाप्य गन्धतैलाद्यैः प्रत्येकं स्वर्णविष्टरे॥ ९॥

वस्त्रभूषणमाल्याद्यैर्यज्ञसूत्रैर्हिरण्मयैः।

अलङ्कृत्य समारोप्य यात्रोपकरणैस्सह॥ १०॥

प्राकारभ्रमणं कृत्वा नयेदुद्वाहमण्डपम्। - श्रीप्रश्ने - २६

<u>कन्यकादानम्</u>

देवीं देवेनयुञ्जीत प्रणवेन गुरुः स्वयम्।

दद्याच्च देवीं देवाय वारिपूर्वं यथाविधि॥ ८॥ - विष्णुतन्त्रे - १३

<u>कन्यादान श्लोकः</u>

कन्यां कनकसम्पन्नां सर्वाभरणभूषिताम्॥३२॥

दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया। - भार्गवतन्त्रे - १४

<u>विवाहोत्सवे आचार्यगोत्रप्रवरादीनां कथनम्</u>

आचार्यस्य च गोत्रस्य यच्छ्रुतिश्च सकारयेत्॥९॥

ततः पाणिगृहीतां तां देवीं देवश्च मन्दिरात्। - विष्णुतन्त्रे - १३

<u>माङ्गल्यसूत्रे अपराजितमन्त्रस्याभिमन्त्रणम्</u>

माङ्गल्यमणिमादाय वैष्णवानामनुज्ञया।

अपराजितमन्त्राद्यैरभिमन्त्र्य च सूत्रवत्॥१९॥ - श्रीप्रश्ने - २६

<u>माङ्गल्यधारणविधिः</u>

बध्नीया न्मङ्गळं सूत्रं देवीकण्ठे हरिं स्मरन्॥५९२॥

मङ्गळं भगवान् विष्णुः मङ्गळं मधुसूदनः।

मङ्गळं पुण्डरीकाक्षः मङ्गळं गरुडध्वजः॥५९३॥ - विष्णुतिलके – ७

<u>विवाहोत्सवे होमप्रकारः</u>

क्रमेणाघार होमादीन् कुर्याद्वियुक्त कर्मणा।

समिद्भिश्च नृसूक्तेन जुहुयाच्छोडशाहुतीः॥११॥

चरुणा विष्णुगायत्र्या चतुर्विंशाहुतीर्हुनेत्।

घृतं पुरुषसूक्तेन विष्णुसूक्तेन वा पुनः॥१२॥ - विष्णुतन्त्रे - १३

<u>विवाहोत्सवाङ्ग होमः</u>

ततस्तु लक्ष्मीगायत्र्या समिच्चरुघृतैः सह।

विष्णुगायत्रिया कुर्यात् प्रत्येकं द्वादशाहुतीः ॥ २५ ॥

ततः पूर्णाहुतिं हुत्वा द्वादशाक्षरविद्यया।

पञ्चोपनिषदा पश्चात् प्रायश्चित्ताहुतीश्चरेत् ॥ २६ ॥ - श्रीप्रश्ने - २६

<u>भगवदभिमुखे होमः - होम विशेषाः</u>

कुण्डस्य चतुरश्रस्य समीपे प्राङ्मुखं हरिम् ॥ ९८ ॥

देवीभ्यां सह देवेशं निवेश्य सुसमाहितः।

इध्माधानादिसंस्कारानाघारान्तं यथाविधि ॥ ९९ ॥

प्रधानहोमं कुर्वीत प्रवेशाख्यमतः परम्।

लाजहोमं प्रकुर्वीत तान्त्रिकं होममेव च ॥ १०० ॥

सप्तावरणहोमं च कृत्वा वैकुण्ठपार्षदान्।

श्रीसूक्तहोमं कुर्वीत तिथिवाराधिदेवतान् ॥ १०१ ॥

नक्षत्राणामधिपतीन् जयादींश्च हुनेत्क्रमात्।

प्रणीतामर्चनान्तं तु कृत्वाकर्म यथाविधि ॥ १०२ ॥ - पुरुषोत्तमे - २४

<u>लाजहोमप्रकारः</u>

लाजहोमं प्रकुर्वीत विष्णुसूक्तेन देशिकः।

अनलं त्रिः परिक्रम्य लाजशेषमतःपरम् ॥ ६०१ ॥

प्रणवेन सकृत हत्वा पंचवारुणिकैरपि। - विष्णुतिलके - ७

<u>लाजहोमप्रकारः</u>

ततः पुरुषसूक्तेन लाजहोमं समाचरेत् ॥ ४८ ॥

अनलं त्रि:परिक्रम्य लाजशेषं सकृद्गुरुः।

जुहुयात्प्रणवेणाग्नौ पञ्च वारुणिकैः पुनः ॥४९॥ - भार्गवतन्त्रे - १४

<u>शेषहोमविधिः (பிடிசுற்றுதல்)</u>

शेषहोमं च तत्सर्वं गुरुर्यत्नं तथाभवेत्।

नीराजनविधानान्ते निक्षिपेद्दिक्षुपिण्डकान्॥२५॥ - विष्णुतन्त्रे - १३

<u>घृतारोपण मन्त्रः</u>

घृतं सुशोभनमिति सिञ्चेयुः पादतस्ततः।

कर्णैस्सुभद्रमित्युक्त्वा मूर्ध्निस्वेव सुमङ्गलम्॥१९॥ - विष्णुतन्त्रे - १३

<u>भूमिदेवी विवाह क्रमः</u>

भूम्याश्च तद्वत् कुर्वीत विवाहो युगपद्यदि।

अङ्कुरादि पृथक् कुर्यात् पर्यायेण चतुर्मुख!॥५९७॥

यौगपद्ये विवाहे तु चैकं प्रतिसरं हरेः।

अग्निरेकोऽथ वा भिन्ने यथाभिमत माचरेत्॥५९८॥ - विष्णुतिलके - ७

<u>अन्यदेवीनां विवाह विषये क्रमः</u>

श्रियं विनान्य देवीनां स्वस्व मन्त्रेण देशिकः।

समिच्चरुघृतैः कुर्यात् प्रत्येकं षोडशाहुतीः॥५९९॥

ततस्तु विष्णुगायत्र्या चतुर्विंशाहुती श्चरेत्।

ततः पुरुषसूक्तेन सर्पिषा षोडशाहुतीश्चः॥६००॥ - विष्णुतिलके - ७

<u>विवाहोत्सव दिनसङ्ख्या -स्मार्तवर्त्मना विवाहोत्सवः</u>

एवं चतुर्दिनं वापि कुर्याल्लौकिकवर्त्मना॥३२॥

जामदग्न्यादिदेवीनां विवाहः स्मार्तवर्त्मना। - श्रीप्रश्ने - २६

<u>स्मार्तवर्त्मना विवाहोत्सवः</u>

जामदग्न्यादिदेवीनाम् उद्वाह स्मार्तवर्त्मना।

कृतोद्वाहं ततो देवं देव्यासह समर्चयेत्॥६१२॥ - विष्णुतिलके - ७

<u>सदने आलये वा विवाहोत्सवविधिः</u>

पृथक् देवदेव्याश्च बध्नीयात् कर्मकौतुकम्॥३॥

आच्छादयेत् वसक्षौमं सोत्तरीयं प्रसारितम्।

आरोप्य शिबिकां ग्रामं प्रादक्षिण्येन पद्मज॥४॥

वैवाहिकञ्च सदनमालयं वा प्रवेशयेत्। - विष्णुतन्त्रे - १३॥

<u>कल्याणोत्सव दर्शनफलम्</u>

कल्याणोत्सव वेळायां देवेशं यस्तु पश्यति।

तस्य सर्वाणि पापानि नश्यन्त्येव नसंशयः॥६७॥ - परमपुरुषे - ४

<u>लक्ष्मीविवाहोत्सव फलम्</u>

इत्थं लक्ष्मीं प्रतिष्ठाप्य विवाहं यस्तु कारयेत्॥३३॥

तस्य गेहे नित्यवासं श्रीः करोति न संशयः।

पुत्रपौत्रादिवृद्धिश्च भूमिलाभश्च जायते।

आयुष्मान्नीरुजो भूत्वा विष्णुलोकमियात्ततः॥३४॥ - श्रीप्रश्ने - २६

---

## <u>फलोत्सव प्रमाणानि</u>

<u>ज्येष्ठे श्रावणे वा फलोत्सवः</u>

फलान्यपि समाहृत्य वन्यजानपदान्यपि।

ज्येष्ठे वा श्रावणे वापि देवाय विनिवेदयेत्॥१९॥ - पाद्मे - १४

<u>फलोत्सवकालः -फलञ्च</u>

फलैरपि विधातव्यं प्रीणनं मधुविद्विषः।

ज्येष्ठे मासि सिते पक्षे द्वादश्यां फलपूजनम्॥१॥

कारयीत द्विजश्रेष्ठ भुक्तिमुक्तिफलपदम्।

अथवा पञ्चदश्यां वा श्रवणे वा द्विजोत्तम॥२॥ - विश्वामित्रे -२६(अनुबन्धः १)

<u>फलोत्सव मासः</u>

ज्येष्ठमासे विशेषेण फलोत्सवविधिं चरेत्॥९॥ - अनिरुद्धे - २२

अनूराधे विशेषेण फलोत्सवमथाचरेत्॥१०॥ - अनिरुद्धे - २३

<u>सहकारफलोत्सव मासः</u>

आषाढे मासि मासर्क्षे सहकारफलैर्यजेत्॥१२॥ - अनिरुद्धे - २२

<u>कदलीफलोस्तव मासः</u>

श्रवणे मासि मासर्क्षे पूजयेत्कदलीफलैः॥१३॥ - अनिरुद्धे - २२

<u>ह्रीबेर - कुमुदाम्र फलोत्सवः</u>

मार्गशीर्षाख्यमासे तु ह्रीबेरैर्वा समाचरेत्॥४३॥

क्रमुकादि (कुमुदाम्र) फलैर्वापि मासर्क्षे तु समाचरेत्। - अनिरुद्धे - २३

<u>बीजापूर फल अभावे कर्तव्यविधिः - तत्कालश्च</u>

श्रावणे मासि विप्रेन्द्र ! बीजपूरफलैर्यजेत्॥२५॥

तदभावे तु विप्रेन्द्र! आर्द्रपूगीफलैर्यजेत्। - अनिरुद्धे - २३

<u>फलानि</u>

कदलीनां च चूतानां पनसानामपि द्विज॥ ३॥

फलानि नालिकेराणां मातुल(लु?)ङ्गफलान्यपि।

खर्जूराणामपि तथा द्राक्षाणां च तथैव च॥ ४॥

फलानि कुरुविन्दानां बदराणां च सञ्चयम्।

जम्बूनां बर्बराणां च साधकान्यपि(?) यानि च॥ ५॥

फलानि तानि सर्वाणि यथालब्धानि सर्वशः।

आहृत्य सर्वाण्येकत्र स्थापयित्वा द्विजोत्तम॥ ६॥ -विश्वामित्रे -२६(अनुबन्धः १)

<u>फल निक्षेपण पात्रः</u>

विधाय पेटिका वेत्री दृढा श्लक्ष्णा महत्तरी।

तासु पर्णानि निक्षिप्य फलानि द्विजसत्तम॥ ७॥ - विश्वामित्रे -२६(अनुबन्धः १)

<u>मण्डपे फलास्तीर्णविधिः</u>

सुश्लक्ष्णे गोमयालिप्ते सुधाचूर्ण विचित्रिते।

पटानास्तीर्य सुश्लक्ष्णान् श्वेतानविरलानपि॥ १३॥

तेष्वारोप्य फलौघं च रक्षां तेषां विधाय च। - विश्वामित्रे - २६(अनुबन्धः १)

<u>फलस्य शुद्धीकरणम्</u>

फलानि सर्वाणि ततः पृथक् सङ्कल्प्य राशिशः।

महाभिजनसंयुक्तं विप्रैः शुद्धैर्जितेन्द्रियैः॥ १९॥

उष्णीषसहितास्यैश्च जिह्वाचापल्यवर्जितैः।

निस्त्वकरणयोग्यानि निस्त्वचं(श्चि) परिकल्प्य च॥ २०॥

यथावस्थितरूपेण शोधनार्हाणि शोधयेत्।

क्षालनार्हाणि संक्षाल्य कदलीदलसञ्चये॥ २१॥ - विश्वामित्रे - २६(अनुबन्धः १)

<u>सर्वेभ्यः फलौघनिवेदनक्रमः</u>

हैमेष्वपि च विन्यस्य पात्रेषु फलसञ्चयम्॥ २२॥

यथापुरं कल्पयित्वा महाहविरपि द्विज।

बिम्बानि मूलपूर्वाणि सविशेषं सभाज्य च॥ २३॥

पृथक् पृथक् फलौघं च सर्वेभ्योविनिवेदयेत्।

कुम्भमण्डलकुण्डेभ्यो निवेद्य च यथापुरम्॥ २४॥

हैमपात्रेषु विन्यस्थं फलराशिं पृथक् पृथक्।

निवेद्योत्सवबिम्बाय तन्महाहविषोर्युगम्॥ २५॥ - विश्वामित्रे -२६(अनुबन्धः १)

<u>फलेन होमः - निवेदनञ्च - वैष्णवानां फल दापनम्</u>

हुत्वा फलानि च पुनः पृथगष्टोत्तरं शतम्।

सेनेशपूर्वकं पश्चाद्वैष्णवेभ्यो यथाक्रमम्॥ २६॥

प्रदाय फलसङ्घं च देवमारोप्य यानके।

सर्वमङ्गलसंयुक्तं परिभ्राम्य प्रदक्षिणम्॥ २७॥ - विश्वामित्रे - २६(अनुबन्धः १)

---

## <u>स्वापोत्सव प्रमाणानि</u>

<u>स्वापोत्सव कालः</u>

अथ स्वापं प्रवक्ष्यामि देवदेवस्य शार्ङ्गिणः।

चातुर्मास्यं(स्ये?) द्विजश्रेष्ठ स्वापं कुर्यात् सुषुप्तये॥ १॥ - कपिञ्जले - २८

<u>शयनोत्सव कालः</u>

श्रृणु वक्ष्याम्यहं साध्वि शय्योत्सवमथो हरेः।

आषाढ्यां शुक्लपक्षस्य द्वादश्यां शयनोत्सवम्॥ १५॥

मम प्रीतिकरं कुर्यात् सर्वलोकसुखावहम्। - श्रीप्रश्ने - ४०

<u>शयनोत्सव कालः</u>

आषाढे शुक्लपक्षे च द्वादश्यां कमलासन।

चक्राब्जमण्डले देवमर्चयित्वा यथाविधि॥ २५॥

कल्पिते शयनागारे मन्दिरे वा यथावसु।

पर्यङ्के कल्पिते तत्र शाययित्वाथ कौतुकम्॥ २६॥

देवीभ्यां सह कूर्चं वा त्रितयं तदभावतः। - पाद्मे - १४

<u>स्वापोत्सव कालः - कारणञ्च</u>

आषाढशुक्लद्वादश्यां स्वापोत्सवमथाचरेत्॥ २०५॥

तदादि कौमुदाख्यस्य यावन्मासस्य तद्दिनम्।

तपसा योगनिद्रायाः सन्तुष्टो जगदीश्वरः॥ २०६॥

योगनिद्रां प्रभजति लोकरक्षणहेतुना। - ईश्वरे - १२

<u>शयनोत्सव मध्ये नित्यादि उत्सव निषेधः - कर्तव्य उत्सवञ्च</u>

शयनस्थं देवदेवं प्रत्यहं शयनार्थकैः।

द्रव्यैः सम्पूजयेद् विद्वान् भक्तिनम्रेण चेतसा॥ २८॥

नित्यं नैमित्तिकं काम्यमुत्सवं नाचरेत्तदा।

कृष्णजन्मोत्सवं कुर्यात् तस्मिन् कालेऽपि देशिकः॥ २९॥

नास्ति कालान्तरं तस्य तस्मात् तत्रैव कारयेत्। - श्रीप्रश्ने – ४०

<u>शयनोत्सव मध्ये पवित्रोत्सवकर्तव्यः</u>

शयनस्थे जगन्नाथे चातुर्मासस्य मध्यतः॥२३३॥

पवित्रारोहणं कुर्यादनन्तस्यातितुष्टिदम्। - ईश्वरे - १२

<u>पर्यङ्क लक्षणम् - स्थानमित्यादि</u>

गर्भगेहपुरोभागे यद्वा गर्भगृहे रमे॥१६॥

सुवर्णश्शृङ्खलाभिश्च सम्बद्धमुपरि स्थले।

तूलिकास्तरणोपेतं नवरत्नविचित्रितम्॥१७॥

मुक्ताजालाभिराबद्धं वासितं गन्धवस्तुभिः।

वितानक्षौमसंवितं पुष्पमाल्यैरलङ्कृतम्॥१८॥

गन्धतैलैर्घृतैर्वापि पूरितैर्ज्वलितैरपि।

अनिर्वाणैर्दीपवरैश्चतुर्भिः शोभितं रमे॥१९॥

एवं शयनमाकल्प्य प्रोक्षयेत् पुण्यवारिणा। - श्रीप्रश्ने - ४०

<u>शयन कल्पनम्</u>

शालीनां पञ्चभि र्भारैस्तण्डुलैश्च तिलैरपि॥४८॥

विस्तीर्णप्रच्छदपटैः कम्बलैः सोपधानकैः।

व्याघ्रचर्म समास्तीर्य पूर्वे याम्येऽथ मस्तके॥४९॥

शाययित्वा जगन्नाथं रक्षार्थमायुधाष्टकम्। - पाराशर्ये - २४

<u>शयनागारे दीप लक्षणम्</u>

शयनं कल्पयेत्तत्र पर्यङ्कादीनि पूर्ववत्॥४॥

दारुजं लोहजं वाऽपि मृन्मयं दीपदण्डकम्।

चतुस्तालसमुच्छ्रेधं नानाविधमनोहरम्॥५॥

घृताधारं सुपात्रं च अग्रे तु मुकुलाकृतिम्।

अष्टदिक्षु न्यसेद्दीपान् पर्यङ्कस्य समन्ततः॥६॥ - कपिञ्जले - २८

<u>शयनोत्सवे मण्डलादि स्थानक्रमः -माहेन्द्रमण्डले कुम्भस्थापनादि</u>

चतुर्द्वारे तथा लिप्ते गोमयाद्भिः समन्ततः।

चित्रिते च सुधाचूर्णैर्मध्ये चक्राब्जमण्डले॥१३॥

मण्डलेशानभागे च शालिभिस्तण्डुलैस्तिलैः।

मध्ये मध्ये च विस्तीर्णैः पटैः शुद्धैः समावृते॥१४॥

माहेन्द्रमण्डले लिप्ते कुम्भं च शुभलक्षणम्।

तन्तुभिर्वेष्टितं चैव कालमण्डलवर्जितम्॥१५॥

वेष्टितं क्षौमयुग्मेन सुशुभेन नवेन च।

सरत्नं च सहेमाब्जं सकूर्चं च सपल्लवम्॥१६॥

सफलं सापिधानं च स्थापयित्वा समन्ततः।

एवंविधं च करकं तस्य दक्षिणतो न्यसेत्॥१७॥

कुम्भाष्टकं च परितः स्थापयित्वाष्टदिक्ष्वथ।

मण्डलस्योत्तरे भागे कुण्डं कृत्वा विधानतः॥१८॥

तन्मध्ये वेदिसंस्थं तं प्रतिष्ठाप्य हरिं पुनः।

कुम्भे च मण्डले चैव देवमावाह्य पूजयेत्॥१९॥ - विश्वामित्रे - १६

<u>शयनोत्सवे सप्तसमिद्धोमः - शेषचरु प्राशनविधिः</u>

कुण्डसंस्थितदेवेशं समिद्भिः सप्तभिः क्रमात्॥२०॥

आराध्य चरुशेषं च स्वयं प्राश्यापि वाग्यतः। - विश्वामित्रे - १६

<u>पर्यङ्क पूजा - चातुर्मास पूजा सङ्कल्पः</u>

पर्यङ्केऽनन्तमावाह्य तस्मिन् देवं यथाविधि।

शाययित्वाथ तस्याग्रे नियमान् शास्त्रचोदितान्॥२२०॥

सङ्कल्प्य चतुरो मासान् देवस्योत्थापनावधि।

व्रतानुष्ठाननिरतः प्रत्यहं देवमर्चयेत्॥२२१॥ - ईश्वरे - १२

<u>भगवतः शयनक्रमः</u>

गेहं प्रदक्षिणं कृत्वा शयनस्थानमाविशेत्।

प्राक्छिरस्कं द्विजश्रेष्ठ शाययेच्छयनोपरि॥११॥

नववस्त्रेण संवेष्ट्यं कण्ठादूर्ध्वं न वेष्टनम्।

अर्चयित्वा चतुर्दिक्षु शुद्धान्नं तु निवेदयेत्॥१२॥ - कपिञ्जले - २८

<u>श्री - भूमि रहितबिम्ब शयनविषये</u>

शाययित्वा तु पर्यङ्के श्रीभूमिसहितं विभुम्॥२६॥

श्रिभूमिरहिते बिम्बे कूर्चयोस्ते तु पूजयेत्। - श्रीप्रश्ने - ४०

<u>शयकौतुके कूर्चे वा शयनम्</u>

मूलमूर्तिं समभ्यर्च्य तस्माच्छयनकौतुके।

कूर्चे वा देवमावाह्य श्रीभूमिभ्यां समन्वितम्॥२१६॥

संस्नाप्य समलङ्कृत्य अभ्यर्च्य हविरन्तिमम्।

निशामुखे प्रवृत्ते तु कृत्वा नित्यार्चनं विभोः॥२१७॥

ततस्तु शयनागारं नीत्वा शयनकौतुकम्।

ततः शयनदेशे तु पश्चिमे हेमविष्टरे॥२१८॥

निवेश्य प्राङ्मुखं देवं हविरन्तं समर्चयेत्। - ईश्वरे - १२

<u>शयनागार कवाटबन्धनविधिः</u>

पश्चिमं चोत्तरं चैव पूर्वद्वारं तथैव च।

बन्धयित्वा कवाटेन दक्षिणेन प्रवेशयेत्॥१३॥ - कपिञ्जले - २८

<u>सन्ध्यान्तरकाले शयनागार द्वारबन्धनम्</u>

त्रिसन्ध्यां पूजयेद्देवं चातुर्मास्ये यथाविधि।

सन्ध्यान्तरस्य वेलायां यात्राद्वारं(शयनागारं)सुबन्धयेत्॥९४॥ -वैहायसी -१५

<u>शयने रक्षार्थम् अष्टायुधानां स्थापनम्</u>

शाययित्वा जगन्नाथं रक्षार्थं चायुधाष्टकम्॥३५॥

संस्थाप्य पूजयित्वाथ मुखवर्जं च वाससा।

शाययित्वाथ तं देवं क्षौमेणाच्छादितोप(द्य चोप?)रि।

रक्षां कृत्वाथ देवस्य हेतीशैः परितः स्थितैः॥४६॥ - विश्वामित्रे - १६

<u>शयनोत्सवे परिवर्तन - आसीन कालः - प्रतिद्वादश्यां चतुस्थानार्चनम्</u>

मन्त्रजापश्च स्नपनमुत्थानावधि सर्वदा।।

प्रतिमासञ्च कर्तव्यं सितपक्षे श्रिय:पतेः ॥ ५४॥

द्वादश्यां देवदेवस्य चतु:स्थानसमर्चनम्।

सितपक्षे तु नभसि द्वादश्यां परिवर्तनम्॥५५॥

ईशास्य शुक्लद्वादश्यामासीनञ्च प्रकल्पनम्। - पाराशर्ये – २४

<u>मासद्वयं वा शयनं -परिवर्तन कालश्च</u>

शयनाङ्गोपचारैश्च प्रत्यहं तोषयेद्विभुम्॥२२२॥

एवं मासद्वये याते मासि भाद्रपदे द्विजाः।

द्वादश्यां शुक्लपक्षस्य देशिकेन्द्रो निशामुखे॥२२३॥

विशेषयागपूर्वं तु परिवर्तनमाचरेत्। - ईश्वरे - १२

<u>शयनोत्सव कालावकाशः</u>

सङ्कल्प्य चतुरो मासान् पक्षांश्चतुर एव वा॥२७॥ - श्रीप्रश्ने - ४०

<u>पक्षत्रय शयन काले न परिवर्तनम्</u>

यदि पक्ष चतुष्केण कुर्याच्छयन मङ्गलम्॥३१॥

यदि पक्षत्रये कुर्यादुत्सवं शयनं रमे।

परिवर्तनं तदा न स्यादुत्थानं मासि कार्तिके॥३२॥ - श्रीप्रश्ने - ४०

<u>शयनोत्थापन कालः</u>

कार्तिक्यांपूर्वपक्षेऽथ एकादश्यामुपोषयेत्।

द्वादश्यां पूर्वसन्ध्यायां स्नात्वा जप्त्वा यथाविधि॥६२॥

गन्धपुष्पादिभिर्द्रव्यैः पूजयेत्पुरुषोत्तमम्।

प्रार्थयित्वा तथा देवं मूलमन्त्रेण देशिकः॥६३॥

उत्थापयित्वा मूलेन वेदिकोपरि विन्यसेत्। - पद्मोद्भवे - २६

<u>शयनोत्थान कालः क्रमश्च</u>

द्वादश्यां कृत्तिकाशुद्धे उत्तिष्ठोदित्य मन्त्रतः॥२८८॥

उत्थाप्य तं हरिं भक्त्या मण्डलार्चन माचरेत्।

हुत्वा हवि र्निवेद्याथ ग्रामे कुर्यान्महोत्सवम्॥ २८९॥ - विष्णुतिलके - ८

<u>प्रबोधन मन्त्रः</u>

मन्त्रश्चोदित्यमित्येष उत्तिष्ठेति च बोधने॥ ४॥

प्रबोध्य चार्चयेद्देवमुत्थितं विधिवर्त्मना। - पाद्मे - १५

<u>उत्थापनोत्सवे देवस्य दर्शनीयानि</u>

दर्शयेद् दर्पणं पूर्णकुम्भं दन्तावलं तथा।

गवांपृष्ठं वाजिमुखं कन्यां सर्वाङ्गशोभनाम्॥ ४३॥ - श्रीप्रश्ने - ४०

<u>शयनोत्सवस्य फलम्</u>

प्रतिसंवत्सरं कुर्यादायुरारोग्यवर्धनम्॥ १८॥

यः कुर्यात्साधकस्सम्यग्विष्णुलोकमवाप्नुयात्।

इति संक्षेपतः प्रोक्तो स्वापो देवस्य चक्रिणः॥ १९॥ - कपिञ्जले - २८

<u>प्रबोधोत्सव दर्शनफलम्</u>

प्रबोधोत्सव वेलायां विष्णोर्दर्शनमुत्तमम्।

सर्व पापप्रशमनम् आयुरारोग्य वर्धनम्॥ ६१॥ - परमपुरुषे – ४

<u>उत्थापनकाले भगवतः स्तुतिफलम्</u>

स्नानादिनियमान् ब्राह्मे कृत्वा भागवतैस्सह।

तस्मिन् स्तवीति यो देवं हरिं सर्वफलप्रदम्॥ ३९॥

महापातकयुक्तोऽपि स तु मोक्षं व्रजेद् रमे। - श्रीप्रश्ने - ४०

<u>शयनोत्सव मध्ये आचार्य व्रतानुष्ठानानि</u>

शयाने जगतां नाथे व्रतानि श्रृणु काश्यप।

कुशोदकं पञ्चगव्यं प्रापणं चानुसेवनम्॥ ६१ ॥

वर्ज्यानि श्रृणु विप्रादेर्दिवास्वापः पराशनम्।

योषित्सेवा तैलसेवा कांस्यपात्रे च भोजनम्॥ ६२ ॥

मांसाशनममून्याहुर्वर्ज्यानि द्विजपुङ्गव। - विश्वामित्रे - १६

-----------------------------------------------------------------

## अन्नकूटोत्सव प्रमाणम्

<u>अन्नकूटोत्सवः</u>

रक्ताऽम्बरानुलेपाद्यैर्महेभ्योऽर्चोपचारकैः।

नन्दायां कार्तिके कुर्यादन्नकूटमहोत्सवम्॥ २८॥

यावत्संभावितैः पाकैः शाकै रत्नैर्मनोहरैः।

गिरीन्द्रं पूज्य विधिवद्गीतवाद्यैर्द्विजार्चनैः॥ २९॥ - शाण्डिल्ये – २५

-----------------------------------------------------------------

## वनभोजनोत्सव प्रमाणानि

<u>वनभोजनोत्सव मासः</u>

पुष्ये मासि च मासर्क्षे हरिद्रालेपनं चरेत्॥ २१ ॥

तन्मासे तु विशेषेण वनभोजनमाचरेत्। - अनिरुद्धे – २२

<u>वनविहारोत्सव क्रमः</u>

उद्यानवनमासाद्य तन्मध्ये स्थितमण्डपे।

देवीभ्यांसह देवेशं भद्रपीठे निवेशयेत्॥१०७॥

स्नापयेद्गालिताम्बोभिः पञ्चविंशतिभिर्घटैः।

( कुण्डेवा स्थण्डिले वापि होमं कृत्वा यथोदितम् )

अलङ्कारासनेऽभ्यर्च्य वन्यपुष्पफलादिकम्॥१०८॥

शीतलं तर्पणजलं मुद्गापूपम् गुडान्वितम्।

ताम्बूलं च निवेद्याथ नीराजनमथाचरेत्॥१०९॥ - पुरुषोत्तमे – २४

---

## तिलपद्मोत्सव प्रमाणानि

तिलपद्मोत्सव कालः

माघमासि विशेषेण पञ्चम्यां शुक्लपक्षके।

मदनमोहनं देवं पूजयेद्विधिशास्त्रतः॥२३१॥

तिलान् समर्पयेन्नूत्नान् देवदेवस्य सन्निधौ। - वैहायसी - १५

तिलदान - पितृपूजन कालः क्रमश्च

माघमासे तु पश्चार्धे तिलदानं समाचरेत्॥१०॥

अङ्कुरादिक्रियास्सर्वाः पूर्ववत् सकलं भवेत्।

तिलदानं ततः कृत्वा ब्राह्मणेभ्यो विशेषतः॥११॥

तिलमिश्रान्न पिण्डेन पितृदानं समाचरेत्।

माघमासे तु मासर्क्षे पितृपूजां समाचरेत्॥१२॥

पत्रालाभे विशेषेण पाटलैः परिपूजयेत्।

पत्रं पुष्पं फलं तोयं गन्धालेपनमाचरेत्॥१३॥ - अनिरुद्धे - २८

<u>तिलपद्मोत्सव विशेष विधिः</u>

देवस्य पुरतो भागे गोमयालिप्त भूतले॥५१॥

रङ्गवल्यादिकं कृत्वा वस्त्रेणाच्छाद्य देशिकः।

कृष्णाजिनं ततो न्यस्य विष्णुसूक्तं जपेद्गुरुः॥५२॥

पुनर्वस्त्रं समास्तीर्य तिलान् तस्योपरि न्यसेत्।

द्वौभारंचैकभारं वा समास्तीर्य तिलोपरि॥५३॥

धान्यपूर्णानि पात्राणि द्वेद्वे प्रतिदिशं न्यसेत्।

दक्षिणे प्रस्थतैलेन पूरितं कुम्भमुत्तरे॥५४॥

तत्प्रमाणाज्यसहितं कुम्भमन्यं निवेशयेत्।

दध्ना प्रस्थचतुष्केन पूरितं कलशं न्यसेत्॥५५॥

पुरोभागे ततो गन्धपुष्पाद्यैः पूजयेत्ततः।

पद्ममध्ये श्रियोपेतं गरुडादि समन्वितम्॥५६॥

तिलैस्सहस्त्रं जुहुयादाचार्यो मूलविद्यया।

तत्पद्मं भक्तितो दद्याद्देवाग्रे वारिपूर्वकम्॥५७॥

प्रीयतां भगवान् विष्णुरितिमन्त्रं समुच्चरन्। - पुरुषोत्तमे - २७

<u>तिलपद्मोत्सवकालः - तिले पद्म लेखनमित्यादि</u>

माघमासे सिते मक्षे पञ्चम्यां मधुविद्विषं॥५८॥

समाराध्य यथाशास्त्रं देवस्याग्रे महीतले।

गोमयालेपिते द्वाभ्यां हस्ताभ्यामपि सम्मिते॥५९॥

चतुर्भिर्वा समायामविस्तारे छादिते पुनः।

वाससा नूतनेनैव सदशेन तथोपरि॥ ६०॥

कृष्णाजिनेन शुद्धेन भेदनच्छेदनादिना।

वर्जितेन समाच्छाद्य वस्त्रं तदुपरि क्षिपेत्॥ ६१॥

तिलानां भारमेकं वा द्वौ वा कृत्वा च वेदिकाम्।

त्रिमेखलां तिले तस्मिन् पद्माकारसमाकृतिम्॥ ६२॥

निष्कत्रयात्मकं स्वर्णं लेखापद्मं तिलेषु वा।

निक्षिप्य नवरत्नानि दिक्षु चाष्टासु निक्षिपेत्॥ ६३॥

धान्यपूर्णानि पात्राणि द्वे द्वे प्रतिदिशं क्रमात्।

प्रस्थतैलं तथा सर्पिर्दधि चापि चतुर्गुणम्॥ ६४॥

पार्श्वयोः पुरतश्चापि पात्रस्थं न्यस्य भूतले। - पाद्मे - १५

<u>तिल मण्डले पूजाक्रमः</u>

तेषु सम्पूजयेदेतान् देवान् पूर्वादितः क्रमात्॥ ६६॥

इन्द्रं पुरुषमग्निं च सनं चापि स्मरन् क्रमात्।

ततः सत्यं च विप्रेन्द्र यातुधानाधिपं ततः॥ ६७॥

नारायणं च वरुणम् अच्युतं च सदागतिम्।

अनिरुद्धं च धनदं हरं च शशिशेखरम्॥ ६८॥

कृष्णमेतेन विप्रेन्द्र क्रमेणाराध्य नामभिः।

तैलप्रस्थं घृतप्रस्थं दध्याढकमतः परम्॥ ६९॥

न्यस्त्वा पार्श्वे यजेद्विष्णुं ब्रह्माणं च शिवं क्रमात्।

स्वनामभिस्तु सम्पूज्य नमोऽन्तैस्तु यथा ततः॥ ७०॥ - नारदीये - २४

<u>तिलपद्मोत्सवे तिलान्न विवेदनम् - तिलेन होमः</u>

अभ्यर्च्य गन्धपुष्पाद्यैस्तिलान्नैस्तदनन्तरम्॥ ६६ ॥

अधीयानेषु विप्रेषु तूर्यवादित्रघोषणे।

मङ्गलेषु तथान्येषु प्रवृत्तेषु यथा तथम्॥ ६७॥

तिलैस्सहस्रकृत्वोऽग्नौ जुहुयान्मूलविद्यया। - पाद्मे - १५

<u>तिलपद्म दानविवेकः</u>

एवं कृत्वा ततो मन्त्री समाहूयात्मवेदिनम्।

सम्पूज्य दीक्षितं शुद्धं वैष्णवं तु जितेन्द्रियम्॥ ७१ ॥

नित्यहोमार्चनपरं पञ्चकालपरायणम्।

अलाभेऽस्यानयेच्छुद्धम् आहिताग्निं तु वैष्णम्॥ ७२ ॥

तस्मै दद्यात्सपत्रं तु पद्मं तिलमयं शुभम्।

ध्यायन्विष्णुं जगन्नाथं हृदये जिष्णुमव्ययम्॥ ७३ ॥ - नारदीये - २४

<u>आचार्येन (आचार्याय) तिलपद्म दानम्</u>

तस्मै भागवतायेदमर्चयित्वा क्षतादिभिः॥ ६९॥

तिलपद्मं प्रदातव्यं सन्निधौ वारिपूर्वकम्।

प्रीयतां भगवान्विष्णुरित्याचार्येण मन्त्रवित्॥ ७०॥ - पाद्मे - १५

<u>तिलादि दानक्रमः</u>

आचार्यं पञ्चकालज्ञमन्ते सर्वं प्रदापयेत्।

प्रीयतां भगवान् विष्णुः इति प्रोच्य सुवैष्णवः॥ २३९॥

तिलपद्मं ददात्यत्र विष्णवे गुरुरूपिणे। - वैहायसी - १५

<u>तिलपद्मोत्सवस्य फलम्</u>

एवमुक्तप्रकारेण तिलपद्मं ददाति यः॥५८॥

आत्मानञ्च पितृन्सर्वान् पुनाति च परापरान्। - पुरुषोत्तमे - २७

<u>तिलपद्मोत्सवस्य फलम्</u>

इत्थं तिलसरोजं यो दद्याद्धान्यादिसंयुतम्।

पुनाति स पितृन् सर्वानात्मानं च परावरान्॥७२॥ - पाद्मे - १५

---------------------------------------------------------------------

## <u>पूरणोत्सव प्रमाणानि</u>

<u>पूरणोत्सव कालः</u>

पूरणस्य विधिं वक्ष्ये द्रव्याणां च विशेषतः।

सङ्क्रान्तौ ग्रहणे वाऽपि अयने च स्वजन्मनि॥१॥

श्रवणे विष्णुपञ्चम्यां द्वादश्यां पञ्चपर्वसु।

पूरणैः पूजयेत् काले सूक्तद्रव्यैश्च देशिकः॥२॥ - कपिञ्जले - २९

<u>पूरणोत्सवे पञ्जर द्रव्याः - तन्मानाः</u>

तत्र पञ्जरबन्धं तु प्रवक्ष्यामि यथातथम्।

वेणुना विदलं कुर्यात् पञ्जरं च विचक्षणः॥२॥

यावत्तु प्रतिमायामस्तावद्विस्तार उच्यते।

उत्सेधः प्रतिमायाश्च चतुरङ्गुलमुच्यते॥३॥

काष्ठैर्वा पञ्जरं कुर्यादन्तःपत्रसमन्वितम्।

पत्रैर्वा केवलैः कुर्यान्नवैश्चोपरिबन्धनम्॥४॥

अर्गलं तत्प्रमाणेन मधूच्छिष्टेन कारयेत्।

लोहेन वा मृदा वापि शालिपिष्टेन वा पुनः॥५॥

अर्गलं चापि तं कृत्वा पूर्वोक्तोत्सेधसम्युतम्। - सनत्कुमारे - इन्द्ररात्रे - १

पञ्जर मानाः

प्रतिमानुगुणेनैव पञ्जरं परिकल्पयेत्॥ १३६ ॥

उत्सेधः प्रतिमायाश्च चतुरङ्गुलमुच्यते।

प्रतिमा परितः कुर्यात् वैपुल्यं तु दशाङ्गुलम्॥ १३७॥

एतल्लक्षणसम्युक्तं पञ्जरं प्रोक्ष्य वारिणा। - पुरुषोत्तमे - २४

पञ्जरे अधः अर्गलविधिः

प्रतिमा तत्र निक्षिप्य पूरणं पुनरारभेत्॥ ६ ॥

अधः शिला वा लोहं वा मधूच्छिष्टं तु वा भवेत्।

रसादीनां तु सर्वेषां कुर्यादर्गलबन्धनम्॥७॥

शेषाणामपि सर्वेषां पञ्जरं तु प्रशस्यते। - सनत्कुमारे - इन्द्ररात्रे - १

देवं पञ्जरे निवेशनम् - मन्त्रश्च

धान्यादिकृतपीठे तत्पञ्जरं सन्निवेशयेत्॥ १३८॥

(धान्यराशौ तु संस्थाप्य पञ्जरं देशिकोत्तमः।)

योगपीठं समभ्यर्च्य बिम्बमुत्तिष्ठमन्त्रतः।

देशिकस्स्वयमादाय पञ्जरे विनिवेशयेत्॥ १३९॥

भद्रङ्कर्णेतिमन्त्रेण - रक्षाबन्धनमाचरेत्। - पुरुषोत्तमे - २४

<u>पूरण मन्त्रः - पूरण मानाः</u>

आपादमस्तकां वान्यैर्व्रीह्यादिभिरधोक्षजम्॥५३॥

छादयेन्मूलमन्त्रेण पूरणं सर्ववस्तुभिः।

तिस्रस्त्रिपादसहितानपि वा द्विगुणांस्तथा॥५४॥

पूरयेत्कालमातोद्यनृत्तगीतादिमङ्गलम्। - पाद्मे – १५

<u>चरुणा पूरणं -पूरणकालावकाशः -पर्युषितकालः फलञ्च(अन्नाभिषेकः)</u>

चरुणा पूरयेत् तत्तु विधिपक्वेन साधक॥८॥

नात्युष्णेनातिशीतेन कदुष्णेन विचक्षणः।

पूरयित्वा तु विधिवत् स्थितं च दश नाडिकाः॥९॥

ततस्तदप्सु वा चाग्नौ क्षिपेद्भूमौ खनेत्तु वा।

दशनाड्यधिकं पूरं स्थापयित्वा विचक्षणः॥१०॥

कालयोगः स उद्दिष्टो रात्रावहनि चैव तु।

कालयोगातिरिक्तं तु निर्माल्यं परिचक्षते॥११॥

तस्मात् सर्वप्रयत्नेन काले तन्निर्हरेत् ततः।

तस्य क्रतुफलं प्रोक्तमग्निष्टोमस्य यत् फलम्॥१२॥ -सनत्कुमारे -इन्द्ररात्रे -१

<u>पूरणीय द्रव्याणि फलञ्च</u>

सौवर्णं रजतं रत्नं फलं पुष्पं तथैव च।

माक्षिकं तिलपिष्टं च अपूपं सर्वबीजकम्॥३॥

बिल्वादीनिच पत्राणि पूरणद्रव्य मुच्यते ।

एतैस्तु पूजयेद्देवं सर्वान् कामानवाप्नुयात्॥४॥ - कपिञ्जले - २९

<u>पूरणोत्सवे पूरणीय द्रव्याणि</u>

घृतेनाभ्यञ्जयेद्देवं मज्जयेद्वा घृतादिषु॥४७॥

घृते वा दध्नि पीयुषे यद्वा मधुनि सम्भृते।

फलेषु वा फलरसैः पञ्चगव्यरसेषु वा॥४८॥

पायसादिषु चान्नेषु कालपुष्पोच्चयेषु वा।

दलेषु वा तुलस्यादेर्नवरत्नचयेषु वा॥४९॥

सुवर्णकलधौतेषु पुष्पाकारेषु शोभने। - पाद्मे - १५

<u>फलपूरणोत्सवः - फलानाम् उत्तमादिभेदाः</u>

फलोत्सवविधिं वक्ष्ये समासादवधारय।

कदलीपनसञ्चानं फलानां संप्रकीर्तितम्॥ ११॥

त्वचाक्षतयुतं चूतं बीजपूरन्तु चाक्षतम्।

पनसं विविधं प्रोक्तं पनसं क्षुद्रसंज्ञकम्॥ १२॥

क्षुद्रन्तु वर्जयेद्विप्र सर्वदा पूरकर्मणि।

कदली त्रिविधं प्रोक्तं त्रिविधं योग्यमेव च॥ १३॥

सहकारे तथाप्रोक्तं हारीतं रक्तपीतकम्।

त्रिविधं पूरणे योग्यं क्रमुके चन्द्रपूरकम्॥ १४॥

हारीतं पीतकं रक्तं पूरणे सर्वकं? भवेत्। - अनिरुद्धे - २३

<u>पूरण कालभेदेन द्रव्यभेदाः</u>

चरुणान्नेन वापूपैः प्रातः सपूरयेत् प्रभुम्।

घृतेन मधुना तैलैर्मध्याह्ने पूरयेत् प्रभुम्॥ ३१॥

पुष्पैश्च विविधैः रम्यैः फलैश्च विविधैरपि।

सक्तुना रसमिश्रेण सायाह्ने पूरयेत् प्रभुम्॥ ३२॥

रत्नतण्डुललोहैस्तु मध्यरात्रे प्रपूरयेत्।

गुडेनापि रसैः सर्वैः प्रत्यूषे पूरयेत् प्रभुम्॥ ३३॥ -सनत्कुमारे -इन्द्ररात्रे -१

<u>रात्रौ पूरण वर्जित द्रव्याणि</u>

न पूरयेत् तिलैः रात्रौ न चान्नैर्नापि वा फलैः।

न चैव रत्नलोहानि निर्माल्यं स्यात् कदाचन॥ ३४॥

शेषाणि सर्ववस्तूनि निर्माल्यं स्यान्न संशयः। - सनत्कुमारे - इन्द्ररात्रे - १

<u>फलपूरण विधिः तन्मानः मन्त्रश्च</u>

अधिवासदिने विप्र! शिवमानेन पूरयेत्॥ १७॥

तद्द्रव्येण बलिं कुर्याद्धोमकर्म तथारभेत्।

द्विगुणं त्रिगुणं चैव चातुर्गुण्यन्तदन्तिके॥ १८॥

वासुदेवादिभिर्मन्त्रैः चतुर्वेदाद्यकैस्तु वा।

शाखाद्यत्रितयं वापि विष्णुसूक्ततृतीयकम्॥ १९॥

अङ्गादीनां विशेषेण मुष्टिमानेन पूरयेत्।

श्रियादीनां विशेषेण जानुमानेन पूरयेत्॥ २०॥

कर्मार्चादिबिम्बानां पादमानेन पूरयेत्।

एकैकं होमकार्ये तु बलिकर्मणि मुष्टिकम्॥ २१॥ - अनिरुद्धे – २३

<u>पूरण नाडीकालः</u>

नत्युष्णंनातिशीतेन पूजयेद्देवमव्ययम्॥ १५॥

पूरणं विधिवत्कुर्यात् स्थितिस्तु दशनाडिकाः। - कपिञ्जले - २९

पूरणोत्सवे होमः

मण्डलस्योत्तरे भागे होमं मूलेन कारयेत्॥१७॥

अष्टोत्तरशतैरेव समिधाज्यैः पृथक् पृथक्।

पूरणद्रव्यमादाय जुहुयात्तु सहस्रकम्॥१८॥ - कपिञ्जले – २९

पूरणोत्सवे होमः

जुहुयात्सर्पिषा यावत्पूरणं मूलविद्यया।

देया च दक्षिणा स्वर्णमाचार्याय यथावसु॥५६॥ - पाद्मे - १५

पूरणोत्सवस्य फलम्

एकेन पूरणेनापि सर्वान् कामानवाप्नुयात्।

तस्मात् सर्वप्रयत्नेन कर्तव्यः पूरणक्रमः॥५५॥ - सनत्कुमारे - इन्द्ररात्रे-१

---

## पत्रच्छेदनोत्सव प्रमाणानि

पत्रच्छेदनोत्सव कालः

पत्रच्छेदं प्रवक्ष्यामि विघ्ननाशाय दुष्टजम्।

गरुडपूजनञ्चैव विहितं तन्त्रवर्त्मना॥३॥

अयने विषुवे चैव युगसन्धौ तथैव च। - पद्मोद्भवे - ३०

पत्रच्छेदनोत्सव कालः

उत्सवे विष्णुपञ्चम्यां सोमसूर्यग्रहे तथा।

प्रयत्नेन विधातव्यः पत्रच्छेदो विशेषतः॥४०॥ - सनत्कुमारे -शिवरात्रे -७

<u>पत्रच्छेदनोत्सव कारणम्</u>

मन्दिरे देवबिम्बस्य सम्मुखे भक्तिभावतः ॥४॥

पत्राण्याच्छिद्य देवर्षे! नानाकृतीनि सारतः।

समर्पणीयानि देवाय शोभावृद्धिकराणि वै॥५॥

विशिष्टमर्चनं प्रोक्तं कर्तव्यं कुशलेन च।

कौशल्यं भक्तिभावश्च माहात्म्यं तत्र कारणम्॥६॥ - पद्मोद्भवे - ३०

<u>पत्रच्छेदने क्षुरिकादयः</u>

सूचीमुखाकृतिश्चैव नालीकं च कुठारिका॥२॥

एकपत्रं च नाराचं द्विशिखं त्रिशिखं तथा।

द्विपत्रच्छेदकं चैव व्रीहीमुखमतः परम्॥३॥

वृत्तं चासिस्तथा चैव क्षुरं च द्विक्षुरं तथा।

एताः पञ्चदश प्रोक्तास्शलाकाश्च यथाक्रमम्॥४॥ - कपिञ्जले - ३०

<u>क्षुरिकादीनां उपयोग क्रमः तन्मानश्च</u>

भेदने चैकपत्रं च नाराचं चापि कीर्तने।

द्विशिखं बिन्दुकरणे त्रिशिखं विषमे तथा॥५॥

द्विपत्रं रूपकरणे भेदकं भेदपाटने।

क्षुरं च पाटने योज्यं पुष्पादीनां न संशयः॥६॥

यथाशक्ति प्रयोक्तव्यं शस्त्रशालां विपश्चितः।

मानं शलाकया कुर्यात्पत्रव्यापारमुच्यते॥७॥ - कपिञ्जले - ३०

<u>छेदनार्ह पत्राणि</u>

पत्राणिचात्र वक्ष्यामि प्रयोगार्हाणि सर्वथा॥ २९॥

उत्तमं कदलीपत्रं तालकञ्च ततः परम्।

गङ्गापत्रं विशेषेण रजनीपत्रमेव च॥ ३०॥

पद्मं कौमोदकी चैव ह्युत्पलञ्च सुगन्धिका।

कल्हारं किंशुकश्चैव पत्राणि च्छेदने मुने!॥ ३१॥ - पद्मोद्भवे – ३०

<u>पत्रच्छेदे उचितपत्राणि</u>

मुख्यं तु कदलीपत्रं वालुकं तदनन्तरम्।

गङ्गापत्रं विशिष्टं स्याद्रजनीपत्रमेव च॥ ८॥

पद्मं च कुमुदं चैव उत्पलं च सुगन्धिकम्।

कल्हारं किंशुकं चैव पत्राण्यर्चनिकाविधौ॥ ९॥ - सनत्कुमारे - शिवरात्रे -७

<u>पत्रसङ्ख्या - भेदाश्च</u>

षष्टित्रिशतिका भेदा एतेषां च पृथक् पृथक्।

एकषष्टिद्विसाहस्रमस्मिंस्तन्त्रे प्रकीर्तितम्॥ ११॥

एतन्नामानि सर्वेषां प्रयोगाश्च विशेषतः।

नारदार्चनिकायां तु दर्शितानि यथाविधि॥ १२॥

पत्रच्छेदोऽपरः प्रोक्तः चतुः षष्टिप्रभेदतः।

पद्मोद्भवे पुराणे तु गरुडस्यार्चनाविधौ॥ १३॥

तेषां च षष्टित्रिशतं प्रभेदाश्च पृथक् पृथक्।

गरुडार्चनिकायां तु सविस्तारमुदाहृतम्॥ १४॥

ते त्रिविंशतिसाहस्रं चत्वारिंशत् प्रकीर्तिताः।

अन्याश्चार्चनिकाः केचिदसङ्ख्येयाः प्रचक्षते॥ १५॥ -सनत्कुमारे-शिवरात्रे-७

<u>पत्रतापनम्</u>

पत्रस्यात्र क्रमं वक्ष्ये येनार्चार्चनिका भवेत्।

प्रदीपस्य शिखायां तु सम्यक् पत्रं प्रतापयेत्॥ १६॥

अतितप्तं न कर्तव्यं तापहीनं तथैव च।

क्लिद्यते चातितापेन कर्कशः स्याद्तापतः॥ १७॥

तस्मात् तन्मध्यमं तापं कुर्याच्चैव शनैः शनैः।

मषीं यथैव गृह्णाति नीलाञ्जनचयप्रभाम्॥ १८॥

तथा सन्तापयेत् पत्रं सततं निस्तलेन तु।

उत्क्रमं वर्जयेत् तत्र धारापातं तथैव च॥ १९॥

अङ्गुलीभ्यां तु विमृजेदेवं ततस्सर्वतः क्रमात्।

समत्वं विषमत्वं च परीक्षेत प्रयत्नतः॥ २०॥ - सनत्कुमारे - शिवरात्रे - ७

<u>पत्रच्छेदने भेदाः</u>

छेदनी भेदने ज्ञेया भेदनं नवधा मतम्॥ २१॥

वर्तुलं लम्बमानं तत् चतुरश्रं त्रिकोणकम्।

षट्कोणायितं वेद्यं सर्पमार्गायितं तथा॥ २२॥

मण्डूकप्लुतिकं चैवं हंसगतियुतं मुने!।

हस्तिपदायितं दीर्घं विज्ञेयं तद्धि शोभनम्॥ २३॥ - पद्मोद्भवे - ३०

<u>पत्रच्छेदने षड्विधयः</u>

कल्हारं किंशुकं चैव पत्रं वै छेदने विधौ॥९॥

वल्लिका छेदकं चैव तथा विप्र प्रकीर्णकम्।

नन्दिकं रञ्जकं चैव रूपकं चेति षड्विधम्॥१०॥ - कपिञ्जले - ३०

<u>पत्रच्छेदने विविध आकाराः</u>

चतुरश्रं तथा वृत्तमर्धवृत्तं दलत्रयम्।

चतुर्दलं दलषट्कमष्टादलं च द्वादशम्॥१८॥

स्थूलं कृशं च ह्रस्वं वा शङ्खचक्रगदात्मकम्।

पद्मरूपं गजाकारं रथाकृतिर्हयात्मकम्॥१९॥

मयूराकृतिकञ्चैव हंसदेवालयाकृतिम्।

तोरणं स्वस्तिकं कुम्भं पुष्पमालायितं तथा॥२०॥

चतुर्विंशतिरूपं तज्ज्ञेयं तन्त्रेषु विस्तरात्। - पद्मोद्भवे - ३०

<u>पत्रमालायां पुष्पबन्धनं - बन्धने तन्तुभेदाः</u>

ततस्सूचीमुखादिभिः कर्तव्याऽऽकृतिका शुभा।

देवशः पूजनीयश्च पत्रच्छेदेन कर्मणा॥३६॥

बन्धने सर्वपुष्पाणां पत्रभेदान् श्रुणुष्व मे॥३८॥

ग्रन्थने कदलीत्वक् स्यात् सूत्रं वा तदलाभतः।

नालिकेरस्य पत्रं वा केतकीपत्रमेव वा॥३९॥

तालीपत्रं तु वा प्रोक्तं तालपत्रमथापि वा।

सूत्रं च तस्य निष्कास्यमलाभे काशजं यदि॥४०॥

ग्रन्थयेच्चैव पुष्पाणि यथाशोभं विलक्षणम्।

अर्पयेद्विष्णवे सम्यक् तन्त्रमार्गानुसारतः॥४१॥ - पद्मोद्भवे - ३०

<u>पत्र बन्धन कालः - अतिक्रमे दोषः</u>

पत्रबन्धनकालश्च पक्षिणीरात्रमेव हि।

विशेषः स्यादहोरात्रं बन्धने दशनाडिका॥४२॥

ततः स्यात् तत्तु निर्माल्यं नार्पयेद्धरये तदा।

अर्पितं दोषभाक् स्यात्सः विघ्नाशः कथं भवेत्॥४३॥ - पद्मोद्भवे - ३०

<u>च्छेदन पत्राणि देवस्य नियोजन क्रमः</u>

फलकेषु नियोज्येव अर्चनापीठपार्श्वयोः।

परितो विन्यसेच्चैवमुत्सवे चोत्सवे तथा॥१८॥

भूमौ वा भित्तिविन्यासं सुमनोभिस्तु कारयेत्।

वल्ली तु पूर्ववत्कुर्याच्छेदकं दक्षिणे तथा॥१९॥

प्रकीर्णं पश्चिमे भागे उत्तरे नन्दिकं तथा।

रूपकं रञ्जनं चैव पार्श्वयोरुभयोस्तथा॥२०॥ - कपिञ्जले - ३०

<u>पत्रच्छेदनोत्सव फलम्</u>

प्रतिभक्तिक्रियं चैव कर्तुः क्रतुफलं भवेत्।

तस्मात् सर्वप्रयत्नेन पत्रच्छेदं तु कारयेत्॥४१॥ -सनत्कुमारे -शिवरात्रे -७

---

## <u>भक्तोत्सव प्रमाणानि</u>

<u>वृषभे विशाखोत्सवः (நம்மாழ்வார்)</u>

वृषभे पूजयेत् भक्त्या पञ्चरात्रविशारदम्।

नारदं पञ्चरात्रज्ञं पञ्चरात्रप्रचारकम्॥ ३४॥

पौर्णमास्यां जनिं लेभे भक्तरूपो जनार्दनः।

विशाखोत्सवमायोज्य स्नपनं कारयेन्मुदा॥ ३५॥ - पाराशर्ये - २४

<u>भक्तोत्सवे वर्जनीयाः</u>

न होमो न बलिस्तीर्थं न ध्वजारोहणक्रिया॥ ३८॥

मृगया च जलद्रोणी न भक्तोत्सवकर्मणि। - भार्गवतन्त्रे - १५

<u>भक्तजन्मदिनोत्सवादिकरणे फलम्</u>

भक्तजन्मदिनेषुश्च स्वीय जन्मदिनेपिच।

महोत्सवं प्रकुर्वीत देवदेवस्यसन्निधौ॥ १४५॥

एवं यःकुरुते भूमौ तस्यायुर्वृद्धिरुच्यते। - परमपुरुषे – ४

---

## <u>गरुडजयन्ति प्रमाणम्</u>

<u>गरुड जन्मदिने पूजा (पौषमासे)</u>

आर्द्रायामपि मासेऽस्मिन् जन्मर्क्षे च गरुत्मतः॥ ४४॥

तत्प्रीतये समाराध्यो हरिश्शास्त्रोक्तवर्त्मना।

पायसान्नं गुलान्नं च प्रभाते विनिवेदयेत्॥ ४५॥

बिम्बं चौत्सवमाकल्प्य वीथिकावरणेषु च।

गरुडेनैव सहितं गमयेन्मङ्गलान्वितम्॥४६॥ - पाद्मे – १५

## हनुमज्जयन्ति प्रमाणम्

हनुमज्जयन्त्युत्सवः

हनुमज्जन्मनक्षत्रे सीताराघवसंयुतम्॥१३॥

मारुतिं विधिवत्स्नाप्य विशेषोत्सवमाचरेत्।- पुरुषोत्तमे – २७

हनुमज्जयन्ति कालः – क्रमः (वैशाखमासे)

अनूराधे हनुमतौ जन्म तस्मिन् सभाजयेत्।

तं राघवेण सहितं सीतया लक्ष्मणेन च॥२३॥

आञ्जनेयं तदत्यन्तप्रीणनं राघवात्मनः। - पाद्मे – १४

---

## मत्स्यजयन्त्युत्सव प्रमाणानि

मत्स्यजयन्ती कालः

कृते युगे चैत्रमासे अग्नितिथ्यां तु युग्मभे।

बन्धनर्क्षे सोमवारे धर्मसंस्थापनाय च॥१॥

मत्स्यावतारो ह्यभवन्मधुकैटवधाय च।

तत्तिथौ विधिना ब्रह्मन् जयन्त्युक्तविधानतः॥२॥ - शेष संहिता – ५

## कूर्मजयन्युत्सव प्रमाणानि

कूर्मजयन्ती कालः

ज्येष्ठशुक्ले कूर्मरूपी द्वादश्यां सुरसत्तमैः।

प्रार्थितो मन्थरोद्धारे भरणार्थिमुदावहन्॥४८॥

वासुदेवांशसम्भूतो ह्यमृतोद्धारणे पुरा।

पूजयेत् तं हरिं भक्त्या भक्तानाममृतप्रदम्॥ ४९॥ - श्रीप्रश्ने – ४७

## वराहजयन्त्युत्सव प्रमाणानि

वराह जयन्ती कालः - (கோரைக்கிழங்கு பிரஸாதம்)

चैत्रशुद्धे शुक्लपक्षे नवम्यां सोमवासरे। ३९॥

तस्मिन् मास्यसिते पक्षे पूर्वप्रोष्ठपदीयते॥ ४१॥

गुरोर्वारे त्रयोदश्यां प्रातर्देवो रमापतिः।

वाराहरूपी भगवान् वासुदेवांशसम्भवः॥ ४२॥

तस्मिन् काले तु तं देवं धरया सहितं हरिम्।

मुस्ताचूर्णादिभक्ष्यैश्च तोषयेन्नियतो गुरुः॥ ४३॥ - श्रीप्रश्ने – ४७

## नृसिह्मजयन्त्युत्सव प्रमाणानि

नरसिह्म जयन्ती

वैशाखशुक्लपक्षस्य चतुर्दश्यां भृगोर्दिने।

चित्रानक्षत्रयोगे च सायाह्ने नरकेसरिम्॥ ४४॥

सङ्कर्षणांशसम्भूतं हिरण्याक्षवधोद्यतम्।

लक्ष्म्या सार्धं भक्तवश्यं पूजयेत् सर्वसिद्धये॥ ४५॥ - श्रीप्रश्ने – ४७

नरसिह्म जयन्ती कालः(चैत्रमासे)

तत्रैव श्रवणे चैव सायाह्ने नरकेसरी॥ ९॥

अर्चनीयस्स हि तदा हिरण्यमवधीद्रिपुम्।

तस्मिन्नेव सिते पक्षे त्रयोदश्यां समर्चयेत्॥ १०॥

विष्णुं यद्वा पुनर्वस्वोः पौर्णमास्यामथापि वा। - पाद्मे - १४

## वामनजयन्त्युत्सव प्रमाणानि

वामनजयन्ती कालः

त्रेतायां श्रावणे मासि द्वादश्यां श्रवणे सिते।

वामनोऽभूद्धरिः पक्षे क्षत्रविड्वलनाशनः॥ १॥

सिंहलग्ने सौम्यवारे धर्मसंस्थापनाय च।

तन्मन्त्रेणार्चयेद्देवं यन्त्रकुम्भादिपूर्वकम्॥ २॥ - शेष संहिता - ८

त्रिविक्रमजयन्ती कालः

तद्युगे श्रावणे मासि द्वादश्यां श्रवणे तथा।

तत्तिथौ सिंहलग्नान्ते आविरासीत्त्रिविक्रमः॥ १॥ - शेष संहिता – ८

## बलरामजयन्त्युत्सव प्रमाणानि*

बलरामावतार कथनम् - बलरामजयन्ती कालः

बलस्तु रौहिणेयो मे ज्येष्ठो भ्राता जगद्गुरुः।

खलानां दण्डको ब्रह्मन्! भक्तानुग्रहकारकः॥ ६९॥

वैशाखशुक्लपक्षस्य द्वितीये कृत्तिकायुते।

सूर्यस्य वासरे प्रातः प्रद्युम्नांशादजायत॥ ७०॥ - पाराशर्ये - ६

बलरामजयन्ती कालः(वैशाखमासे)

तस्मिन् द्वितीये शुक्लस्य कृत्तिकासहिते रमे।

सूर्यस्य वासरे प्रातः प्रद्युम्नांशादजायत॥ ४६॥

---

××பரசுராம ஜயந்தி உத்ஸவம் மற்றும் காலம் எதுவும் தற்கால ஸம்ஹிதைகளில் காணப்படவில்லை.

बलस्तस्मिन् दिने सायं रेवतीसहितं विभुम्।

पूजयेद्धलहस्तं तमपराह्णे गुरुः स्वयम्॥४७॥ - श्रीप्रश्ने – ४७

<u>**कल्किजयन्त्युत्सव प्रमाणानि**</u>

<u>कल्क्यावतार कथनम् - कल्किजयन्ती कालः</u>

कल्किस्तु दुष्टनाशायावतरिष्यति शाश्वतः।

श्रावण्यामुत्तरे तारे तृतीयायां दिने गुरोः॥९३॥

खलानां दहनं कृत्वा कलिं कृतयुगं दधत्।

महापुरुषरूपेण प्रथिष्यति सुधर्मधृक्॥९४॥

अवतारा असङ्ख्येया जाता दुष्टविदारकाः।

भविष्यन्ति च संसारे तेष्वहं  सर्वतः परः॥९५॥

द्वारिकायां वसाम्यत्र दक्षिणे द्रविडे तथा।

भजेद्यो वासुदेवं मां नास्ति तद्गतिरन्यथा॥९६॥ - पाराशर्ये – ६

<u>कल्कि जयन्ती कालः(श्रावण मासे)</u>

शुक्लपक्षेऽथ मासेऽस्मिन् सम्भविष्यति ब्राह्मण!॥७१॥

तृतीयायां दिने कल्की भक्तानाममृतप्रदः।

पूजयेत्तस्य मन्त्रेण स्नपनञ्चैव कारयेत्॥७२॥ - पाराशर्ये - २४

<u>कल्कि जयन्ती कालः</u>

श्रावण्यामुत्तरे तारे तृतीयायां दिने गुरोः।

कल्की खलानां दहनं पुनः कृतयुगं दधत्॥५०॥

अनिरुद्धांशजोऽभूत्तं प्रातरेव समर्चयेत्। - श्रीप्रश्ने – ४७

## हयग्रीवजयन्त्युत्सव प्रमाणानि

हयग्रीव जयन्ती कालः

कृष्णपक्षे त्रयोदश्यां बुध्यर्क्षे गुरुवासरे।

हंसाकारं हरिं भक्त्या पूजयेत्तज्जनूत्सवे॥ ३१॥

सृष्ट्यादौ वेधसे दत्त्वा प्रणवं सर्वकामदम्।

तं हंसाख्यं हरिं ब्रह्मन्! लक्ष्यबीजेन पूजयेत्॥ ३२॥ - पाराशर्ये - २४

हयग्रीवजयन्ती कालः

तत्कृते मीनमासे तु भन्ध्यर्क्षे युग्मभान्तके।

वेदमार्गप्रतिष्ठायै धर्मसंस्थापनायच॥ १३॥

स्थित्यर्थमाविरासीद्धि हयग्रीवः स्वयं हरिः।

नारसिंहजयन्त्युक्तविधिना सम्यगब्जज॥ १४॥ - शेष संहिता – ५

हयग्रीवजयन्ती फलम्

हयग्रीवजयन्त्यादौ सर्वकर्मार्थसिद्धये।

सर्वविघ्नविनाशार्थं धर्ममोक्षार्थसिद्धये॥ २३॥

यः करोति हयग्रीवजयन्तीं सम्यगब्जज।

ससर्वलोकान् जयति सर्वविद्यागुरुर्भवेत्॥ २४॥

देवविप्रः सुधीश्च स्यात् स याति परमं पदम्। - शेष संहिता – ५

---

## सुदर्शनजयन्त्युत्सव प्रमाणम्

### सुदर्शन जयन्ति कालः

ज्येष्ठे सुदर्शनं चक्रं हेतिराजं प्रपूजयेत्।

पाराशर्य! सिते पक्षे द्वादश्यां शुक्रवासरे॥४१॥

चित्रानक्षत्रके सौम्ये लग्ने कर्कटके शुभे।

अवतारोऽस्ति मे शुभ्रो दैत्यानां प्राणघातकः॥४२॥

रक्षकश्चात्र भक्तानां वाञ्छितार्थफलप्रदः।

तन्मन्त्रेण समभ्यर्च्य स्नपयेत् पूजयेत्तथा ॥४३॥ - पाराशर्ये – २४

## सुदर्शननृसिंह-जयन्त्युत्सव प्रमाणानि

### सुदर्शननृसिंह जयन्ती कालः

मीनमासे शुक्लपक्षे प्रथमामेषलग्नके।

बध्न्यर्क्षे भानुवारे तु द्वापरे ग्रह अष्टके॥२१॥

उच्चस्थे दुष्टनाशार्थं सुदर्शननृकेसरी।

सृष्टिस्थित्यन्तमोक्षार्थम् आविरासीत् हरिः स्वयम्॥२२॥-शेषसंहिता -१०

### सुदर्शननृसिंहजयन्ती फलम्

सुदर्शननृसिंहस्य जयन्तीं कारयेद्बुधः॥२७॥

सत्सन्तानप्रसिद्ध्यर्थं बन्धमोचनसिद्धये।

तज्जयन्त्युत्सवादेव सन्तानं लभते सदा॥२८॥

तद्वत्सरेण सर्वेषां सत्यमेव न संशयः।

तत्तन्मासे तज्जयन्तीं कुर्यात्सम्यग्विधानतः॥२९॥

तस्मै मुक्तिं प्रदास्यामि पाञ्चरात्रेण सर्वदा।

धर्मकामार्थमोक्षाद्यं राज्यं श्रीः वंशवर्धनम्॥३०॥

तस्मात्सर्वप्रयत्नेन पाञ्चरात्रं प्रकल्पयेत्।

पाञ्चरात्रेण मार्गेण सर्वं सिद्ध्यति सर्वदा॥३१॥ - शेष संहिता – १०

---

## पर्वोत्सव प्रमाणानि

पर्वोत्सव कालः

अमावास्योत्सवं वक्ष्ये मासि मासि मुनीश्वर।

देवजन्मर्क्षके वापि प्रतिष्ठार्क्षमथा पि वा॥१॥

यजमानस्य जन्मर्क्षे राजजन्मर्क्षकेऽपि वा।

अयने विषुकाले वा निश्चयित्वाङ्कुरान् पुरा॥२॥

नवाहे सप्तपञ्चाहे त्र्यहैकाहमथापि वा। - विष्वक्सेने - २८

षट् पर्वोत्सव कालः - पञ्चपर्वोत्सवश्च

विष्णोराविर्भवर्क्षे च दर्शश्रवणयोस्तथा।

एकादश्यां सङ्क्रमे च षड्विधैश्चोत्सवः स्मृतः॥६०॥

नोत्सवः श्रवणे यत्र विष्णोरायतने शुभे।

पञ्चपर्वोत्सवं नाम मासि मासि भवेद्रमे॥६१॥ - श्रीप्रश्ने - ४७

पञ्चपर्वोत्सव कालः

एकादश्योः पौर्णमास्यां दर्शे सङ्क्रमणेऽपि च॥२७९॥

पञ्चपर्वोत्सवो ब्रह्मन्! सर्वदोषोपशान्तिदः। - विष्णुतिलके - ८

<u>पञ्च पर्वोत्सव कालाः</u>

दिनानि पञ्च शस्तानि वैष्णवानि चतुर्मुख॥ ११९॥

तेषु व्रतमनुष्ठेयं सर्वाभिप्रेतसाधनम्।

पक्षद्वयेऽपि द्वादश्यौ सिनीवाली कुहूस्तथा॥ १२०॥

श्रवणर्क्षं दिनानि स्युर्मासेषु द्वादशस्वपि। - पाद्मे - १५

<u>पर्वोत्सव कार्य क्रमानि</u>

पुरा नित्यार्चनां कृत्वा प्रार्थनापूर्वकं हरेः।

शक्तिमावाह्य देवेशं भद्रपीठे निधाय च॥ ६२॥

पुष्पाभरणमाल्याद्यैरलङ्कुर्याद्विशेषतः।

अर्घ्यपाद्यादिनाभ्यर्च्य भक्ष्यादीनि निवेद्य च॥ ६३॥

यात्रोपकरणैश्छत्रैश्चामरैर्व्यजनादिभिः।

सर्ववादित्रघोषैश्च प्राकारं भ्रामयेद्धरिम्॥ ६४॥

देवस्य श्रमशान्त्यर्थं मध्ये मध्ये च मण्डपे।

अर्घ्यादिना तमभ्यर्च्य भक्ष्याणि विविधानि च॥ ६२॥

मुद्गान् शर्करसम्मिश्रान् नालिकेरजलं तथा।

निवेद्य मुखवासादि ताम्बूलं च समर्पयेत्॥ ६६॥ - श्रीप्रश्ने - ४७

<u>अमावास्याद्युत्सवादिषु बेरभेदाः</u>

अमावास्योत्सवाद्येषु संप्रोक्तं चाङ्कुरार्पणम्॥ २४॥

उत्सवप्रतिमां वापि स्नपनार्चामथापि वा।

बलिबिम्बं तु वा चक्रबिम्बमेकमथापि वा॥ २५॥

तद्गृहीत्वा तु मन्त्रज्ञः शुद्धस्नानं तु कारयेत्।- विष्वक्सेने - २८

<u>पर्वोत्सवे रक्षाबन्धन मन्त्रः</u>

अधिवास्य प्रयत्नेन कौतुकं बन्धयेद्धरेः॥२॥

जितन्त इति मन्त्रेण सर्वसंपत्करं शुभम्।

ऊर्णामयेन सूत्रेण सौवर्णेन नवेन वा॥३॥ - वासिष्ठे - १७

<u>पर्वोत्सवे वीथि भ्रमणम्</u>

शङ्खदुन्दुभिनिर्घोषै नृत्तगीतरवैरपि॥६॥

ग्रामं परिभ्रमेत्पश्चात्प्रादक्षिण्येन मन्दिरम्।

पायसान्नैर्बलिं दद्याद्दिश्वष्टासु ततः क्रमात्॥७॥

पुनर्देवालयं गत्वा स्नपनं कारयेद्बुधः। - वासिष्ठे - १७

<u>पर्वोत्सवे अवभृथं तत्फलञ्च</u>

ह्रदे समुद्रे द्रोण्यां वा देवस्नानं समाचरेत्॥१०॥

तत्र दिव्ये जले स्नानं ये कुर्वन्ति समाहिताः।

तेषां पापानि नश्यन्ति तमस्सूर्योदये यथा॥११॥ - वासिष्ठे – १७

<u>पर्वोत्सवे अवभृथ देशाः</u>

तीर्थस्नानं ततो ब्रह्मन् महाजनसमन्वितम्।

नद्यां ह्रदे तटाके वा देवेशं स्नानमाचरेत्॥१००॥

तीरे देवं समानीय शुद्धस्नानं समाचरेत्। - विष्वक्सेने - २८

<u>मासोत्सवे मण्डलाराधनविधिः</u>

मासोत्सवविधिं वक्ष्ये समासाच्छृणु सांप्रतम्।

मासि मासि विशेषेण द्वादशीष्वखिलासु च॥ १ ॥

नक्षत्रेषु च सर्वेषु श्रवणं चोत्तमं भवेत्।

तिथीनां द्वादशी श्रेष्ठा वाराणां शुक्रवासरम्॥ २ ॥

योगानान्तु व्यतीपातं करणानान्तु विष्टिकम्।

अमावास्यां पौर्णमास्यां मासार्धे वा समर्चयेत्।

द्वादश्यान्तु विशेषेण मण्डलाराधनं चरेत्॥ ४॥ - अनिरुद्धे - २२

<u>पर्वोत्सवे वाहन क्रमः</u>

तद्बिम्बं शिबिकाद्येषु समारोप्य समाहितः।

रथं तु शिबिकां वापि गजं वाश्ववरं तु वा॥ ६१ ॥

प्रोक्षयेद्गारुडेनैव भूषयेद्गरुडं स्मरन्। - विष्वक्सेने - २८

<u>पर्वोत्सवे नदी तटाकमध्ये देवस्य स्नपनम्</u> (ஆழ்வார் திருநகரி – கேரளம்)

पुराणोक्ततटाके वा नदीतीरेऽथवा मुने।

देवदेवं समानीय मूलमन्त्रेण साधकः॥ ८७॥

स्नापयेत्तोयमध्ये तु पूर्ववन्मुनिपुङ्गव।

महाजनान् समाहूय दद्यात्तीर्थमनुत्तमम्॥ ८८॥ - विष्वक्सेने - २८

<u>संक्रान्तिपूजाविधिः - फलञ्च</u>

संक्रान्तौ मण्डले कुण्डे कुम्भे च मधुविद्विषम्।

समाराध्यार्चयेद्विप्रः परमान्नैश्चतुर्विधैः॥ ३६ ॥

जुहुयान्मनुनानेन ज्वलनेऽष्टोत्तरं शतम्।

भोजयेत्तन्मयान् विप्रान् दद्यात्तेभ्यस्तुदक्षिणाः॥ ३६ ॥

यस्य यस्य च धर्मस्य यद्यत्फलमुदीरितम्।

तस्य तस्य फलं तत्तन्मन्त्राच्छतगुणं भवेत्॥३७॥ -श्रीमन्नारायणे -जपे -४

<u>मासि मासि श्रवणे पूजाक्रमः (पञ्चपर्व पूजा - मासेशपूजा क्रमश्च )</u>

अश्नन् हविष्यं पूर्वेद्युरनश्नन्नपरेऽहनि।

श्रवणे मध्यमे भागे शुचिर्दक्षस्समाहितः॥१२५॥

चक्राब्जमण्डले यद्वा बिम्बे कुम्भेऽथवा हरिम्।

आराध्य मूर्तिं मासेशमुपचारैर्यथोदितैः॥१२६॥

आदावन्ते च वित्तानि दत्त्वा शक्त्यनुसारतः।

ब्राह्मणेभ्यस्तथा दत्त्वा गुरवे दक्षिणादिकम्॥१२७॥

अपरेद्युस्तथा देवीमर्चयित्वा यथाविधि।

पारणं ब्राह्मणैस्सार्धं कुर्यान्नियतमानसः॥१२८॥

एवं चतुर्षु चान्येषु दिनेष्वाराधनक्रमः।

मासि मासि च यष्टव्या मासेशो मूर्तिरब्जज॥१२९॥ - पाद्मे - १५

<u>श्रवण -अमा-पूर्णिमा -एकादशि-द्वादशि -जयन्त्यादिषु विशेषपूजा फलञ्च</u>

श्रवणर्षे त्वमायां च पौर्णमास्यामथापि च।

तदन्येषु च पर्वेषु वैष्णवेषु चतुर्मुख॥४०॥

एकादश्यां च द्वादश्यां जयन्त्यादिव्रतेषु च।

साधकस्तु शुचिर्भूत्वां कुम्भं संस्थाप्य पूर्ववत्॥४१॥

चक्राब्जं वर्तयित्वा तु कुण्डे वा स्थण्डिलेऽपि वा।

प्रतिष्ठाप्य ततो वह्निं यजेद्देवं मधुद्विषम्॥४२॥

पूर्वोक्तेन विधानेन ब्राह्मणानपि भोजयेत्।

अनेन विधिना यस्तु तोषयेज्जगदीश्वरम्॥४३॥

तस्य तत्तद्व्रतेषूक्तं फलं शतगुणं भवेत्। - श्रीमन्नारायणे - जपे - १४

एकादश्याम् अर्चनविधिः फलञ्च

एकादश्यां सिते पक्षे उपोष्य विधिपूर्वकम्।

द्वादश्यां योऽर्चयेद्विष्णुं तस्य पुण्यफलं श्रुणु॥४॥

सर्वपापैर्विनिर्मुक्तो सर्वरोगैस्सुदारुणैः।

इह लोके परान् भोगान् विपुलाभिमतान् सुखम्॥५॥

भुक्त्वा कीर्तिं परां प्राप्य सर्वलोकातिशायिनीम्।

विष्णुलोकं समाप्नोति वैष्णवश्च भविष्यति॥६॥

यः कुर्यान्मासि मास्येवं तस्य पुण्यफलं श्रुणु।

चिन्तयेन्मनसा यद्यत्तत्तत्सम्प्राप्नुयान्नरः॥७॥

अणिमादिगुणान् भुक्त्वा पश्चात्कैवल्यमाप्नुयात्। - नारदीये - २४

एकादश्यादि पर्वदिनेषु देव दर्शनफलम्

एकादश्याममायांच सर्वपर्वसु शार्ङ्गिणः।

दर्शनंपावनं पुण्यमभीष्ट फलसिद्धिदम्॥६५॥ - परमपुरुषे - ४

अमावास्यादिने स्नपनम्

अमावास्यां विशेषेण कलशैस्स्नपनं चरेत्।

घृतं वा क्षीरमेवस्या न्नालिकेरजलं तु वा॥५॥

उक्तद्रव्यमथो वापि यजमानेच्छया गुरुः। - अनिरुद्धे - २२

<u>अमावास्यादिषु - सहस्त्रकलशादि स्नपनम्</u>

अनूराधे तु विप्रेन्द्रामावास्यां श्रवणेऽपि वा।

सहस्त्रकलशैर्देवं (कलशैस्स्नानं) तदर्धैर्वा तदर्धकैः॥ १०॥

अष्टोत्तरशतैर्वापि तन्न्यूनं न समाचरेत्। - अनिरुद्धे - २२

<u>अमावास्योत्सव फलम्</u>

अनेन विधिना सम्यक्कर्तव्यं वैष्णवोत्सवम्।

ग्रामवृद्धिकरं चैव सर्वपापप्रणाशनम्॥ १६॥

अमावास्योत्सवं सम्यक्कथितं ते महामते।

एतदालोक्य कर्तव्यं मासि मासि जनैर्मुने॥ १७॥ - वासिष्ठे - १७

<u>अमावास्यां तमो नाशनार्थं चक्राद्यायुध समर्पणम्</u>

अमावास्यां तमोनाशहेतवे देवमन्दिरे॥ ५॥

देवायायुधरूपेण चक्रखड्गाद्यमर्पयेत्। - वैहायसी - १५

<u>पौर्णम्यां सुवर्ण(वज्रमकुटम्) मकुटोत्सवः</u>

पौर्णमास्यां च देवस्य सुवर्णमुकुटं महत्।

इन्द्रनीलमणिचित्रविचित्रशोभितं दृढम्॥ ४॥

अर्पयेद् दर्शयेच्चैव महाहविः समर्पयेत्। - वैहायसी - १५

<u>विषुवद्वये - अयनद्वये चतुस्थानार्चनम्</u>

विषुवद्वितये विप्र! तथा चैवायनद्वये।

स्नपनं कारयेद्धीमान् अङ्कुरार्पणपूर्वकम्॥ २०॥

पूर्वेद्युः कौतुकं कुर्यात् चतुस्स्थानार्चनं तथा।

शयनाधिवासनं कृत्वा प्रातः काले समुद्धरेत्॥ २१॥

नित्यकर्म ततः कृत्वा द्वारादियजनं चरेत्।

कुम्भमण्डलकं पूज्य बिम्बे स्नपनमाचरेत्॥ २२॥ अनिरुद्धे - २७

विषु अयनेषु च - वाहनारोहणविधिः

उत्सवंबिम्बमादाय यात्रां सम्यक् समाचरेत्।

गजे वा स्यन्दने वापि शिबिकायां समाचरेत्॥ ३२॥ - अनिरुद्धे - २७

उत्तरायणपूजाक्रमः

उत्तरे त्वयने विप्रः कुम्भे चाग्नौ च मण्डले।

समावाह्य जगन्नाथं उपवासव्रतश्शुचिः॥ ३८॥

यजेत पूर्ववद्धोमं कर्तव्यं विप्रतोषणम्।

अनेन देशिकेन्द्रस्तु महाफलमवाप्नुयात्॥ ३६॥ - श्रीमन्नारायणे - जपे - ४

कल्पादि -युगादि - मन्वादि पूजा

कल्पादौ च युगादौ च मन्वादौ पुण्यवासरे।

दानं जापार्चनं कार्यं यथर्तुदिनसम्भवम्॥ ६५॥ - शाण्डिल्ये - २५

युगादि पूजाविधिः

वैशाखस्य तृतीयायां चन्दनाम्बरमाल्यकैः।

मण्डनैर्नवपाकैश्च युगादिषु च पूजयेत्॥ १८॥ - शाण्डिल्ये - २५

मासेशाराधनम्

मार्गशीर्षादि मासानामधिपाः केशवादयः॥ २७८॥

मासर्क्षेवा तिथौ यद्वा मासेशाराधनं चरेत्। - विष्णुतिलके - ८

<u>अङ्कुरार्पण पूर्वकं मासर्क्ष पूजा</u>

सर्वस्मिन्मासनक्षत्रे प्रादुर्भावदिनेषु च।

अर्चयित्वाकुरान् पूजा कार्या स्नपनपूर्विका॥ १३५॥ - पाद्मे - १५

<u>तुलसी - दमन - चम्पक आरोपणोत्सव कार्यक्रमाणि</u>

तुलस्यारोपणे चैव दमनारोपणं भवेत्।

चम्पकारोपणं विप्र! तथा कर्म समाचरेत्॥ १॥

अङ्कुरार्पणं ततः कुर्यात् तथा वै कौतुक्रियाम्।

निशि पूजाविधानञ्च अधिवासञ्च भूषणम्॥ २॥

त्रिस्थानयजनं चैव होमकर्मविधिस्तथा।

स्नपनं तु विशेषेण नालिकेरजलैर्भवेत्॥ ३॥

केवलं गन्धतोयैर्वा तदभावे विशेषतः।

अधिवासविधौ ब्रह्मन्! सद्यो द्रव्याधिवासनम्॥ ४॥

यात्राकाले तु विप्रेन्द्र! पुष्पदाम प्रशस्यते।

विकिरेत् सर्वतो विप्र! पुष्पैश्च सुगुणैर्यथा॥ ५॥

अन्यानि सर्वकर्माणि पूर्ववत्कारयेद्विज। अनिरुद्धे - २३

<u>वसन्त ऋतौ - संवत्सरारम्भ पूजा</u>

वसन्ते देवतृप्त्यर्थं वर्षादौ पूजयेद्धरिम्।

विधिवत्स्नपनं कृत्वा नवाभरण वस्त्रकैः॥ १॥ - पुरुषोत्तमे - २७

<u>चैत्रमास रोहिणीपूजा (अक्षय तृतीया) - तस्य पलञ्च</u>

मधुमासे तु रोहिण्यां मध्याह्ने वा निशामुखे।

स्नपनं विधिवत्कृत्वा निवेद्य च महाहविः ॥ ८१ ॥

होमं कृत्वा विधानेन पूजयित्वा गुरुं तथा।

प्रदक्षिणनमस्कारैः पूजयेत्पुरुषोत्तमम् ॥ ८२ ॥

यथाशक्त्या तु विप्रेन्द्र तस्य पुण्यफलं श्रुणु।

इह राज्यं तु सम्प्राप्य निष्कण्टकमनुत्तमम् ॥ ८३ ॥

सर्वभोगैस्तु सहितं सर्वै वै सुन्दरीगणैः।

मन्त्रिभिः स्ववशैर्युक्तो राजभिश्चापरैर्वृतः ॥ ८४ ॥

भुक्त्वा भोगान् तु विविधान् अभीष्टानिह सर्वदा।

प्रेत्याप्सरोभिः सहितः स्वर्गलोके महीयते ॥ ८५ ॥

तत्रापि भोगान् सम्प्राप्य विष्णुलोकं स गच्छति। - नारदीये - २४

<u>वैशाखपूजा महिमा</u>

वैशाखे वैष्णवादिभ्यो यो ददाति गुडोदकम्।

वैष्णवेभ्यस्तु यो दद्यात् सोपि वैकुण्ठमाश्रयेत् ॥ १६२ ॥

सर्वदावैष्णवान्नन्तु भुञ्जीयाद्विबुधोत्तमाः।

साक्षाद्धरि प्रसादन्तु तद्भवेन्नच संशयः ॥ १६३ ॥ - परमपुरुषे - ४

<u>ग्रीष्मकाले भगवत्समर्पण योग्यवस्तु कथनम्</u>

ग्रीष्मकालेतु सम्प्राप्ते हरिसन्तर्प्य शीतळैः।

दध्यन्नाद्यैर्नरो भूयात्सर्व किल्बिष वर्जितः ॥ १६१ ॥ - परमपुरुषे – ४

<u>मार्गशिर मासे विष्णुपञ्चमी पूजा</u>

श्रवणस्यैवमाचार्यं कुर्याद्याग विशेषतः।

सोमसूर्यग्रहेपिच अयने विषुवेपि च? ॥ १४८ ॥

तथैव <u>विष्णुपञ्चम्यां</u> विष्णवे विष्णुभक्तितः।

एवं तु वैष्णवं यागं करोति विविधं चरेत्॥ १४९ ॥

अश्वमेधफलं प्राप्य विष्णुलोके महीयते। - वासिष्ठे - १२

<u>मकरमासे - पुष्यनक्षत्रे - पौर्णम्यां च विशेष पूजा</u>

पुष्ये च मासि नक्षत्रे पौर्णमास्यामथापि वा ॥ ५७ ॥

आराधनं भगवतस्सर्वपापविनाशनम्। - पाद्मे - १५

<u>मकरसङ्क्रान्ति दिने गो - भू - हिरण्य - कूश्माण्ड - व्रीहि दानानि</u>

मकरस्थे दिनकरे तत्काले सङ्क्रमे द्विजाः ॥ २५१ ॥

संस्नाप्य देवदेवेशं पञ्चविंशतिभिर्घटैः।

अलङ्कृत्य विशेषेण हविरादीन्निवेदयेत्॥ २५२ ॥

तत्काले यजमानश्च गोभूस्वर्णादिकांस्तथा।

कूश्माण्डव्रीहिदानञ्च कुर्याद्देवस्य तुष्टये॥ २५३ ॥ - ईश्वरे – १३

<u>माघमासे पञ्चम्यादि तिथौ विशेषपूजा (रथ सप्तमि)</u>

माघमासे तु पञ्चम्यां सप्तम्यामथ वा द्विजाः।

विशेषोत्सवरूपेण पूजनीयः महाप्रभुः ॥ ३० ॥ - वैहायसी – १०

<u>फाल्गुन पञ्चम्योत्सवः</u>

तपस्ये मासि पञ्चम्यां शुक्लपक्षे विशेषतः ॥ ७८ ॥

स्नपनाद्यं तु होमान्तं सम्पूज्य च निशानने।

वाहनैर्विविधैर्देवं यजेदश्वैर्गजैः रथैः ॥ ७९ ॥

शिबिकाद्यैस्तथा चान्यैर्यो यजेद्विधिपूर्वकम्।

सर्वान् कामानवाप्नोति यद्गत्वा न निवर्तते॥८०॥ - नारदीये - २४

---

<u>गन्ध -रजनी लेपनोत्सव प्रमाणानि</u>

<u>गन्धालेपनोत्सव मासः</u>

मार्गशीर्षे मासि ऋक्षे गन्धालेपनमाचरेत्॥१७॥ - अनिरुद्धे - २२

<u>हरिद्रालेपन मासः</u>

पुष्ये मासि च मासर्क्षे हरिद्रालेपनं चरेत्॥२१॥ - अनिरुद्धे - २२

<u>लेपन मानम्</u>

लेपने तु विशेषेण मानं वक्ष्यामि सुव्रत!।

आकण्ठस्थानपर्यन्तं प्रथमं परिलेपयेत्॥४१॥

स्थानान्नाभ्यवधि ब्रह्मन्! द्वितीयं परिलेपयेत्।

नाभ्या कट्यवधि ब्रह्मन्! तृतीयं परिचक्षते॥४२॥

अक्षात्पादावधि यावत् चतुर्थं परिलेपयेत्।

आकण्ठान्नाभिपर्यन्तं देवीभ्यां मानमीरितम्॥४३॥ - अनिरुद्धे - २२

<u>गन्धालेपन विधिः -लेपभित्तिमय मूलबेरस्य विधिः</u>

कर्पूरं प्रथमं प्रोक्तं कुङ्कुमं तदनन्तरम्।

चन्दनन्तु ततः पश्चात् बाह्लीकं तदनन्तरम्॥३७॥

अथवा मिश्रितं वापि आमूर्धं प्रथमं भवेत्।

नाभ्यान्तन्तु द्वितीयं स्यात्तृतीयं जानुमानकम्॥३८॥

चतुर्थं पादमानं स्याद्देवीभ्यां कटिमानकम्।

मूलबेरे तथा प्रोक्तं मानं वै द्विज सप्तकम्॥ ३९॥

लेपभित्तिपटस्थे तु कर्मार्चायां समाचरेत्।

कलशस्नपने विप्र केवलं गन्धतोयकम्॥ ४०॥

घृतं च क्षीरमेकं वा नालिकेरजलं तु वा।

गन्धाभावे विशेषेण ह्रीबेरं संप्रशस्यते॥ ४१॥ - अनिरुद्धे - २३

<u>रजनीस्नान - लेपन कालः कार्यक्रमानि</u>

पुष्ये मासि च मार्क्षे रजनीस्नानमाचरेत्।

अङ्कुरं कौतुकं कृत्वा मण्डपालङ्कृतिं तथा॥ १॥

द्वारपूजाविधिं चैव चतुस्स्थानार्चनं तथा।

स्नपनं शयनं चैव अधिवासं तथा भवेत्॥ २॥

सकलं पूर्ववत्कृत्वा पूर्वकर्मावधारय। - अनिरुद्धे - २८

---

## <u>पुष्पोत्सव प्रमाणानि</u>

<u>मासर्क्षे पत्रपुष्पार्चनम्</u>

मासर्क्षे विषुवे चैव पत्रपुष्पादिकैर्यजेत्। - अनिरुद्धे – २२

<u>मासभेदेन आरोपण पुष्प भेदाः</u>

माघमासे तु माघर्क्षे दमनारोपणं चरेत्॥ ७॥

फाल्गुने मासि ऋक्षे च तुलस्यारोपणं चरेत्।

चैत्रे तु मासऋक्षे तु चम्पकेनार्चनं चरेत्॥ ८॥

वैशाखमासे ऋक्षे च शतपत्रेण पूजयेत्। - अनिरुद्धे – २२

<u>पद्मोत्सव मासः</u>

भाद्रपदे मासि ऋक्षे पङ्कजाराधनं चरेत्। - अनिरुद्धे – २२

<u>श्वेतपद्मोत्सव मासः</u>

आश्वयुजे मासि ऋक्षे श्वेतपद्मस्समर्चयेत्॥ १५॥

तन्मासे तु विशेषेण शयनोत्थापनं चरेत्। - अनिरुद्धे – २२

<u>पुष्पारोपणादि उत्सव कार्यक्रमाणि</u>

प्रथमञ्चाङ्कुरं वापि मण्डपालङ्कृति तथा।

शुद्धस्नानं तृतीयञ्च चतुर्थे द्वारपूजनम्॥ २५॥

चतुस्स्थानार्चनञ्चैव पञ्चमं समुदाहृतम्।

षष्ठं कौतुकबिम्बं स्यात्ततश्शयनकल्पनम्॥ २६॥

शयनाधिवासने चैव रक्षा कार्या ततः परम्।

प्रातस्स्नानं ततः कुर्यात् कलशैस्स्नपनं भवेत्॥ २७॥

द्वारपूजाविधानञ्च चतुस्स्थानार्चनं तथा।

निवेदनं बलिञ्चैव भूषणारोपणं तथा॥ २८॥

भूषणारोपणं विप्र! पूजायास्संपुटं भवेत्।

वेदघोषं ततः श्लोकदानं नीराजनं तथा॥ २९॥

गीतं वाद्यं तथा नृत्तं होमद्रव्यबलिर्भवेत्।

यात्रोत्सवं ततः कुर्यात् तत्प्रसादप्रदापनम्॥ ३०॥

पूजावरोहणं चैव पुनः पूजां समाचरेत्।

शुद्धस्नानं ततः कृत्वा तथास्थाननिवेशनम्॥३१॥

दक्षिणां सुप्रदानञ्च इति कर्मक्रमं विदुः।

एतत्कर्मक्रमेणैव सर्वकर्माणि कारयेत्॥३२॥ - अनिरुद्धे – २२

<u>पुष्प -पत्र -पवित्राणां मान प्रकारः</u>

प्रथमं नाभिमानञ्च द्वितीयञ्चोरुमध्यगम्।

तृतीयं जानुमानन्तु चतुर्थं पादमानकम्॥३३॥

पुष्पपत्रपवित्रेषु प्रमाणं परिकीर्तितम्।

कुम्भमण्डलकुण्डेषु एतन्मानमुदाहृतम्॥३४॥

स्थूलमानं तथाप्रोक्तं देवीभ्यां नाभिमानकम्।

स्थूलया सङ्गबिम्बानां नाभिमानं प्रशस्यते॥३५॥

भूषणायुधशक्तीनां तालमानं प्रशस्यते। - अनिरुद्धे – २२

<u>चम्पकाभावे कर्तव्यः</u>

चम्पकानामभावे तु पाटलं परिकीर्तितम्॥६॥ - अनिरुद्धे – २३

<u>पत्र - पुष्पोत्सवे प्रधानत्वम्</u>

पत्रपुष्पोत्सवे विप्र! भूषणैः परिभूषयेत्। - अनिरुद्धे – २३

<u>पद्मोत्सव मासः</u>

मासेचाश्वयुजे विप्र! जलजैः परितो यजेत्॥२६॥

पङ्कजोत्सवं तु कुर्यात् जलजै श्चैव देशिकः।

जलजं त्रिविधं प्रोक्तं उत्पलं त्रिविधं भवेत्॥२७॥ - अनिरुद्धे – २३

<u>पद्मानाम् अभावे क्रमः</u>

पङ्कजानामभावे तु जातिपुष्पैः प्रपूजयेत्।

पूर्ववत्सकलं कर्म कार्यं विप्रवरेण तु॥२८॥ - अनिरुद्धे – २३

रक्तपद्मैस्तथा श्वेतैः कल्हारैस्तदभावतः।

<u>पत्र - पुष्पोत्सवे पुष्पेणैव मण्डलं -यानालङ्कारः -पुष्पकविमानं -पुष्पवृष्टिश्च</u>

तद्दलैर्मण्डलं कुर्यात् यानालङ्कृतमेव च॥२९॥

विमानं पुष्पकं कुर्यात् पुष्पवृष्टिस्तथा भवेत्। - अनिरुद्धे – २३

<u>पद्मोत्सवे मण्डल प्रकारः</u>

पङ्कजोत्सवके विप्र मण्डलं बहुपङ्कजम्॥३०॥ - अनिरुद्धे – २३

-----------------------------------------------------------------

## <u>उपरागस्य प्रमाणानि</u>

<u>उपरागे स्नपनं - समुद्रादौ निमज्जनञ्च</u>

निमज्जयेत् समुद्रादौ ग्रहणे चन्द्रसूर्ययोः।

स्नपनं वा प्रकुर्वीत यथार्हं कमलासन!॥२९६॥ - विष्णुतिलके – ८

<u>उपरागे कार्यक्रमानि</u>

चन्द्रसूर्योपरागे च तत्कालात् पूर्वमेव तु।

चतुस्थानस्थितस्यापि स्थानद्वयगतस्य च॥११६॥

देवस्य यजनं कृत्त्वा होमान्तं स्नपनादिकम्।

औपचारिकसांस्पर्शैः प्रभूतैर्हृदयङ्गमैः॥११७॥

पयोघृतादिभिः सम्यक् सविशेषैर्महामते।

ततोऽक्षसूत्रमादाय तावत् कुर्याज्जपं सुधीः ॥ ११८॥

यावद्राहुविमुक्तस्य चन्द्रादेर्दर्शनं भवेत्।

पूजाहोमजपादीनां फलानन्त्यमवाप्नुयात्॥ ११९॥

अन्यथा विफलं कर्म कर्तुर्व्याध्यादिपीडनम्। - पारमेश्वरे - ९

--------------------------------------------------------------------

## महालक्ष्म्याः शुक्रवारपूजा

प्रति शुक्रवारे महालक्ष्म्युत्सवम्


शुक्रवारे तु देव्यास्तु मासि मास्युत्सवं चरेत्॥ ६२॥ - श्रीप्रश्ने – ४८

********************


***** उत्सव रत्नावल्यां प्रथमोभागे प्रमाणावलिः संपूर्णम्*****

श्रीः


# <u>मुद्रा चित्राणि</u>




ब्रह्ममुद्रा




विष्णु मुद्रा




रुद्र मुद्रा




गङ्गा -यमुना मुद्रा




मत्स्य मुद्रा




कूर्म मुद्रा




नृसिह्म मुद्रा



वराह मुद्रा




वामन मुद्रा



राम मुद्रा



श्रीकृष्ण मुद्रा



कल्कि मुद्रा


श्रीः

# वास्तु चित्रम्



# <u>वास्तु चित्रम्</u>

(वर्तमानोक्ता)



श्रीः

# मेदिनी चित्रम्




श्रीः


## ध्वजपट चित्राणि



पाद्म संहिता



ईश्वर -पारमेश्वर संहिता – उत्तमपक्षः



ईश्वर -पारमेश्वर संहिता – द्वितीयःपक्षः




# मार्कण्डेय संहिता



श्रीप्रश्न संहिता

श्रीः

# श्रीरामोत्सवे हनुमद्ध्वजपट चित्रम्




पाद्म संहितानुसारेण कल्पितम्

श्रीः

# यागशाला चित्राणि

## पालिका घटिका शराव स्थापन क्रमः

प्राची



होमकुण्डः



धान्यपात्रः



पालिका

घटिका

शराव मण्डलं




सोमकुम्भः

## सोमकुम्भस्य परितः षोडशपालिकाः स्थापन क्रमः


| | | | | |
|---|---|---|---|---|
| 16 | | 9 | | 10 |
| | 8 | 1 | 2 | |
| 15 | 7 | सोम कुम्भः | 3 | 11 |
| | 6 | 5 | 4 | |
| 14 | | 13 | | 12 |

## वेदिकायां महाकुम्भाद्यष्टमङ्गलादीनां स्थापनक्रमः


प्राची




# पूर्वद्वारम्


पूर्वे रुग् रूपे
सुशोभन नाम्नि
रक्त ध्वजयोः
ओं कुमुदाक्षाय नमः
ओं पूर्णाय नमः
अश्वत्थ तोरणे
ओं लं इन्द्राय नमः
ओं कुमुदाय नमः
ओं पुष्कराय नमः


# दक्षिणद्वारम्


दक्षिने यजुर्ऐर्पे
सुभद्र नाम्नि
पीत ध्वजयोः
ॐ वामनाय नमः
ॐ आनन्दाय नमः
औदुम्बर तोरणे
ॐ हं यमाय नमः
ॐ पुण्डरीकाय नमः
ॐ नन्दनाय नमः

# पश्चिमद्वारम्



पश्चिम साम रूपे
सुबन्ध नाम्नि
नील ध्वजयोः
ॐ सर्वनेत्राय नमः
ॐ वीरसेनाय नमः
न्यग्रोध तोरणे
ॐ वं वरुणाय नमः
ॐ शङ्खकर्णाय नमः
ॐ सुषेणाय नमः

# उत्तरद्वारम्


प्लक्ष तोरणे
ॐ सं सोमाय नमः
ॐ सुमुखाय नमः
ॐ प्रभवाय नमः
उत्तरे अथर्व रूपे
सुहोत्र नाम्नि
शुक्ल ध्वजयोः
ॐ सुप्रतिष्ठाय नमः
ॐ संभवाय नमः


## यागाशालायां पञ्चकुण्ड -कुम्भ -मण्डल -बिम्ब -पालिका स्थानानि

**प्राची**




श्रीः


## अष्टमङ्गल चित्राणि




श्रीवत्सम्




पूर्णकुम्भः




भेरी




दर्पणमण्डलम्




मत्स्ययुग्मम्



शङ्खम्




चक्रम्




काश्यप नन्दनः

श्रीः

# चक्राब्जमण्डलम्




## चक्राब्जमण्डलाङ्गानि




| | |
|---|---|
| 1.कर्णिका | 8. नेमिः |
| 2. केसराणि | 9. पीठः |
| 3. दलानि | 10. वीथिः |
| 4. दलभूमिः | 11. द्वारः |
| 5. नाभिः (आवरणत्रयम्) | 12. शोभा |
| 6. अराणि | 13. अर्धशोभा |
| 7. अरान्तवलयम् | |

श्रीः

## पवित्रमाला चित्रम्



मातुलङ्गफलाकार ग्रन्थिः

मुक्ताकार ग्रन्थिः



शङ्खाकार ग्रन्थिः

श्रीः

# कृत्तिकादीपोक्त विशेषाकार दीपचित्राणि


## मार्कण्डेय संहिता



चक्राकृति दीपः



शङ्खाकृतिदीपः




कूर्माकृति दीपः



मत्स्याकृति दीपः



कूटाकृति दीपः



धनुराकृति दीपः


श्रीः

# स्नपन चित्राणि

## एकोत्तर अशीतीकलश(अधमोत्तम) स्नपनविधिः

### कलशे आवाहन क्रमः

प्राची




| | | |
|---|---|---|
| 1. वासुदेवः | 7. नारायणः | 13. वामनः |
| 2. पुरुषः | 8. माधवः | 14. श्रीधरः |
| 3. सत्यः | 9. गोविन्दः | 15. हृषीकेशः |
| 4. अच्युतः | 10. विष्णुः | 16. पद्मनाभः |
| 5. अनन्तः | 11. मधुसूदनः | 17. दामोदरः |
| 6. केशवः | 12. त्रिविक्रमः | इतरेषु नारायणः |

## <u>कलशोत्थापन क्रमः</u>

### प्राची

| | | |
|---|---|---|
| | | |
| | 8 | |
| | | |

| | | |
|---|---|---|
| | | |
| | 1 | |
| | | |

| | | |
|---|---|---|
| | | |
| | 5 | |
| | | |

| | | |
|---|---|---|
| | | |
| | 4 | |
| | | |

| | | |
|---|---|---|
| 16 | 9 | 13 |
| 12 | 17 | 10 |
| 15 | 11 | 14 |

| | | |
|---|---|---|
| | | |
| | 2 | |
| | | |

| | | |
|---|---|---|
| | | |
| | 7 | |
| | | |

| | | |
|---|---|---|
| | | |
| | 3 | |
| | | |


| | | |
|---|---|---|
| | | |
| | 6 | |
| | | |

पाद्यादि द्रव्यकलशान् क्रमेण उत्थाप्य

श्रीः

## षोडशकलश स्नपने आवाहन क्रमः


प्राची




| | |
|---|---|
| 1. रत्नोदकं - पुरुषः | 9. अमृतोदकं - विष्णुः |
| 2. लोहोदकं - सत्यः | 10. मार्जनोदकं - मधुसूदनः |
| 3. गन्धोदकं - अच्युतः | 11. कषायं - त्रिविक्रमः |
| 4. आज्यं - अनन्तः | 12. कुशोदकं - वामनः |
| 5. पाद्यं - केशवः | 13. दधि - श्रीधरः |
| 6. अर्घ्यं - नारायणः | 14. क्षीरं - हृषीकेषः |
| 7. आचमनं - माधवः | 15. मधु - पद्मनाभः |
| 8. पञ्चगव्यं - गोविन्दः | 16. यवोदकं - दामोदरः |

## षोडशकलश स्नपन उत्थापन क्रमः


प्राची




पाद्यादि द्रव्यकलशान् क्रमेण उत्थाप्य

श्रीः

# पूरणोत्सवोक्त पञ्जरचित्रम्



श्रीः

अनुबन्धः -१

श्रीमद्वरदगुरुणा विरचित पाद्मतन्त्रप्रयोगस्थ

## <u>अपराजित महामन्त्रः</u>

ओं नमो भगवते अनन्ताय सहस्रशीर्षाय सुगन्धक्षीरोदार्णवशायिने शेषभोगपर्यङ्काय गरुडवाहनाय वासुदेवाय नमः पीतवाससे सङ्कर्षण प्रद्युम्नानिरुद्ध हयशीर्ष वराह नृसिंह वामन त्रिविक्रम राम राम राम कृष्ण वरप्रद नमोऽस्तु ते। असुर दैत्य यक्ष राक्षस भूत पिशाच सिद्ध योगिनी डाकिनी ब्रह्मराक्षस विनायक पूतना रेवती स्कन्द (पुरोगम) ग्रहादि नक्षत्रग्रहान् अन्यांश्च महतो ग्रहान् हन हन, पातय पातय, ख्यात ख्यात, गृह्ण गृह्ण, ज्वल ज्वल, विश विश, ध्वंसि ध्वंसि, त्रासि त्रासि, द्रुह्य द्रुह्य, चक्रेण गदया वज्रेण भस्मी कुरु। सहस्रार सर्वमुख प्रहरणायुधबाहो, जय जय विजय विजयानन्तापराजिताप्रतिहत सहस्रनेत्र, प्रज्वल प्रज्वल, विश्वरूप मधुसूदन महापुरुष वैकुण्ठनारायण पद्मनाभ हृषीकेश सर्ववशङ्कर शङ्खचक्रगदाधर सर्वभूतनमस्कृत सर्वनागप्रमर्दन सर्वासुरोत्सादन सर्वदेवमहेश्वर सर्वग्रहनिवारण सर्वयन्त्रप्रभञ्जन सर्वदुःखप्रशमन सर्वज्वरविनाशन सर्वबन्धविमोक्षण सर्वदुस्वप्ननाशन सर्वभूतनमस्कृत सर्वभूतापकर्षण जनार्दन नमोऽस्तु ते॥

*******************

श्रीः

अनुबन्धः -२

## विशेष ब्रह्मादिपरिवार होमः

(श्रीप्रश्न संहितोक्ता)

ब्रह्माधिपतये श्यामवर्णाय पद्मनाभाय सपरिवाराय स्वाहा।

रुद्राधिपतये रक्तवर्णाय सङ्कर्षणाय सपरिवाराय स्वाहा।

इन्द्राधिपतये रक्तवर्णाय त्रिविक्रमाय सपरिवाराय स्वाहा।

प्रणवाधिपतये शुद्धस्फटिकवर्णाय वासुदेवाय सपरिवाराय स्वाहा।

ऋग्वेदाधिपतये श्यामवर्णाय नारायणाय सपरिवाराय स्वाहा।

यजुर्वेदाधिपतये रक्तवर्णाय सङ्कर्षणाय सपरिवाराय स्वाहा।

सामवेदाधिपतये हैमवर्णाय प्रद्युम्नाय सपरिवाराय स्वाहा।

अथर्ववेदाधिपतये नीलोत्पलनिभाय अनिरुद्धाय सपरिवाराय स्वाहा।

ऋषीणामधिपतये पद्मकिञ्जल्कवर्णाय विष्णवे सपरिवाराय स्वाहा।

गन्धर्वाणामधिपतये हेमवर्णाय वामनाय सपरिवाराय स्वाहा।

सर्वेषां देवानामधिपतये कनकवर्णाय प्रद्युम्नाय सपरिवाराय स्वाहा।

यक्षानामधिपतये पाण्डरवर्णाय श्रीधराय सपरिवाराय स्वाहा।

मासानामधिपतये कनकवर्णाय केशवाय सपरिवाराय स्वाहा।

वत्सराणामधिपतये पीतवर्णाय अच्युताय सपरिवाराय स्वाहा।

समुद्राणामधिपतये रक्तवर्णाय जनार्दनाय सपरिवाराय स्वाहा।

पर्वतानामधिपतये पीतवर्णाय हरये सपरिवाराय स्वाहा।

प्रजानामधिपतये शुद्धस्फटिकवर्णाय पुरुषोत्तमाय सपरिवाराय स्वाहा।

भूतानामधिपतये बन्धूकसदृशाय पद्मनाभाय सपरिवाराय स्वाहा।

पशूनामधिपतये नीलवर्णाय कृष्णाय सपरिवाराय स्वाहा।

वृक्षानामधिपतये श्यामवर्णाय अच्युताय सपरिवाराय स्वाहा।

ओषधीनामधिपतये कालमेघनिभाय पद्मनाभाय सपरिवाराय स्वाहा।

वनस्पतीनामधिपतये स्फटिकवर्णाय माधवाय सपरिवाराय स्वाहा।

जरायुजानामधिपतये सितवर्णाय वासुदेवाय सपरिवाराय स्वाहा।

अण्डजानामधिपतये रक्तवर्णाय सङ्कर्षणाय सपरिवाराय स्वाहा।

स्वेदजानामधिपतये हेमवर्णाय प्रद्युम्नाय सपरिवाराय स्वाहा।

उद्भिज्जानामधिपतये श्यामवर्णाय अनिरुद्धाय सपरिवाराय स्वाहा।

भुवनानामधिपतये श्यामवर्णाय अनिरुद्धाय सपरिवाराय स्वाहा।

************

श्रीः

अनुबन्धः -३

## अष्टदिग्बन्धनविधिः

(वर्तमाने देशाचारानुसारेण अचरणक्रमः)

अर्घ्यपात्र- घण्टाक्षत-गन्धपुष्प- धूप- दीप- बल्यन्नाणि च सम्पाद्य। सर्वविध वाद्य- वेदघोषेण बलिबेरेणसाकं दिग्बन्धनं कारयेत्॥ आचार्यः प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्य देवदेवस्य भगवतो वासुदेवस्य श्री भूमि नीला----नायिका समेत श्री----स्वामि सन्निधौ----

महोत्सवकर्मणि धवजारोहणानन्तरम् अष्टदिग्बन्धनकर्म करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। प्राकारस्य अष्टदिक्षु क्रमेण तत्तद्दिग्देवताम् आवाह्य। बलिं दत्त्वा। पूर्वे इन्द्रदिग्भागे आधारादीन् अभ्यर्च्य।

इन्द्रः

दम्भोलिभीषणभुजाय सुराधिपाय
श्यामाय दानवकुलक्षय कारणाय।
पूर्वाधिपाय सुरवारण-वाहनाय
तुभ्यं पुलोमतनयापतये नमोऽस्तु॥

ओं लं इन्द्राय नमः आगच्छ आगच्छ इन्द्रं लोकपालकम् आवाहयामि। आसनं समर्पयामि----दीपं समर्पयामि। इन्द्रस्य मेघतालं। कल्याणिरागं। भुजङ्गनृत्तं।

दिमित दितिसुत युवति कुचतट घटितकुङ्कुम हारिणम्।
समत घणमख जवन निजगज गमन लोलुप मानसम्।
वितत सुरतरु बहुल परिमल कुसुमदाम विराजितम्।
नमत शतमख मनसमभिनव नील नीरद् मेचकम्। तत्तत्।

प्राच्यां दिशि ऐरावत-वाहनारूडः वज्रायुधधरः इन्द्रः सशक्ति-परिवारो दिग्देवताधिपतिसहितः इन्द्रादि आग्नेयान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत-पिशाचापस्मार-शाकिनी-ढाकिनी -वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां(धामं) रक्ष रक्ष अचल अचल आक्रम्याक्रम्य महावज्र-कवचाय हुं फट् स्वाहा।

ओं लं इन्द्राय नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं त्रातारमिन्द्रं मवितारमिन्द्रꣳहवेहवे सुहवꣳशूरमिन्द्रं। हुवेनु शक्रं पुरुहूतमिन्द्रꣳꣳस्वस्तिनो मघवाधात्विन्द्रः। इति मन्त्रेण नीराज्य।

## अग्निः

आग्नेय दिग्भागे आधारादीन् अभ्यर्च्य।

अग्ने तु हव्यमनिशं वहते सुराणां
कव्यं समीपमथवा नयते पितृणाम्।
धूमध्वजाय दहनाय जुहूदराय
शोणाय कोणपतये भवते नमोऽस्तु॥

ओं रं अग्नये नमः आगच्छ आगच्छ अग्निं लोकपालकम् आवाहयामि।

आसनं----दीपं समर्पयामि। अग्नेर्बद्धाव तालं। गौलरागं। सर्वतोभद्र नृत्तं।

अग्नि ममुज्ज्वलित प्रभ मूर्जित जित्प्रभ देश गतिम्।
झल्लि मुरारि धृढक्रम शक्ति सुजीवित कृत्म गतिम्।
यज्ञ हुताशन दाहन दुरितं क्रममय दिति तौघम्।
वाहन मेषं वर-दहनप्रिय सन्ततदास हितम्।
साह जितागत चन्द्रक भूषण शक्ति सदासहितम्।
दाहन मोहन हुङ्कृति सेवित दान दयावरदम्।
निखिल कृत गुणनिगमस्तोम विनोदक विश्व जनम्।
काहल शङ्ख समद्धल पटह हरिद्रिक तालमिदम्। तत्तत्।

आग्नेयां दिशि मेष-वाहनारूढः स्रुक्स्रुवधरः अग्निः सशक्ति परिवारो

दिग्देवताधिपतिसहितः आग्नेयादि दक्षिणान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत-पिशाचापस्मार-शाकिनी-ढाकिनी -वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां(धामं) रक्ष रक्ष अचल अचल आक्रम्याक्रम्य महावज्र-कवचाय हुं फट् स्वाहा।

ओं रं अग्नये नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं त्वन्नौ अग्ने वरुणस्यविद्वान् देवस्य हेडोवयासिसीष्ठाः।

यजिष्ठो वह्नितम श्शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत्

इति मन्त्रेण नीराज्य। दक्षिणदिग्भागे आधारादीन् अभ्यर्च्य।

<u>यमः</u>

कालाय लोकसमदण्डविधायकाय
नीलप्रभाय महिषाधिपवाहनाय।
दण्डायुधाय तनयाय विकर्तनस्य
देवाय दक्षिणदिशाम्पतये नमोऽस्तु॥

ओं हं यमाय नमः आगच्छ आगच्छ यमं लोकपालकम् आवाहयामि।

आसनं समर्पयामि----दीपं समर्पयामि। यमस्य भृङ्गिणीतालं।

काम्भोधिरागं। कुट्टिमनृत्तं।

प्रणमत शमणं प्रणमत शमणं करधृत वरदण्डम्।
त्रिभुवन हरिणं वाहन महिषा प्रघटित महिमानम्।
काल सुवर्ण कराल तटाकृति कङ्कणभूषणकम्।
अगणित विभवं परिजन सहितं कलशज ककुबीशम्। तत्तत्।

दक्षिणस्यां दिशि महिष वाहनारूढः पाश -दण्डहस्तः यमः सशक्ति परिवारो दिग्देवताधिपतिसहितः याम्यादि नैर्ऋत्यान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत- पिशाचापस्मार-शाकिनी -ढाकिनी-वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां(धामं) रक्ष रक्ष अचल अचल आक्रम्याक्रम्य महावज्र-कवचाय हुं फट् स्वाहा।

ओं हं यमाय नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं सुगन्नः पन्थामभयङ्कृणोतु। यस्मिन्नक्षत्रे यमएति राजा।
यस्मिन्नेनमभ्यषिञ्चन्त देवाः। तदस्यचित्रꣳहविषायजाम

इति मन्त्रेण नीराज्य। नैर्ऋतिदिग्भागे आधारादीन् अभ्यर्च्य।

निर्ऋतिः

श्यामाय भीषणमृगाधिप-वाहनाय
कोणाधिपाय लसदुग्रकृपाणकाय।
तुभ्यं पिशाचकुलराक्षसयातुधान
सेनावतः प्रियकृते निर्ऋते नमोऽस्तु॥

ओं षं निर्ऋतये नमः आगच्छ आगच्छ निर्ऋतिं लोकपालकम् आवाहयामि।
आसनं----दीपं समर्पयामि। नैऋतेर्मल्लतालं। देशाक्षिरागं। कमलबन्धनृत्तम्
सप्त घण वृद्ध गण दुर्जत विमर्धकर चित्र करणप्रहसितेता।
मद्धल मुखप्रहितशब्द निहितक्षण पुरस्सरसुराऽसुर सुवीर।
सत्य रस भक्तजन रक्षण समर्थ हरित प्रचुर सत्यविद्धेतः।
विघ्नकर शत्रुजन मत्तकर चित्रकरण प्रहसि तक्षणमुपेतः। तत्तत्।

नैर्ऋत्यां दिशि हय वाहनारूढः खड्ग -केटाङ्गहस्तः निर्ऋतिः सशक्ति परिवारो दिग्देवताधिपतिसहितः नैर्ऋत्यादि पश्चिमान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत-पिशाचापस्मार-शाकिनी -ढाकिनी-वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां रक्ष रक्ष अचल अचल आक्रम्याक्रम्य महावज्र-कवचाय हुं फट् स्वाहा।

ओं षं निर्ऋतये नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं असुन्वन्तमयजमानमिच्छस्तेनस्येत्यान् तस्करस्यान् वैषि।

अन्यमस्मदिच्छ सातं इत्या नमोदेवि निर्ऋते तुभ्यमस्तु

इति मन्त्रेण नीराज्य। पश्चिमदिग्भागे आधारादीन् अभ्यर्च्य।

<u>वरुणः</u>

श्यामलाय मकराधिरोहिणे

तुभ्यमुल्लसितपाशपाणये।

जीवनाय वरुणाय कुर्महे

देहिनामपरदिक्पतये नमोऽस्तु(नमः)॥

ओं वं वरुणाय नमः आगच्छ आगच्छ वरुणं लोकपालकम् आवाहयामि।

आसनं----दीपं समर्पयामि। वरुणस्य मङ्गलतालं। नाट्टरागं।कमलनृत्तम्।

शतमख कुलिशं क्षितिभृतद्दडिमत प्रणमतसुरवरनिकुरम्भम्।

मकर प्रवर प्रकरसि सुर सृङ्मकुटप्रकटित नवरत्नम्।

धमधम परिवृत परिवृत शरमणि मृदुज्वल जलनिधि मुदितान्तम्।

उदनिधि सदनो निवसतु निरतं विददतु वरुणो मम भूतम्। तत्तत्।

पश्चिमायां दिशि मकर वाहनारूढः पाशहस्तः वरुणः सशक्तिपरिवारो दिग्देवताधिपतिसहितः पश्चिमादि वायव्यान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत-पिशाचापस्मार-शाकिनी-ढाकिनी -वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां(धामं) रक्ष रक्ष अचल अचल आक्रम्याक्रम्य महावज्र कवचाय हुं फट् स्वाहा।

ओं वं वरुणाय नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं इमम्मे वरुणश्रुधीहव मद्याचमृडय। त्वामवस्युराचके।

तत्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः।

अहेडमानो वरुणे हबोद्धुरुशꣳ समान आयुः प्रमोषीः

इति मन्त्रेण नीराज्य। वायव्यदिग्भागे आधारादीन् अभ्यर्च्य।

<u>वायुः</u>

प्राणादि भेदकजुषे घृतकेतनाय

धूम्राय तुङ्गमृगपुङ्गव-वाहनाय।

कोणाधिपाय जगतामधिपावनाय

वाताय तीव्रगतये भवते नमोऽस्तु॥

ओं यं वायवे नमः आगच्छ आगच्छ वायुं लोकपालकम् आवाहयामि।

आसनं----दीपं समर्पयामि। वायोर्जयतालं। श्रीरागं। पृष्टकुट्टिमनृत्तम्।

सुर पुर तरुवर सुमनः परिमल सुरभित विश्वगणम्।

अविरत रतिपति रतियुत सुरवर युवती कृद्धनकम्।

क्रीडाबेद प्रशनः पटुतर सुरभवसरणियुतम्।

पुरतः पुरतः परितः परितः परिटारूढयुतम्। तत्तत्।

वायव्यां दिशि मृगवाहनारूढः ध्वजहस्तः वायुः सशक्तिपरिवारो दिग्देवताधिपतिसहितः वायव्यादि सोमान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत-पिशाचापस्मार-शाकिनी-ढाकिनी -वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां(धामं) रक्ष रक्ष अचल अचल आक्रम्याक्रम्य महावज्र-कवचाय हुं फट् स्वाहा।

ओं यं वायवे नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं आनौनियुद्भिश्शतिनीभिरद्धरम्। सहस्रिनीभि रुपयाहि यज्ञम्।

वायौ अस्मिन् हविषि मादयस्व। यूयम्पातस्स्वस्तिभिस्सदानः

इति मन्त्रेण नीराज्य। उत्तरदिग्भागे आधारादीन् अभ्यर्च्य।

कुबेरः

सुवर्णवर्णाय शिवप्रियाय
धनाधिनाथाय गदायुधाय।
उदग्दिगीशाय हराद्रिवासिने
नमोऽस्तु तस्मै नरवाहनाय॥

ओं कं कुबेराय नमः आगच्छ आगच्छ कुबेरं लोकपालकम् आवाहयामि।

आसनं---दीपं समर्पयामि। कुबेरस्य भद्रतालं। मोहनरागं। मण्डलनृत्तम्।

यक्ष गण रक्षण विचक्षण मुदारम्।

शिक्षित विपक्ष मति यक्ष परिवारम्।

त्र्यक्ष सख भिक्षु सुसुदृक्ष शुभवाचम्।

यक्ष पति यक्ष युग लक्ष्यमिह कुर्मः। तत्तत्।

उदीच्यान्दिशि नरवाहनारूढः पद्महस्तः कुबेरः सशक्तिपरिवारो दिग्देवताधिपतिसहितः उदीच्यादि ईशानान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत-पिशाचापस्मार-शाकिनी-ढाकिनी -वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां(धामं) रक्ष रक्ष अचल अचल आक्रम्याक्रम्य महावज्र-कवचाय हुं फट् स्वाहा।

ओं कं कुबेराय नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं राजाधिराजाय प्रसह्यसाहिने। नमो वयं वैश्रवणाय कुर्महे।

समेकामान् कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु।

कुबेराय वैश्रवणाय। महाराजायनमः इति मन्त्रेण नीराज्य।

ऐशान्यदिग्भागे आधारादीन् अभ्यर्च्य।

## ईशानः

वृषाधिरूढाय जटाय मौलिने
कपालबालेन्दु कलावतंसिने।
त्रिशूलिने कोणदिशाधिवासिने
सदा सुवासाय शिवाय ते नमः॥

ओं शं ईशानाय नमः आगच्छ आगच्छ ईशानं लोकपालकम् आवाहयामि।आसनं समर्पयामि----दीपं समर्पयामि। ईशानस्य डक्करी तालं। शङ्कराभरण रागं। वामजानूर्ध्वनृत्तं।

त्रिलोचनं त्रिशूलिनं जटाधरं नटाधिपम्।

कपर्धिनं विमर्दिनं प्रपञ्च मोहकारणम्।

पुरान्तकं जितान्तकं नतान्तरङ्गतोषकम्।

चिरन्तनं तपोधनैर्विचिन्त्यमान विग्रहम्।

उमापतिं नमामितं कपालिनंकृपालयम्।

भुजङ्गराज भूषणं कुरङ्ग राजपोषणम्।

थणाकुधिं धिणाकृधिं धिणेकुधिं धिनेकृधिम्।

दगद्धग द्धिगिद्धिगिच्छिवस्य तालमीदृशम्। तत्तत्।

ऐशान्यां दिशि वृषभवाहनारूढः शूलहस्तः रुद्रः सशक्तिपरिवारो दिग्देवताधिपतिसहितः ऐशान्यादि इन्द्रान्तं मण्डलं बन्धयतु। चोरारि-व्याघ्र-वराह-सर्प-यक्ष-राक्षस-भूत-प्रेत- पिशाचापस्मार-शाकिनी-ढाकिनी -वेताल-ब्रह्मराक्षसादि सर्वदुष्टग्रहान् बन्ध बन्ध मां(धामं) रक्ष रक्ष अचल अचल आक्रम्याऽक्रम्य महावज्र-कवचाय हुं फट् स्वाहा।

ओं शं ईशानाय नमः बलिं ददामि। इति प्रसादेन सोदकं बलिं दद्यात्।

ओं तमीशा॑नञ्जग॑तस्त॒स्थु ष॒स्पति॑म्। धि॒य॒ञ्जिन्वमव॑से हूमहे व॒यम्।

पू॒षानो॒यथा॒ वेद॑सा॒ मस॑द्वृधे। र॒क्षि॒ताषा॒युरद॑ब्ध स्स्व॒स्तये॑

इति मन्त्रेण नीराज्य। महा बलिपीठे पूर्ववत्

ओं सर्वेभ्यो श्रीमहाविष्णु पार्षदेभ्यो नमः बलिं ददामि इति समस्त वाद्य-घोषैस्सह सोदकं बलिं दत्वा। मुखमण्डपे बलिबेरम् अर्घ्यादिभिः अभ्यर्च्य। यथाभागं निवेद्य। नीराजयेत्॥

*************

श्रीः

अनुबन्धः -४

## उत्सवे उपयोग्य वेदमन्त्राः

### ब्रह्मसूक्तम्

ब्रह्म जज्ञानं प्रथमं पुरस्तात्। वि सीमत स्सुरुचो वेन आवः।

स बुध्निया उपमा अस्य विष्ठाः। सतश्च योनिमसतश्च विवः॥

पिता विराजामृषभो रयीणाम्। अन्तरिक्षं विश्वरूप आविवेश।

तमर्कैरभ्यर्चन्ति वथ्सम्। ब्रह्मसन्तं ब्रह्मणा वर्द्धयन्तः॥

ब्रह्म देवानजनयत्। ब्रह्म विश्वमिदं जगत्। ब्रह्मणः क्षत्र न्निर्मितम्।

ब्रह्म ब्राह्मण आत्मना॥ अन्तरस्मिन्निमे लोकाः। अन्तर्विश्वमिद ञ्जगत्।

ब्रह्मैव भूताना ञ्ज्येष्ठम् । तेन कोऽर्हति स्पर्द्धितुम्॥ ब्रह्मन्देवास्त्रयस्त्रिꣳशत्।

ब्रह्मन्निन्द्रप्रजापती। ब्रह्मन् ह विश्वा भूतानि। नावीवान्त स्समाहिता।

चतस्र आशाः प्रचरन्त्वग्नयः। इमं नो यज्ञन्नयतु प्रजानन्।

घृतं पिन्वन्नजरꣳ सुवीरम्। ब्रह्म समिद्भवत्याहुतीनाम्॥

### विष्णुसूक्तम्

विष्णोर्नुकं वीर्याणि प्रवोचꣳय्यः पार्थिवानि विममे रजाꣳसि यो अस्कभाय

दुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुणायो विष्णोरराटमसि विष्णोः पृष्ठमसि

विष्णो श्श्नप्त्रेस्थो विष्णोस्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा।

तदस्य प्रियमभिपाथो अश्याम्। नरोयत्र देवयवो मदन्ति। उरुक्रमस्य

सहि बन्धुरित्था। विष्णोः पदे परमे मद्ध्व उथ्सः। प्रतद्विष्णुस्तवतेवीर्याय।

मृगोनभीमः कुचरोगरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा। परोमात्रया तनुवावृधान। न ते महित्वमन्वश्ञुवन्ति। उभेतेविद्म रजसीपृथिव्या विष्णो देवत्वम्। परमस्य विथ्से। विचक्रमे पृथिवीमेष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। उरुक्षितिꣳसुजनिमाचकार। त्रिर्देवः पृथिवीमेष एताम्। विचक्रमे शतर्चसं महित्वा। प्र विष्णुरस्तु तवसस्तवीयान्। त्वेषꣳꣳह्यस्यस्थविरस्य नाम। अतो देवा अवन्तुनो यतोविष्णुर्विचक्रमे। पृथिव्यास्सप्त धामभिः। इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम्। समूढमस्य पाꣳसुरे। त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। ततोधर्माणि धारयन्। विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्य सखा। तद्विष्णोः परमम्पदꣳ सदापश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवाꣳसस्समिन्धते। विष्णोर्यत् परमं पदम्॥

**श्रीसूक्तम्**

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रांहिरण्मयीं लख्ष्मीञ्जातवेदोम आवह। तांम आवहजातवेदो लख्ष्मीमनपगामिनीम्।यस्यां हिरण्यं व्विन्देयङ्गामश्वं पुरुषानहम्। अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्। श्रियन्देवीमुपह्वयेश्रीर्मादेवीर्जुषताम्। कांसोस्मितां हिरण्यप्राकारामार्द्रा ञ्ज्वलन्तीन्तृप्ता न्तर्पयन्तीम्। पद्मेस्थितां पद्मवर्णान्तामिहोपह्वये श्रियम्। चन्द्रां प्रभासां य्यशसाज्वलन्तीं श्रियंल्लोके देवजुष्टामुदाराम्। तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतान्त्वांव्वृणे। आदित्यवर्णे तपसोऽधिजातो

वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसानुदन्तु मायान्त रायाश्च बाह्या अलक्ष्मीः। उपैतुमान्देवसखः कीर्तिश्चमणिनासह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिन्ददातुमे। क्षुत्पिपासामलाञ्ज्येष्ठा मलक्ष्मीन्नाशयाम्यहम्। अभूतिमसमृद्धिन्च सर्वां निर्णुदमे गृहात्। गन्धद्वारां दुराधर्षांनित्यपुष्टाङ्करीषिणीम्। ईश्वरीꣳसर्वभूताना न्तामिहोपह्वये श्रियम्। मनसःकाममाकूतिंव्वाचस्सत्यमशीमहि। पशूनां रूपमन्नस्य मयिश्रीश्श्रयतांय्यशः। कर्दमेन प्रजाभूता मयि संभवकर्दम। श्रियंव्वासय मे कुलेमातरंपद्ममालिनीम्। आपस्सृजन्तु स्निग्धानिचिक्लीतवसमे गृहे। निचदेवींमातरꣳꣳश्रियंव्वासय मे कुले। आर्द्रांय्यः करिणींय्यष्टिं पिङ्गलां पद्ममालिनीम्। चन्द्रांहिरण्मयींल्लक्ष्मी ञ्जातवेदो म आवह। आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयींल्लक्ष्मीञ्जातवेदो म आवह। तांम आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यंप्रभूतङ्गावो दास्योश्वान् विन्देयं पुरुषानहम्। ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मी प्रचोदयात्॥

## भूसूक्तम्

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा। उपस्थे ते देव्यदितेऽग्निमन्नाद मन्नाद्याया दधे। आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः। पितरञ्च प्रयन्थ्सुवः। त्रिꣳशद्धाम विराजति वाक्पतङ्गाय शिश्रिये। प्रत्यस्य वहद्द्युभिः। अस्य प्राणादपानत्यन्तश्चरतिरोचना। व्यक्ख्यन्महिषस्सुवः।

यत्त्वा क्रुद्धः परोवपमन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दी पयामसि। यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्। मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी। ब्रह्मवर्चसः पितृणां श्रोत्रञ्चक्षुर्मनः। देवी हिरण्यगर्भिणी देवी प्रसोदरी। रसने सत्यायने सीद। समुद्रवती सावित्री ह नो देवी मह्यकी। महोधरणी महोऽर्यतिस्थ शृङ्गेशृङ्गे यज्ञेयज्ञे विभीषणी। इन्द्रपत्नीव्यापिनी सुरसित इह। वायुपरी जलशयनी स्वयं न्धाराया सत्यन्धोपरिमेदिनी। सोपरिधत्तङ्गाय। विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम्। ओं धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात्॥

**स्वस्तिसूक्तम् (ऋग्वेदः)**

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः। स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावा पृथिवी सुचतुना। स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः। बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः। विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः। स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति। स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि। स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव। पुनर्ददताघ्नता जानता सं गमेमहि। स्वस्त्ययनं ताक्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम्। असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवा रुहेम। अंहोमुच

माङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्। प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नो अस्तु। स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

**घोषशान्तिः (शान्तिसूक्तम् - शान्तिमन्त्रः)**

शन्नो वात पवताम्मातरिश्वा शन्नस्तपतु सूर्यः। अहानि शंभवन्तु नश्शꣳ रात्रिः प्रतिधीयताम्। शमुषानो व्यच्छतु शमादित्य उदेतु नः। शिवा न श्शन्तमा भव सुमृड़ीका सरस्वति। मा ते व्योम सन्दृशि। इडायै वास्त्वसि वास्तुमद्वास्तुमन्तो भूयास्म मावास्तोश्छि थ्स्मह्यवास्तु स्सभूयायोऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मः। प्रतिष्ठाऽसि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाश्छि थ्स्मह्यप्रतिष्ठ स्सभूयाद्योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः। आवातवाहि भेषजंव्विवातवाहि यद्रपः। त्वꣳहि विश्वभेषजो देवानान्दूत ईयसे। द्वाविमौ वातौ वात आसिन्धोरापरावतः। दक्षं मे अन्य आवातु पराऽन्यो वातु यद्रपः। यद्दो वातते गृहेऽमृतस्य निधिर् हितः। ततो नो देहि जीवसे ततो नो धेहिभेषजम्। ततो नोमह आवह वात आवातु भेषजम्। शंभूर्मयोभूर्नो हृदे प्रण आयूꣳषि तारिषत्। इन्द्रस्य गृहोऽसि तन्त्वा प्रपद्ये सगुस्साश्वः। सहयन्मे अस्तितेन। भूःप्रपद्ये भुवःप्रपद्ये सुवः प्रपद्ये भूर्भुवस्सुवःप्रपद्ये वायुं प्रपद्येऽनार्तान्देवतां प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्मप्रपद्य ओं प्रपद्ये। अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च यया वातस्स्वस्त्या स्वस्ति मान्तया स्वस्त्या स्वस्ति मानसानि। प्राणापानौ

मृत्योर्मा पातं प्राणापानौ मामा हासिष्टं मयिमेधां मयिप्रजां मय्यग्निस्तेजो दधातु मयिमेधां मयिप्रजां मयीन्द्र इन्द्रियन्दधातु मयिमेधां मयिप्रजां मयि सूर्यो भ्राजोदधातु। द्युभिरक्तुभिः परिपातमस्मा नरिष्टेभिरश्विना सौभगेभिः। तन्नोमित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उतद्यौः। कयानश्चित्र आभुवदूती सदावृधस्सखा। कयाशचिष्ठया वृता। कस्त्वासत्यो मदानां मꣳहिष्ठो मथ्सदन्धसः। दृढाचिदारुजे वसु। अभी षुणस्सखीनामविता जरितॄणाम्। शतं भवास्यूतिभिः। वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः। अपध्वान्तमूर्णुहि पूर्द्धिचक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्। शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंय्योरभिस्रवन्तुनः। ईशाना वार्याणा क्षयन्तीश्चर् षणीनाम्। अपो याचामि भेषजम्। सुमित्रान आप ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मः। आपोहिष्ठा मयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे। योवश्शिवत मोरसस्तस्य भाजयतेहनः। उशतीरिव मातरः। तस्मा अरङ्गमामवो यस्यक्षयाय जिन्वथ। आपो जनयथाचनः। पृथिवी शान्ता साऽग्निना शान्ता सामेशान्ता शुचꣳशमयतु। अन्तरिक्षꣳशान्त न्तद्वायुना शान्तन्तन्मे शान्तꣳ शुचꣳशमयतु। द्यौश्शान्ता साऽदित्येन शान्ता सामे शान्ता शुचꣳशमयतु। पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्द्यौ श्शान्ति र्दिश श्शान्तिरवान्तरदिशाश्शान्तिरग्निश्शान्तिर्वायु श्शान्तिरादित्य श्शान्ति श्चन्द्रमा श्शान्तिर्नक्षत्राणि शान्तिरापश्शान्ति रोषधयश्शान्ति र्वनस्पतय श्शान्तिर्गौश्शान्ति रजाशान्तिरश्वश्शान्तिः पुरुषश्शान्तिर्ब्रह्म शान्ति

ब्राह्मण श्शान्ति शान्तिरेव शान्तिश्शान्तिर्मे अस्तु शान्तिः। तयाऽहꣳ शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदेच शान्तिङ्करोमि शान्तिर्मे अस्तु शान्तिः। एहश्रीश्च ह्रीश्च धृतिश्च तपोमेधा प्रतिष्ठा श्रद्धा सत्यन्धर्मश्चैतानि मोत्तिष्ठन्तमनूत्तिष्ठन्तु मामाꣳ श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यन्धर्मश्चैतानि मामाहासिषुः। उदायुषा स्वायुषो दोषधीनाꣳ रसनो त्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳअनु। तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदश्शत ञ्जीवेमशरदश्शत न्नन्दामशरद श्शतं मोदामशरदश्शतं भवाम शरदश्शतꣳ श्रृणवाम शरदश्शतं प्रब्रवाम शरदश्शतमजीतास्स्याम शरदश्शत ञ्ज्योक्क सूर्यन्दृशे। य उदगान् महतोऽर्णवाद्विभ्राजमान स्सरिरस्य मध्यात्समा वृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु। ब्रह्मणश्चोतन्यसि ब्रह्मण आणीस्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षन्दिव न्दाधार पृथिवीꣳ सदेवाय्यँदहं वेद तदहन्धारयाणि मामद्वेदोऽधि विस्रसत्। मेधामनीषे माविशताꣳ समीची भूतस्य भव्यस्यावरुध्यै सर्वमायुरयाणि सर्वमायुरयाणि। आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्द्धमानः। यदास्तोतृभ्यो महिगोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम। ब्रह्म प्रावादिष्म तन्नो माहासीत्। ओं शान्ति श्शान्ति श्शान्तिः॥

**अघमर्षणसूक्तम् (वैष्णवीय फाठः)**

हिरण्यश्रृङ्गं व्वरुणंप्रपद्ये तीर्थंमे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मेमनसावाचा कर्मणावा दुष्कृतङ्कृतम्। तन्न इन्द्रो

वरुणो बृहस्पतिस्सविताच पुनन्तु पुनः पुनः। सुमित्रान आप
ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टियञ्च वयन्द्विष्मः।
नमोऽग्नयेऽफ्सुमते नम इन्द्राय नमोवरुणाय नमोवारुण्यै नमोऽद्भ्यः।
यदपाङ्क्रूरंय्यदमेध्यंयदशान्तन्तदपगच्छतात्। अत्याशनादतीपानाद्यच्च
उग्रात् प्रतिग्रहात्। तन्मेवरुणोराजा पाणिनाह्यवमर्शतु। सोऽहमपापो
विरजो निर्मुक्तो मुक्तकल्बिषः। नाकस्यपृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम्।
इमंमे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमꣳसचाता परुष्णिया। असिक्निया
मरुद्वृधे वितस्तयाऽर्जीकीये श्रृणुह्या सुषोमया। ऋतञ्च सत्यञ्चाभीद्धा
त्तपसोऽध्यजायत। ततो रात्रिरजायत ततस्समुद्रो अर्णवः। समुद्रादर्णवा
दधि संव्वथ्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।
सूर्याचन्द्रमसौ धातायथापूर्वम कल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो
सुवः। यत्पृथिव्याꣳरजस्स्वमान्तरिक्षे विरोदसी। इमाꣳस्तदापो वरुणः
पुनात्वघमर्षणः। एष भूतस्य भव्ये भुवनस्य गोप्ता। एष पुण्यकृतां
लोकानेष मृत्योर्हिरण्मयम्। द्यावापृथिव्योर्हिरण्मयꣳसꣳश्रितꣳ सुवः।
सनस्सुवस्सꣳशिशाधि। आर्द्रञ्ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वलति
ब्रह्माहमस्मि। योऽहमस्मि ब्रह्माहमस्मि। अहमेवाहं माञ्जुहोमि स्वाहा।
अकार्यकार्यवकीर्णीस्तेनो भ्रूणहा गुरुतल्पगः। वरुणोऽपामघमर्षण
स्तस्मात् पापात् प्रमुच्यते। रजोभूमिस्त्वमाꣳरोदयस्व प्रवदन्ति धीराः।
पुनन्तु ऋषयः पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः।
आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा। वृषा पवित्रे

अधिसानो अव्ये बृहथ्सोमौ वावृधे सुवान इन्दुः॥

**स्वस्तिवाचनम्**

आशुश्शिशानो वृषभो नयुद्ध्मो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोऽनिमिष एकवीरश्शतꣳसेना अजयथ्साकमिन्द्रः। सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेणजयत तथ्सहद्ध्वंय्युधो नर इषुहस्तेन वृष्णा। स इषुहस्तैस्सनिषङ्गिभिर्वशी सꣳस्रष्टा सयुधइन्द्रोगणेन। सꣳसृष्टजिथ्सोमपा बाहुशर्द्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता। बृहस्पते परि दीय रथेन रक्षोहाऽमित्राꣳअपबाधमानः। प्रभञ्जन् थ्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्। गोत्रभिदङ्गोविदं व्वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा। इमꣳसजाता अनुवीरयद्ध्वमिन्द्रꣳसखायोऽनु सꣳरभद्ध्वम्। बलविज्ञाय स्स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः। अभिवीरो अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्। अभिगोत्राणि सहसा गाहमानोऽदायो वीरश्शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुद्ध्योऽस्माकꣳसेना अवतु प्रयुथ्सु। इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञःपुर एतुसोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रे। इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानाम्मरुताꣳशर्द्ध उग्रम्। महामनसां भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्थात्। अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकंय्या इषवस्ता जयन्तु। अस्माकंव्वीरा उत्तरे भवन्त्वस्मानु देवा अवताहवेषु। उद्धर्षय मघवन्नायुधान्यु थ्सत्त्वनां मामकानां महाꣳसि। उद्वृत्रहन् वाजिनांव्वाजिना

न्युद्रथानाञ्जयतामेतु घोषः। उपप्रेत जयता नरस्स्थिरावस्सन्तु बाहवः। इन्द्रो वश्शर्मयच्छत्त्वनाधृष्या यथाऽसथ। अवसृष्टा परापत शरव्ये ब्रह्मसंशिता। गच्छामित्रान् प्रविशमैषाङ्कञ्चनोच्छिषः। मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभि वस्ताम्। उरोर्वरीयो वरिवस्ते अस्तु जयन्तन्त्वामनुमदन्तु देवाः। यत्रबाणा स्संपतन्ति कुमाराविशिखा इव। इन्द्रोनस्तत्र वृत्रहा विश्वाहा शर्मयच्छतु॥

**वरुणसूक्तम्**

उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमश्श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितयेस्याम। अस्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि। यत्किञ्चेदं व्वरुणदैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मानस्तस्मा देनसो देवरीरिषः। कितवासो यद्रिरिपु र्नदीवि यद्वा घा सत्यमुतयन्नविद्म। सर्वाता विष्य शिथिरेव देवाथा तेस्यामवरुण प्रियासः। अवते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुरप्रचेतो राजन्नेनांसि शिश्रथः कृतानि। तत्त्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणे हबोध्युरुशंसमान आयुः प्रमोषीः॥

**आयुष्यसूक्तम् (घृतसूक्तम्)**

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी। ईशानो देवः स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन। विभ्राजमानः सरिरस्य

मध्याद् रोचमानो घर्मरुचिर्य आगात्। स मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत् तु देवः। ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तम्। सुवर्णरम्भ ग्रहमर्कमर्च्यं तमायुषे वर्द्धयामो घृतेन। श्रियं लक्ष्मीमौबलामम्बिकां गां षष्ठीञ्च यामिन्द्रसेनेत्युदाहुः। तां विद्यां ब्रह्मयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेन। दाक्षायण्यः सर्वयोन्यः सुयोन्यः सहस्रशो विश्वरूपा विरूपाः। ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषन्ताम्। दिव्यागणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान्। तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाः रीरिषो मोत वीरान्। एकः पुरस्ताद् य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति भुवनꣳसाम्पराये स नो हविर्घृतमिहायुषेऽत्तु देवः। वसून् रुद्रानादित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान् गन्धर्वाꣳश्च पितृꣳश्च विश्वान्। भृगून् सर्पाꣳश्चाङ्गिरसोऽथ सर्वान् घृतꣳ हुत्वा स्वायुष्या महयामशश्वत्। विष्णो त्वन्नो अन्तमश्शर्म यच्छ सहन्त्य। प्र ते धारा मधुश्चुत उत्सन्दुह्रते अक्षितम्। आभिर्गीर्भिर्यदतो न----ओं शान्ति श्शान्ति श्शान्तिः॥

**पुरुषसूक्तम् - उत्तरनारायणम्**

अद्भ्य स्संभूतः पृथिव्यै रसाच्च। विश्वकर्मणस्समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत् पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णन्तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते। तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति

वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वोयो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मञ्जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौव्यात्तम्। इष्टं मनिषाण। अमुम्मनिषाण। सर्वं मनिषाण॥

**शाकुनसूक्तम्**

अनुहवं परिहवं परीवादं परिक्षपम्। दुस्स्वप्नं दुरुदितं तद्विषद्भ्यो दिशाम्यहम्। अनुहूतं परिहूतश्शकुनेर्यदशाकुनम्। मृगस्य सृतमक्षणया तद्विषद्भ्यो दिशाम्यहम्। आरात्ते अग्निरस्त्वारात्परशुरस्तु ते। निवाते त्वाऽभि वर्षतु स्वस्तितेऽस्तु वनस्पते स्वस्तिमेऽस्तु वनस्पते। नम श्शाकृथ्सदे रुद्राय नमो रुद्राय शकृथ्सदे। गोष्ठमसि नमस्ते अस्तु मामा हिꣳसीस्सिगसि नसि वज्रो नमस्ते अस्तु मामा हिꣳसीः। उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शꣳससि। स्वस्तिनश्शकुने अस्तु प्रतिनस्सुमना भव॥

**वास्तुसूक्तम्**

वास्तोष्पते प्रतिजानीह्यस्मान् थ्स्वावेशो अनमीवो भवानः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्न एधि द्विपदे शञ्चतुष्पदे। वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या। आवः क्षेम उतयोगे वरन्नो यूयं पात स्वस्तिभिस्सदा नः। वास्तोष्पते प्रतरणो न एधि गोभिरश्वेभिरिन्दो।

अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रतिनो जुषस्व। अमीवहा

वास्तोष्पते विश्वा रूपाण्याविशन्। सखासुशेव एधि नः।

********************

श्रीः

अनुबन्धः -५

**लघु सप्तावरण पठन विधिः**

श्रीशैलेशदयापात्रं----विष्णुं सदाहं शरणं प्रपद्ये॥

सत्यं ज्ञानमनन्तं ब्रह्म – என்றும் आकाश शरीरं ब्रह्म – என்றும்,

नारायणपरं ब्रह्म तत्वन्नारायणः परः – என்றும் ப்ரஹ்மशब्द வாச்யராய்

वैकुण्ठे तु परेलोके श्रिया सार्धं जगत्पतिः।

आस्ते विष्णुरचिन्त्यात्मा भक्तैः भागवतैः सह॥ – என்கிறபடியே திவ்யாந்த புரத்திலே நாச்சிமாரோடே கூட

स एको ब्रह्मण आनन्दः – என்றும்,

अविकाराय शुद्धाय नित्याय परमात्मने – என்றும்,
உயர்வற உயர் நலம் உடையவன் யவனவன் – என்றும்

சொல்லுகிறபடியே आनन्द निर्भर ராய், निर्विकार ராய், त्रिविध परिच्छेद

ரஹிதராய், ज्ञानानन्द ஸ்வரூபராய், यद्भूतं यच्च भव्यम्।

उतामृतत्वस्येशानः – என்கிறபடியே மோக்ஷகாரணமான தேவரீர்

विश्वस्य भर्त्री जगतः प्रतिष्ठा – என்றும், नित्यै वैषा जगन्माता विष्णोः

श्रीरनपायिनी – என்றும், நீயும் திருமகளும் நின்றாயால் – என்றும்,
அகலகில்லேன் இறையுமென்று அலர்மேல்மங்கையுறை
மார்பா – என்றும் சொல்லுகிறபடியே

नित्यैயாய், जगत्कारणभूतैயாய், मच्छेषभूता सर्वेषाम् ईश्वरी वल्लभा मम - என்கிறபடியே एकोनसर्वशेषिणिயாய்,

अपरिच्छिन्न ज्ञानानन्द स्वरूपिणिயாய், सर्वदा सर्वப்ரகாரத்தாலும்

अविनाभूतवल्लभैயான பெரியபிராட்டியாரை உடையவரான தேவரீர்,

पृथिव्यप्सु प्रलीयते। आपस्तेजसि लीयन्ते। तेजो वायौ लीयते।

वायुराकाशे लीयते। आकाशम् अव्यक्ते लीयते। अव्यक्तम् अक्षरे लीयते।

अक्षरं तमसि लीयते। என்றும், तमः परे देव एकीभवति – என்றும்

एको ह वै नारायण आसीत्। न ब्रह्मा। न ईशानः।

नाग्निष्ठोमो नेमे द्यावापृथिवी न नक्षत्राणि सूर्यः - என்றும்,

एक एवाभवत्तत्र देवो नारायणः प्रभुः।

स जगत्सृष्टि-संहारैः विहर्तुमकरोन्मनः॥ - என்றும்,

स्वांशांश-कलया लक्ष्म्या स्वयंशक्त्या जगन्मयः।

स्वकालेऽनन्तशयने शयिष्ये प्रलयोदधौ॥ என்கிற காலவிபேஷத்திலே

சுரரறிவருநிலை விண்முதல் முழுவதும்,
வரன்முதலாயவை முழுதுண்டபரபரன் – என்றும்,
இந்த ப்ரபஞ்சமெல்லாம் தேவரீராலே ஸம்ஹரிக்கப்பட்டு ப்ரளயார்ணவ ஜலத்திலே பண்டோராலிலைப் பள்ளி கொண்ட தேவரீர்,

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः – என்றும், यो अस्याध्यक्षः परमेव्योमन् – என்றும், स्वसत्ताभासकं सत्वं – என்றும், अप्राकृतं सुरैर्वन्द्यम् अयुतार्कसमप्रभम् – என்றும்,

सभाप्रासाद संयुक्तं वनैश्चोपवनैर्युतम्।

वापी कूप तटाकैश्च वृक्षषण्डैस्समन्वितम्॥ – என்றும்,

நீந்தும் துயரில்லா வீடு – என்றும், நலமந்தமில்லதோர் நாடு – என்றும்,

स्वयं प्रकाशமாய், अनेकादित्य सन्निभமாய், असङ्कुचित ஞானர்களான நித்யஸூரிகளாலும் முக்தர்களாலும் ஸேவ்யமாய், காலக்ருத

பரிணாமரஹிதமாய் भगवदिच्छानुगुणபரிணதமான

गोपुर – दिव्यास्थानमण्डप – दिव्यकल्पतरु – शत सहस्र कोटि दिव्य रत्नस्त

म्भ – प्रासाद – नगर – वापी – कूप – तटाक – आरामोद्यान शोभित

श्रीवैकुण्ठाख्य दिव्यநகரத்திலே எழுந்தருளியிருக்கும் தேவரீர், புனஸ் ஸ்ருஷ்டி காலத்திலே

क्रीडामि केवलं ब्रह्मन् सृष्टि-संहार-पालनैः॥ என்றும்,

मम माया दुरत्यया॥ मन्मायामोहितं जगत्॥ – என்றும்,

கேவலம் अचित्तत्त्वमेव ஸாம்ராஜ்யம் பண்ணுகிற காலத்திலே தேவரீர்,

बहु स्यां प्रजायेयेतिஎன்கிற ஸங்கல்பத்தைப் பண்ணியருளி,

नारायणात् प्राणो जायते। मनस्सर्वैन्द्रियानि च।

खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी – என்றும்,

तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत् – என்றும், முன்னுலகங்களெல்லாம் படைத்த என் முகில்வண்ணன் – என்றும்

சொல்லுகிறபடியே सृष्ट्याधिकारिயான தேவரீர்

स प्रजापतिरेकः पुष्करपर्णे समभवत् – என்றும்,

हिरण्मयं पद्मगर्भं नाभेरण्डमजायत।

तदण्डं पञ्चभूतात्मभूतं -शुद्धमतर्कितम्॥

अण्डस्य वर्धमानस्य मध्ये पद्मं सितप्रभम्।

सहस्रदलपर्यन्तम् अन्तःकेसरमण्डितम्।

मध्ये कर्णिकयायुक्तम् अद्भुतं सृष्टिकारणम्।

स्रष्टारमसृजत्तस्मिन् पद्मनाभः चतुर्मुखम्॥ – என்றும், (पाद्मे)

உந்திமேல் நான்முகனைப் படைத்தான் – என்றும் சொல்லுகிறபடியே திருநாபிக்கமலத்திலே நின்றும் ப்ரஹ்மாவை உத்பந்நனாக்கி அந்த ப்ரஹ்மாவானவன்

पद्मे दिव्येऽर्क सङ्काशे नाभ्यामुत्पाद्यमामपि।

प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितम्॥

सोऽहं सन्न्यस्तभारोहि त्वामुपासे जगत्पतिम्॥

युगकोटि सहस्राणि विष्णुमाराध्य पद्मभूः।

पुनस्त्रैलोक्यधातृत्वं प्राप्तवान् इति शुश्रुम॥ – என்றும்,

திருவுருவு கிடந்தவாறும் கொப்பூழ்ச் செந்தாமரைமேல்
திசைமுகன் கருவுள் வீற்றிருந்து படைத்திட்ட கருமங்களும் – என்றும்
தேவரீருடைய திருநாபிக்கமலத்திலே உத்பன்னனாய் சிஷ்யனுமான

சதுர்முகனுக்கு अनेक कल्पकोटिसहस्र अनुष्ठितங்களான अश्वमेधादि

क्रतुக்களாலே ப்ரீதராய்

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै – என்றும்,

அன்னே இவரையறிவன் மறைநான்கும் முன்னே உரைத்த முனிவர்

– என்கிறபடியே அவனுடைய सुकृतविशेषानु ரூபமான

ப்ராஜாபத்யத்தையும் வேதங்களையும் ப்ரஸாதித்து, அத்தை அவன் இழந்துநிற்க,
வசையில் நான்மறைகெடுத்த அம்மலரயற்கருளி முன்பரிமுகமாய்,
இசைகொள் வேதநூல்பயந்தவனே – என்கிறபடியே வேதங்களையும்

மீட்டுக்கொடுத்து ப்ராஜாபத்யத்தை पुनः प्रतिष्ठित மாக்கியருளி

ब्रह्मणोऽभून् महाक्रोधः त्रैलोक्यदहनक्षमः।

भ्रुकुटी कुटिलात्तस्य ललाटात् क्रोधदीपितात्।

समुत्पन्नस्तदा रुद्रः युगान्ताग्निसमप्रभः॥ – என்றும், (पाद्मे)

रुद्रोऽसीति। यदरोदीत्तस्माद्रुद्रः –என்றும், नारायणाद्रुद्रो जायते –என்றும்

महादेवः सर्वमेधे महात्मा हुत्वा आत्मानं देवदेवो बभूव – என்றும்,

नामानि कुरु मे धातः स्थानानि च जगद्गुरो।

यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः।

ततस्त्वामभिधास्यन्ति नाम्ना रुद्र इति प्रजाः।

मन्युर्मनुर्महिनसोमहान् शिव ऋतध्वजः।

उग्ररेता भवः कालो वामदेवो धृतव्रतः॥ – என்றும்,

நான்முகனும் தான்முகமாய்ச் சங்கரனைத்தான் படைத்தான் –

என்கிறபடியே ப்ரஹ்மாவினுடைய क्रोधज னாய் ப்ரஹ்மாவினிடத்தில்

நின்றும் पापनिवृत्त्यर्थ மாகவும் प्रसिद्धமாகவும் रुद्रன் முதலான नामधेय

வரம்பெற்ற ருத்ரனை ப்ரஹ்மாவைக்கொண்டு உத்பன்னனாக்கி,

அவனாலே अनुष्ठित மான आत्मात्मीय ஸமர்பண ரூபமான

सर्वमेध மென்கிற மஹாக்ரதுவினாலே समाराध्यனாய்

पशुपतित्वத்தையும் संहारकर्तृत्वத்தையும் ப்ரஸாதித்து அருளினீர்.

பேசநின்ற சிவனுக்கும் பிரமன் தனக்கும் பிறர்க்கும் நாயகன் –

என்கிறபடியே ப்ரஹ்மா ருத்ரன் இருவர்களுக்கும் सृष्टि –संहार सामर्थ्य

ப்ரதரான தேவரீர், तस्मात् विराडजायत – என்றும்,

अप एव ससर्जादौ तासु वीर्यम् अपासृजत्।

तदण्डमभवद्धैमं सहस्रांशु-समप्रभम्॥ – என்றும்,

உடையானை ஒலிநீருலகங்கள் படைத்தானை – என்கிறபடியே அநந்தரம் ப்ரதமம் ஜலத்தை ஸ்ருஷ்டித்தருளி அதிலே ஒரு வீர்யத்தை விட அது ஒரு அண்டமாக பரிணமித்தது.

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः।

पुष्पदन्तस्सार्वभौमः सुप्रतीकश्च दिग्गजाः॥ – என்கிறபடியே ஐராவதாதி அஷ்டதிக்கஜங்களையும்,

अतलं वितलं चैव सुतलं च तलातलम्।

महद्रसातलं चैव पातालमिति च स्मृतम्॥

भूलोकश्च भुवर्लोकः स्वर्गलोको महस्तथा।

जनस्तपस्सत्यलोकः सप्तलोकाः प्रकीर्तिताः॥ -என்கிறபடியே

चतुर्दश भुवनங்களையும்,

लवणेक्षुरसौ पश्चात् मैरेयस्तदनन्तरम्।

सर्पिर्दधि पयस्त्वन्यत्ततः शुद्धोदकं परम्॥ – என்கிறபடியே

सप्त सागरங்களையும்,

जम्बू प्लक्ष कुश क्रौञ्चाः शाकद्वीपस्तथा परः।

शाल्मली पुष्करो नाम सप्तमश्चतुरानन॥ – என்கிறபடியே

सप्त द्वीपங்களையும்,

सह्यो महेन्द्रो मलयः शुक्तिमानृक्षनामवान्।

विन्ध्यश्च पारियात्रश्च सप्तैते कुल पर्वताः॥ – என்கிறபடியே ஸப்த பர்வதங்களையும்,

सुर नर तिर्यक् स्थावरम् – என்கிற चतुर्विध देहங்களையும்,

अण्डजं स्वेदजं चैव उद्भिज्जञ्च जरायुज மென்கிற ஸகல ஜீவன்களையும் ஸ்ருஷ்டித்து

एवं सृष्ट्वा जगत्सर्वं विश्वरूपधरो हरिः என்கிறபடியே விஶ்வ ஸ்ருஷ்டியைப் பண்ணியருளி क्षीराब्धिशायियாய் எழுந்தருளியிருக்கும் தேவரீர்,

मम प्राकाराः पञ्चेति प्राहुर्वेदान्तपारगाः।

परो व्यूहश्च विभवो नियन्ता सर्व देहिनाम्।

अर्चावतारश्च तथा दयालुः पुरुषाकृतिः।

इत्येवं पञ्चधा प्राहुर्मां वेदान्तविदो जनाः॥ – என்றும், (विष्वक्सेने)

செய்ய பரத்துவமாய்ச் சீரார் வியூகமாய்
துய்யவிபவமாய்த் தோன்றிவற்றுள், எய்துமவர்க்கு
இந்நிலத்தில் அர்ச்சாவதாரமெளிதென்றான்
பன்னுதமிழ்மாறன் பயின்று – என்கிறபடியே

பரம் – வ்யூஹம் – விபவம் – அந்தர்யாமி – அர்ச்சை என்கிற ஐந்துநிலைகளில் இருக்கும் – இதில்

**பரத்வமாவது**

स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद् विलक्षणम् – என்றும்,

दिगेषा कथिता ब्रह्मन् धन्यानां तत्र तिष्ठताम् – என்றும் (पाद्मे)

पश्यन्ति सूरयःशश्वत्तद्विष्णोः परमम्पदम् – என்றும்,
அயர்வறும் அமரர்கள் அதிபதி – என்றும் தேவரீர், யம நியமாதி

सिद्धालङ्कार ங்களாலே शुद्ध மான ஆத்மாக்களை உடையவர்களான பக்த ஜனங்களுக்கு அர்ச்சிராதி மார்க்கத்தாலே ப்ராப்யமான

பொருளாய் सामीप्यं सारूप्यं सायुज्यं என்கிற पदस्थितர்களுடைய

அநுபவ கைங்கர்யங்களுக்கு विषय भूत ராய், सर्वस्मात्பரராய்

பரவாஸுதேவராய், நித்ய ஸூரிகளாலே ஸேவிக்கப்பட்டு निरवधिक

तेजोरूपिயாய், ஸ்ரீ பூமி நீளா ஸமேதராய், शुद्धसत्वமயமான பரமபதத்திலே எழுந்தருளியிரா நிற்கிறது பரத்வம்.

<u>**வ்யூஹமாவது**</u>

चत्वारः क्रमशः सन्ति चतुर्भिः समधिष्ठिताः।

व्यूहैः क्रमेण वक्ष्येताननिरुद्धः परः स्मृतः।

प्रद्युम्नोऽनन्तरं तेषां सङ्कर्षण समाह्वयः।

वासुदेवस्ततः पश्चाद् व्यूहाख्यः कमलासन॥ – என்றும், (पाद्मे)
ஏகமூர்த்தி மூன்றுமூர்த்தி நாலுமூர்த்தி நன்மைசேர் – என்றும்,

பையரவினணைப் பாற்கடலுள் பள்ளிகொள்கின்ற பரமமூர்த்தி –

என்றும், ज्ञान – शक्ति – बलैश्वर्य – वीर्य – तेजस् என்கிற

ஷட்குணங்களையும் ப்ரகாபபிப்பித்துக்கொண்டு सर्वावतारकन्दமான
வ்யூஹ வாஸுதேவராய் எழுந்தருளியிரா நின்ற தேவரீர்

भगवन् शक्ति-तेजोऽनिरुद्धो बिभ्राणः पासि तत्त्वं गमयसि च तथा व्यूह्य

रङ्गाधिराज – என்கிறபடியே अनिरुद्धावதாரம் செய்தருளி शक्ति

तेजஸ்ஸுக்களாலே जगद्रक्षणத்தையும், तत्वज्ञानप्रदानத்தையும்,
செய்தருளி ஷாட்குண்ய பரிபூர்ணராய், வாசுதேவாதி
சதுர்மூர்த்திகளாலும், ப்ரஹ்மாதி அஷ்டமூர்த்திகளாலும் விபபவத்தை
ரக்ஷித்தருள்கிறது வ்யூஹம்.

<u>**விபவமாவது**</u>

अवतारेषु तत्काले पश्यन्तोऽपि जना भुवि।

अवजानन्ति मुनयो जानन्ति ज्ञानिनो रमे॥ – என்றும், (श्रीप्रश्ने)

अजायमानो बहुधा विजायते – என்றும்,
ஆதியஞ்சோதியுருவை அங்குவைத்து இங்குப்பிறந்தாய் – என்றும்

पुण्य पापफलरूपமாக போவதும் வருவதுமாய்த் திரிகிற
ஸம்ஸாரிகளைப் பார்த்து ஸம்ஸார விமுக்தராகும் படி கடாக்ஷித்தருளி,

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ - என்றும்,

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ - என்றும்,

ஸாதுக்களுடைய ரக்ஷணார்த்தமாகவும் துஷ்க்ருதர்களுடைய விநாಶார்த்தமாகவும் धर्मसंस्थापनार्थ மாகவும் யுகம் தோறும் ஸம்பவிக்கக்கடவோம் என்று அருளிச்செய்தபடியே பெருக்காறு போலே விபவாவதாரம் பண்ணுவதாய் திருவுள்ளம் பற்றி அருளினீர்.

मत्स्यः कूर्मो वराहश्च वासुदेवादजायत।

नृसिह्मो वामनो रामो जामदग्न्योऽप्यजायत।

सङ्कर्षणात्तथा जज्ञे प्रद्युम्नाद्राघवो बली।

अनिरुद्धादभूत्कृष्णः क्ल्कीति दश मूर्तयः॥ - என்றும், (पाद्मे)

மீனோடாமை கேழல் அரிகுறளாய் முன்னுமிராமனாய்த் தானாய் பின்னுமிராமனாய்த் தாமோதரனாய் கற்கியுமானான் தன்னை -

என்கிறபிரகாரம் மத்ஸ்யாதி தசாவதாரங்களாலும், पद्मनाभादि அவதாரங்களாலும் दुष्ट निग्रहादिகளாலே ஸ்ரீவைகுண்டலோகத்தை அடைய வாழ்வித்தருளினீர் இப்படி பற்பல அவதாரங்கள் செய்தருள்வது விபவம்.

**<u>அந்தர்யாமித்வமாவது</u>**

योगतत्त्वे न मुनयः सदा मां ध्यानगोचरम्।

पश्यन्ति देवि हृन्मध्ये तस्मान्मां हार्द उच्यते॥ - என்றும், (श्रीप्रश्ने)

यस्य आमात्मा शरीरं। यस्य पृथिवी शरीरं - என்றும்,

एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः - என்றும்,

शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः - என்றும்,

पद्मकोश प्रतीकाशं हृदयञ्चाप्यधोमुखं – என்றும்,

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठञ्च समाश्रितः – என்றும்,

ஓடிவந்தென் மனக்கடலில் வாழவல்ல மாய மணாள நம்பீ – என்றும்,
நேசத்தினால் நெஞ்சநாடு குடிகொண்டான் – என்றும்,
மாசற்றார் மனத்துளானை – என்றும்

भूगत ஜலம்போலே உள்ளத்தே உறைகின்றவராய்,

सकलजनहृदयान्तर्वर्तिயாய், प्रवृत्ति निवृत्यादि கள் செய்பவராய்,

விஶேஷித்து யோகிகள் ஸித்தர்கள் பகவத் ஜ்ஞானிகளுடையவும்
ஸகல ஸ்ரீவைஷ்ணவர்களுடைய ஹ்ருதயகமலத்திலே
எழுந்தருளியிருப்பது அந்தர்யாமித்வம்.

**<u>அர்ச்சாவதாரமாவது</u>**

अर्चावतारस्सर्वेषां बान्धवो भक्तवत्सलः। – என்றும்,

अर्च्यस्सर्व-सहिष्णुरर्चक-पराधीनाखिलात्मस्थितिः – என்றும்,

தமருகந்ததெவ்வுருவம் அவ்வுருவம்தானே
தமருகந்ததெப்பேர் மற்றப்பேர் – என்றும்,
சுவர்மிசைச்சார்த்தியும் வைத்தும் தொழுவர் – என்றும்,
ஸ்ரீ வைகுண்ட லோகத்திலே இன்துணைப் பதுமத்தலர்மகளும்,
நான்முகனும், அமரர்களும் புவியில்வாழ் ஜீவகோடிகளின் ஸம்ஸார
நிஸ்தரணத்துக்கு விரகுகாண மாட்டாமல் தேவரீரை ப்ரார்த்திக்க,
அப்போது

सर्वातिशायि षाड्गुण्यं संस्थितं मन्त्रबिम्बयोः।

मन्त्रे वाच्यात्मना नित्यं बिम्बेतु कृपया स्थितम्॥ – என்று

அருளிச்செய்தபடியே அஜ்ஞானிகளுடைய ரக்ஷணார்த்தமாக
ஸௌலப்யத்தின் எல்லை நிலமாக மந்த்ர மயமான பிம்பத்திலே
திவ்யஸாந்நித்யம் கொண்டு

जायतेसिद्धिरचिरात् स्थाने स्थापय तां च माम्।

ज्ञानं योगश्च यदिदं केवलं मुक्तिकारणं।

स्थापयित्वा तु मां स्थाने पुरुषः सर्वमश्नुते।

यो मां संस्थाप्य सदने ममाराधयति स्वयम्।

न तस्य केवलं सिद्धिः स्थानाभ्यर्हजुषामपि।

तस्मात्सर्वात्मना ब्रह्मन् स्थाने मां स्थापयेत्पुमान्॥ (पाद्मे) என்று

அருளிச்செய்தபடியே ஸ்தலங்கள்தோறும் दिव्यमङ्गलविग्र மாய் எழுந்தருளி ஞானிகளும், அஜ்ஞாநிகளும், பக்தர்களும், பகவரும், பாமரரும் கண்ணாரக்கண்டுகொள்ளும்படியாகவும், தாளடைந்தோர்தங்கட்டுத் தானே வழித்துணையாக அர்ச்சாவதாரம் செய்தருளினீர். இப்படிப்பட்ட அர்ச்சாவதாரத்திலே தன்னுடைய

प्रतिष्ठादि க்ரியைகளையும், ब्रह्मोत्सवादि உத்ஸவங்களையும் செய்விக்கும்படியான

अनन्तो गरुडश्चैव विष्वक्सेनः कपालभृत्।

ब्रह्मा इत्येव पञ्चैते श्रृण्वन्ति पृथगीरितम्॥

अनन्तः प्रथमे रात्रौ गरुडश्च द्वितीयके।

तृतीयरात्रौ सेनेशः चतुर्थे वेधसा श्रुतम्॥

रुद्रःपञ्चमरात्रौ च श्रुत्वा शास्त्रं पृथक् पृथक्। – என்கிறபடியே (विहगेन्द्रे) பரமபதத்திலே அநந்த –கருட –விஷ்வக்ஸேந –ப்ரஹ்ம –ருத்ராதிகளுக்கும், प्रपञ्च த்தின் उज्जीवनार्थமாக नरனாகவும்,

नारायणனாகவும், பூவுலகில் அவதரித்து நரனுக்கும், பஞ்சாயுத அம்ஶபூதர்களாக தோதாத்ரி ஶிகராதிகளில் அவதரித்த ஶாண்டில்யாதி ஐந்து மஹரிஷிகளுக்கும், மற்றுமுள்ள அநேக க்ஷேத்ர –ஶிகர –ஆரண்யாதிகளிலும் தானே தோன்றி

तत्परव्यूह विभव स्वभावादि निरूपणम्।

पाञ्चरात्राह्वयं तन्त्रं मोक्षैक फल लक्षणम्॥ – என்றும் சொல்லுகிறபடியே மயர்வேதும் வாராமல் மானிடரை வாழ்விக்கும் திவ்யமான ஶ்ரீபாஞ்சராத்ர ஶாஸ்த்ரத்தை உபதேஶித்தருளினீர்.

இப்படி அந்த பகவத் ஶாஸ்த்ர பூர்வகமாக திவ்யதேஶங்களிலேயும் பற்பல ஸ்தலங்களிலேயும் அர்ச்சிக்கபடா நிற்கிற தேவரீர், திவ்யமங்கள விக்ரஹ விஶிஷ்டநாய் அடிக்கீழ் அமர்ந்து புகுந்து அடியீர் வாழ்மினென் என்று அருள் கொடுக்கும் பிரானாய் இந்த---------ஸ்தலத்திலே நித்ய ஸாந்நித்யம் செய்தருளி, தேஶாந்தரகதனான புத்ரன் பக்கல் பித்ரு ஹ்ருதயம் கிடக்குமாப்போலே ஸம்ஸாரிகளாய் பாமரராய் கிடக்கும் ஜீவாத்மாக்களை கடாக்ஷித்து தன்னுடைய ஸௌந்தர்யாதிகளாலே வஶப்படுத்தலாமென்று பார்த்தருளி

आराधनमिदं ब्रह्मन् मोक्षकामैरनुष्ठितम्।

पश्वादिफलकामैस्तु दुरनुष्ठानमद्भुतम्।

तोषणं मम कल्याणमनुष्ठितममानुषम्।

सवस्सांसारिकं दुःखमुत्तरन्ति तदम्बुधिम्।

यष्टार इति विद्वांसो निर्ब्रुवन्त्युत्सवाह्वयम्॥ – (पाद्मे) என்றும்

அருளிச்செய்தபடியே ஆனந்தத்தை பிறப்பித்து உஜ்ஜீவிப்போமென்று திருநாள் கண்டருளத்திருவுள்ளம் பற்றி ஶ்ரீபாஞ்சராத்ர விதியினாலே

----மாஸ----தின மஹோத்ஸவம் ஸங்கல்பித்து அதிலே----।

மங்கலம்.

********************